नं: २-घ

महाभाष्यप्रदीपः

पत्राणि १६८ तः ३३८

नं० २-घ

महाभाष्यप्रदीपः

पत्राणि १६-६तः ३३८=

=१६-६=१६९ पत्राणि

नं० २-घ

महाभाष्यप्रदीपः

पत्राणि १६-६तः ३३८=

=१६-६ पत्राणि

किमर्थमिति। वक्ष्यमाणोऽभिप्रायः। शब्देनार्थगतेरिति। कात्यायनवचनप्रामाण्यादस्त्रियामिति प्रतिषेधस्यानित्यत्वाद्विभाषा गुणेऽस्त्रियामिति पं
चमी॥ इह योग्यतालक्षणेन संबंधेन शब्दोऽर्थं प्रत्याययति। व्याकरणेऽपि प्रभुरूपसंदेवतान्तं च उदंचो भरता इत्यर्थे एव गृह्यन्ते। अग्नेर्ढगित्यादौ
तु अर्थस्य प्रत्ययेन पौर्वापर्यासंभवात्साहचर्यात्तस्वस्य न तद्वाचिनः संप्रत्ययः स्यादिति सूत्रारंभः। संज्ञाप्रतिषेधार्थमिति। संज्ञासंप्रत्यय उच्य

लोके२

किमर्थं पुनरिदमुच्यते। शब्देनार्थगतेरर्थस्यासंभवात्तद्वाचिनः संज्ञाप्रतिषेधार्थं स्वरूपवचनं। शब्देनोच्चारितेना
र्थो गम्यते गामानय दध्यशानेति अर्थ आनीयतेऽर्थश्च भुज्यते। अर्थस्यासंभवादिह व्याकरणेऽर्थे कार्यस्या
संभवः। अग्नेर्ढगिति न शक्यतेऽङ्गारादिभ्यः परो ढक् कर्तुं शब्देनार्थगतेरसंभवात् यावंतः तद्वाचिनः शब्दास्ता
वद्भ्यः सर्वेभ्य उत्पत्तिः प्राप्नोति। इष्यते च तस्मादेव स्यादिति तच्चांतरेण यत्नं न सिध्यतीति तद्वाचिनः संज्ञाप्रतिषे
धार्थं स्वरूपवचनं एवमर्थमिदमुच्यते। न वा शब्दपूर्वको ह्यर्थे संप्रत्ययस्तस्मादर्थनिवृत्तिः। न वा एतत्प्रयोजनम
स्ति। किं कारणम्॥ ×र्थेकार्यस्या×२ ॥ ॥

ते। नवेति। शब्द उपलब्धोऽर्थं प्रत्याययति न सत्तामात्रेण। चक्षुरादीनि तु सत्तामात्रेण विषयमवगमयंति। अर्थस्य च शास्त्रीये कार्ये क्वचिदयोग्य
त्वात्प्रत्यासत्त्या स एवोपात्तः शब्दो गृह्यते न तु विप्रकृष्टः शब्दांतरमिति भावः॥ ॥श्री॥ ॥

भा० कै० प्र०
१६७
169

शब्दपूर्वक इति। अर्थेस्योपलब्धुः शब्दपूर्वक इत्यर्थः॥ अशब्दसंज्ञेति। न्यायात्स्वरूपग्रहणे सिद्धे शब्दसंज्ञायां स्वरूपग्रहणं माभूदित्येवमर्थमिदमित्यर्थः॥ अन्य
योपसर्गे घोः किः इति किमन्तयोर्घुधात्वोः शब्दार्थयोस्सान्नतुदाधाम्वः॥ कुमारीघट इत्यत्र घरूपकल्पेति ह्रस्वः प्रसज्येत। ईहल्घोरित्यत्र तु घुशब्दस्याकारान्तत्वाभावा

शब्दपूर्वको ह्यर्थे संप्रत्ययः॥ आतश्च शब्दपूर्वकः। योपि ह्यसावाहूयते नाम्नानामच यं दानेन नोपलब्धं। तदा पृच्छति किं
भ[illegible]वाना हेति। शब्दपूर्वकश्चार्थस्य संप्रत्ययः॥ इह च व्याकरणे शब्दे कार्यस्य संभवः अर्थे ऽसंभवः॥ तस्मादर्थनिवृत्तिः
तस्मादर्थनिवृत्तिर्भविष्यति। इदं तर्हि प्रयोजनं। अशब्दसंज्ञेति वक्ष्यामीति। इह माभूत्। दाधाघ्वदाप्। तरप्तमपौ घ
इति। शब्दसंज्ञा [illegible] प्रतिषेधानर्थक्यं वचनप्रामाण्यात्। शब्दसंज्ञायां प्रतिषेधोनर्थकः। शब्दसंज्ञायां स्वरूपवि
धिः कस्मान्न भवति। वचनप्रामाण्यात्। शब्दसंज्ञावचनसामर्थ्यात्। ननु च वचनप्रामाण्यात्संज्ञिनां संप्रत्ययः स्यात्स्व
॥रूपग्रहणाच्च संज्ञायाः एतदपि नास्ति प्रयोजनं॥ ॥ ॥

दाघामेव ग्रहणं सिध्यति वचनप्रामाण्यादिति। प्रदेशेषु संज्ञिप्रत्यायनार्थं संज्ञाकरणमिति सामर्थ्यात्स्वरूपग्रहणं न भविष्यति। ननु चेति। उभयगतिरि
ह शास्त्रे दृष्टा संख्याकर्मकरणादिष्विति इहापि स्वरूपस्य संज्ञिनश्च प्रदेशेषु ग्रहणं स्यात्॥ ॥श्री॥ ॥७॥ ॥

एम०
१६६

नहीति॥ षड्भ्यो लुगित्यादावुच्चारितेति भावः। कातन्त्रेहीति। त्वत्र इकारान्तः शब्द उच्चारितो जश्शसोश्च षकारान्ता ह्युक्तत्वेयः षस्मामिति च नुट्। असिद्धमिति। इकारान्तः श्रूय
माणोपि इत्यस्यासिद्धत्वात् षकारान्तस्य स्वरूपस्य ग्राहकोऽभविष्यतीत्यर्थः॥ मंत्राद्यर्थमिति। मंत्रादयः शब्दस्य संज्ञाः। शास्त्रसामर्थ्यादिति। देवसुम्नयोरित्याहोक्यजादी

आचार्यप्रवृत्तिर्ज्ञापयति। शब्दसंज्ञायां न स्वरूपविधिर्भवतीति। यदयं षणान्ता षडिति षकारान्तायाः संख्यायाः षट्संज्ञां शा
स्ति। इतरथा हि वचनसामर्थ्यात् नकारान्तायाः संख्यायाः संप्रत्ययः स्यात् स्वरूपग्रहणाच्च षकारान्तायाः। नैतदस्ति ज्ञापके।
न हि षकारान्ता संज्ञा कातन्त्रे हि इकारान्ता। असिद्धं जश्त्वं तस्यासिद्धत्वात् षकारान्ता। मंत्राद्यर्थं नहीदं वक्तव्यं। मंत्रे ऋचि यजुषी
ति च य उच्यते तन्मंत्रशब्दे ऋक्शब्दे यजुःशब्दे च माभूत्। मंत्राद्यर्थमिति चेच्छास्त्रसामर्थ्यादर्थगतेः सिद्धं। मंत्राद्यर्थमिति
चेत्। किं कारणं। शास्त्रसामर्थ्यादर्थगतिर्भविष्यति। मंत्रे ऋचि यजुषीति य उच्यते। मंत्रशब्दे ऋक्शब्दे यजुःशब्दे च तस्य का
र्यस्य संभवो नास्तीति कृत्वा मंत्रादिसहचरितो योऽर्थस्तस्य गतिर्भविष्यति साहचर्यात्॥ ॥ ॥

नां निमित्तत्वेनोपादाना यजुषि ऋचि मंत्र इति स्वरूपं न ग्रहीष्यते। न हि तथाविधं लक्ष्यमस्तीति भावः। मंत्रादिसहचरित इति। साहचर्यं च शब्दानुविद्धस्यैवार्थे
॥ स्यावगमात्॥ ॥श्री॥ ॥श्री॥ ॥

भा० कै० प्र०
१७०
170

सित्तद्विशेषाणामिति। वृक्षस्य मृगस्य च स्वरूपस्यैव निर्देशः कर्तव्यः। एतदपि न्यायसिद्धं। तुल्यजातीयानां द्वन्द्व एकवद्भवतीति वक्ष्यते। पर्यायाणां च युगपत्प्रयोगाभावात्सामान्यशब्दे न सर्वविशेषणा माक्षेपाद्वृक्षमिति। द्वन्द्वाभावाद्विशेषाणामेव प्लक्षन्यग्रोधादीनां ग्रहणं सिद्धं। पित्पर्यायवचनस्य चेति। चशब्दात्स्वरूपस्य विशेषाणां च ग्रहणं। इदं वाच
न्यविशेषाणां चाभावात्सामान्य

सित्तद्विशेषाणां च वृक्षाद्यर्थं। सिन्निर्देशः कर्तव्यः। ततो वक्तव्यं तद्विशेषाणां ग्रहणं भवतीति। किं प्रयोजनं। वृक्षाद्यर्थं। विभाषा वृक्षमृगेति। प्लक्षन्यग्रोधं प्लक्षन्यग्रोधाः। पित्पर्यायवचनस्य च स्वाद्यर्थं। पिन्निर्देशः कर्तव्यः। ततो वक्तव्यं पर्यायवचनस्य च विशेषाणां ग्रहणं भवति स्वस्य च रूपस्येति। किं प्रयोजनं। स्वाद्यर्थं। स्वे पुषः। स्वपोषं पुष्यति। रैपोषं धनपोषं विद्यापोषं गोपोषं। जित्पर्यायवचनस्यैव राजाद्यर्थं। जिन्निर्देशः कर्तव्यः ततो वक्तव्यं पर्यायवचनस्यैव ग्रहणं भवति। किं प्रयोजनं। राजाद्यर्थं। सभा राजामनुष्यपूर्वा। इनसभं ईश्वरसभं तस्यैव न भवति। राजसभा। तद्विशेषाणां च न भवति। पुष्यमित्रसभा। चन्द्रगुप्तसभा। झित्तस्य च तद्विशेषाणां मत्स्याद्यर्थं। झिन्निर्देशः कर्तव्यस्ततो वक्तव्यं तस्य च ग्रहणं भवति तद्विशेषाणां चेति। किं प्रयो

निकमेव। जित्पर्याये ति। इदं न्यायसिद्धमित्याह। इनः राजेति पर्युदास आश्रीयते तेन राजशब्दसदृशानां तत्पर्यायाणामेव ग्रहणं सिध्यति। झित्तस्येति।
॥ इदं वाचनिकमेव ॥ ॥ श्री ॥ ॥ ५ ॥ ॥

राम०
१७०

मत्स्यार्थमिति। मृगपक्षिणोस्तु पिन्निर्देशात्सकृल्लाभार्थं कर्त्तव्यः। असैकस्येति। इयमिष्टिरेव॥ अणुदित्स॥ अप्रत्यय इति किमर्थमिति। किं यस्य
प्रत्ययसंज्ञा विहिता तस्य प्रतिषेधः उतयः प्रतीयते विधीयते इति यौगिकं तस्यापीति प्रश्नः॥ इत इति। विशेषविहितत्वात्सदाद्यत्वं बाधित्वा त्रिमात्र आदेशः
प्रत्यय

मत्स्यार्थं। पक्षिमत्स्यमृगान्हंति। मात्सिकः। तद्विशेषाणां शाफरिकः शाकुलिकः पर्यायवचनानां न भवति अजिह्मान्हंति।
असैकस्य पर्यायवचनस्येष्यते। मीनान्हंति मैनिकः। स्वंरूपं शब्दस्याशब्दसंज्ञा॥ अणुदित्सवर्णस्य चाप्रत्ययः॥ ॥अप्र
त्यय इति किमर्थं। सनाशंसभिक्ष उः। आशंसः प्रतिके। अस्तत्वमिदमुच्यते अप्रत्यय इति। अप्रत्ययादेशादि क्लिन्नित इवत्वं प्र
त्यय उदाहृत आदेशो इदम इश्। इतः इहादिति। लविता लवितुं। क्लिति। बभूवमिति। हे अनड्वन् इति तः परिहारः। आचार्यप्र
वृत्तिर्ज्ञापयति न दिताम् सवर्णानां ग्रहणं भवतीति। यदयं ग्रहो लिटि दीर्घत्वं शास्ति। नैतदस्ति ज्ञापकं। नियमार्थमेतत्स्या
त्। ग्रहः अलिटि दीर्घ एवेति॥ ॥ ॥

भावा

प्राप्नोति। बभूवेति। अनुनासिकः प्राप्नोति। अनड्वन्निति। आममपि प्रसज्येत प्राप्नोति। यदयमिति। ग्रहेरेव दीर्घो नान्येभ्य इति नियमार्थादिति भावः। नियमार्थमि
ति। ग्रहे दीर्घ एव न ह्रस्व इत्येवमर्थं स्यादित्यर्थः॥ ॥श्री॥

×ताद्दीर्घाणांग्रहणं नतत्राष्टनआविभक्ताविलत्राकारेऽत्राहकोमानदित्सर्थः। यथैवह्रस्वं एर×२

वृत्तो वेति॥ ननु च ववरीरथेति ऌटिदीर्घो मा भूदित्येवमर्थमेतत्स्यादिति कथं ज्ञापकं। एवं तर्हि वृत इलश्चाप्युलिटीत्यनुवृत्तेनाद्बिटि दीर्घे निषेधादन्यत्रोभयत्रास्मि न्निडेवाग्रहणं ज्ञापकमीटइटाग्रहणाभावस्य। प्रत्यये भूयानिति। साधारणानां साधारणाञ्चेत्यर्थः। प्रत्यय इत्यन्वर्थसंज्ञा हि तायेनार्थं प्रतियंतिसप्रत्य योनचदीर्घप्लुतयोरर्थस्याभिधानमस्ति। ह्रस्वा इति। प्रतीयंते श्रूयंते उच्चार्यंते॰ गादिचोदनास्वित्यर्थः। दीर्घा इति। ह्रस्वेभ्यो दीर्घै रण्ॡ तादाकारोरपरत्वादि कार्यं प्रतिपद्यते तथाप्याहकस्त्वमपि प्रतिपद्येते इति भावः। कथं पुनरप्रत्ययइत्यस्याप्रत्याप्यमानइत्यर्थः। उच्यत भाविनएप्योदेतेः कर्मण्यभिधानात्। यत्रा

यत्र हि वृत्तो वेति विभाषां शास्ति। सर्वेषामेव परिहारो भाव्यमानेन सवर्णानां ग्रहणं नेत्येवं भविष्यति। प्रत्यये भूयान्परिहारः॥ अन भिधानात्प्रत्ययः सवर्णान्न ग्रहीष्यति। यानहि प्रत्ययः सवर्णान्न गृह्णीयान्नैतेरर्थस्याभिधानं स्यात्। अनभिधानान्न भविष्य ति। इदं तर्हि प्रयोजनं। इह केचित्प्रतीयंते केचित्प्रत्याप्यन्ते ह्रस्वाः प्रतीयंते दीर्घाः प्रत्याप्यंते। यावद्ब्रूयात्प्रत्याप्यमानेन सवर्णानां ग्रहणं नेति तावदप्रत्यय इति॥ किं पुनर्दीर्घः सवर्णग्रहणे न गृह्णीयात्। ह्रस्वं। यत्नाधिक्यान्न भविष्यति। प्लुतं तर्हि गृह्णीयात्।

ल्वि ह्वि = नि हि प्लु प्लु ॥ हि

धिक्यादिति। ननु च ह्रस्वोच्चारणेऽर्धमात्रिकस्य मात्रिक एव स्यादिति दीर्घोच्चारणमुभयार्थं स्यात्। एतत्तु न निरूपितं स्यात्पर एवात्र परिहारोऽभिधास्यते। अनणत्वादि ति। अत्र हि सूत्रे प्रत्याहारसन्निविष्टा एव गृह्यंते तत्स्वात्मनि क्रियाविरोधात् अनिष्पादादग्रहणकशास्त्रांतराभावाच्च। अत्र सूत्रे॰ कारादिभिराकारादीनां ग्रहणा संभवोऽन्येषु तु प्रदेशेषु अनेन सूत्रेणा॰ कारादिभिराकारादयोगृह्यमाणा अणादिकार्यं लभंते॥ ॥ ॥

मायमानेनेति। प्रतीयते विधीयते इति यौगिकस्यात्र प्रत्ययस्य ग्रहणमिति भावः। किमर्थं पुनरिति। आकृतिनिर्देशात्सिद्धमिति प्रश्नः। अणसवर्णस्येति। उरिदृग्रह
णस्याविचारयिष्यमाणत्वादेवमुक्तं। व्यक्तिनिर्देशे कालादिभिन्नस्य ग्रहणं न प्राप्नोतीति भावः। प्रत्याहारग्रहण इति। अकोचीति यत्र संज्ञया प्रत्यायनमिकारादी

एवं तर्हि सिद्धे सति यदप्रत्यय इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः भवत्येषा परिभाषा भाव्यमानेन सवर्णानां ग्रहणं नेति। किमर्थं पु
नरिदमुच्यते। अणसवर्णस्येति स्वरानुनासिक्य[illegible] कालभेदात्। अणसवर्णस्येत्युच्यते स्वरभेदादानुनासिक्यभेदात्कालभेदाच्चाण
सवर्णान्न गृह्णीयात् इष्यते च ग्रहणं स्यादिति। तच्चान्तरेणायत्नेन सिध्यतीत्येवमर्थमिदमुच्यते। अस्ति प्रयोजनमेतत्। किं तर्हीति।
तत्र प्रत्याहारग्रहणे सवर्णाग्रहणमनुपदेशात्। तत्र प्रत्याहारग्रहणे सवर्णानां ग्रहणं न प्राप्नोति। अकः सवर्णे दीर्घ इति। किं कार
णं। अनुपदेशात्। यथाजातीयकानां संज्ञा कृता तथाजातीयकानां संप्रत्यायिका स्यात्। ह्रस्वानां च क्रियते। ह्रस्वानामेव संप्रत्या
यिका स्यात्तदीर्घाणां न स्यात्। ननु च ह्रस्वाः प्रतीयमाना दीर्घान्संप्रत्याययिष्यन्ति॥ ॥ ॥

नां तत्र तैरन्येषां ग्रहणं न स्यात्। यत्र स्वरूपेणोच्चार्यन्ते अस्य च्वौ यस्येति चेति तत्रैव तेषां ग्राहकत्वं स्यात्। अनुपदेशादिति। अनुच्चारणादित्यर्थः। न हि प्रत्याहा
रे दीर्घा उच्चारिताः यतो अणादिचोदनाभिर्गृह्येरन्। अथवा अकोचीत्यादावनुच्चारितास्त्वकारादयो दीर्घाणां प्रत्यायकाः न स्युरित्यर्थः। ननु चेति। उच्चार्यमाणैरेव प्र
त्यायकैर्भवितव्यमिति नास्ति। सन्निहितास्तु प्रत्यायकाः। तच्च सन्निधानं यथायोगमस्त्येवेत्यर्थः॥ ॥ ॥

उच्चार्यमाणोऽति। प्रतीयमानो हि मध्यानं सत्कृत्य मध्यप्रसाधनेन गमाद्युतं देवगच्छेदित्यर्थः। आहृस्यावचनमिति। प्रतीयमानशब्देनान्यस्य प्रसाधनमित्य-
र्थः। ऋ गि लु क्ले इति। यद्यपि प्रकरणे वर्णादिषु शिष्टं तन्निवेशापि ऋकृशब्देन ऋकृप्रत्यापत्तेन तथापि स्वास्थार्थेन प्रसाधयतीत्यर्थः। एवं तर्हीति। अइउण्
इति प्रत्याहारे। कारादिभिराकारादीनां ग्रहणं तेषामप्यगादिसंज्ञाभिग्रहणं भविष्यतीति भावः। उपदेश इति। प्रसाधनमित्यर्थः। करिष्यत इति। व्याख्या

ह्रस्वसंप्रत्ययादिति चेदुच्चार्यमाणसंप्रसाधकत्वाच्छब्दस्यावचनं। ह्रस्वसंप्रत्ययादिति चेदुच्चार्यमाणः शब्दः प्रसाधको भवति
न संप्रतीयमानः। तद्यथा ऋ गि लु क्ले संपाठमात्रं गम्यते नास्यार्थो गम्यते। एवं तर्हि वर्णपाठ एवोपदेशः करिष्यते। वर्णपाठ उपदे क्रमर
श इति चेदवरकालत्वात्परिभाषाया अनुपदेशः। वर्णपाठक्रम उपदेश इति चेदवरकालत्वात्परिभाषाया अनुपदेशः। किं परास्ता
त्रिपत इतोऽवरकालानेसाहा। सर्वेषावरकाले वा। वर्णानामुपदेशस्तावत् उपदेशोत्तरकाला इत्संज्ञा इत्संज्ञोत्तरकाल आदिरं
त्येन सहेति प्रत्याहारः प्रत्याहारोत्तरकाला सवर्णसंज्ञा सवर्णसंज्ञोत्तरकालमणुदित्सवर्णस्य चाप्रत्यय इति। सैषा उपदेशोत्तर
काला वर्णानामुपसंज्ञा निमित्तत्वाय कल्पयिष्यत इत्येतन्न। तस्मादुपदेशः कर्तव्यः॥ ॥ ॥

स्वतो अवरकालत्वादिति। निष्पन्ने श्वंगेषु न यात्मचात्मच्चाविसादृ हैस वर्णानां ग्रहणं नांगेषु नापि स्वात्मनि अनिष्पन्नत्वादिति भावः। सर्वेषेति। आर्थक्रमे
णापि। न शब्दक्रमेणैवेत्यर्थः। वर्णानामुपसंज्ञाविति। अइउण् इत्येयमेव वर्णानाकारादीनुसादयेदित्येतन्नास्ति। तस्मादिति। प्रत्याहारस्य वृद्धौ घेलुना अपि

तत्रानुवृत्तीति। व्यक्तिपक्षेऽसत्यपि सूत्रारंभेऽवांतरभेदसंभवाद्ग्रहणं न सिध्यतीत्यर्थः। वचनादिति। अणसदृशोऽणिति ग्रहीष्यत इत्यर्थः। अनंतरोक्तमुभयं यत्र नास्ति
अकोचीत्यादौ। अत्र ह्यनुबंधेन चिह्नेन प्रत्याहारस्य एव निर्दिष्ट इत्येतत्तमुच्चारणं चास्ति तत्राकार उच्चारितः आदिरंत्येन सहेते इति मध्यपतितानां स्वरूपस्य च ग्राह
कोऽस्माच्च वचनात्सवर्णानामपीत्यर्थः। एवं व्यक्तिपक्षे सूत्रारंभे सत्यपि नास्तीष्टसिद्धिः। आकृतिपक्षे तु सूत्रेन कर्तव्यमित्याह। सवर्णा इति। प्रत्याहारेऽनुवृत्तिनि

तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनणत्वात्। तत्रानुवृत्तिनिर्देशे सवर्णानां ग्रहणं न प्राप्नोति। अस्य चोद्यस्येति च। किं कारणं।
अनणत्वात्। न ह्येते अणः। ये अनुवृत्तिनिर्देशे केन हि ये अक्षरसमाम्नाय उपदिश्यंते। एवं तर्ह्यनणत्वादनुवृत्तौ न अनुपदे
शाच्च प्रत्याहारे न उच्यते चेदमणः सवर्णान्न गृह्णातीति। वचनाद्भविष्यति। वचनाद्यत्र तन्नास्ति। नेदं वचनाल्लभ्यं। अस्ति ह्यन्यदे
तस्य वचने प्रयोजनं किं। य एते प्रत्याहाराणां आदितो वर्णाः तैः सवर्णानां ग्रहणं यथा स्यात्। एवं तर्हि सवर्णाग्रहणमपरिभा
ष्यमाकृतिग्रहणात्। सवर्णाग्रहणमपरिभाष्यं। कुतः। आकृतिग्रहणात्। अवर्णाकृतिरुपदिष्टा सा सर्वमवर्णकुलं ग्रहीष्य
ति तथेवर्णाकृतिः तथोवर्णाकृतिः। ननु चान्या आकृतिरकारस्य अन्याकारस्य च। अनन्यत्वाच्च। अनन्याकृतिरकारस्याकारस्य

देशे च सर्वत्र जातिरुपदिश्यते नांतरीयकं तु व्यक्त्युच्चारणं। अत्वं ह्रस्वदीर्घप्लुतेषु विद्यते। यथा गोत्वं कृशे गोपिंडे स्थूले चेति भावः। ननु चान्येति। श्रुतिभे
दादेदं मन्यमानस्य प्रश्नः। अनन्यत्वाच्चेति। सत्यपि श्रुतिभेदे एकाकृतियोगोऽस्त्येव। यथा कृशे स्थूले च गोपिंडे गोत्वयोगः ॥×श्लोकसं×२ ॥ ॥

भा०कै० प्र० १७३ 173

योऽहीति। अभेदस्यापि प्रत्यभिज्ञानात्सद्भाव इत्यर्थः। यस्त्विति। अत्रापि यदा प्राणी नहन्तव्य इति प्राणित्वेनाश्रयणं तदा अभेद एव। गवाश्वरूपाश्रयणे तु भेद इति भावः। अथ नञ् आविभक्तावित्यत्र तु यत्नाधिक्याद्दीर्घे व्यक्तिसमवेतं सामान्यं गृह्यते। यथा शुक्लवयाः प्रत्युत्थेय इति विशिष्टव्यक्तिस्थब्राह्मणत्वमाश्रीयते। अपर आहेति। व्यक्तिरेव शब्दार्थः जातिस्तु शब्दार्थोऽपि अभेदस्य सम्यहेतुरस्तीति सर्वव्यक्तीनामभेदेनाश्र

ब्राह्मणः २

योऽप्यनेकान्तेन भेदः नासावन्यत्वं करोति। तद्यथा नयोर्गोश्वगोश्वभेदः सोऽन्यत्वं करोति। यस्तु खलु गोश्वाश्वस्य च भेदः सोऽन्यत्वं करोति। अपर आह। सवर्णोऽणग्रहणमपरिभाष्यमाकृतिग्रहणादनन्यत्वं। सवर्णोऽणग्रहणमपरिभाष्यमाकृतिग्रहणादनन्यत्वं भविष्यति। अनन्याकृतिरकारस्याकारस्य च। अनेकान्तो ह्यनन्यत्वकरः।

गोश्वः

यो ह्यनेकान्तेन भेदो नासावन्यत्वं करोति। तद्यथा नयोर्गोश्वभेदः सोऽन्यत्वं करोति। यस्त्व खलु गोश्वाश्वस्य च भेदः सोऽन्यत्वं करोति। तद्दीर्घह्लग्रहणेषु। एवं च कृत्वा ह्लग्रहणेषु सिद्धं भवति। ऋलॄ ऋलि। अ वाचा अवाते अवात्ता। यत्रैतन्नास्ति अणसवर्णाननुगृह्णातीति। अनेकान्तो ह्यनन्यत्वकर इत्युक्तार्थे॥ ॥

यणादेकव्यक्तिनिर्देशेऽपि ग्रहणं सर्वव्यक्तीनां सिध्यतीति सत्यर्थः। अत्र पक्षे आकृतिग्रहणमाकृतेरेकाकारमत्सत्य निमित्तत्वेन प्रतिपत्तिरुच्यते। तद्वचेति। यथा आकृतिग्रहणाद्रणस्य कार्यं सिध्यति तथा हल्ष्वपि आकृतिग्रहणादेव सिध्यति। व्यक्तिपक्षे त्वेकैव तकारव्यक्तिर्हल्ष्वपरे

॥ शमासादयेत् पूर्वापरावेस्वाभामिति लोपो न स्यात् अबुद्धे सारा वेवतु स्यात्। धातुमत्सयावयव

राम० १७३

द्रुतेति। हल्ग्रहणोद्धेवेद मुच्यते यत्रैतन्नास्वराणां सवर्णान् गृह्णातीति। अपरस्तु न्वक्ति निर्देशोऽपि ग्रहणकशास्त्रेणास्मादेव वृत्तिभिन्न
स्य ग्रहणं। वृत्तिपृथक्त्वमिति। ह्रस्वदीर्घादिभमाणत्क्षणापि वृत्ति र्नभेदिकास्यादिति खड्गाभिरिसत्त्रे सप्रसज्येतेति भावः। क्रियते
इति। अवश्यकर्त्तव्यतां दर्शयति। अक्रियपक्षे एवं सवर्णान् गृह्णातिप्रसंगः। स्वरूपसाख्याने त्वाकृतिग्रहणात्। उदिद्ग्रहणं कर्त्तव्य
मेवा न हि वर्ग्याणामेकाकृतियोगोस्ति। स्थिते तु सत्ये कुहेत्स्तु रिसादे भाव्यमानस्योदित्सामर्थ्यादप्रसय इति निषेधो नावतरती

द्रुतविलंबितयोश्चानुपदेशात्। द्रुतविलंबितयोश्चानुपदेशान्मन्यामहे आकृतिग्रहणात्सिद्धमिति। यद्यपे
क्षया चिद्वृत्तौ वर्णानुपदिश्य सर्वत्र कृतीभवति। अस्तिप्रयोजनमेतत्। किं तर्हीति। वृत्तिपृथक्त्वं तु नोपप
द्यते। वृत्तेः पृथक्त्वं नोपपद्यते। तस्मात्तत्र तपरनिर्देशात्सिद्धं। तस्मात्तत्र तपरनिर्देशः कर्त्तव्यः। न कर्त्तव्यः
क्रियते एतन्नाम सर्वत्र तोभिसपेक्षितेति। अणुदित्सवर्णस्य चाप्रत्ययः॥ । ॥

सर्णस्वेवायं निषेधः। प्रत्याख्यानपक्षे भाव्यमानेषु यथाश्रुतं रूपमुत्पद्यत इति आकृतिग्रहणेऽपि भिन्नकालानां ग्रहणं न भवति।
यथा पशुना यजेत पशुमालभेत सुत्तिवा कपोतान् संख्या विवक्ष्यते। उदात्तादिस्य स्वभेदकाइत्युक्तं। अनुवादे तु नान्तरीयकत्वादेकस्य त्वनु
च्चारणेऽपि सकलव्यक्तिग्रहणं। यथा ग्रहं संमार्ष्टीति सर्वेषां ग्रहाणां प्राजापत्यानव ग्रहाइत्यादिष्पोस्तानानां संमार्जनं॥ ॥

तेर

भा०कै०प्र०
१७४
175

तपरस्तत्कालस्य॥ ॥ अयुक्त इति। न्यायेनासंबद्ध इत्यर्थः। न्यायशब्दस्याप्रयोगस्तु प्रसिद्धत्वान्न कृतः। कदाचित्तु प्रसिद्धार्थस्याप्रयोगो
दृश्यते न्यायेनायुक्तमिति। धात्वर्थेनाऽर्थे तस्य तु प्रयोगाभावः। नहि भवति जीवति प्राणानिति। तदित्यनेनेति। स कालोऽस्येति काल
सामानाधिकरण्येन तच्छब्दस्योपादानात्। तदित्ययं च वर्ण इति। परामृष्ट इत्यर्थः। तपरशब्दवाच्यस्यार्थस्य तच्छब्देन परामर्शात्। वर्णस्ये
ति। वर्णवाचिनस्तच्छब्दस्येत्यर्थः। कालेनेति। कालवाचिनेत्यर्थः। कालो हि प्रसिद्धपरिमाणा क्रिया अप्रसिद्धपरिमाणस्य क्रियान्तरस्य
परिच्छेदिका। यथा दिवसमधीत इति दिवसशब्देनोदयादिरस्तमयान्त आदित्यगतिप्रबन्ध उच्यते। स चाध्ययनस्य परिच्छेदकत्वात्कालः

तपरस्तत्कालस्य॥ अयुक्तोऽयं निर्देशः॥ तदित्यनेन न कालः प्रतिनिर्दिश्यते। तदित्ययं च वर्णः॥ तत्रायुक्तं वर्णस्य
कालेन सह सामानाधिकरण्यं। कथं तर्हि निर्देशः कर्तव्यः। तत्कालकालस्येति। स तर्हि तथा निर्देशः कर्तव्यः। न कर्त
व्यः। उत्तरपदलोपोऽत्र द्रष्टव्यः। तद्यथा। उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः। खरमुखः। एवं तत्कालकालस्तत्का
×तत्कालकालस्येति। किमिदं तत्कालकालस्येति। तस्य कालस्तत्कालस्तत्कालः कालोऽस्य सोऽयं तत्कालकालः ×२ लस्तत्का

वर्णस्तत्क्रियात्मको न भवति तस्य काल इति। यैवं कृ वर्णस्य परिच्छेदिका क्रिया निमेषादिः सैवयस्य परस्य स तत्कालकालः। उष्ट्रमुख इति। गम्यमाना
र्थत्वाद्द्वितीयमुखशब्दाप्रयोगः। उष्ट्रमुखमस्योष्ट्रमुखः। न च प्राणीप्राण्यन्तरस्य मुखमिति सामर्थ्यात्सादृश्यप्रतीतिः। समग्रेणाचोष्ट्रेण मु
ख[illegible]स्य सादृश्याभावादुष्ट्रशब्दोऽवयवे वर्तते। मुखेन वेच मुखस्य सादृश्यं प्रसिद्धमिति सामर्थ्यादुष्ट्रमुखमिव मुखमस्येत्यर्थोऽवगम्य
ते। एवमिहापि वर्णः कालो न भवतीति सामर्थ्यात्तदीया क्रिया क्रियान्तरपरिच्छिन्नाऽसती क्रियान्तरपरिच्छेदिकेति वर्ण एव परिच्छेदक उच्यते॥ ॥

राम०
१७४

अथवेति। वर्णसहचरितायां क्रियायां तच्छब्दो वर्त्तते सकालो यस्येति तद्वर्णसमवेता क्रियापरिच्छेदिका यस्येत्यर्थः। यथाश्मादि द्रव्यं द्रव्यान्तरपरिच्छिन्नं स्वर्णादीनां परिच्छेदकं तद्वत्क्रियापीत्यर्थः। दीर्घग्रहणमिति। भेदका उदात्तादय इति भावः। तत्र वृद्धिरादैजिति सूत्रमाकारस्य वृद्धिसंज्ञेष्यते। एकस्येव तु दीर्घस्य स्यात्। तपरकरणं त्वैजर्थमेव स्यात्। ह्रस्वग्रहणमिति। अतो भिस ऐसिति सकारग्रहणे पूर्वसूत्रेणादीर्घप्लुतयोर्ग्रहणं प्राप्नोति। इदं

अथवा साहचर्यात्तच्छब्दोऽत्र भविष्यति। कालसहचरितो वर्णोऽपि काल एव। किं पुनरिदं नियमार्थमाहोस्वित्प्रापकं। कथं च नियमार्थं स्यात्कथं वा प्रापकं। यद्यत्राणग्रहणमनुवर्त्तते ततो नियमार्थं। अथ निवृत्तं ततः प्रापकं। कश्चात्र विशेषः। तपरस्तत्कालस्य नियमार्थमिति चेद्दीर्घग्रहणे स्वरभिन्नानामग्रहणं। तपरस्तत्कालस्य नियमार्थमिति चेद्दीर्घग्रहणे स्वरभिन्नानामग्रहणं न प्राप्नोति। केषां। उदात्तानुदात्तस्वरितानुनासिकानां। अस्तु तर्हि प्रापकं। प्रापकमिति चेद्ध्रस्वग्रहणे दीर्घप्लुतप्रतिषेधः। प्रापकमिति चेद्ध्रस्वग्रहणे दीर्घप्लुतयोस्तु प्रतिषेधो वक्तव्यः। विप्रतिषेधात्सिद्धं। अणः सवर्णान्गृह्णातीत्येतदस्तु तपरस्तत्कालस्येति वा। तपरस्तत्कालस्येत्येतद्भवति विप्रतिषेधेन। अणः सवर्णान्गृह्णातीत्यस्यावकाशः। ह्रस्वा अतपरा अणः॥१०

हि सूत्रमनण्सु ग्रहणे चरितार्थं विप्रतिषेधादिति। विरोधो ह्यत्र विद्यते। यदि पूर्वसूत्रेणाकारः सवर्णानां ग्राहकस्तदाष्टादशानां ग्रहणप्रसंगः। अनेन तु षण्णां। तत्र परत्वादनेन परेण सवर्णानां तत्कालानां स्वरूपस्य च ग्राहकः। न च त इति तकारोच्चारणसामर्थ्यादनेनैव ग्रहणं भविष्यति किं विप्रतिषेधाश्रयणेन। नैतदस्ति। मुखसुखार्थस्यापि तकारस्य दर्शनात् ऋत इद्धातोरित्यादौ यथा॥ ॥ ॥

यद्येवमिति। यद्ययं योगस्तत्कालान् प्रतिपादयन्भिन्नकालान्निवर्त्तयतीत्यर्थः। त्रिमात्राधिक इति। द्रुतं श्लोकमुच्चं चोच्चारयति वक्तरि नाडिकायाः यस्मान्नव
पानीयपलानि स्रवन्ति तस्मा एव मध्यमायां वृत्तौ द्वादशपलानि स्रवन्ति। नवानां त्रिभागस्त्रीणि पलानि तदधिकानि नव द्वादश संपद्यन्ते। विलम्बितायां वृत्तौ षो

तपरस्तत्कालस्येत्यस्यावकाशः दीर्घोत्तपरः। ह्रस्वेषु तपरेषूभयं प्राप्नोति। तपरस्तत्कालस्येत्येतद्भवति विप्रतिषेधेन। यद्येवं द्रुता
यां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कालभेदात्। द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कर्त्तव्यं। तथा
मध्यमायां द्रुतविलम्बितयोः। तथा विलम्बितायां द्रुतमध्यमयोः। किं पुनः कारणं न सिध्यति। कालभेदात्। ये हि द्रुतायां वर्णा
स्त्रिभागाधिकाः ते मध्यमायां वर्णास्त्रिभागाधिकास्ते विलम्बितायां। सिद्धं त्ववस्थिता वर्णा वक्तुश्चिराचिरवचनाद्वृत्तयो विशि
ष्यन्ते। सिद्धमेतत्। कथं। अवस्थिता वर्णाः द्रुतमध्यमविलम्बितासु। किं कृतस्तर्हि विशेषः। वक्तुश्चिराचिरवचनाद्वृत्तयो विशि
ष्यन्ते। वक्ता कश्चिदाशुभिधायी भवति आशु वर्णानभिधत्ते कश्चिच्चिरेण कश्चिच्चिरतरेण। तद्यथा। तमेवाध्वानं कश्चिदाशु
गच्छति। कश्चिच्चिरेण कश्चिच्चिरतरेण। रथिक आशु गच्छति आश्विकश्चिरेण पदातिश्चिरतरेण॥ ॥

डशपलानि स्रवन्ति। सिद्धं त्विति। सर्वासु वृत्तिषु न वर्णानामुपचयापचयौ यथा गन्त्रृणां मालस्यादिभेदाद्गतिभेदेऽपि न मार्गभेद इत्यर्थः॥ ॥

विषम इति। वर्णाः प्रयत्नजन्याः तद्भेदे हि वृत्तिभेदाद्द्रुतकालाः एव। अवस्थातु अवस्थित एव न गतः क्रियाजन्यः। एवं तर्हीति। यस्मिन् स्फोटे ऽन विवक्षितः। सच नि
त्यः। एतच्चुचये नोच्चारितेन त्वत्र परस्पराशायां विचारितमिति नित्य एव बोद्धव्यं। शब्दगुण इति। शब्दस्य गुण उपकारको व्यञ्जकत्वेनेत्यर्थः। तद्यथा। घटः पुनः पुनर्दृश्य
मानोऽपि न भेदमवलम्बते तथा विलम्बितायां वृत्तावकार एव पुनः पुनरुपलभ्यत इति वृत्तिभेदेपि वर्णस्य भेदो न गृह्यते इति सर्वेषु वृत्तिषु तत्कालत्वं। ह्रस्वदीर्घप्लु
तास्तु स्वत एव भिन्नाः भिन्नैर्ध्वनिभिर्व्यज्यन्त इति तेषां कालभेदः। भेर्याघात इति। भेरीमाहन्तीति भेर्याघातः। उपलब्धिसामान्ये दृष्टान्तः। यथा प्रयत्नव

विषमउपन्यासः। अधिकरणमत्राध्वा व्रजति क्रियायाः। तत्रायुक्तं यदधिकरणस्य वृद्धिह्रासौ स्यातां। एवं तर्हि स्फोटः शब्दः। ध्वनिः
शब्दगुणः। कथं भेर्याघातवत्। तद्यथा भेर्याघातः भेरीमाहत्य कश्चिद्विंशति पदानि गच्छति कश्चित्त्रिंशत् कश्चिच्चत्वारिंशत्। स्फोटस्तावा
नेव भवति। ध्वनिकृता वृद्धिः। ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते। अल्पो महांश्च केषांचिदुभयं तत्स्वभावतः॥ तपरस्त
त्कालस्य॥ ॥ ॥

शाउसन्तो भेरीशब्दः कश्चिदल्पकालमुपलभ्यते कश्चिच्चिरं कश्चिच्चिरतरं च। एवं वृत्तिषूपलब्धीनां कालभेदो विषय स्यत्व भेद एव। स्फोटस्तावानेवेति। दा
र्ष्टान्तिकोपन्यासः। ध्वनिः स्फोटश्चेति। व्यञ्जको व्यङ्ग्यश्चेत्यर्थः। शब्दानां व्यङ्ग्यानां संबन्धी व्यञ्जकत्वेन यो ध्वनिः स एव महानल्पश्चोपलक्ष्यते। व्यङ्ग्यस्तु भिन्न
कालएवेत्यर्थः। उभयमिति। व्यङ्ग्यो व्यञ्जकश्च प्रमाणेन स्वभावतः स्वरूपेणासिद्धावित्यर्थः। केषांचिदिति। व्यक्तानामुभयं गृह्यते। अव्यक्तानां तु ध्वनिरेव॥ ०॥

आदिरंत्येन॥ ॥असंप्रत्यय इति। अप्रतिपत्तिरित्यर्थः। संबंधिशब्दैर्वेति। संज्ञयैवाक्षिप्तः संज्ञीत्यर्थः। आद्यंतौ च मध्यापेक्षाविति मध्यगानामेव संज्ञित्वं।
स्वरूपमित्यनुवर्त्तनात् स्वरूपस्य च। सहग्रहणाच्चाद्यंतौ समुदितौ संज्ञेति। एको यणचीति समुदायादेव विभक्त्युत्पत्तिर्नादिमात्रात्। स्वरूपं त्वादेरेव गम्यते नांत्य

आदिरंत्येन सहेता॥ आदिरंत्येन सहेतेत्यसंप्रत्ययः संज्ञिनो निर्देशात्। आदिरंत्येन सहेतेति असंप्रत्ययः। किं कारणं। संज्ञिनं अनिर्देशात्। नहि संज्ञिनो निर्दिश्यंते। सिद्धं त्वादिरिता सह तन्मध्यस्येति वचनात् सिद्धमेतत्। कथं आदिरंत्येन सहेता गृह्यमाणः स्वस्य च रूपस्य ग्राहकः तन्मध्यानां चेति वक्तव्यं। संबंधिशब्दैर्वा तुल्यं। संबंधिशब्दैर्वा तुल्यमेतत्। कथं तद्यथा। संबंधिशब्दाः मातरि वर्तितव्यं पितरि शुश्रूषितव्यमिति। न चोच्यते स्वस्यां मातरि स्वस्मिन् पितरीति संबंधाच्च गम्यते। या यस्य माता यो यस्य पितेति। एवमिहापि आदिः अंत्य इति संबंधिशब्दावेतौ। तत्र संबंधादेतद्गंतव्यं यं प्रति य आदिः अंत्य इति च भवति तस्य ग्रहणं भवति स्वस्य च रूपस्येति। आदिरंत्येन सहेता॥ ॥ ॥

त्यस्य तस्य अप्राधान्यादिति दृष्टव्येति केवल एवायकार आदेशः प्रवर्त्तते न तु णकारसहितः॥ ॥श्री॥ ॥७॥ ॥

येनविधिः॥ ॥इह कस्मादिति शङ्कानुशासनप्रस्तावात् शास्त्ररूपमिकाविशेष्यत इत्यस्मिन्तदन्तप्रसंगः येनेकाल इति। तत्र स्वचयनजयनादिष्वयनमिति प्रा
प्नोति। प्रकरणादिवशाच्चाक्षादिष्विवार्थविशेषावगतिः स्यात्। निर्दिश्यमानस्यादेशा इत्यत्रतान्त्रितपरिहारान्तरविवक्षया। यदिचैवमिति। आद्गुण इत्यादौ
अपत्यादिसवर्णोग्रहणाचार्यते। अचीति चाजादिस्तेन खट्वेन्द्र इत्यादावर्णान्तस्य समुदायस्याजादेशो गुणप्रसंगाद्द्विरूपप्रसंगः। षष्ठी निर्दिश्यमानत्वनिर्दि
श्यमानस्येसपिनास्ति। स्योन इति। सिवेर्बाहुलकादौणादिके नप्रत्यये गुणोवलोप ऊठिति कार्यत्रयप्रसंगः। तत्रापवादत्वाद् ऊठ्वलोपौ बाध्येते। गुणस्त्वे

येनविधिस्तदन्तस्य। इह कस्मान्न भवति इको यणचि दध्यत्र मध्वत्र। अस्तु। अलोन्त्यस्य विधयो भवन्ती संसस्य भविष्यति। नैवं श
क्यं। येऽनेकाल आदेशास्ते सुदोषः स्यात् एचोयवायाव इति। नैष दोषः। यथैव प्रकृतिस्तदन्तविधिर्भवति एवमादेशतो भविष्य
ति। तत्रैजन्तस्यायादयः तान्न्यादेशा भविष्यन्ति। यदिचैवं क्वचिद्द्वैरूप्यं तत्र च दोषः स्यात्। अपि चोतरङ्गबहिरङ्गे न प्रक्लृप्येयातां। तत्र

॥ को दोषः स्योनः स्योना॥ ॥ ॥

पस्त्वेन्द्र४ श्लोर
नम्र२

तरंगत्वाद्बाध्यते। गुणो ह्यंगसंबंधिनीमित्तलक्षणं तद्वीमुपधामाद्यां तु केचाश्रयति। ऊठ्तु वकारान्तमंगमनुनासिकादिं च प्रत्ययमित्यपेक्षत्वादन्तरंगः
तत्रकृते गुणस्य प्राप्नोति यणादेशस्य। तत्र वर्णमात्रापेक्षत्वाद्यणादेशो न्तरंगः प्रवर्त्तते। नानाश्रयत्वाच्च वार्णादांगं बलीय इत्येतन्नास्ति। यत्रैकाश्रये वार्णांगे
यथाकार इति घन्नाश्रयेयणो वृद्धौ तत्रैवास्य प्रवृत्तिः। यदि चेर् इको यणचीत्यत्र तदन्तादिविधीस्यातां तदा यणादेशस्यांतरंगत्वाभावाल्लरत्वादुगुणः स्यात्॥१०॥

अंतरंगलक्षणस्येति। असतितदंततदादिविधित्वेयोंतरंगस्तस्येत्यर्थः। एवं बहिरंगलक्षणो गुण इति व्याख्येयं। अल्विधिश्चेति। अलोंत्यस्ये
त्यत्रापितदंतविधिसद्भावादंत्यालं तस्य समुदायस्य कार्येण भवितव्यमिति द्योः पंथा इत्यत्रालोंत्यस्यादेशो न प्राप्नोतीत्यर्थः [illegible]
[illegible] तत्र कदाचित्स्थितिस्त्यस्याकारः स्यात्कदाचित्स्थित्रित्यस्य अनेकाल्शित्सर्वस्येत्येतत्तु सर्वस्यैवेति नियमार्थं स्यात्। प्रकृत इति। प्रस्तु
ते। प्रस्तावस्वक्वचित्साक्षात्तदंतविधिभाजो निर्देशात्। यथा ईदूदेद्द्विवचनं प्रगृह्यमित्यत्र द्विवचनस्य। क्वचिदधिकारात्। यथा एरजित्यत्र धातोः।

अंतरंगलक्षणस्य यणादेशस्य बहिरंगलक्षणो गुणो बाधकः स्यादिति। अनेन शब्दमाश्रित्य यणादेशः। न शब्दमाश्रित्य गु
णः। अल्विधिश्च न प्रकृत्येतद्द्योः पंथाः स इति। तस्मात्प्रकृते तदंतविधिरिति वक्तव्यं। न वक्तव्यं। येनेति करण एषा तृतीया।
अन्येन चान्यस्य विधिर्भवति। तद्यथा देवदत्तस्य समांशेनांशेन वैरोदनेन च यज्ञदत्तः प्रतिविधत्ते। तथा संग्रामं हस्त्यश्व
रथपदातिभिरिति। एवमिहाप्युच्चार्यमाणो यस्तं विधत्ते अकारेण प्रातिपदिकस्य इत्वं विधत्ते॥ ॥ ॥

क्वचिदाक्षेपात्। यथा इको झलित्यत्र सनो धातोः करण एवेति। विधिशब्दः कर्मसाधनो येन करणेन कार्यं विधीयते स शब्दस्तदंतस्य संज्ञेत्यर्थः।
तेन विशेषणेन विशेष्यस्य तदंतविधिर्भवति नान्यथा। इको यणचीत्यादौ च विशेष्यस्यासन्निधानात्तदंतविधेरभावः। हस्त्यश्वरथपदातिभिरि
ति। बहुप्रकृतित्वाभावादेकवद्भावाभावः॥ ॥श्री॥ ॥७॥ ॥

ग्रहणोपाधीनामिति। गृह्यते उच्चार्यत इति ग्रहणं। तस्य ये उपाधयः इष्यंते ते तदंतस्य संज्ञिनः प्राप्नुवंति। संज्ञा हि संज्ञि प्रत्यायने विशेषणमावमापन्ना कथमात्मनो विशेषणसंबंधमनुभवेत्। संकीर्णमिति। ओष्ठ्यः पूर्वो यस्माद् ऋकारांतात् इत्युक्तमिति तत्र चार्थः स्यात्। अपि च सूत्रार्थे धात्ववयवत्व मो

येन विधिस्तदंतस्येति चेद् ग्रहणोपाधीनां तदंतोपाधित्वप्रसंगः। येन विधिस्तदंतस्येति चेद् ग्रहणोपाधीनां तदंतोपाधितात्प्रसंगः। ये ग्रहणोपाधयस्तेपि तदंतोपाधयः स्युः। तत्र को दोषः। उतश्च प्रत्ययादसंयोगपूर्वादिति संयोगपूर्वग्रहणमुकारांतस्य विशेषणं स्यात्। तत्र को दोषः। असंयोगपूर्वग्रहणेन इहैव पर्युदासः स्यात्। अपक्ष्णुहि तक्ष्णुहीति। इह न स्यात्। आप्नुहि शक्नुहीति। तथा उदोष्ठ्यपूर्वस्येति ओष्ठ्यपूर्वग्रहणम् ऋकारांतं विशेषणं स्यात्। तत्र को दोषः। ओष्ठ्यपूर्वग्रहणेनेह प्रसज्येत। संकीर्णमिति। इह च न स्यात् निष्पूर्णोः पिपूर्षतीति। सिद्धं तु विशेषणविशेष्ययोर्यथेष्टत्वात्। सिद्धमेतत्। कथं। यथेष्टं विशेषणविशेष्ययोर्योगो भवति। याव ता यथेष्टं। इह तावदुतश्च प्रत्ययादसंयोगपूर्वादिति नासंयोगपूर्वग्रहणेनोकारांतं विशेष्यते। किं तर्हि उकार एव विशेष्यते। उकारो योऽसंयोगपूर्वस्तदंतात्प्रत्ययादिति। तथा उदोष्ठ्यपूर्वस्येति नौष्ठ्यपूर्वग्रहणेन ऋकारांतं विशेष्यते किं तर्हि ऋकार एव विशेष्यते।

ष्ठ्यसाश्रयितुं न युज्यते। अवधित्वावयवत्वयोरेकस्य विरोधात्। सिद्धं त्विति। वृद्ध्यादिसंज्ञा गुणप्रधानभावानपेक्षा एवमदेशेषु संज्ञिनं प्रत्याययंति। इयं तु संज्ञा गुणप्रधानभावापेक्षत्वात् कार्यकालात् अन्तरेण तश्च प्रत्ययादित्यादौ विशेषणसंबंधमनुभूय विशेष्येण संबंधमुकारादिरनुभवतीति यथोक्तदोषाभावः॥

स्व ८

समासे॥ श्रितादिभिः सुबन्तस्य विशेषणेऽस्तु तन्निमित्तप्रयुक्तविधिः प्रतिषिध्यते। प्रतिषेधद्वारेण चैतत्प्रदर्श्यते श्रितादयः प्राधान्येनाश्रयितव्याः स्तद्विशेषणत्वेन सुपेति। कष्टं परमश्रित इति॥ श्रितान्तमेतत्सुबन्तं न भवतीति संबुध्यन्तमुदाहृर्त्तं यद्येवं कष्टं परमश्रिते निएनत्वस्य लक्षणे न सुबन्तं भवति श्रितान्तं च श्रूयते। सौत्रनाडिरिति। अनुशतिकादित्वादुभयपदवृद्धिः। नडादीनि प्रातिपदिके न विशेष्यन्ते इति तदन्तविध्यभावः। अतिमह

समासप्रत्ययविधौ प्रतिषेधः॥ समासप्रत्ययविधौ प्रतिषेधो वक्तव्यः। समासविधौ तावत्। द्वितीया श्रितादिभिः समस्यते। कष्टश्रितः नरकश्रित इति। कष्टं परमश्रित इत्यत्र माभूत्। प्रत्ययविधौ। नडस्यापत्यं नाडायनः। इह न भवति सूत्रनडस्यापत्यं सौत्रनाडिः। किमविशेषेण। नेत्याह। उगिद्वर्णग्रहणवर्ज्जं। उगिद्ग्रहणं वर्णग्रहणं च वर्ज्जयित्वा। उगिद्ग्रहणं। उगितश्च। भवती अतिभवती महती अतिमहती। वर्णग्रहणं। अत इञ्। दाक्षिः प्लाक्षिः। अस्ति चेदानीं कश्चित्केवलोऽकारः प्रातिपदिकं यदर्थो विधिः स्यात्। अस्तीत्याह। अवतेर्डः। अः। तस्यापत्यं। अत इञ्। इः। अकच्छ्रूम्वतः सर्वनामाव्ययधातुविधावुपसंख्यानं। अकज्वतः सर्वनामाव्ययविधौ प्रभवतः धातुविधावुपसंख्यानं कर्त्तव्यं। अकज्वतः सर्वके विश्वके॥ ॥

तीति महान्तमतिक्रान्तेति प्रादिसमासः। तत्र यद्यपि गौरादिषु बृहन्महत् इति पठ्यते तथाप्यनुपसर्जनाधिकारात्तत्र ङीष् न भवतीति उगित्त्वलक्षणो ङीप् प्राप्यते। अन्ये तु गौरादिष्वनयोः प्रमादपाठमाहुः। न याचोक्तं। नद्यजाद्युदात्तत्वे बृहन्महतोरुपसंख्यानमिति॥ ङीषि हि सत्युदात्तस्य सिद्धत्वाल्लिङ्न ग्राउदात्तत्वविधानेन। अत इञ् इति। तदन्तविधावसति त्रिलकरणमुत्तरार्थं स्यात्। सर्वक इति। अकच्चिह्नेन शीभावो न स्यात्॥ ॥

उच्चैरिति। तथैवाकच्चित्कतेलुङ्‌ न स्यात्। उच्चैरधीयान इति प्रांगवद्भावनिषेधो न स्यात्। उच्चैर्मुखमिति नाव्ययदिक्शब्देति मुखस्वरनिषेधो न स्यात्। भि
नत्तीति। धातो रंत उदात्तो भवतीति उदात्तत्वं न स्यात्। प्रत्ययस्वरेणानुत्तिसिध्यती स भिनोत्ते सत्र दश्युति धातोर्विधीयमानं रुत्त्वं न स्यादिति वक्तव्यं। अन्ये त्वाहुः॥
भिनत्तीत्यत्रागमानुदात्तत्वेन प्रत्ययस्वरस्य बाधितत्वात्सतिशिष्टस्वरो धातुस्वर एष्टव्यः। सिद्धं त्विति। सर्वस्य योन्तः सर्वकशब्दस्य। एवमन्यत्रापि योज्यं। तत्र
सर्वनामानीत्यन्वर्थसंज्ञाक्षिप्तः संज्ञी सर्वादिभिर्विशेष्यते अव्ययसंज्ञाक्षिप्तः स्वरादिर्धातुसंज्ञाभाजो वा प्रकाराभूवादिभिरिति भावः। उत्तरपदलोपश्च

तोऽकारः कौ र

अव्ययविधौ। उच्चैः नीचैः। स्वभ्यवतः। भिनत्ति। छिनत्ति। किं पुनः कारणं न सिध्यति। इह तस्य वा ग्रहणं भवति तदंतस्य वा। न
चैदंतत्तनापि तदंते। सिद्धं तु तदंतांतवचनात्। सिद्धमेतत्। कथं। तदंतांतवचनात्। तदंतांतस्येति वक्तव्यं। किमिदं तदंतांतस्येति। तस्यांतस्त
दंतः तस्तदंतः अंतो अस्य तदिदं तदंतांतं तत् तदंतांतस्येति। सतहि तथा निर्देशः कर्तव्यः। न कर्तव्यः। उत्तरपदलोपोत्र द्रष्टव्यः। तद्यथा।
उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः। खरमुखः। एवमिहापि तदंतः अंतो यस्य सोयं तदंतस्तदंतस्येति॥ ॥ ॥

ति। वाचनिकोत्र लोपः। ननु सामर्थ्याज्ज्ञास्यमानार्थस्य निवृत्तिरित्याहुः। अन्ये तु वर्णयंति। यथावयवदृष्टो नाक्षौ। रिसवयवविविषया बुद्धिरुदेति तथेहा
पि सर्वशब्दस्य योवयवोस्ति तत्रैव सर्वशब्दविषया बुद्धिरुत्पद्यते। अतः सर्वशब्दांत इति व्यपदिश्यते। अथवा अवयवे समुदायरूपारोपात्तदंतता भवि
ष्यति। गौरेनापि त्यर्थेन शास्त्रे व्यवहारो दृश्यते। छत्रपार्श्वीयः मूलदंडाजिनश्रीतो ह्रस्वादिषु॥ ॥ ॥

तदेकदेशविज्ञानादिति। मध्यपातिनोऽकजादयस्तदे[illegible]कदेशा इतितत्त्वबुद्धिं न विघ्नंति। अल्पपरिमाणानामिति। परिच्छिन्नपरिमाणनामित्यर्थः। यावदेवेति। अल्पमधिकं वेत्यर्थः। इमाश्चापीति। सर्वाद्युपादानेन संज्ञाः क्रियमाणाः कथं सर्वकादीनां भवंति। नित्या हि शब्दाः विकारेऽप

तदेकदेशविज्ञानाद्धा सिद्धं। तदेकदेशविज्ञानाद्धा पुनः सिद्धमेतत्। तदेकदेशभूतस्तद्ग्रहणेन गृह्यते तद्यथा। गंगायमुनादेवदत्तेति। अनेका नदी गंगां यमुनां च प्रविष्टा गंगायमुनाग्रहणेन गृह्यते तथा। देवदत्तास्थो गर्भो देवदत्ताग्रहणेन गृह्यते। विषम उपन्यासः। इह केचिच्छब्दा अल्पपरिमाणानामर्थानां वाचका भवंति। य एते संख्याशब्दाः परिमाणशब्दाश्च पंच सप्तेति एकेनाप्यपायेन भवंति। द्रोणः खारी आढकमिति नैवाधिके भवंति न न्यूने। केचिद्यावदेव तद्भवति तावदेव वादुः। य एते जातिशब्दा गुणशब्दाश्च तैलं घृतमिति खार्यामपि भवंति द्रोणेऽपि। शुक्लो नीलः कृष्ण इति हिमवत्यपि भवति वटकणिकामात्रेऽपि द्रव्ये। इमाश्चापि संज्ञा अल्पपरिमाणानामर्थानां क्रियंते ताः केनाधिकस्य स्युः। एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति तदेकदेशभूतं तद्ग्रहणेन गृह्यत इति। यदयं नेदमदसोरकोरिति सककारयोरिदमदसोः प्रतिषेधं शास्ति। कथं कृत्वा ज्ञापकं। इदमदसोः कार्यमुच्यमानं कः प्रसंगो यत्सककारयोः स्यात्। पश्यति त्वाचार्यस्तदेकदेशभूतं तद्ग्रहणेन गृह्यत इति। ततः सककारयोः प्रतिषेधं शास्ति। कानि पुनरस्य योगस्य प्रयोजनरहितानीति सर्वे शब्दः सर्वकशब्द इति न वृत्तं कुशलास्तत इत्यर्थः। एवं तर्हीति। यद्यपि नित्याः शब्दास्तथापि प्रक्रियायामकजादयो विधीयमानाः प्रकाद्यव्यतिरेकस्तत इत्यर्थः॥

प्रयोजनमिति। अन्वर्थसंज्ञाक्षिप्तः संज्ञी सर्वोऽपि विशेष्यते। अपूर्वो वा तदंतविधिः प्रसंख्यायते। एवमुत्तरत्र ज्ञेयं। उपपदविधाविति। भयाढ्यादिभि
:कर्मविशेष्यते। क्षेमप्रियमद्रेऽण् चेत्यत्रानुकर्मणा क्षेमादय इति तदंतविध्यभावः। प्रतिषेध इति। विधीयत इति विधिः सामान्येन गृह्यत इति प्रतिषेधेऽपि

प्रयोजनं सर्वनामाव्ययसंज्ञायां। सर्वे परमसर्वे। विश्वे परमविश्वे। उच्चैः परमोच्चैः। नीचैः परमनीचैरिति। उपपदविधौ भयाढ्यादि
षु ग्रहणं प्रयोजनं। भयंकरः। अभयंकरः। आढ्यंकरणं स्वाढ्यंकरणं। ङीब्विधावुगिद्ग्रहणं प्रयोजनं। भवती अतिभवती। म
हती अतिमहती। प्रतिषेधे स्वस्रादिग्रहणं प्रयोजनं। स्वसा परमस्वसा। दुहिता परमदुहिता। अपरिमाणबिस्ताचितग्रहणं च प्रतिषे
धे प्रयोजनं। अपरिमाणबिस्ताचितकंबल्येभ्यो न तद्धितलुकि। द्विबिस्ता द्विपरमबिस्ता। दितिग्रहणं च प्रयोजनं। दितेरपत्यं दैत्यः।
अदितेरपत्यं आदित्यः। दित्यदित्यादित्येति अदितिग्रहणं न कर्तव्यं भवति। रोणपा अण। रोणपा अणग्रहणं च प्रयोजनं। आ
जकरोणिः। सैंहिकरोणिः। तस्य च। तस्य चेति वक्तव्यं। रोणिः। किं पुनः कारणं न सिध्यति। न तदंतात्। तदंतविधिना सिद्धे केवला
च्च व्यपदेशिवद्भावेन॥ ॥ ॥

तदंतविधिर्भवति स्वस्रादिभिः प्रातिपदिकस्य विशेषणात्। द्विपरमविस्तेति द्विगुना सन्निधापितमुत्तरपदं बिस्तादिभिर्विशेष्यते इति तदंतविधिः। दिति
ग्रहणं चेति। परमदित्या दित्या दिभ्यस्त्वनभिधानात्सपो न भवति। तस्य चेति। स्वं रूपमित्यस्यानुवृत्तिं वार्त्तिककारो नेच्छति। तथा चाद्यंतवदित्यत्र ये न विधिस्त
दंतत्वे इति प्रयोजनमवोचत्॥ ॥ ॥

व्यपदेशिवद्भावोऽप्रातिपदिकेनेति। ननु गौरीशब्दोऽप्रातिपदिकं प्रत्ययान्तत्वात्। नैष दोषः। अप्रातिपदिकेनेत्यत्र वाक्ये प्रातिपदिकग्रहणे लिङ्गवि
शिष्टस्यापि ग्रहणमिति वचनात् प्रत्ययान्तेऽपि व्यपदेशिवद्भावो न भवति। न च लिङ्गविशिष्टपरिभाषा स्वरूपविधिविषयैवेति प्रातिपदिक

व्यपदेशिवद्भावोऽप्रातिप्रातिपदिकेन। किं पुनः कारणं व्यपदेशिवद्भावोऽप्रातिपदिकेन। इह सूत्रान्ताट्ठक् भवति द
शान्ताड्डो भवतीति केवलादुत्पत्तिर्मा भूदिति। नैतदस्ति प्रयोजनम्। सिद्धमत्र तदन्तविधिना केवलाच्च व्यपदेशिवद्भा
वेन सोऽयमेवं सिद्धे सति यदन्तग्रहणं करोति तज्ज्ञापयत्याचार्यः सूत्रान्तादेव दशान्तादेवेति। नात्र तदन्तादुत्पत्तिः प्रा
प्नोति। इदानीमेव ह्युक्तं समासप्रत्ययविधौ प्रतिषेध इति। सा तर्ह्येषा परिभाषा कर्त्तव्या। न कर्त्तव्या। आचार्यप्रवृत्ति
र्ज्ञापयति व्यपदेशिवद्भावोऽप्रातिपदिकेनेति। यदयं पूर्वादिनिः सपूर्वाच्चेत्याह। नैतदस्ति ज्ञापकम्। अस्ति ह्यन्यदेतस्य
वचने प्रयोजनम्। किं सपूर्वादिनिं वक्ष्यामीति। यत्तर्हि योगविभागं करोति। इतरथा हि पूर्वात्सपूर्वादिनिरित्येव ब्रूयात्।
किं पुनरयमस्यैव शेषः न सपूर्वाच्चेति नेत्याह। यच्चानुक्रान्तं यच्चानुक्रंस्यते सर्वस्यैव शेषः न सपूर्वाच्चेति॥ ॥

सूत्रे वक्ष्यते। सपूर्वादिनिमिति। पूर्वग्रहणेऽकृते सपूर्वादिनिरुच्यमाने सर्वस्मात् सपूर्वात् प्राप्नोतीति कथं ज्ञापकमित्यर्थः। यच्चानुक्रान्तमिति॥
अप्रातिपदिकेनेति तु निषेधो यत्रान्तग्रहणं सूत्र एव पाठं तत्र। यथा दशान्ताड्ड इति दशाधिका अस्मिन् शत इत्यत्र न भवति॥ ॥

यद्धिधाविति। ठञ्विधौ तु तदंतविधेरभावात्पारमहलिक इति ठञ् भवति। ऋतोरिति। ऋतुवाचिनः शब्दाद्यो वृद्धिमान्प्रत्ययस्तद्विधाने ऽवयवानां तदंतवि
धिः शरदः पूर्वो भागः पूर्वशरत्। तत्र भवमिति ऋतुलक्षणो ऽण्। तत्र वृद्धिमदिति वचनात्प्रावृष एण्य इत्यत्र तदंतविधिर्न भवति। तेन ऋत्वणेव भवति
पूर्वप्रावृषमिति। प्रावृट् शब्दो वर्षापर्यायः। अवयवा नामिति किं। पूर्वासां शरदि भवं पौर्वशारदिकमित्यत्र न भवति। कालाट्ठञित्येव हि भवति। तत्र हि यथा क

रथसीताहलेभ्यो यद्विधौ प्रयोजनं। रथ्यः। परमरथ्यः। सीत्यं परमसीत्यं। हल्यः परमहल्यः। सुसर्वार्द्धदिक्शब्देभ्यो जनपदस्य प्रयो
जनं। सुपांचालकः। सुमागधकः। सुसर्वपांचालकः। सर्वमागधकः। सर्व। अर्द्ध। अर्द्धपांचालकः। अर्द्धमागधकः। अर्द्ध। दिक्शब्द।
पूर्वपांचालकः। पूर्वमागधकः। ऋतोर्वृद्धिमद्विधाववयवानां प्रयोजनं। पूर्वशारदं। अपरशारदं। पूर्वनैदाघं अपरनैदाघं। ठञ्विधौ संख्या
याः प्रयोजनं। द्विषाष्टिकं। पंचषाष्टिकं। धर्मोत्तरः प्रयोजनं। धर्मं चरति धार्मिकः। अधर्मं चरत्याधर्मिकः। अधर्माच्चेति न वक्त
व्यं भवति। पदांगाधिकारे तस्य तदुत्तरपदस्य च। पदांगाधिकारे तस्य तदुत्तरपदस्य चेति वक्तव्यं। पदाधिकारे किं प्रयोज
नं। प्रयोजनमिष्टकेषीकामालानां चिततूलभारिषु। इष्टकचितं चिन्वीत पक्वेष्टकचितं चिन्वीत। इषीकतूलेन मुंजेषीकतूलेन। मा
लभारिणी कन्या। उत्पलमालभारिणी कन्या॥ ॥ ॥

यंचित्कालवाचिनो ग्रस्यते। द्विषाष्टिकमिति। द्वे षष्टी प्रमाणमस्येति समासकृते ऽह्नो ह्रोदिनि ठञ् भवति। संख्यायास्तदंतविधौ सति संख्यायाः तदादिठञ् प्रतिषेधात्ते
न प्राप्नुतेरिति ठञेव भवति। अध्यर्द्धपूर्वेति लुङ् भवति। सोऽस्यांशवस्नभृतय इत्यतः सोऽस्येत्यनुवर्तमाने तदस्य ॥ ॥

परिमाणामिसत्वपुनः प्रसयार्थसमर्थविभक्तिनिर्देशात्कृतेवालुकि पुनस्तन्निर्देशासामर्थ्यात्सुनः प्रसयस्तद्विधानसामर्थ्याच्च पुनर्लुगभावः। पदांगाधिकारइ
ति। पदशब्देनोत्तरपदं गृह्यते पदैकदेशलोपात्। उत्तरपदेनसामर्थ्यात्क्षिप्तं सर्वं पदमिष्टकादिभिर्विशेष्यते। महदस्त्वस्त्विति। महदादिभिरंगं विशेष्यते। स्वाप
इति। नसुजनादिति समासांतनिषेधः। अपो भीति तत्त्वमपि स्वाद्भिरिति भवति। द्विपदइति। पादः पदिति पाच्छब्देनांगं विशेष्यते। पादस्य पदेति। ननु पदा

दंगाधिकारे किं प्रयोजनं। प्रयोजनं महदस्वसृनप्तॄणां दीर्घविधौ। महान्। परममहान्। अप्। आपस्तिष्ठंति। स्वापस्तिष्ठंति।
स्वसा। स्वसारौ स्वसारः। परमस्वसा परमस्वसारौ परमस्वसारः। नप्ता। नप्तारौ नप्तारः। एवं परमनप्ता परमनप्तारौ
परमनप्तारः। पद्युष्मदस्मदस्थ्याद्यनडुहो नुम्। पद्भावः प्रयोजनं। द्विपदः पश्य। अस्ति चेदानीं कश्चित्केवलः पाच्छ
ब्दो पदर्थो विधिः स्यात्। नास्तीत्याह। एवं तर्ह्यंगाधिकारे प्रयोजनं नास्तीति कृत्वा पदाधिकारस्येदं प्रयोजनमुक्तं हिमकाशि
हतिषु च यथा पत्काषिणो पत्काषिणः एवं परमपत्काषिणो परमपत्काषिणः। यदि तर्हि पदाधिकारे पादस्यान्तं दंतविधि
र्भवति पादस्य पदाज्यातिगोपहतेषु यथेह भवति। पादेनोपहतं पदोपहतं एवमत्रापि स्यात् द्विग्धपादेनोपहतं द्विग्धपा

वेतदंतविधिरुक्तः। अयं तु पदभावविधिः। नैष दोषः। पादशब्देन सर्वं पदस्य विशेषणात्तद्भावेतदंतविधिः। अनेनैव न्यायेन पदभावेपि तदंतविधिप्र
संगः। यथाभूतः शब्दः सूत्रे पादशब्दो निर्दिष्टस्तेन तथाभूतस्योत्तरत्रानुमानात्॥ ॥ ॥ ॥

एवं तर्हीति। एवं च परमपादेन कृषतीति विवक्षायां परमपादकाषीति भवति। यदा तु परमः पत्काषीति विवक्षा तदा परमपत्काषीति भवति। पारयतेरिति। पदेऽल्पेनादिस
ग्येः। परमपंथा इति क्वचित्पाठः सत्सु युक्तः समासांतविधानात्। न पूजनादिसत्त्र पूजायां स्वतिग्रहणमिति वचनान्नास्ति निषेधः। तस्मात्सुपंथा इति पाठः। परमगो
रित्ययमप्यपपाठः। गोरतद्धितलुकीति टज्विधानात्। तस्मात्सुगोरिति पाठः। परमसखायाविति बहुव्रीहिः। न सुसखे तु टचा भाव्यं। अनडुच्छब्दस्येह मप्रपंचार्थः।

एवं तर्हि अंगाधिकार एव प्रयोजनं। ननु चोक्तं नास्ति केवलः पाच्छब्द इति। अयमस्ति पादयतेः क्विप् प्रत्ययः। पात्। पदः। पदौ। पु
त्। युष्मत् अस्मत्। यूयं वयं। अतियूयं अतिवयं। अस्थ्यादि। अस्थ्ना दध्ना सक्थ्ना। परमास्थ्ना। परमदध्ना परमसक्थ्ना। अनडुहे नुम्।
अनड्वान्। परमानड्वान्। द्युपथिमथिपुंसोः सुडुगोसखिचतुरनडुत्त्रिग्रहणं प्रयोजनं। द्यौः सुद्यौः। पंथाः सुपंथाः। मंथाः प
रममंथाः। पुमान् परमपुमान्। गौः सुगौः। सखा सखायौ सखायः। सुसखा सुसखायौ सुसखायः। परमसखायौ परमसखा
यः। चत्वारः। परमचत्वारः। अनड्वाहः परमानड्वाहः। त्रयाणां परमत्रयाणां॥ ॥ परमसखा ॥

पाठः। अनडुहो नुमि सत्त एव वचनाद् अङ्गाधिकारादमामोः कृतयोर्नुम्विधानात्। नुम्विधौ तदंतविधिना आमामोरपि तदंतविधेराक्षेपात्। अन्ये त्वाहुः।
असतीह पुनर्ग्रहणे यत्रैव नुम् क्रियते तत्रैव आमामोः स्यात् न परमानड्वाह इत्यत्र लाभः स्यादिति पुनः पाठः कर्तव्यः। पूर्वत्रापि पाठो नुमर्थः कर्तव्यः। अन्य
था आमामोरेव तदंतविधिः स्यान्न तु नुम्विधौ॥ ॥ ॥

भा०कै०प्र०
१८२
182

अतिस इति। शोभनः सरः सुसरः। उपसर्जने तु तच्छब्दार्थे तदिति भवति। बहुमत्स्यिकेति। न ऋवर्णो णमपीति न वक्तव्यं भवति। वर्णग्रहणं चेति। यद्येवमु
गिद्वर्णग्रहणवर्जमित्यत्र किमर्थं वर्णग्रहणं। उच्यते। प्रत्ययविधौ तदंतविधिप्रतिषेधाद्वर्णग्रहणे प्रत्ययविधौ प्रतिषेधाशंकानिवारणार्थं। प्रत्य
यग्रहणं चापंचम्या इति। प्रत्ययग्रहणे यस्मात्स इति सिद्धे तदंतविधावपंचम्या इति प्रतिषेधार्थं वचनं। यत्र पंचम्यंतात्परः प्रत्ययः कार्यांतरवि
धानाय परिगृह्यते तत्र तदंतविधिर्माभूत्। यथा रदाभ्यामित्यत्र। अत्र हि तदंतविधौ रेफदकारांताभ्यामुत्तरो यो निष्ठातस्तस्य यस्तकारस्तस्य नत्वं
स्यात्। न च संज्ञाविधौ प्रत्ययग्रहणे तदंतग्रहणं नास्तीति निषेधावतारः। यत्र हि संज्ञाविधानेन त्वायं निषेधः इह तु निष्ठानुवादेन नत्वविधिः। सं

स्यादिविधिमत्स्या स्त्रीग्रहणं च प्रयोजनं। सः अतिसः। मत्स्यका मत्स्यिकानि मे त्स्यिकानि मे मत्स्यका। बहुमत्स्यका बहु
मत्स्यिका स्त्रीग्रहणं च प्रयोजनं स्त्रियौ स्त्रियः। राजस्त्रियौ राजस्त्रियः। वर्णग्रहणं च प्रयोजनं। क्व सर्वत्र। अङ्गाधि
कारे चान्यत्र च। अन्यत्रोदाहृतं। अङ्गाधिकारे॰ तो दीर्घो यञि सुपि च। इहैव स्यात्। अप्भ्यां पदाभ्यामित्यत्र न स्यात्।
१ प्रत्ययग्रहणं चापंचम्याः प्रयोजनं॥ ॥ ॥

ज्ञाविधौ तर्हि तदंतविधिनिषेधस्य किं प्रयोजनं उच्यते। यदि संज्ञाविधौ प्रत्ययग्रहणे तदंतस्य संज्ञा स्यात् प्रदेशेषु पुनस्तदंतविधिः स्यादिति प्रत्य
यांतांतं गृह्येत। तस्मात्संज्ञाविधावपि तदंतविधेर्निषेधो रदाभ्यामिति च। अपंचम्या इत्यस्यनायमर्थः। यत्र पंचम्यंतात्परः प्रत्ययो विधीयते तत्र तदं
तविधिर्न भवतीति। एवं हि व्याख्यायमाने ञित स्नुतत्प्रत्ययादित्यत्र तत्प्रत्ययादेव अञ्जिविधीयमाने तस्यैवाग संज्ञा यावद्धि स्वरैः स्यात्तां न तु तदंतस्य॥०॥

राम०
१८२

परमगार्ग्यायण इति। अत्र गार्ग्यायण इत्येवोदाहरणं। गार्ग्यशब्दाद्युवत्वेनात्फग्विधानात्। न तत्र परमगार्ग्यशब्दात्प्रत्ययस्तस्य युवत्वेन तत्राभावात्। तस्माच्च
फक्विधीयमाने पारमगार्ग्यायण इत्यनिष्टरूपप्रसंगः। तस्मादेतन्न्यायप्रदर्शनार्थं परमगार्ग्यायण इत्युपन्यस्तं। उत्तरपदाधिकारे प्रत्ययग्रहणे तदंत
विध्यभावो लेखग्रहणेन ज्ञापितः। तत्र दाम्पामिसत्त्रनिष्ठायाः प्राधान्यात्तदंतविध्यभावः। स्यतासी लृलुटोरित्यत्र धातोरित्स[illegible]धिकारात् पंचम्या इ
ति निषेधात् स्यतासी लृलुटोः प्राधान्येनाश्रयणात्तदंतविध्यभावः। अलेवानर्थकेनेति। अर्थवद्ग्रहणे नानर्थकस्येति वर्णो निर्दिष्टोऽनुनाश्रीयत इति स्थितं। वर्णरूपत

यञिञोः फग्भवति॥ परमगार्ग्यायणः परमवात्स्यायनः। अपंचम्या इति किमर्थम्। दृषत्तीर्णो परिषत्तीर्णो। अलेवान
र्थकेन नान्येनानर्थकेनेति वक्तव्यं। किं प्रयोजनं। हन्ग्रहणे प्लीहन्ग्रहणं माभूत्। उद्ग्रहणे गर्मुद्ग्रहणं माभूत्। स्त्री
× गार्ग्यायणः वात्स्यायनः ×२
ग्रहणे शास्त्रीग्रहणं माभूत्॥ ॥ ॥

यायस्य शब्दस्याश्रयणं नार्थवता रूपमाश्रीयते तत्र वर्णग्रहणं च सर्वत्रेत्यत्र वर्णग्रहणे जातिग्रहणाद्वर्णसमुदायग्रहणेऽप्यनर्थकस्य ग्रहणं प्राप्तमनेन नि
वार्यते। अलेवेति च एकत्वसंख्यागुणत्वाद्विवक्षितं विधानसामर्थ्याद्वा। हन्ग्रहण इति। तेन प्लीहानावित्ति दीर्घो भवति। उद्ग्रहण इति। उदः स्थास्तंभोरिति
त्र। तेन गर्मुत स्थास्यतीति पूर्वसवर्णो भावः। शास्त्रीग्रहणमिति। तेन शास्त्र्या विनिश्चिया इतीयङ् न भवति॥ ॥ ॥
नियम२

पायसंकरोतीति। संपर्युपेभ्यः इति सुडागमो भवति। तत्र हलग्रहणे स्त्रीग्रहणे चागमस्य विशेष्यत्वात् स्यात्तदन्तविधिः। उदः स्थेस्तम्भोरित्यधिकारात्तव गोत
स्पोच्छब्देन विशेषणात् स्यात्तदन्तविधिः। प्रतिषेधविज्ञाने तु न भवति। उदय इत्यत्र वर्गेण विशेष्यत्वात्तोरिलस्य वा निवृत्तत्वात्। संग्रहणोपदप्रकरणात्त
दन्तविधिः स्यादिति निवार्यते। पदेन समासयोर्विशेष्यत्वे तद्विति तदन्तविध्यभावः। पायसंकरोतीति करोतेर्भूषणार्थे वृत्तिता संभवतीति सु
ट् स्यात्। किमर्थमिति। अलेवानर्थकेनेत्येतदाक्षिप्यते। अस्य हि नियमस्य प्लीहानाविसादिप्रयोजनं। तच्चान्यथा सिध्यति। अङ्
गाधिकारे हलग्रहणं स्त्रीग्रहणं चास्ति। एङः पदान्तादतीति पदाधिकारे संग्रहणं। वा पदान्तस्येत्यतः पदग्रहणानुवृत्तेर्वा। उदः स्था
स्तम्भोरिति पूर्वसवर्णः पदाधिकारे विधीयते। पदाङ्गाधिकारे इत्यत्र च केवलपदाधिकारोपि गृह्यते उत्तरपदाधिकारोपि। तत्रास्य प्लीहा

संग्रहणोपायसंकरोतीति मा भूत्। किमर्थमिदमुच्यते। न पदाङ्गाधिकारे तस्य च तदुत्तरपदस्येत्येव सिद्धं। न चेदं तदन्तत्वना
पितदुत्तरपदं। तत्त्ववक्तव्यं भवति। किं पुनरत्र न्यायः। तदन्तविधिरेव ज्यायान्। इदमपि सिद्धं भवति परमातिमहा
॥ नृ एतद्धि नैव तत् नापि तदुत्तरपदम्॥ ॥ ॥

नादिषु दोषो न भविष्यति। नहि प्लीहानाविसत्र हलिसंगं नापि तदुत्तरपदमिति प्रश्नः। तन्न वक्तव्यमिति। पदाङ्गाधिकारइत्येतदिसत्र्थे:॥ अ
लेवानर्थकेनेति वचनेनार्थवता तदन्तविधिसद्भावादिति भावः। तदन्तविधिरेवेति। आद्यमकल्पिकः सूत्रे रोवृ तदन्तविधिः स एवाल लेवानर्थ
केनेति नियम्यते। परमातिमहानिति। परमश्चासावतिमहानिति समासः। तत्र परमादिर्महच्छब्दो न भवति नापि महच्छब्दः उत्तरपदः। अ
तिमहच्छब्दस्योत्तरपदत्वादिति सान्तमहत इति दीर्घत्वं न स्यात्। अनेनैव न्याये नोगित्तु श्रूयमाणोनुमागमोपि न स्यात्। तदन्तविधिना तु

सुस्रोता इति। अनागमकानां सागमका आदेशा इत्याश्रयणाद् आसः आनर्थक्यमर्थवतो ह्यागम इति न्यायाश्रयणे लघ्वर्थे वा नेवास्य शङ्कः। यस्मिन्विधिरिति। तदन्
तविध्यपवादस्तदादिविधिः। अत एव विशेषणेन भवति नान्येन॥ ॥वृद्धिः॥ ॥वृद्धिग्रहणमिति। असति वृद्धिग्रहणे कथं सर्वस्य वृद्धसंज्ञा न भवतीति चेत् य
स्याचामादिर्भिन्नजातीयस्तद् वृद्धमिति जातिव्यावर्जितं स्यात्। दाक्षा इति। असति वृद्धिग्रहणे निर्द्धारणहेतोर्धर्मस्यानुपादानादादिशब्दः समीपार्थो विज्ञायेत। तत्र

अपि निनस्य न ग्रहणमर्थवतश्चानर्थकेन च तदन्तविधिप्रयोजनमिति। अन्नाराज्ञे सर्थवता। साम्ना इत्यनर्थकेन। इन्। दण्डी सर्थवता वा
ग्मी सनर्थकेन। असः सुप्रथिमा इत्यनर्थकेन। यस्मिन्विधिस्तदादावल्ग्रहणे। यस्मिन्विधिस्तदादाविति वक्तव्यं। किं प्रयोजनं।
अचि श्नुधातुभ्रुवां य्वोरियङुवङौ इति इहैव स्यात् श्रियौ भ्रुवौ श्रियः भ्रुव इत्यत्र न स्यात्॥ ॥वृद्धिर्यस्याचामादिस्तद्वृद्धं॥ ॥
वृद्धिग्रहणं किमर्थं। यस्याचामादिस्तद्वृद्धमितीयत्युच्यमाने दात्ता दाक्षिताः अत्रापि प्रसज्येत। वृद्धिग्रहणे पुनः क्रियमाणे न दो
×सुपथा इत्यर्थवता सुस्रोता इत्यनर्थकेन। म× (१ षो भवति। अथ यस्य ग्रहणं किमर्थं। यस्येति व्यपदेशाय॥ .॥ ॥
×न्। सुशर्मा इत्यर्थवता×२
शाद्दाक्षित शब्दयोस्तत्र क्रियाशब्दो द्रष्टः। नामधेयस्य तु पक्षे भवत्येव वृद्धसंज्ञा। प्रत्येयं वृद्धमित्यत्र यद्यनामधेयत्वाद् वृद्धाः पक्षे कर्मादयस्तदर्थप्रतिषेधः स्या
त्। यस्येति व्यपदेशायेति। संज्ञिन इति शेषः। अन्यथा तच्छब्देन किं प्रत्यवमृश्येत। तदिति स्यानुपादाने च वृद्धे रेव संज्ञा प्रसंगः॥ ॥
५२

गार्गीया इति। न हि गार्ग्यशब्दस्य वृद्धिरादिः किं तर्हि हल्। मालादीनां चेत्येतत्तु नामधेयार्थं स्यात्। समासान्तयन इति। सति चेह आदिग्रहणे आद्यन्तवत्त्वे
ने एकग्रहणस्य समासान्तयनशब्दः प्रत्युदाहरणम्। असति हि आदिग्रहणे दरिद्रा इति वर्णेन तल्लक्षणस्याचोऽभावे एवैकग्रहणस्य प्रयोजनम्। आचा
मिति तु वृद्ध्युच्चसंख्याविवक्षार्थं स्यात्। न ह्यचामिति। सर्वस्य प्रातिपदिकस्याकालत्समुदायरूपत्वात्। अचामित्यनेन केवलानामचां समुदायः
सन्निवेशरूपो निर्दिष्टः। पौर्वापर्येण व्यस्यानां सन्निवेशः। स च केवलानामचां नास्ति। ननु चैवमिति। अचः सन्निवेशासम्भवादचां मध्ये

अथाज्ग्रहणं किमर्थम्॥ वृद्धिर्यस्यादिस्तद्वृद्धमितीयत्युच्यमाने इहैव स्यात् औपगवीयाः। इह न स्यात्। गार्गीया वात्सीया इति।
अज्ग्रहणे पुनः क्रियमाणे न दोषो भवति। अथादिग्रहणं किमर्थं। वृद्धिर्यस्याचां तद्वृद्धमितीयत्युच्यमाने समासान्त
यनेभवः सामासान्तयन इत्यत्र प्रसज्येत। आदिग्रहणे पुनः क्रियमाणे न दोषो भवति। वृद्धसंज्ञायामज्सन्निवेशा
द्रनादित्वम्। वृद्धसंज्ञायामज्सन्निवेशादादिरित्येतन्नोपपद्यते। न ह्यचां सन्निवेशोऽस्ति। ननु चैवं विज्ञायते। अ
जेवादिरिति। नैवं शक्यम्। इहैव प्रसज्येत। औपगवीयाः। इह न स्यात्। गार्गीयाः। एकान्तादित्वं तर्हि विज्ञायते॥ ॥

जपेक्षपायस्य वृद्धिरादिरिति विज्ञास्यते इत्यर्थः। नैवं शक्यमिति। वृद्धिविशेषणार्थो निर्द्धारणे षष्ठी स्यात्। अचां मध्ये आद्यपाया वृद्धिरित्याका
रस्य निवृत्तिप्रसंगः। आकारो ह्यनजेव सन् केवलमचकार्यो णिग्रहणकशात्त्वेण लभते ततश्चाश्वलायन इत्यत्र न स्यात्। गार्ग्य इत्यत्र च आ
कारस्यानच्त्वात् समुदायानादित्वाच्च न स्यात्॥ ॥श्री॥ ॥७॥ ॥

एकान्तादित्वे चेति। एकान्ता अवयवा अचः प्रातिपदिकस्य तेषाममचामादिर्वृद्धिर्यस्य तद्वृद्धमित्यर्थः। सर्वप्रसंग इति। नह्यत्र विशेष उपादीयते सर्वेषाममचामादिर्वृद्धिरि-
ति। तत्र स्वमध्येपि वर्त्तमान आकारोन्यापेक्षया आदिरिति समासान्तयने संज्ञाप्रसंगः। आदिग्रहणं चासन्निहितस्यार्थे स्यात् खट्वेति सिद्धमिति। उभयरूपत्वेपि प्राति-
पदिकस्याः जात्कृति एचामिति वचनादाश्रीयते। विद्यमानापि हलाकृतिर्न विवक्ष्यते। तेनायमर्थः। यस्य शब्दस्य सकलाजपेक्षया वृद्धिरादिस्तद्वृद्धमिति। यथा पं-
क्तौ ब्राह्मणानामादिमानये स्रुक्स्य तोपि शूद्रादीनां दस ब्राह्मणजात्यपेक्षया यो ब्राह्मण आदिः स आनीयते। व्यंजनस्येति। अचामिति वचनादित्य-

एकान्तादित्वे च सर्वप्रसंगः। इहापि प्रसज्येत समासान्तयने भवः सामासान्तयन इति। सिद्धम जात्कृतिनिर्देशात्। सिद्धमेतत्। कथं।
अजात्कृतिनिर्दिश्यते। एवमपि व्यंजनैर्व्यवहितत्वान्नप्राप्नोति। व्यंजनस्याविद्यमानवत्त्वं यथान्यत्र व्यंजनस्याविद्यमानव-
द्भावो वक्तव्यः। यथान्यत्रापि व्यंजनस्याविद्यमानवद्भावो भवति क्वान्यत्र स्वरे। वानामधेयस्य वृद्धसंज्ञा वक्तव्या देवदत्तीयाः दै-
वदत्ताः। यज्ञदत्तीयाः याज्ञदत्ताः। गोत्रोत्तरपदस्य च। गोत्रोत्तरपदस्य च वृद्धसंज्ञा वक्तव्या। कंबलचारायणीयाः ओदनपाणि-

मानामपि व्यंजनानि न विवक्षितानीत्यर्थः। यथा अन्यत्रेति। यथा स्वरविधायकमेवेसु दृष्टिता निति मतुप उदात्तत्वं न प्रवर्त्तते। वा नामधेयस्येति। पौरुषं ना-
मगत्यते। कंबलचारायणीया इति। कंबलप्रियस्य चारायणस्य शिष्या इत्यर्थः। ओदनपाणिनीया इति। पणिनो प समिसरण। गाथिविदथीति प्रकृतिभावादि-
लोपाभावः। पणिन सा प संयुवेतीन्। तस्य छात्रा इति विवक्षिते प्र निलुगितीञो लुक्। तेनेत्र व्यं सराग भवतीति छो भवति॥
×धावयोग्यत्वाद्व्यंजनम विद्यमानवदेव मिहापाचामिति वचनादित्यर्थः। इत्यनुष्ठामिति स्वर विधौ तु ग्रहणं लिंगाद्व्यंजनं त्व्यव ×२

पैंगलकाण्वा इति। काण्वादिभ्यो गोत्र इत्यण्। द्वन्द्वसंज्ञायां तु छः स्यात्॥ ॥ सदादीनि च॥ ॥ तात्सुत्रा इति। आदिग्रहणान्यथानुपपत्त्योपसर्जनानामपि स्यु
दादिरित्युक्तं स्यादिति भावः। अथापि सत्यपि तत्रार्थेन्वानुवृत्तिः स्यात्तत्तु संबंधस्येहायोग्यत्वान्निर्द्धारणस्य समानजातीयविषयत्वात्। त्वदीय इति। एकपदे शिव

गोत्रान्ता द्वन्द्वसमस्तवत्सवयोभवतीति वृद्धत्वमाप्नोत्यन्येषां दाहरणानि। किमविशेषेणानेत्याह। जिह्वाकासहरितकात्यवज्ज्ये
म। जिह्वाकात्यं हरितकात्यं च वर्जयित्वा। जैह्वाकाताः हारितकाताः। किंपुनरत्र ज्यायः। गोत्रान्ताद्वा समस्तवदित्येव ज्यायः। इ
दमपि सिद्धं भवति। पिंगलकाण्वस्य छात्राः पैंगलकाण्वाः। एतानि द्वन्द्वसंज्ञानि सुः। सदादीनि च। यस्या चामादिग्रहणमनु
वर्तते उताहो न। किं चातः। यद्यनुवर्त्तते इह च प्रसज्येत। त्वत्सुत्रस्य छात्रास्त्वात्सुत्राः मात्सुत्राः। इह च न स्यात्। त्वदीयो मदीय
इति। अथ निवृत्तम् एङ् प्राचां देशे यस्या चामादिग्रहणं कर्तव्यम्। एवं तर्ह्यनुवर्तते। कथं त्वात्सुत्राः मात्सुत्रा इति। संबंधमनु
वर्तिष्यते। वृद्धिर्यस्या चामादिस्तद्वृद्धम्। सदादीनि च। वृद्धसंज्ञानि भवंति। वृद्धिर्यस्याचामादिस्तद्वृद्धम्। एङ् प्राचां देशे यस्या
चामादिग्रहणमनुवर्त्तते। वृद्धिग्रहणं निवृत्तम्॥ ॥ ॥

द्धा गोत्रं नास्ति। अप्रातिपदिकेनेति निषेधात्। संबंधमिति। द्वितीयान्तमेतत्। संबंधमनुरोत्स्यते न ह्यस्मतीसर्थे। अथवा संबध्यत इति संबंधः। कर्मणि घञ्।
न पुंस्केपि बाधकाभावाद्भवति। वृद्धिग्रहणं संबद्धमादिग्रहणम् नुवर्त्तते इति नास्ति तस्य सदादिभिः संबंधः॥ ॥ ॥

तद्यथेति। एतद्दर्शयति स्वरितत्वप्रतिज्ञानादुत्तरसूत्रे एव योगपूर्वत्वाद्यस्याचामादिरिति संबध्यते। एङ्। यस्याचामादिस्तद्वृद्धमिति वाक्यार्थसंपादनाय। इह तु योगपृथ-
त्वात्संबंधानुपपत्तिः। तुल्यजातीयस्य निर्धारणात्त्यदादीनां चाचामेकत्वाभावाद्यस्याचामादयस्तदादय इति संबंधाभावात्॥ ॥एङ् प्राचां॥ ॥कुणिना प्राग्ग्रह-
णमाचार्यनिर्देशार्थं व्यवस्थितविभाषार्थं चेति व्याख्यातं। तेन कौडो नाम उदग्ग्रामस्तत्र भवः कौड इत्युभयवृत्तिः। अस्मिंस्तु प्राग्ग्रहणं देशविशेषणं व्याख्यातं। ते-
न देवदत्तो नाम वाहीकेषु ग्रामः तत्र भवो दैवदत्त इत्यत्र वृद्धत्वाट्ठञ्ञिठौ न भवतः। भाष्यकारस्तु कुणिदर्शनमशिश्रियत्। सैपुरं स्कौनगरं च वाहीकग्रामौ तत्र वृद्ध-

तद्यथा॥ कश्चित्कान्तारे समुपस्थिते सार्थमुपादत्ते स यदा निष्कान्तारीभूतो भवति तदा सार्थं जहाति॥ ॥एङ् प्राचां देशे॥
॥एङ् प्राचां देशे शैषिकेष्विति वक्तव्यं। सैपुरिकी। सैपुरिका। स्कौनगरिकी स्कौनगरिकेति॥ ॥इति श्रीमद्भगवत्पतंज-
लिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य प्रथमे पादे नवममाह्निकं पादश्च समाप्तः॥ ॥

त्वाद्वाहीकग्रामेभ्यश्चेति ठञ्ञिठौ भवतः। शैषिकेष्विति वचनादपत्यविकारयोर्वृद्धलक्षणप्रत्ययाभावः। कौडदेवदत्तयोस्तु प्राग्देशवाचिनोर्व्यवस्थितवि-
भाषया न भवतीति। प्राग्देशवाचिनस्तु देवदत्तशब्दस्य वृद्धसंज्ञत्वात्काश्यादित्वाद्वृद्धलक्षणौ ठञ्ञिठौ भवतः॥ ॥इत्युपाध्यायजैयटपुत्रकै-
यटकृते महाभाष्यप्रदीपे प्रथमस्याध्यायस्य प्रथमे पादे नवमाह्निकं॥ पादश्च समाप्तः॥ ॥ ॥

भा०कौ०प्र०
१८६

186

गाङ्कुटादिभ्योऽञ्णिन्ङित्। चत्वारो ऽत्र पक्षाः उपक्षिप्ता भाष्ये ङित्वकित्त्वसंबंधप्रतिपादने। भावने। संज्ञाकरणं। अतिदेशश्चेति। तत्राद्यपक्षनिराकरणाय व्याख्ये कुप्रसक्तिः। ङिल्कित् वचनं इति सता हीति। विद्यमाने न वस्तुनापि संबंधो यस्य शक्यते कर्त्तुं। न च गाङ्कुटादिभ्यः परस्य प्रत्ययस्य ङकार इत्संज्ञोऽस्ति येन तस्य ङित्त्वव्यपदेशः स्यात्। सत्त्वे वा भूतानुवादे प्रयोजनाभाव इत्याभाषापत्तिः। न च गाङ्कुटादिभ्यष्ठङादेः क्रियतेऽनेन विधानमुपपद्यते। अञ्णिद्ग्रहणानर्थक्यप्रसंगात्। भाष्ये इति। गाङ्कुटादिभ्यः परो योऽञ्णित्प्रत्ययः स ङिद्भवति। ङकार इत्संज्ञकस्तस्य भवतीत्यर्थः। स तु ङकार आदेशो

गाङ्कुटादिभ्योऽञ्णिन्ङित्। ङितकिद्वचनेन तयोरभावात् प्रसिद्धिः। ङिल्कित् वचनेन तयोरभावात् ङकारककारयोरभावान्ङित्वकित्वयोरप्रसिद्धिः। सता त्वभिसंबंधः शक्यते कर्त्तुं। न चात्र ङकारककाराविलोपप्रसंगः। तद्यथा। चित्रगुर्देवदत्त इति यस्य ता गावो भवंति स एव ताभ्यां शब्दाभ्यां ▬▬▬ शक्यते ऽभिसंबंद्धुं। भाष्ये तेनत्यपेन तग। ङ्कुटादिभ्योऽञ्णिन्ङिद्वत् इत्यत्र संयोगाल्लिट् कित् इवतीति। भवतीति चेदादेशप्रतिषेधः। भवतीति चेदादेशस्य प्रतिषेधो वक्तव्यः। ङकारककाराविनाबादेशो प्राप्नुतः॥ ॥

मध्येऽन्तेवेति देशविशेषं नापेक्षते। इदुमाक्रांतस्येव विधानात्। इतां च धर्मोऽश्रूयमाणानामपि कार्यं प्रति विशेषकत्वं। भवतीति चेदिति। ङित्त्वकित्त्वमित्वाना मभावान्नुः। इदनंतरो स्येति अनंतरार्थे बरुश्रीत्यभावाच्चादेः परस्येत्यादेः स्थाने ङकार आदेशः प्राप्नोतीत्यर्थः। ङइङित् इति न खुरूप एवस्याप्यः स्वप्रधानार्थप्राप्ते न तस्यानंतरं गत्वा दुरुश्रीत्यर्थानुपपाद्याच्चा। कुटितेत्यादौ प्रसिद्धिः ङित्वाद्यङादयो यद्यादेशाः क्रियंते तदा न तेन तदर्थाभिधाने समर्थाः तदुक्तं दयस्याहृणा त्वेन प्रसिद्धाः। अथा स्यादेव वचनादर्शवाः क्रियेरन् तदा ङिच्चे संसस्यत्तुः॥ ॥ ॥

=अनेनास्यागमत्वं निराकृतं॥=

राम०
१८६

=सर्वोक्तन्यायादादेशःसंप्रसारणम्॥१=तत्प्रयोजनं तु विशिष्टं विचिन्त्यमित्याशयेन संप्रसारणं॥२=अत्रापि तद्वदुक्तिसाहित्येन संप्रसारणप्रयोजनं॥३=

कथं पुनरिति। इत्संज्ञो ह्यसन्नेव कार्यमात्रं प्रतिपादयति। आदेशस्तु भावरूपो ह्यन्यस्य प्रसंगे भवति। किं हीति। लोपस्यापि आदेशत्वं तथा ङकारस्यापीत्संज्ञकस्य मविष्यतीत्यर्थः। तत्र स्थानिन्नं निर्वर्त्य ङकारो निवर्त्तेत। संज्ञाकरणं इति। अकृतपरिमाणसंज्ञाकृतेति सूत्रे नातिरिक्तशब्दोच्चारणे संज्ञा स्वरूपानुपपत्ते भात्संज्ञिना म संप्रसयः। ङित्संज्ञाकरणं तु अप्यचेः कुटादित्ववचनात् संप्रसारणार्थं स्यात्। लिटः कित्संज्ञावचिस्वपीति संप्रसारणार्थं स्यात्। गाङ्कुटादिभ्यस्त्वहि ङित्संज्ञाकि

कथं पुनरित्संज्ञो नामादेशः स्यात्। किं हि वचनान्न भवति। एवं तर्हि षष्ठीनिर्दिष्टस्यादेशा उच्यन्ते। न चात्र षष्ठी पश्यामः। गाङ्कुटादि

[भा२] भ्य एषा पंचमी अञ्णिदिति प्रथमायाः षष्ठी प्रकल्पयिष्यति। तस्मादित्युत्तरस्येति। संज्ञाकरणं तर्हीदं गाङ्कुटादिभ्यो ऽञ्णि

न्ङित्संज्ञो भवति। असंयोगाल्लिट्कित्संज्ञो भवतीति। संज्ञाकरणे किं द्रुहणोः संप्रसयः शब्दभेदात्। संज्ञाकरणे किं द्रुह

णोः संप्रसयः स्यात्। किं कारणं। शब्दभेदात्। अन्यो हि शब्दः किदिति। अन्यः किदिति अन्यः ङिदिति च। तथा किं द्रुह

णोषु ङि द्रुहणेषु चानयोरेव संप्रसयः स्यात्। न द्विनिर्देशस्तत्स्थयं। गाङ्कुटादिभ्योऽञ्णिन्ङित् द्रुहृवति असंयोगा

ल्लिट्कि द्रुहृवतीति। सन्तर्हि वृत्तिनिर्दिष्टः प्राक्कर्तव्यः। नह्यन्तरेण वतिमतिदेशो गम्यते। अन्तरेणापि वतिमतिदेशो गम्यते।

[४०]

मर्यास्यात्। अनर्थिका भवतु न्यायागतेर्थे किं कुर्मः। किति चेसादेतु ये गिकस्ये वग्रहणं स्याद्यस्य ककारेऽङकारश्चेत्संज्ञकः। अनयोरेवेति। कृत्रि

माकृत्रिमयोः कृत्रिमे संप्रसय इति न्यायात्। चङादीनां तु ङिकरणं कित्त्वादेशेषु ग्रहणार्थं स्यात्। अत्र संज्ञाउपलब्धिः॥ " "

=नोपदिश्यते गुरुस्वार्थ एवामि[illegible] =अतिदेशः [illegible] =व्यपदेशः [illegible]

५२

एषब्रह्मदत्त इति। निर्ज्ञाते भेदे तत्कार्ये प्राप्ते यत्तद्रूपारोपणं क्रियते इ[illegible]तिदेशगतिः। अकि द्धि प्रसंग इति। कार्यातिदेशे तत्स्थानिवद्धानिकार्याणि व्यपदेशमंतरेणापि भवंतीति गुणनिषेधादीनामेवातिदेशः। इमागस्तु स्वाश्रयः केन निवार्यते। यथाब्राह्मणवदतिदेशः क्षत्रियस्य स्वाश्रयं युद्धादिं निवर्त्तयति। अकितीति च पर्युदासाश्रयणात्किंत्यतिबद्धकार्याभावात्स्वाश्रयो मागमः स्यात्। सिद्धं त्विति। प्रसज्यप्रतिषेधे मागमनि
वृ॰

एषब्रह्मदत्तः अब्रह्मदत्तं ब्रह्मदत्त इत्याह। नेमन्यामहे ब्रह्मदत्तवदयं भवतीति। एवमिहाप्यदि॰ तदि॰ दिसाहदि॰ द्धदितिगम्यते। अकितं किदिसाहकिद्धदितिगम्यते। तद्वदतिदेशः किद्विधिप्रसंगः। तद्वदतिदेशे किद्विधिरपि प्राप्नोति। सृजिदृशोर्झल्यमकिति। सिस्रक्षति। दिदृक्षते। अकि ह्लक्षणो मागमः प्राप्नोति। सिद्धं तु प्रसज्यप्रतिषेधात्। सिद्धमेतत्। कथं। प्रसज्यायं प्रतिषेधः क्रियते किति नेति। सर्वत्र सत्त्वं तादात्म्ये न परप्रतिषेधः। सर्वेषु पक्षेषु सन्नंतादात्मनेपदं प्राप्नोति चुकुटिषति। निचुकुटिषतिदि॰ तद्वदात्मनेपदं प्राप्नोति। तस्य प्रतिषेधो वक्तव्यः। सिद्धं तु पूर्वस्य कार्यातिदेशात्। सिद्धमेतत्। कथं। पूर्वस्य यत्कार्यं तदतिदिश्यते। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते। सप्तम्यर्थेपि वतिर्भवति। तद्यथा। मथुरायाम् इव मथुरावत्। पाटलिपुत्र इव पाटलिपुत्रवत्। एवंदि॰ तीवदि॰ द्धत्॥ ॥ ॥

पूर्वस्य एव कित्कार्यं। सिद्धं तु पूर्वस्येति। विशिष्टमत्रादि॰ त्कार्यमतिदिश्यते नेन सर्वमिसर्थः। सप्तम्यर्थेपीति। सप्तम्यर्थे वर्तमानादिवार्थे वतिरित्यर्थः। ननु नेह वतिरूपान्त्यलक्षणमयं परिहारः। अयं भावः। यथा न सर्वकार्यप्राप्त्यर्थ एवाब्रह्मदत्ते ब्रह्मदत्तत्वारोपः अपि तु कस्यचिदेव कार्यस्य लाभार्थः एवमिहापि व्याख्यानाद्धिशिष्टदि॰ त्कार्यातिदेशार्थ एवाग्निरिति। अत्र सस्य तद्रूपासंगः। उपदेशग्रहणानुवृत्त्या चोपदेशेयो दि॰ तस्मादात्मनेपदमिति पूर्वस्य कार्यातिदेशो।

=मथमि[illegible] =निर्दिष्टं[illegible]आहृपमेयोति॰ ९=

अथ किमर्थमिति॥ कार्यार्थत्वादनुबंधासंगस्यैकेनैवानुबंधेन गुणनिषेधादेः सिद्धत्वादनुबंधभेदो न स्यात् इति प्रश्नः। एकस्य चानुबंधस्य करणे अतिदेशोपि

अथ किमर्थं पृथक् क्ङितोः क्रियेते। न सर्वं ङिदेव स्यात् ङिदेव वा। पृथगनुबंधत्वे प्रयोजनं वचिस्वपियजादीनां संप्रसारणं सार्वधातुके चङादिषु। पृथगनुबंधत्वे प्रयोजनं वचिस्वपियजादीनां संप्रसारणं सार्वधातुके चङादिषु च। सार्वधातुके प्रयोजनं। यथेह भवति सुप्तः सुप्तवानिति एवं स्वपितः स्वपिथ इत्यत्रापि प्राप्नोति। चङादिषु च प्रयोजनं। क्ङेषु न स्युः चङादयः। चङ्. ङ्. जिङ्. निबंधङ्. ङः चङ्. यथेह भवति। सूनः सूनवानिति। एवमशिश्वियदित्यत्रापि प्राप्नोति। अङ्. यथेह भवति सून उत्क्रेर इति एवमस्वत् अवो चुदत्रापि प्राप्नोति। न जिङ्. यथेह भवति सुप्तः एवं स्वप्नगित्यत्रापि प्राप्नोति। ङ्. निप्. यथेह भवति इष्टमिति। एवं यज्वा इत्यत्रापि प्राप्नोति। अथङ्. यथेह भवति उषित इति एवमावस थ इत्यत्रापि प्राप्नोति। नङ्. यथेह भवति इष्टमिति एवं यज्ञ इत्यत्रापि प्राप्नोति। जाग्रोगुणविधिः। जागर्तेर्गुणविधिः प्रयोजनं। यथेह भवति जागरतः जागरथ इत्यादिनीतिपर्युदासः। एवं जागरितः। जागरितवानित्यत्रापि प्राप्नोति। अपर आह। जाग्रोगुणविधिः। जागर्तेर्गुणविधिः प्रयोजनं। यथेह भवति जागरितः जागरितवानिति एवं जागरथ इत्यत्रापि प्राप्नोति॥ ॥श्री॥ ॥ ॥

मेदेन नक्तेत्यगः आवसथ इति। रूदिविदिमुषिभ्यः ङि. दित्यतो ङि. दित्यनुवर्तमाने उपसर्गे वसेः इत्यथप्रत्ययः जागृ इति। क्ङिति गुण इत्यनेन ङि. ति। एव

(९ चविषयविभागः पृथगनुबंधोपादाने लभ्यते॥ ॥ ॥

:अनुवाद ५

ओपदेशिकस्येति विषयभेदात् अथयेकि॥२॥ नस्मादिति कृ। हारिस्यः परस्य किलत्वविधानं तु कुटित्वादौ च हितार्थमिति भावः॥२॥

श्रीगणेशाय नमः॥

मा०कौ०पू०

१८८

१४४

नुविते ति। एरस्तु तौ। धूविधूनने। क्ङितीति सप्तमीनिर्देशादिट्प्रतिषेधस्याप्यतिदेशः स्यादित्युपन्यासः। न लिङ्प्रतिषेधः पूर्वस्य कार्यः। कुटित्वेति। न क्त्वा सेडिति निषेधो विशे
षानुपादानादौपदेशिकवदातिदेशिकस्यापि किल्त्वस्य स्यात्। अथवायमपि न कार्यः तदतिदिश्यते इति क्त्वा प्रत्यये किल्त्वातिदेश एव न स्यात्। नुविलेति। ङित्त्वेनाकित्त्वेन

कुटादीनामिट्प्रतिषेधः। कुटादीनामिट्प्रतिषेधः प्रयोजनं। यथेह भवति लूत्वा पूत्वा इति श्र्युकः क्ङितीतीट्प्रतिषेधः एवं नुविता धुविताऽत्र
त्रापि प्राप्नोति। क्त्वायां किल्त्वप्रतिषेधश्च। किंच। इट्प्रतिषेधश्च। नेत्याह। अपदेशे पंचमः पठितः क्त्वायां च किल्त्वप्रतिषेध इति। यथेह भवति देवित्वा सेवित्वेति
न क्त्वा सेडिति किल्त्वप्रतिषेधः एवं कुटित्वा पुटित्वा अत्रापि प्राप्नोति। अथवा देश एवायं पठितः। क्त्वायां किल्त्वप्रतिषेधश्च इट्प्रतिषेधश्च।
किल्त्वप्रतिषेध उदाहृतः। इट्प्रतिषेधो यथेह भवति। लूत्वा पूत्वा श्र्युकः क्ङितीति एवं नुवित्वा धुवित्वा अत्रापि प्राप्नोति। स्यादेतत्प्रयोजनं य
घस्य नियोगतः अतिदेशिकेन ङित्त्वेनोपदेशिकं किल्त्वं बाध्येत। सत्यपि ङित्त्वे किदेवैषः। तस्मान्नूत्वा धूत्वा इत्येव भवितव्यं॥ ॥ तु२
सार्वधातुकमपित्॥ ॥सार्वधातुकग्रहणं किमर्थं। अपि ङिद्द्वितीय सुच्यमाने आर्द्धधातुकस्याप्यनेनापितो ङित्त्वं प्रसज्येत। कर्त्ता
हर्त्ता। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति नानेनार्द्धधातुकस्यापितो ङित्त्वं भवतीति॥ ॥ ॥

नाप्राप्ते इति बाध्यते इति भावः॥ सत्यपीति। विरोधाभावादतिदेशेन स्वाश्रयस्य किल्त्वस्यानिवर्त्तनाद्येन नाप्राप्ते इति न्यायाभावाच्च। न हि कुटिता कुटितुमित्यादौ किल्वे
प्राप्ते ङित्वारंभः॥ ॥सार्वधातुकमपित्॥ ॥लिंगादव्याप्तिरतिव्याप्तिर्वेति प्रदर्शनाय सार्वधातुकग्रहणस्याक्षेपप्रतिसमाधाने भाष्यकारेणोपन्यस्ते॥ ॥

राम०

१८८

यत्किप्रसेक्ता विषयं गाङ्कुटादि तिसूत्रं भिन्नं तद्व्यपेनमोलक्षः किलेआरभ्यते॥१॥ न्यायाभावाद्येति जातिपक्षे जस्यभेदे लक्षणऐक्येऽपरनास्तीति भावः॥२॥ अतिदेशेन ङित्वातिदेशेन॥२॥

=सुपजोर्दिनिः। पिदिति न्यासद्वयं विधाय योयं शब्दो वर्तिः सप्तर्थो विभिदि सर्वाश्रयणात् किमिद्ध निनोः पिदंना स्विति सदो अतेन तदभिप्रायं तु आर्ध्यं स्थाश्रयमपि त्वमादाय ङित्वातिदेशसंभवात्॥२॥ आर्धधातुकशब्दस्य चरमाद्यर्थं ठगंतत्वेनां नोदात्तत्वात् बह्वचोंतोदात्तादिति ठञाभातीसत=
=आह आर्धेति। अर्धधातुशब्दस्य सुरूपांतोदात्तः तत्र स्वभवादावर्थे बहुचर इति त्र्यन्निताद्यघुदात्तत्वमिति भावः। भवेति। तेषु भवार्धधातुकसंज्ञासर्पः। ठञंतत्वादिति। आर्धधातुकानि निवक्तव्ये आर्धधातुकीया नि सुकि स्तु प्रियतद्धितत्वस्य सूचनायेति बोध्यं॥१॥

आर्धधातुकीयानि। ति आर्धधातुके षुभं वा इति ठञंतत्वात् दंतोदात्तत्वमायात् बह्वचोंतोदात्तादिति ठञ भावेत्वछाछो भवति। नातर इस्तुङि। त्वं तिपः पित्वादप्राप्तिसंज्ञापकं सार्वधातुकाङित्वस्य ङुनियो ङित्वमज्ञापकं अस्य पित्वात् ङित्वाप्राप्तेः अपवंते अर्भवंत इति। गुणास्त्वेवंनि स त्वादंतरंगत्वाच्चैकादेशः तत्र कृते परस्येहापित आश्रितत्वात् परस्य कार्यप्रसादिवद्भावात् गुणनिषेधः स्यात्। साधारणपरिहाराभिधानाय वार्णादंगमिति नाश्रिते। प्रसज्यप्रतिषेधे तु ङित्वनिषेधः पूर्वस्य कार्ये मिति पूर्वप्रसंग वद्भावान् ङित्वाभावः।

यदयमार्धधातुकीयान्क्वाश्चितङित इत्यः करोति। चङ् ङ् जिङ् निव ध ङ् ङः। सार्वधातुकेप्येतज्ज्ञापकं स्यात्। नेत्याह। तुल्यजातीयस्य ज्ञापकं। क्वश्च तुल्यजातीयः। यथा जातीयका च्वङ् ङ् जिङ् नि बध ङ् ङः कथं जातीयका स्वैते। आर्धधातुकं। यद्येतदस्ति तुल्यजातीयस्य ज्ञापकमिति। चङ् ङौ लुङ् विकरणा नोज्ञापको स्यातां। नजि ङ् त्ने मानकाला नां। ङु नि ब्भूतकाला नां। अथ ङौ णादिकानां। नङ् शब्दोध्यन्ते यो नां तस्मात् सार्वधातुकं ग्रहणं कर्तव्यं। किं पुनरयं पर्युदासः यदन्यत्पित इत्याहो स्वित्प्रसज्यायं प्रतिषेधः पिन्नेति। कश्चात्र विशेषः। अपिन्ङिदिति चेच्छ्वेकादेशप्रतिषेध आदिवत्वात्। अपिन्ङिदिति चेच्छ्वेकादेशे प्रतिषेधो वक्तव्यः। च्यवंते प्लवंते। किं कारणं। आदिवत्वात्। पिदपि
॥ नो रादेशोऽपि तदादिवत्स्यात्। अस्त्यन्यत्पित इति कृत्वा ङित्वं प्राप्नोति॥ ॥ ॥

यद्यपि सार्वधातुकावयवस्यैकादेशस्तथापि परंप्रत्यादिवत्वादंतशब्दः सार्वधातुकमपि द्रवतीति स्याद्देव ङित्वं। च्यवे इति चोक्तमेक वचने सर्वस्यैव सार्वधातुकस्यैकादेशः॥
=परंसमुदायं प्रतीत्यर्थः॥२=
॥ तिङ् ङित्वप्रसंगः॥ ॥श्री॥ ॥७॥

=सार्वेदिति। एकादेशस्यादिनाय वौपूर्वपरयोः समुदायं प्रत्यादिवत्वात् एकादेशोऽपि तयोरेवांता दिवदिप्रर्यागादिवदिति सूत्रस्येति भावः।१=अभुपेलायायं अवेहरिति॥२=

=पूर्वेत्यादि ... कार्यमाश्रित्य ... प्रतिषेधमाधत्ते ॥१॥ = उनमस्य आदि शिष्ट्यस्य ... इत्यर्थ इति भावः ॥१॥ = ऋदुपधेभ्य इति विशिष्यो ... ॥२॥

तुदानीति ॥ यद्यप्युत्तमस्य पित्त्वं तथापि तदुक्तत्वाद्दाटः पिद्वयव्वस्यैकादेशः पित उत्तमस्यादिवदिति स्यान्ङित्वनिषेधः तुदै इत्यत्र च सर्वस्यैव पित एकादेशः पित आदिवद्ङि ति ङित्वनिषेधप्रसंगः स्यानिवद्भावादिति । यथा स्यानिकालेयथा योगं गुणप्रवृत्तिर्निहन्तीत तथा ह्यादेशे पिद्धितेत्वव्यधान बुध्या भवतः ॥ ॥ असंयोगा ॥ ॥
ऋदुपधेभ्य इति । बिभिदतुः बिभिदुरित्यादौ कित्त्वे निसंयुणस्त्वनिसः वर्तते इत्यादेतु द्वयोरप्यनिसत्वं । तत्र परत्वाद्गुणप्रसंगः पूर्वविप्रतिषेधाश्रयेण निवार्यते । न

अस्तु तर्हि प्रसज्यप्रतिषेधः पिन्नेति । न पिन्ङिदिति चेदुत्तमैकादेशप्रतिषेधः न पिन्ङिदिति चेदुत्तमैकादेशे प्रतिषेधः प्राप्नोति । तुदानि लिखानि । किं कारणं । आदिवत्वादेव । पिदपिनोरेकादेशः पित आदिवत्सात्तत्र पिन्नेति प्रतिषेधः प्राप्नोति । यथेच्छसि तथास्तु । ननु चोक्त मुभयथा च दोष इति । उभयथा न दोषः । एकादेशः पूर्वविधौ स्यानिवद्भवतीति स्यानिवद्भावाद्व्यवधानं ॥ ॥ असंयोगाल्लिट् कित् ॥ ॥ ऋदुपधेभ्यो लिटः कित्वं गुणाद्विप्रतिषेधेन । ऋदुपधेभ्यो लिटः कित्वं गुणाद्भवति विप्रतिषेधेन । वर्तते ववृधे । उक्तं वा । किमुक्तं । नवाक्त्वस्यानवकाशत्वादपवादो गुणस्येति । विषम उपन्यासः । युक्तं तत्र यदनवकाशं कित्करणं गुणं बाधते । इह पुनरुभयं सावकाशं । कित्करणं सावकाशः । ईजतुः ईजुः । गुणः सावकाशः । वर्तिता वर्द्धिता । इहोभयं प्राप्नोति । वर्तते ववृधे परत्वाद्गुणः प्राप्नोति । इदं तर्ह्युक्तमिष्टवा
(१)चीपरशब्दः विप्रतिषेधे परं यदिष्टं तद्भवतीति ॥ ॥ ॥

वाक्त्वस्येति । यथाक्त्वस्य कित्करणसामर्थ्याद्गुणो बाध्यते तथेहातिदेशसामर्थ्यादित्यर्थः । युक्तं तत्रेति । क्त्वस्य कित्करणे प्रयोजनांतरमसावकः इह तु संप्रसारणविधौ कृता र्थत्वाद्दुर्बलेनातिदेशेन प्राप्यमाणो गुणनिषेधो दुर्बलत्वाद्विधिना सह स्पर्द्धितेनाद् न्यायेन । इष्टवाचीति । तत्र कारणो वायमर्थः संगृहीतः सतु समर्थनीय इत्यर्थः ॥ ॥

=नत्वस्यानवकाशत्वादित्युक्तं ... गुणेन ... ॥१॥ = तथेति कार्यकालपक्षे ऋदुपधविषयेन ... निषेधसामर्थ्यादित्यर्थः ॥२॥ = ... ॥१॥

=श्रयसिद्धिमेवदर्शयन्निवभूवेति॰ननुकित्वविधानसामर्थ्यादनिड्लक्षणाया अपिस्युः प्रतिषेधोभविष्यतीसत आह॰गुणमात्रेनि॰ [illegible] एवंवतन्निषेधेनास्याविताघ्र्येनानिड्लक्षणावृद्धिर्निषेधकत्वेमानाभावइतिभावः॥१॥=कार्यकालपक्षेणलः कित्वविशेषेण विधानसामर्थ्यादनिड्लक्षणापिवृद्धिः प्रतिषेध्येति अनन्तं॥

इंधिभ॥ ॥किमर्थमिति। वृनापि सूत्रेणेष्टं सिध्यति मसृपिचेष्टं न सिध्यति। बंभूवेत्यत्र लक्षणत्वा [illegible] द्वंद्वेरित्स्यलक्षणं मा वात्प्रतिषेधाप्रसंगात्। गुणमात्रनिषे धएवतु बभूविषयेत्र्यहं बभूवेति चुणित्वाभावपक्षे स्यादिति भव्यः। इंधेरिति। भाषायां लिङ्ग्रामाभ्य वधानात् छंदस्यमंत्र इत्याम्प्रतिषेधादेतदुक्तं न त्वस्य भाषायां प्रयोगाभावः। तत्र छंदस्युभयथेति लिटः सार्वधातुकत्वात्सनमीध इतिदि.लान्नलोपः। आर्द्धधातुकत्वाच्च भ्रमभावः व्यत्ययो बहुलं वचनाद्वा। नित्सोवुगिति। अयोः सुप्रीसतत्स्योरि

इंधिभवतिभ्यां च॥ ॥किमर्थमिदमुच्यते। इंधेः संयोगार्थं भवतेः पिदर्थं। अप्रयोगः शक्योऽवक्तुं। कृथं। इंधेश्छंदोविषयत्वाद्भुवोवुको नित्यत्वाच्च

लिटः तान्यां किद्वचनानर्थकं। इंधेश्छंदो विषयो लिट्। नह्यंतरेणाछंदः इंधेर्लिट् लभ्यः। आमाभाषायां भवितव्यं। भुवोवुको नित्यत्वात्। भवतेरपिनि त्योवुक्। कृतेगुणे प्राप्नोत्यकृतेपिप्राप्नोति। ताभ्यां किद्वचनानर्थकं। ताभ्यामिंधिभवतिभ्यां किद्वचनमनर्थकं॥ ॥मृडमृदगुधकुषक्लिशवदव सः क्त्वा॥ ॥किमर्थमृडादिभ्यः परस्य क्त्वः कित्वमुच्यते। किदेव क्त्वा। नक्त्वासेडिति प्रतिषेधः प्राप्नोति तद्बाधनार्थं। यदि तर्हि मृडादिभ्यः परस्य क्त्वः कित्वमुच्यते नार्थो नक्त्वासेडिति कित्वप्रतिषेधेन। इदं नियमार्थं भविष्यति मृडादिभ्य एव परस्य क्त्वः कित्वं भवति नान्येभ्य इति।

हि२ ष्य१

तिनानुवर्त्तत इति भावः। एकदेशविकृतस्यानन्यत्वाच्च शङ्कांतरप्रसङ्गभावः। संसामपि वाशङ्कांतरप्राप्नोकृताकृतप्रसंगि [illegible] त्वाद्भुको नित्यत्वं। वुक्कृते गुणस्य प्राप्तिरेव नास्तीति नैतयोस्तुल्यबलत्वं॥ मृडमृद॥ मृडादिभ्य एवेति। विपरीतनियमस्तु व्याख्यानान्न भवति। मृडादिभ्यः क्त्वैव किदिति। नत्वयं निष्ठार्थो शास्त्रप्रवृत्ति

॥१ लेक्ष्यमूलत्वाद्व्याकरणस्मृतेः॥ ॥ ॥

=नन्वेवंशङ्कांतरमायितिःकामिनस्यादतआह॰सत्यामपीति॰१=शङ्कांतरमाप्यभुवोऽनित्यत्वेन परत्वाद्गुणेभाभूदितिकित्वंकर्त्तव्यमिति स्पष्टमर्थं॰=विपरीतेति॰विशेषणाभूतमृडादिसंकोचस्यन्याय्यत्वमितिभावः॥अप्रवनक्त्वासेडिति सूत्र लतासत्वंभारब्धं भाष्यकारस्तुआवश्यमात्रानुरोधेन नक्त्वा

भा० कौ० १०
१५०

लूत्वेति॥ क्त्वामात्रस्य नियमः स्यात् किं त्वं तु क्त्वातो सुन्ङ् सु नु इत्यादौ विशेषणार्थं स्यात्। एवमपीति। क्लिशः क्त्वानिष्ठयोरिति विकल्पेनेड् द्विधा नात्। अप्रस्तुतावदिति। मृडमृदवदवसां क्त्वः कित्त्वविधानं नियमार्थं गुधकुषक्लिशां नो तु रलो व्युपधादिति विकल्पे प्राप्ते निसार्थं। तत्र विधि संभवे क्लिशेरनिटः क्त्वः कित्वविधानं नियमार्थं न भवति॥ ॥रुदविद॥ ॥
सन्नर्थमिति। तत्र चरितार्थत्वादनिटः क्त्वः कित्वविधानं नियमार्थं न भवति॥ ॥इको झल्॥ ॥किमर्थमिति। इको झल् हलन्ताच्चेत्येकयोगः कर्तव्यः किमर्थं योगविभाग इति प्र
यदि तर्हि नियमः क्रियते इहापि तर्हि नियमान्न प्राप्नोति। लूत्वा पूत्वा। अत्रापि कित्वं प्राप्नोति। तुल्यजातीयस्य नियमः। क श्च तुल्यजातीयः यथा
जातीयो मृडादिभ्यः परः क्त्वा। कथं जातीयश्च मृडादिभ्यः परः क्त्वा। सेट्। एवमप्यस्ति कश्चिद्विभाषितेट् सोऽनिटां नियामकः स्यात्। अप्रस्तुताव
द्येसेट् तेषां ग्रहणं नियमार्थं भविष्यति। य इहानीं विभाषितेट् तस्य ग्रहणं विध्यर्थं भविष्यति॥ ॥हलन्ताच्च॥ ॥रुदविदमुषग्रहिस्वपिप्रच्छः संश्च॥ ॥
स्वपिप्रच्छ्योः सन्नर्थं ग्रहणं क्रियते। किदेव हि क्त्वा॥ ॥इको झल्॥ ॥किमर्थमिकः परस्य सनः कित्वमुच्यते। इकः कित्वं गुणो मा
भूत्। इकः कित्वं क्रियते गुणो मा भूदिति। चिचीषति। तुष्टूषति। नैतदस्ति प्रयोजनं। दीर्घारंभात्। दीर्घत्वमत्र बाधकं भविष्यति। कृते भवे
त्। कृते खलु दीर्घत्वे गुणः प्राप्नोति। अनर्थकं तु। अनर्थकमेवं सति दीर्घत्वं स्यात्॥ ॥ ॥ ॥
प्राप्यर्थे गवक्ष्यमाणः अज्झनगमां सनीति दीर्घत्वमिति। अज्झनगमां सनीति दीर्घत्वं नाप्राप्ते गुणे आरभ्यमाणं तस्य बाधकमिति भावः। कृते भवेदिति। शास्त्रमावर्त्तमानं धर्मसा
धनं जपादिवदिति भावः। अनर्थकं त्विति। शास्त्रस्य वैकात्म्ययोगाद्दुर्मनं तु शास्त्रप्रवृत्तिमात्रादिसर्थः॥ ॥ ॥ ॥ राम० १५०

ह्रस्वार्थमिति। ह्रस्वानामेव दीर्घविधानसामर्थ्याद् गुणे न स्यात् दीर्घाणां तु प्रागेव तादृप्यात् रूपविशेषसंपत्तिफलकृताच्छास्त्रस्य दीर्घे शास्त्रप्रवर्त्तनेनाद् गुणप्रसंगः। दीर्घाणाम
पीति। गुणप्रकरणार्थं दीर्घेष्वपि दीर्घशास्त्रप्रवर्त्ततेऽप्येवं स्यादेः। नहि भुक्तवानिति। तत्त्रिफलं भोजनं फले संपन्ने पुनर्नैव प्रवर्त्तते। ननु चेति। तृप्तोऽपि पुनर्भुङ्क्ते इत्यर्थः। भा
वमिति। कर्त्तव्यं भोजनादि तत्प्रिविशेषाद्यर्थिभिरित्यर्थः। नकिंचिदिति। नहि दीर्घाणां दीर्घतरः संपाद्यत इत्यर्थः। अग्निवदिति। दग्धस्याग्न्यन्तरादहनादहतीति भावः। इहा
प्ययोग्यत्वाद् दीर्घेषु शास्त्रेण न प्रवर्त्तितव्यमित्यर्थः। दीर्घाणामपीति। ह्रस्वस्य दीर्घरूपसंपादनार्थं दीर्घे शास्त्रं प्रवर्त्तते। दीर्घेषु तद्रूपप्रतिबन्धि गुणनिवर्त्तनेन स्व

नानर्थकं। ह्रस्वार्थं। ह्रस्वानां दीर्घवचनसामर्थ्याद् गुणो न भविष्यति। भवेद् ह्रस्वानां दीर्घवचनसामर्थ्याद् गुणो न स्यात्। दीर्घाणां तु प्रसज्यते। दीर्घाणां
तु खलु गुणः प्राप्नोति। ननु च दीर्घवचनसामर्थ्याद् गुणो न भविष्यति। न दीर्घाणां दीर्घाः प्राप्नुवंति। किं कारणं। नहि भुक्तवान् पुनर्भुङ्क्ते कृतश्मश्रुश्च
पुनः श्मश्रूणि कारयति। ननु च पुनः प्रवृत्तिरपि दृष्टा भुक्तवानपि पुनर्भुङ्क्ते कृतश्मश्रुश्च पुनः श्मश्रूणि कारयति। सामर्थ्याद्धि पुनर्भाव्यं सा
मर्थ्याद्धि पुनः प्रवृत्तिर्भोजनविशेषाच्छिल्पविशेषाद्वा। दीर्घाणां तु पुनर्दीर्घवचने न किंचित्प्रयोजनमस्ति। अकृतकारि खल्वपि शास्त्रमग्निव
द्भवति। तद्यथा। अग्निर्यददग्धं तद्दहति। यद्दग्धं तन्न दहति। दीर्घाणामपि दीर्घवचनमेतत्प्रयोजनं गुणो माभूदिति। कृतकारि खल्वपि शास्त्रं प
र्जन्यवत्। तद्यथा। पर्जन्यो यावदूनं पूर्णं च सर्वमभिवर्षति। यथैवं तर्हि दीर्घवचनसामर्थ्याद् गुणो न भवतु सैव मिरित्वमपि न प्राप्नोति। चिकीर्षति। जिही
र्षतीति। इत्वं दीर्घसंश्रयं। नाकृते दीर्घे इत्वं प्राप्नोति। किं कारणं। कृत इत्युच्यते॥ ॥ ॥ ॥

रूपप्रसापत्तये। यथा मो राजि समः क्वाविति मकारस्य मकार इति भावः। तत एव ह्रस्वानामपि दीर्घाणामपि येननाप्राप्तिन्यायेन दीर्घेण गुणो बाध्यत एवायथैवेति। दीर्घारंभा
द्विकृते नेव दीर्घेण स्यात् तस्मिमिति भावः। इत्वमिति। यद्यंतरेण दीर्घविधानं प्राप्नुयादित्वं तदा दीर्घेण बाध्येत पर्तस्तु दीर्घाश्रयमेवेत्वं तदानन्तरेव फलं दीर्घस्य संजातमि
ति इत्वप्रवर्त्तिष्यते। तथा चोच्यते। यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्यत इति॥ ॥ ॥

दीर्घोणामपीति॥ इलोलोपस्यां गुणवृद्धी भवतो विप्रतिषेधेनेति गुणप्रसंगादिति भावः॥ ज्ञीप्सतीति॥ असति किले गुणवत्सिलोपस्यापि विशेषाभावात् दीर्घेण बाधनं स्यादित्यर्थः॥ काम्स्त्वादिति॥ यथान्यत्र क्षिप्तानां शरादीनामन्यत्र निपातो संभाव्य एवं किल णिलोपयोरपि संबंधो न संभाव्यत इत्यर्थः॥ एषोभिसंबंध इति॥ ज्ञीप्सतीति रोगुणलोपदीर्घत्वानि प्राप्नुवंति॥ तत्रासति किले नवकाशत्वादिशेषाभावाच्च गुणवत्सिलोपस्यापि दीर्घत्वं बाधकं स्यात्॥ पूर्वं यद्वा पुरस्तादपवादा अनंतरान्विधीन्बाधंते नोत्तर

भवेद्ध्रस्वानां नाकृते दीर्घे कृदित्वं स्यात्॥ दीर्घोणां तु खल्व कृते दीर्घत्वे कृदित्वं प्राप्नोति॥ दीर्घोणां नाकृते दीर्घे॥ दीर्घोणामपि नाकृते दीर्घे कृदित्वं प्राप्नोति॥ यदा दीर्घत्वेन गुणो बाधितः ततउत्तरकालं कृदित्वं भवति॥ णिलोपस्तु प्रयोजनं॥ इदं तर्हि प्रयोजनं॥ णिलोपो यथा स्यात्॥ ज्ञीप्सतीति॥ काम्स्त्वाः कनिपतिताः॥ क्व किल्त्वं क्व णिलोपः॥ कोवाभिसंबंधः॥ यत्सति किले णिलोपः स्याद् असति किले न स्यात्॥ एषोभिसंबंधः॥ यत्सति किल्त्वे सावकाशं दीर्घत्वं परत्वात् णिलोपो बाधते॥ तत्र णिलोपस्यावकाशः॥ कारणा हारणा॥ दीर्घत्वस्यावकाशः॥ चिचीषति॥ तुष्टूषति॥ इहोभयं प्राप्नोति ज्ञीप्सतीति॥ परत्वात् णिलोपः॥ ×असति पुनः किले नवकाशं दीर्घत्वं यथैव गुणं बाधते एवं णिलोपमपि बाधेत×

णानिति णिलोपस्यैव बाधकं न तस्मात् गुणस्तु स्यादेवासति तु किले नैव गुणो बाधित इति चिचीषती स्यादिषु लब्धावकाशं दीर्घत्वं परत्वात्सिलोपेन बाध्यते॥ ननु च असत्यपि किले येन नाप्राप्तन्यायेन गुणस्यैव बाधकं दीर्घत्वं भविष्यति न णिलोपस्य गुणबाधे न च सावकाशं दीर्घत्वं परत्वात्सिलोपेन बाधिष्यत इति नार्थः किलेन॥ नैतदस्ति॥ पुरा बाध्यं भेदेनापेक्ष्यते इदं सर्वं तत्प्राप्तमिदं तु कचिदेवेति तदायं न्यायः॥ यदा तु बाध्यमात्रमपेक्ष्यते विध्यंतरेण व्याप्तो विषयो न कश्चिदस्तीति तदा सर्वस्यैव बाधया भाव्यं॥

=यत्रेति। यथाविभाषादिकस्मात्सङ्ख्यादेर्नास्य शब्दस्य संज्ञाशब्दे तेन तन्त्रानायलक्षणपर्यालोचनमित्यर्थः। प्रयोगकृतेति। तत्र मीयतरूपाद्योगनिष्ठं। ३= परत्वादिति। यथा निमित्सतीत्यत्रापवादत्वाद्दीर्घेण गुणस्य बाधे सति तत्र बाध्यसामान्यचिंतायां णिलोपस्यापि बाधेन भाव्यं=
=तथापि दीर्घसमानकालिकस्य णिलोपस्य गुणस्य बाधे पि दीर्घे कृते स्थानिवत्वेन प्राप्त णिलोपः स्यादेव। न च दीर्घविधानसामर्थ्यं। इत्स्याभावे सामान्यग्रहणसंपादनेन कृतार्थत्वात्। एवं च परत्वादित्यस्य दीर्घोत्तरकालं प्राप्तत्वादित्यर्थः॥ २ =सामान्यग्रहणे सविशेषणस्योक्तप्रक्रियाभाष्यकृता...

असत्यपीति॥ मीनातिमिनोत्योः सन्पूर्वकाशत्वाद्गुणं बाधित्वा दीर्घत्वं प्रवर्त्तते। ततो मीग्रहणेन ग्रहणादिस्वभावेन प्रतिपदविहिते न गुणे बाध्यते कृते च समावे हलंताच्चे
ति कित्वाल्लघूपधगुणाभावः। तत्र सामान्यग्रहणे चरितार्थत्वाद्दीर्घविधानस्य ज्ञीप्सतीति परत्वाण्णिलोपो भविष्यतीति नार्थः कित्वेन। ननु तथा क्षणिकत्वान्मिनोतेर्मीरूप
स्य मीग्रहणेन प्राप्नोति। नैष दोषः। यत्र लक्षणमभिनिर्वर्त्तितेन शब्दरूपमपेक्ष्यते तत्र लक्षणप्रतिपदोक्तयोरिति परिभाषोपस्थानं न तु यत्र प्रयोगोपाश्रयणं तत्र।
ननु एवमसत्यपि मीग्रहणे न ग्रहणे मीनातीत्यादिना आलेकृते मामाद्यग्रहणेष्वविशेषइति माग्रहणेन ग्रहणादिस्वभविष्यतीति सामान्यग्रहणमपि दीर्घस्य प्र
योजनं नोपपद्यते। एवं तर्हि दोषांतराभिधानेनास्य पूर्वपक्षस्य निराकरणं तथाभाष्यकारेणैतत्सुष्ठु निरूपितं। तदेव दोषांतरमाह। यथैवेति। सामान्यग्रहणाउ

=णिलोपप्रसङ्गः किंतु बाध्यसामान्यचिंतया गुणवत् णिलोपं बाधित्वा दीर्घे कृते स्थानिवत्वाण्णिलोपः स्यात् हि सामान्यग्रहणे न चरितार्थस्य दीर्घस्य ... निरनार्थकं ... निबाध्यसामान्यचिंतेयं ... सामान्यग्रहणमेवास्त्विति नास्ति कुत्रापि दोषः॥ ४=

असत्यपि कित्वे सावकाशं दीर्घत्वं। कोवकाशः। इत्स्याभावः। निमित्सति। प्रनिमित्सति। मीनातिमिनोत्योर्दीर्घत्वे कृते मीग्रहणेन ग्रहणं यथा
स्यात्। यथैव तर्ह्येसति कित्वे सावकाशं दीर्घत्वं परत्वाण्णिलोपो बाधते एवं गुणोपि बाधेत। तस्मात्कित्वं वक्तव्यं। इकः कित्वं गुणो मा भूद्दीर्घारंभात्कृ
ते भवेत्। अनर्थकं तु ह्रस्वाणां दीर्घाणां तु प्रसज्यते। सामर्थ्यादिपुनर्भाव्यमृद्दित्वं दीर्घसंश्रयं। दीर्घाणां नाकृते दीर्घे णिलोपस्तु प्रयोज
नं॥ ॥ हलंताच्च॥ अयुक्तोयं निर्देशः। कथं हि इको नाम हलंतं स्यात् दन्यस्यान्यः। कथं तर्हि निर्देशः कर्त्तव्यः। इग्वतो हल इति॥ ॥

प्रयुक्तत्वाद्दीर्घस्य नानवकाशत्वं इति द्वाभ्यामपि गुणणिलोपाभ्यां दीर्घत्वं बाध्यते इति कर्त्तव्यं कित्वं। न च दीर्घविधानस्य कुङ् शब्द इति धातुरवकाशः चुकूषत इति। यस्मात्कु
ङ् शब्द इति पाठः तत्र कुटादित्वान्ङित्वे सति गुणाभावाद्दीर्घस्य श्रवणं सिद्धं। वेदलोकयोश्च कूतशब्दस्य प्रयोगो दृश्यते। गुङ् अव्यक्ते शब्दे इति चेत्तर्हि निगमामिति ब्रूयात्
किं प्रसाधनेन॥ ॥हलंताच्च॥ ॥अयुक्त इति। अंतशब्दमवयववचनं मत्वा पर्यनुयुंक्ते अन्यस्यान्यइति। असंतभेदमनेन दर्शयति। अवयवावयविनोर्भेदविवक्षा
पि भवति। तत्रैनां पटइति। अभेदविवक्षापि भवति। पटीभवंति तंतवइति। इग्वतो हलइति। हलंतादित्यर्थः॥ ॥

मा०कै०प्र०
१५२
152

यियक्षतीति। अत्र संप्रसारणप्रसंगः। तद्यः सामीप्य इति। एवं च हलन्त्वात् सावं तमश्चेति कर्मधारयः। निपातनाच्च विशेषणस्य परनिपातः। एवमपीति। व्यक्तिनिर्दे
श इति भावः। अपत्ति कित्वेन लोपो न स्यात्। दंभेरिति। वर्णग्रहणे जातिग्रहणमिति निपातएकाजनाङि. सत्र एकग्रहणे न ज्ञापितं। न चात्र व्यक्तिगतमेकत्वं अपितु
जातेः स्वगतं। तत्र पक्षान्तावत् व्यक्तिव्यतिरेका जातिः तस्याश्च व्यक्तिद्वारकाः सामीप्यादयो धर्माः तदा तस्या एकत्वादिकृत्समीपत्वे सनश्च परत्वं तदपेक्षमस्तीति सि
द्धं धिप्सतीति कित्वं। हकारादिषु चाभिन्नप्रत्ययाभिधानाद्धल्त्वजातेः सद्भावः। यदापि सकलभेदाव्यक्त्याप एव जातिरिति पक्षः तदाभेदसुरासादभेदाश्रयणाद्

यद्येवं यियक्षति। अत्रापि प्राप्नोति। एवं तर्हि इगुपधाद्धलन्तादिति वक्ष्यामि। एवमपि दंभेर्न प्राप्नोति। सूत्रं भिद्यते यथान्यासमेवास्तु। च१
ननु चोक्तमयुक्तोयं निर्देश इति। नायुक्तः। अयमंतशब्दोस्त्येवावयववाची। तद्यथा। वस्त्रान्तः वसनान्त इति। वस्त्रावयवो वसनावय
इति गम्यते। अस्ति सामीप्ये। तद्यथा। उदकान्तं गत इति। उदकसमीपं गत इति गम्यते। तद्यः सामीप्ये वर्त्तते तस्येदं ग्रहणं। एवमपि
दंभेर्न सिध्यति। यो ह्यत्र इक्समीपे हल् न तस्मादुत्तरः सन्। यस्मादुत्तरः सन् नासाविक्समीपे। एवं तर्हि दंभेर्हल्ग्रहणस्य जातिवाचक
त्वात्सिद्धं। हल्जातिर्निर्दिश्यते। इक उत्तरया हल्जातिरिति॥ ॥लिङ्सिचावात्मनेपदेषु॥ कथमिदं विज्ञायते आत्मनेपदयो
॥लिङ्सिचाविति। आहोस्विदात्मनेपदेषु परतो यौ लिङ्सिचाविति॥ ॥

षसिद्धिः॥ ॥लिङ्सिचौ॥ ॥कथमिति। आत्मनेपदेष्विति सप्तमी श्रुतस्यार्थद्वयं न लभ्यते। तत्र यदि निर्द्धारणे सप्तमी। तदा तुल्यजातीयस्य निर्द्धारणा
ल्लिङ्‌विशेषितः स्यात्। लिङ्शब्देन लिङादेशग्रहणात्। अथ परसप्तमी तदा सिजेव विशेष्यते न लिङ्। सीयुडादिसमुदायो लिङ्शब्देन गृह्यते इति तस्यात्म
नेपदपरत्वाभावः। न चानयोर्भिन्नयोरर्थयोः सह विवक्षा संभवतीत्येकशेषस्याप्रयोगः॥ ॥ ॥

राम०
१५२

सिच्च विशेषित इति॥ आत्मनेपदपरत्वादुपचारात् सिजेवात्मनेपदमुच्यते। गौणमुख्यार्थयोरात्मनेपदशब्दयोः सारूप्यमात्रमति बहुस्वकृयोपुः करिष्यत इत्यर्थः। आत्म

किं चातः। यदि विज्ञायते आत्मनेपदं यो लिङ् सिचाविति लिङ् विशेषितः सिज विशेषितः। अथ विज्ञायते आत्मनेपदेषु परतो यो लिङ् सिचा
विति सिज्विशेषितः लिङ् विशेषितः। यथेच्छसि तथास्तु। अस्तु तावदात्मनेपदं यो लिङ् सिचाविति। ननु चोक्तं लिङ्विशेषितः सिज विशेषि
त इति। सिच्च विशेषितः। कथं। आत्मनेपदं सिज्नास्तीति कृत्वा आत्मनेपदे परे सिचि कार्यं विज्ञास्यते। अथवा पुनरस्त्वात्मनेपदेषु परतो
यो लिङ् सिचाविति। ननु चोक्तं सिज्विशेषितो लिङ् विशेषित इति। लिङ् विशेषितः। कथं। आत्मनेपदे परतो लिङ्नास्तीति कृत्वा आत्मने
पदे लिङि कार्यं विज्ञास्यते। नैव वा पुनरर्थो लिङ् विशेषणेनात्मनेपदग्रहणेन। किं कारणं। ऋलिति वर्त्तते। आत्मनेपदेषु चैव लिङ् ऋ
त्वादिः न परस्मैपदेषु। तदेतत्सिज्विशेषणमात्मनेपदग्रहणं। अथ सिज्विशेषणे आत्मनेपदग्रहणे सति किं प्रयोजनं। इह तावन्मा
भूत् अयाक्षीत् अवाप्सीत्। नैतदस्ति। इक इति वर्त्तते। एवमप्यचैषीत् अनैषीत्। अत्रापि प्राप्नोति। हलन्तादिति वर्त्तते। एवमप्यकोषीत्
अमोषीत्। अत्रापि प्राप्नोति। नैतदस्ति। ऋलिति वर्त्तते। एवमप्यभैत्सीत् अच्छैत्सीत्। अत्रापि प्राप्नोति। नैतदस्ति। इग्लक्षणयोर्गुणवृद्ध्योः
प्रतिषेधः। न चैषेग्लक्षणा वृद्धिः। इदं तर्हि प्रयोजनं इह मा भूत् असाक्षीत् अद्राक्षीदिति। किं च स्यात्। इग्लक्षणा अमागमो न स्यात्॥ ॥

नेपदे लिङीति। अवयवगतं पौर्वापर्यं समुदाये आश्रयिष्यत इत्यर्थः। अथ वा तन्त्रेण शब्दद्वयोच्चारणादर्थद्वयं लभ्यते। नैव वेति। संभवव्यभिचाराभ्यां सिजेव विशे
(ष्यते न तु लिङ् इत्यर्थः॥ ॥ ॥ ॥

=तदेनविवक्षायांतुछोनस्मात्किन्त्वस्मादिति भावः॥२= बहुव्रीहिस्तुलुकवोऽजपीयाविसाह तकारश्रदिति तस्यभावइति तकारेश्रत्संज्ञोसर्थः॥१=

स्याघ्वोरिच्च॥ ॥इच्चकस्येति। कथं पुनरत्र षष्ठी यावता हेतुपरः श्लोकेन मयुक्त इति हेतुतृतीयया भाव्यं नैष दोषः। हेतुरूपतया अविवक्षणात् संबंधिरूपेण विवक्षितत्वात्। यथा मदीयाः पुत्रा इति शेषिकः प्रत्ययः तदुसन्निकाले प्रसरूपत्वस्याविवक्षणात्। तकार इत् तकारे तत्तस्य भावस्तत्कारे त्वं किमर्थं क्रियते। दीर्घो माभूदिति। अन्तरतम्यात्प्राप्नोतीति भावः। भाष्यमाणोऽणसवर्णान्नगृह्णातीति सेषपरिहारो निस्तत्वान्नोक्तः। कचिद्भाव्यमानेनापि सवर्णग्रहणात्। यथा अमूभ्यामिति सादारूकारो दीर्घः संभवति। परिहारांतराभिधानाद्या। अंतरेणापीति। इकारविधानेनापीसर्थः। किं त्वतुक्तं त्वमेवा तेन विना ईत्वस्य प्राप्यभावात्। अनंतर इति। अभ्यासदृशादेशे क्रियमाणेऽर

=इत्यस्यतकारेत्वंकिम=
=र्थमित्यर्थः॥२=

स्याघ्वोरिच्च॥ ॥इच्चकस्य तकारेत्वं कस्य हेतो रिकारस्तपरः क्रियते। दीर्घो माभूत्। दीर्घो माभूदिति। कृतेपि सः। अंतरेणाप्यारंभे दीर्घोत्र सिद्धः। घुमास्थागापाजहातिसां हलीति। अनंतरे प्लुतो माभूत्। इदं तर्हि प्रयोजनमनंतरे प्लुतो माभूदिति। कुतो नु खल्वेतदनंतरार्थे आरंभे ह्रस्वो भविष्यति। न पुनः प्लुत इति। प्लुतश्च विषये स्मृतः। विषये प्लुत उच्यते। यदा च विषयो भवितव्यमेव तदा प्लुतेन। इच्चकस्य तकारे त्वं दीर्घो माभूदिति कृतेपि सः। अनंतरे प्लुतो मा भूत् प्लुतश्च विषये स्मृतः॥ ॥श्री॥ ॥

सर्थः। प्लुतश्चेति। अनेन तपरत्वं प्रत्याख्यायते। यद्यनेन प्लुतो विधीयते तदा यत्रापि विषयेऽनंतरस्यापि प्रश्नाख्यानयोरित्यादिना प्लुतो विहितस्तत्राप्यनेन विधीयेत। अस्मिन्नुक्ते पूर्वत्रासिद्धमिति साष्टमिकस्य प्लुतस्यासिद्धत्वात्। ततश्च पक्षे अनुवाददोषः प्राप्नोतीति ह्रस्व एव भवति। अन्ये तु तपरत्वमनेन समर्थितमिति व्याचक्षते। अनंतरे प्यारे शेश्रूयमाणे दीर्घ एव स्यात्। [illegible]। ननु सिद्ध एव दीर्घ इत्युक्तं सिद्धस्यापि पुनर्विधानं प्लुतनिवृत्त्यर्थं स्यात्। माभूत्प्लुत इति चेत्। तन्न। प्लुतश्च विषये स्मृतः। स चासति तपरत्वे न प्राप्नोति निर्दीर्घनिवृत्त्यर्थं तपरत्वं स्थितं। प्लुतविधौ तु वाक्यस्य टेरित्यधिकारात् कथमिकारस्य प्लुतः स्यादिति चिंत्यमेतत्॥ ॥ ॥

=शक्ते अरद्या आदेशे श्रूयमाणेपीसर्थः॥२= ननु किमिति तत्र प्लुत इष्यते इति शंकते मा भूदिति स्म तद्विति एवं च प्रश्नाख्यानादि विषये तस्य च वाक्यतन्निवृत्त्यर्थं विधानमिति भावः॥१= प्लुत इति अनंतरस्यापि इत्यस्यायमर्थो नंतरस्य परस्य टेः प्लुतो पिनावाक्यस्य चेदिति=
=तन्नेति अस्मिन्पक्षे कुतो नु खल्वेतदित्यादि भाष्यमेवं व्याख्येयं अनंतरार्थे अभ्यासस्य ईत्वस्याप्राप्तौ योऽयमारंभ अतः ह्रस्वो दीर्घ एव भविष्यति न पुनः प्लुत इति कुतो नु खल्वेतत् प्लुतो भावः। प्रियाणां वाक्ये नैव संबंधे तेन तत्र संबंधेन पदेनापीति च भाष्यतात्पर्यं॥१=
प्लुतो भेदयोगतादिति॥१=

नक्त्वासेट्॥ ॥क्तेः किक्त्वेइति। अकारप्रश्लेषः। निष्ठायामिति। शीङादिभ्य एव परा निष्ठा न कि दिति नियमः विपरीतस्तु निषेधेतिव्याख्यानान्न भवति। परोक्षायामिति। पूर्वोचार्यप्र
सिद्ध्या परोक्षा लिडुच्यते। अस्त्वत्रेति। प्राप्नोतु कित्वमिसर्थः। ननु निर्दिष्टस्य निषेधः शक्यः कर्तुं उपास्थायिषातामिति। स्था स· आ ता· इति स्थिते इत्वं च प्राप्नोति चिण्वद्भा

×रुलिति×४

नक्त्वासेट्॥ ॥नसेडिति क्तेः किस्त्वे। नसेडिसेव सिद्धं नार्थः क्त्वाग्रहणेन। निष्ठायामपि तर्हि प्राप्नोति गुधितः गुधितवानिति। निष्ठायाम
वधारणात्। निष्ठायामवधारणान्न भविष्यति। किमवधारणं। निष्ठा शीङ् स्विदि मिदि क्ष्विदि धृष इति। परोक्षायां तर्हि प्राप्नोति। किं चस्या
त्। पपिव। पपिम। क्किति साकारलोपो न स्यात्। मा भूदेवमिटी त्येवं भविष्यति। इदं तर्हि जग्मिव। जघ्निव। क्किति सुपधालोपो न स्यात्। ज्ञा
पकान्न परोक्षायां। ज्ञापकात्परोक्षायां न भविष्यति। किं ज्ञापकं। सन्निकल्त्वग्रहणं विदुः। यदयमिकौ कल्त्वग्रहणं करोति तज्ज्ञापयत्या
चार्योऽस्योपदेशिकस्य कित्वस्य प्रतिषेधो नातिदेशिकस्येति। कथं कृत्वा ज्ञापकं। कल्त्वग्रहणमनर्थकं स्यात्। अस्त्वत्र कित्वं न
सेडिति प्रतिषेधो भविष्यति। पश्यति त्वाचार्य औपदेशिकस्य कित्वस्य प्रतिषेधो नातिदेशिकस्येति ततो कल्त्वग्रहणं करोति। नैतदस्ति ज्ञा
पकं। उत्तरार्थमेतत्स्यात्। स्थाघ्वोरिच्च। कृत्वा दोषः यथा स्यादिह मा भूत् उपास्थायिषातां उपास्थायिषत॥ ×स्येतत्प्रयोजनं कृत्वादोषः यथा स्यादिह मा

वद्भावात्तत्र परत्वाच्चिण्वद्भावो युक् प्राप्नोति वृद्धिश्च तत्र हि च्छपवारत्वाद्युगागमः। तत्र कृते यकारस्येत्वमसंगतः न च पुनर्वृद्धिः लभ्यते। पूर्वमेव युका बाधितत्वादिति भावः॥

=महतस्येति=कृन्नेभ्यइस्तेनेन भाष्यस्येसर्थः। अन्यथारेफाहल्निधाने कुराजेसादेङीअसत्येतेतिभावः॥१= लस्यभेदाल्लक्षणभेदआश्रीयत इतिभावः॥२= अंजेर्नैश्रीति क्सेोरण्निषेधे वस्वेकाजादित्विरुतद्धित्वाभेकाचां विधीयते। अथवा क्त्रिसनेन भस्याश्रयस्यासिद्धत्वात्तस्यानित्यमनाश्रित

भा० कै० प्र०

१५४

१५५

असतिकित्त्वे इति॥ इल्ग्रहणस्य ज्ञापकत्वं न तावत् स्थितमित्यातिदेशिकस्यापि कित्त्वस्य नेड्ङित्तिनिषेधो भवतीत्यभिप्रायः। सुधीवनीति। अनो बहुव्रीहेरिति ङीप्रतिषेधः। नतु रेफस्यापि सतु सन्नियोगशिष्टानामन्यतरापाये उभयोरप्यपाय इति न्यायान्निवर्तते। अयं न्यायो विल्त्वकादिभ्यश्छस्य लुगित्यत्र छग्रहणेन ज्ञापितः। अस्त्वेत्येति। यकारस्यकृते इत्वे वृद्धिर्भविष्यतियुगागमेन त्वाकारस्य वृद्धिर्बाध्यते न त्विकारस्यापि। आजिवानिति। इदं नोपपद्यते। अत्र हि नलोपे कृते द्विर्वचनं

इत्वं कित्सन्नियोगेन। कित्त्वसन्नियोगेनेत्वमुच्यते। तेनासति कित्त्वे इत्वं न भविष्यति। रेफस्तु तस्य सुधीवनि। तद्यथा। सुधीवा सुपीवेति ङीप्सन्नियोगेन रउच्यमानो सतिङीपि न भवति। अथवा स्त्वेत्वे। कारूपसिद्धिः। हिंसेरेतयामाया देशो न विषयति। वसु स्थिते वसुथेन हिल्ग्रहणं कर्तव्यं। वसो सौ परेशिकं कित्त्वं। किं च स्यात्। पपिवान् तस्थिवान्। किं। तीसाकार लोपो न स्यात्। मास्त्वेवमिटीसेवं भविष्यति। इदं तर्हि जग्मिवान् जघ्निवान्। किं। तीसुपधालोपो न स्यात् वस्वर्थे किदिति देशात्। अस्त्वंत्रो परे शिकस्य कित्त्वस्य प्रतिषेधः। आतिदेशिकमत्र कित्त्वं भविष्यति। यत्र तर्हि तन्नातिदिश्यते। अजेः आजिवानिति। एवं तर्हि छान्दसः क्वसुः लिट् छन्दसि सार्वधातुकं भवति। तत्र सार्वधातुकमपित् ङिद्वती सुपधालोपो भविष्यति। निगृहीतिः प्रयोजनं। इदं तर्हि प्रयोजनं। इह मा भूत्। निगृहीतिः ~~[struck through]~~ उपस्निहितिः निकुचितिः। तत्र हिल्ग्रहणं कर्तव्यं। न कर्तव्यं॥ ॥

मपि२

चने स्कोदे शेच वस्वेकाजाद्घसामिती डागमः। तत्र हि कित्त्वप्रतिषेधान्नलोपनिवृत्तौ द्विहल्त्वान्नुडिसस्सेकाच्त्वाभावादिण् निवृत्तौ न लोपादीनां चक्रकप्राप्तिः। चक्रके च चेष्टतो व्यवस्थाभाष्यकारेण तु परिहारान्तरसद्भावादेष परिहारो नाश्रितः॥ निगृहीतिरिति। तितुत्रेष्वग्रहादीनामितीडागमः॥ ॥ ॥

रा० म०

१९५

=नुटएकादेशपवादत्वान्नित्वेनोर्वचसप्तिन्नेयं॥२=

भपरतिरभिमिछिर्वाक्यितविभाषासमासेअन्यपदेनसंगाधेसाङ्कः॥१८

क्त्वा च विग्रहादिति। विग्रहो विभागो योगस्य करिष्यत इत्यर्थः॥ ॥उदुप॥ ॥उदुपधाच्छप इति। धापः संबंधी॥ शब्विकरणोयस्तस्मादित्यर्थः॥ ॥पूङः॥ ॥पू
ङ इति। सेडिरन्यतरस्यामिति चानुवर्त्तनात् सेटो रेव क्त्वानिष्ठयोः कित्वविकल्पः स्यात्। ततश्च पुविला पुवित इति पक्षे स्यात्। स्पष्ट तिचेडागमः। पूङः स्वेति विकल्पेन हि द्विधा

क्त्वा च विग्रहात्। उपरिष्टाद्योगविभागः करिष्यते। न सेट् निष्ठा शीङ् स्विदिमिदिक्ष्विदिधृषः। मृषस्तितिक्षायां। उदुपधाद्भावादिकर्मणोरन्यतरस्यां।
पूङः॥२ ततः पूङः स्व निष्ठा सेट् क्लिन्नं भवति। ततः क्त्वा च। क्त्वा च सेड् क्लिन्नं भवति। पूङ इति निवृत्तं। न सेडिति निवृत्तेऽकित्वे निष्ठायामवधारणात्। ज्ञापकात्
त्वपरो क्त्वायां स निरुत्वग्रहणं विदुः। इत्वं कित्सन्नियोगेन रेणानुल्यं सुधीवनि। वस्त्वर्थे कि दती देशा कृहीतिः क्त्वा च विग्रहात्॥ ॥उदुपधाद्भा
वादिकर्मणोरन्यतरस्यां॥ ॥इहकस्मान्न भवति गुधितः गुधितवान्। उदुपधाच्छपः। शब्विकरणोऽपेक्ष्यते। पूङः क्त्वा च॥ ॥
पूङः क्त्वानिष्ठयोरिडि वा प्रसंगः सेट्प्रकरणात्। पूङः क्त्वानिष्ठयोरिडि विभाषा प्राप्नोति। किं कारणं। सेट्प्रकरणात्। सेडिति वर्त्तते। न वा सेट् कितवं
त्वस्या किदाश्रयत्वादनिटि वा कित्वं। न वा एष दोषः। किं कारणं। सेट्त्वस्या किदाश्रयत्वात् किदाश्रयं सेट्त्वं यदा कित्वं तदेडा भवितव्यं। सेट्त्वस्या
किदाश्रयत्वादनिट्येव विभाषा कित्वं भविष्यति। इड्विधौ पूङो ग्रहणं क्रियते। तेन वचनादिट् सेट्प्रकरणाच्च इट्येव विभाषा कित्वं प्राप्नोति।
इड्विधौ त्वग्रहणं। इड्विधौ हि पूङो ग्रहणं न कर्त्तव्यं भवति॥ ॥ ॥

नाता नवेति। इड्विधौ पूङः स्वेति सूत्रं वार्त्तिककारः प्रत्याचष्टे। तच्चानिटोरेव क्त्वानिष्ठयोरनेन कित्वं विकल्प्यते। न च यदा कित्वं तदा श्र्युकः कितीति निषेधात् क्त्वा
इति। यदा त्वकित्वं तदेडुणयोः पविला पवित इति भवति॥ ॥ ॥श्री॥ ॥

भा०कौ०प्र०
१९५
155

भारद्वाजीपाठ इति। लाघवमनादृत्य सूत्रकारेण पृ. ङ्. क्षेतीड्विधौ पठितं रहन्तु विकल्पो नानुवर्त्तते उत्तरत्र चाग्रहणादिति सिध्यतीष्टमिति भावः। उत्तरार्थमिति। न क्त्वा सेडिति
किल्वप्रतिषेधस्य सिद्धत्वात्॥ ॥तृषिमृषि॥ ॥पूजार्थमिति। शास्त्रस्य पूजापारं पर्यं प्रतिपादनेनानादित्वात्प्रामाण्यप्रतिपादनात्॥ ॥रलो व्युः॥ किमिदमिति।
किमियमप्राप्ते विभाषा आहोस्वित्प्राप्ते इति प्रश्नः। तत्र चाप्राप्तविभाषायां सत्यां एवाप्राप्ते कित्वे पक्षे विधीयते इति क्त्वानुवृत्तिरनर्थिका। नहि तस्य कित्वे विधेयं सत एवभा

क्त्वानिष्ठयोः १

भारद्वाजीयाः पठन्ति। नित्यमकित्त्वमिडाद्योः क्त्वाग्रहणमुत्तरार्थं। नित्यमकित्त्वमिडाद्योरिति सिद्धं। कथं विभाषामध्येयं योगः क्रियते विभाषा
मध्ये च ये विधयस्ते नित्या भवन्ति। किमर्थं तर्हि क्त्वाग्रहणं। क्त्वाग्रहणमुत्तरार्थं। उत्तरार्थं क्त्वाग्रहणं क्रियते। नोपधात्थफान्ताद्वा। वञ्चि
लुञ्च्यृतश्चेति॥ ॥तृषिमृषिकृशेः काश्यपस्य॥ ॥काश्यपग्रहणं किमर्थं। काश्यपग्रहणं पूजार्थं। वेत्येव वर्त्तते॥ रलो व्युप
धाद्धलादेः संश्च॥ ॥किमिदं रलः क्त्वासनोः कित्वं विधीयते आहोस्वित्प्रतिषिध्यते। किञ्चातः। यदि विधीयते क्त्वाग्रहणमनर्थकं।
क्तिदेव हि क्त्वा। अथ प्रतिषिध्यते सन्ग्रहणमनर्थकम्। अकिदेव हि सन्। अत उत्तरं पठति। रलः क्त्वासनोः कित्वं विधीयते। ननु
चोक्तं क्त्वाग्रहणमनर्थकं इति। नानर्थकं। न क्त्वा सेडिति प्रतिषेधः प्राप्नोति तद्बाधनार्थम्॥ ॥ ॥

वान्। अथ प्राप्तविभाषा तदा क्त्वः कित्वमस्तीति तस्यैव पक्षे निषेधः कर्त्तव्य इति सन्ग्रहणं न कार्यं। न हि तस्य कित्वमस्ति यस्य पक्षे निषिध्यते। रल इति। अप्राप्तवि
भाषयमेकेनैव रूपेण व्यवस्थिते सर्वे एकरूपत्वदर्शनाय विचारः कृतः। न त्वभयत्र न संति। मतिलक्ष्यं पाराश्रयणेनासांसिद्धत्वात्॥ ॥

राम०
१९५

=नवकालानां अचां बहुत्वादेकः संज्ञी सतु न पर्यायमनर्थ आह जस्सेक इत्यादि उपलक्षितः कालो येषां ते एकशेषो भावः संज्ञिविशेषणस्येति ऊ इत्यस्येत्यर्थः ऊकालस्तत्परिच्छेदस्यानेकस्मिन्वर्णे संभवादिति भावः ।८=त्रित्वादिति प्रदेशेषु त्रिविधव्यवहारदर्शनादिति भावः ।२=

ऊकालः ॥ ॥ अयुक्तोयमिति । न परस्त्र कालस्येत्यत्र व्याख्यानत्वादिह न व्याख्यायते । ह्रस्वादिष्विति । ऊँ इत्येतस्यैव शब्दस्योच्चारणात् भेदानवगमात् संज्ञिविशेषणस्यैकत्वे स-
ति संज्ञिनोप्येकत्वात् संज्ञानां च त्रित्वात् संख्यातानुदेशाप्रसंगः । सिद्धं त्विति । त्रयाणां ऊकैकादेशानां निर्देशाद्विशेषणात्त्रयाणामव्यवच्छिन्नत्वात् संज्ञिनामपि त्रित्वाद्यथासंख्यं संबन्धः

ऊकालोऽज्झ्रस्वदीर्घप्लुतः ॥ ॥ अयुक्तोयं निर्देशः । ऊ इत्यनेन कालः प्रतिनिर्दिश्यते । ऊ इत्ययं च वर्णः । तत्रायुक्तं वर्णेन सह का[ल]स्य सामाना-
धिकरण्यं । कथं तर्हि निर्देशः कर्त्तव्यः । ऊकालकाल इति । किमिदं ऊकालकाल इति । ऊ इत्येतस्य कालः ऊकालः ऊकालः कालो यस्य सः ऊकाल-
काल इति । स तर्हि तथा निर्देशः कर्त्तव्यः । न कर्त्तव्यः । उत्तरपदलोपोत्र द्रष्टव्यः । तद्यथा । उष्ट्रमुख[illegible]मिव मुखमस्य उष्ट्रमुखः । खरमु-
खः । एवमूकालकाल ऊकाल इति । अथवा साहचर्यात्ताच्छब्द्यं भविष्यति । कालसहचरितो वर्णोपि काल एव । ह्रस्वादिषु समसंख्या-
प्रसिद्धिर्निर्देशवैषम्यात् । ह्रस्वादिषु समसंख्यत्वस्याप्रसिद्धिः । किं कारणं । निर्देशवैषम्यात् । तिस्रः संज्ञाः । एकः संज्ञी । वैषम्यात् सं-
ख्यातानुदेशो न प्राप्नोति । सिद्धं तु समसंख्यत्वात् । सिद्धमेतत् । कथं । समसंख्यत्वात् । कथं समसंख्यत्वं । त्रयाणां हि विकारनिर्देशः त्र-
याणामयं प्रश्लिष्टनिर्देशः । कथं पुनर्ज्ञायते त्रयाणामयं प्रश्लिष्टनिर्देश इति । तिसृणां संज्ञानां करणसामर्थ्यात् । तावद्यपितावत्ति
॥ तिसृणां संज्ञानां करणसामर्थ्याज्ज्ञायते त्रयाणामयं प्रश्लिष्टनिर्देश इति ॥ ॥ ॥

=अपशब्दैरिव वैयाकरणैरेतत्यासुक्तोयमिति भावः ।१=

सिद्ध इत्यर्थः । अर्थेत समसाम्यं यथासंख्यसूत्रेणाश्रीयते न शब्दतः एवान्यथवा शब्दतः साम्याश्रयणेपि संहिताश्रयादेकमिव प्राप्तत्वं यः शब्दा उच्चारिता इत्य-
दोषः । कथं पुनरिति । प्रत्यक्षे लोकस्यैव शब्दस्य श्रवणाद्भेदावगमप्रमाणाभाव इति भावः । तिसृणामिति । अनुमानाद्भेदावसाय इति भावः ॥ ॥

अयं तावदिति। लौकिकव्यवहाराश्रयणेन प्लुतत्वं ह्रस्वत्वं च सिद्धमाश्रित्यैतदुच्यते। यत्तावदिति। शास्त्राद्व्यवस्थितायां ह्रस्वादिसंज्ञायां लोके ह्रस्वादिव्यवहारोऽन्यथे

×प्रकृतिभावः प्लुतसंज्ञाचानेनैव। यदि च त्रिमात्र आदौ वा मध्ये वा स्यात्प्लुतसंज्ञैवास्य न स्यात्कुतः×४

कुतस्त्वेतेनानुपूर्व्येण सन्निविष्टानां संज्ञा भविष्यतीति। आदौ मात्रिकस्ततो द्विमात्रस्ततस्त्रिमात्र इति। न पुनर्मात्रिको मध्ये वान्ते वा स्या
त्। तथा द्विमात्र आदौ वा स्यादन्ते वा। तथा त्रिमात्र आदौ वा मध्ये वा स्यात्। अयं तावत्त्रिमात्रो ग्शक्य आदौ वा मध्ये वा कर्तुं। कुतः। प्लु
ताश्रयो हि प्रकृतिभावः प्रसज्येत। मात्रिकद्विमात्रिकयोरपि घ्यन्तं पूर्वं निपततीति मात्रिकस्य पूर्वनिपातो भविष्यति। यत्तावदुच्य
ते। अयं तावत्त्रिमात्रो ग्शक्य आदौ वा मध्ये वा कर्तुं प्लुताश्रयः प्रकृतिभावः प्रसज्येतेति। प्लुताश्रयः प्रकृतिभावः। यदप्यु
च्यते। मात्रिकद्विमात्रिकयोरपि घ्यन्तं पूर्वं निपततीति मात्रिकस्य पूर्वनिपातो भविष्यतीति। ह्रस्वाश्रया हि घिसंज्ञा। ह्रस्वसंज्ञा
चानेनैव। यदि च मात्रिको मध्ये वान्ते वा स्यात् ह्रस्वसंज्ञैवास्य न स्यात्कुतो घिसंज्ञा कुतः पूर्वनिपातः। एवमेषा व्यवस्था न प्रक
ल्पते एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति न त्रिमात्रोऽन्ते भवतीति। यदयं विभाषा पृष्टप्रतिवचने हेरिति मात्रिकस्य प्लुतं शास्ति। क
थं कृत्वा ज्ञापकं। योऽन्ते स प्लुतसंज्ञः। यदि च मात्रिकोऽन्ते स्यात् प्लुतसंज्ञा स्यात्। तत्र हि मात्राकालस्य मात्राकालवचनमनर्थकं
स्यात्। मध्ये तर्हि स्यादिति। एवं त्वाचार्यप्रवृत्तिर्ज्ञापयति न मात्रिको मध्ये भवतीति। यदयमतो दीर्घो यञि सुपि चेति
दीर्घत्वं शास्ति कथं कृत्वा ज्ञापकं। यो मध्ये स दीर्घसंज्ञकः। यदि च मात्रिको मध्ये स्याद्दीर्घसंज्ञास्य स्यात्। तत्र मात्राकालस्य मात्रा

परिभाषायाः
तिभावः। यदयमिति। उपनन्तरतमादेशविधानार्थमेतत्स्यादिति चेत्। तन्न। न हि स्थानेऽन्तरतमः इस्मा प्रसक्तायाः बाधा सुक्तेति विशिष्यानुपूर्वी प्रतिपन्नो

=उकारादिः।१=

॥ लिंगत्वमेव प्लुतविधानस्य ॥ ॥ ॥

मात्रिकेऽणेति॥ लिंगद्वयेनांतमध्याभ्यां मात्रिकस्यापकृष्टत्वादिति भावः। दीर्घप्लुतयोस्त्विति। उकारेणत्वात् द्विमात्रत्रिमात्रयोः स्वरूपस्य च ग्राहक इति ह्रस्वसंज्ञा त्रयाणा
मपि प्राप्नोति। न च दीर्घप्लुतसंज्ञाभ्यां द्विमात्रत्रिमात्रयोः ह्रस्वसंज्ञा बाध्यते। संज्ञानां समावेशाभ्युपगमात् आकडारादेका संज्ञेति वचनात्। द्विमात्रत्रिमात्रौ लवनत्वाद्द्वि
त्रिकालानां न ग्राहकावितितत्र न दोषः। यावच्चेति। एककार्यत्वादेतदुक्तं। ऊकाजिसेव कालार्योल्लभ्यते। उकारादयोत्वं न व्यभिचरंतीति नाच्चेन ते विशेष्यंते ऽपितु

द्विमात्रं न स्यं तिस्यादिति। स्वत्राप्याचार्यप्रवृत्तिर्ज्ञापयति न द्विमात्रेणांते भवतीति। य इयमोमभ्यादाने इति द्विमात्रिकस्य प्लुतं शास्ति। कथं
कृत्वा ज्ञापकं। येनांते स प्लुतसंज्ञः। यदि च द्विमात्रेणांते स्यात् प्लुतसंज्ञः स्यान्न तु द्विमात्रा कालस्य द्विमात्राकालत्ववचनेऽनर्थकं स्यात्। मात्रिकेण
चास्य पूर्वं निपातो बाधित इति कृत्वाऽन्यत्रोत्सहते भवितुमस्मादेतो मध्यात्। एवमेषा व्यवस्था भवति प्रा। दीर्घप्लुतयोस्तु पूर्वसंज्ञाप्रसं
गः। दीर्घप्लुतयोरपि पूर्वसंज्ञा प्राप्नोति। का। ह्रस्वसंज्ञा। किं कारणं। ऽण्सवर्णान्न गृह्णातीति। सिद्धं तु तपरनिर्देशात्। सिद्धमेतत्। कथं।
तपरनिर्देशः कर्तव्यः। उदृकाल इति। यद्येवं द्रुतायां मध्यमविलंबितयो रूपसंख्यानं कालभेदात्। द्रुतादिषु चोक्तं। किमुक्तं। सिद्धं
त्ववस्थितावर्णा वक्तुश्चिराचिरवचनाद्वृत्तयो विशिष्यंत इति। स तर्हि तपरनिर्देशः कर्तव्यः। न कर्तव्यः। इह कालग्रहणं क्रियते यावच्च
तपरकरणं क्रियते तावच्च कालग्रहणं। प्रत्येकं च कालशब्दः परिसमाप्यते। उकाल ऊकाल ऊंकाल इति च यद्वा
एकसंज्ञाधिकारेऽयं योगः कर्तव्यः। तत्रैका संज्ञा भविष्यति। या परा। नवकाशा चेति। एवं हि दीर्घप्लुतयोः पूर्वसंज्ञा न भविष्यति॥० ॥

तैरच्। तत्रोकारा दिकालत्वा उकारादिसदृशो ज्ग्रहीष्यत इति नार्थः कालग्रहणेनातत् क्रियते श्रूयमाणेनोकारेण कालं विशेषयितुमिति सवर्णा
ग्रहणं न भविष्यति। तत्रैतत्स्याद्उकारादयः कालशब्देन श्रूयत इत्याह। प्रत्येकं चेति। परिमात्रस्याचोऽसंभवात्संज्ञात्रयकरणाच्चेति भावः॥ ॥ ॥

=ननु षण्मात्रस्य कालइतिसंज्ञिविशेषणस्याभावात्संज्ञीषण्मात्रो नेहाश्रीयते ह्रस्व न आह संज्ञेति संज्ञाकांक्षि

=भाष्येन दुर्लभमिति॥ ह्रस्वप्रदेशेषु ग्रहणे लच एवेति निमित्ताभावाद्धलामप्यादेशः प्राप्नोतीति भावः॥ प्रतिरुक्तिः स्यादेतदिति॥ ह्रस्वसंज्ञाभक्तत्वात् ह्रस्वविधायकेषु अच्ग्रहणं कर्तव्यमित्यत्र हलामप्यादेशप्रसक्तिरित्येतेन न किंचि दनभिष्टसंपादनं कर्तुं शक्यते न चानिष्टार्थं मनःप्रसक्तिरिति अच्ग्रह=

=णं न कर्तव्यमिति भावः॥ न चानंतरत्वमादेशविधानार्थं ह्रस्वग्रहणं किं न स्यात्तत्राह॥ पतत्स्विति॥ अनिष्टसंपादनाय ह्रस्वग्रहणे तु कर्तव्येऽलाभवादज्ग्रहणमेव नभाव्यं संपादकमस्तु॥ हलां निवृत्तिस्तु भक्तितो नान्तरत्वमनिर्दिष्टानपुंसकस्य हलश्च हलादिज्ञापकापरिसि॥ ध्यानीतिभावः॥

भा॰कै॰पृ॰
१९७
197

ति२

अच्श्चहसंज्ञायामिति॥ ह्रस्वसंज्ञा च शहसंज्ञेति तद्विधाने उकारः सवर्णान्न ग्रहीष्यति॥ उदात्तादयस्तु गुणा न भेदका इति तद्भिन्नस्यापि ह्रस्वसंज्ञा भविष्यति॥ उदात्तादिसं ज्ञास्वज्ग्रहणं निवृत्तमिति दीर्घप्लुतानामपि ता भविष्यंति॥ हलोऽलयोग्यत्वात्तदभावः॥ इको परागचीलादौ तु न संज्ञाविधानं अपि त्वादिरंत्येनेति विहित संज्ञानुवाद इति सवर्णग्रहणं भविष्यति॥ अथवा ह्रस्वसंज्ञेति॥ त्रैयाणां चेद्ध्रस्वसंज्ञा तदा ह्रस्वप्रदेशेषु त्रयः संज्ञिन उपतिष्ठंते तत्रांतरतमादेशविधाने ह्रस्वसंज्ञाविधानमन

अथवाऽस्वरूपं शाहस्याष्ट्रहसंज्ञेत्ययं योगः प्रत्याख्यायते॥ तच्च यदेतदशहसंज्ञेत्येतद्घयाविभक्त्या निर्दिष्टमानमर्थवद्भवतितया निर्दिष्टमुत्तरत्रानुवर्त्तिष्यते॥ अण्णुदित्सवर्णस्य चाप्रत्ययः॥ अशहसंज्ञायामिति॥ अथवा ह्रस्वसंज्ञावचनसामर्थ्याद्दीर्घप्लुतयोः पूर्वसंज्ञा न भविष्यति॥ ननु चेदं प्रयोजनं स्यात्संज्ञयाविधाने नियमं वक्ष्यामीति ह्रस्वसंज्ञया यदुच्यते तदचः स्थाने यथा स्यात्॥ स्यादेतत्प्र योजनं यदि किंचित्कराणि ह्रस्वशासनानि स्युः॥ यतस्तु खलु यावदज्ग्रहणं तावद्ध्रस्वग्रहणमतो ऽकिंचित्कराणि ह्रस्वशासनानि॥ इ दंतर्हि प्रयोजनं॥ एच इग्घ्रस्वादेशे इति वक्ष्यामीति॥ अनुच्यमानेऽस्मिंस्त्रिह्रस्वप्रदेशेषु एच इग्भवतीति वक्तव्यं स्यात्॥ ह्रस्वो नपुंसके प्रातिपदिकस्य एच इग्भवतीति॥ णौ चङ्युपधाया ह्रस्व एच इग्भवतीति॥ ह्रस्वः हलादिः शेषः एच इग्भवतीति॥ संज्ञाकरणान्मा भूत्तोन लघीयः कृतमेतत्॥ लघ्वर्थं हि संज्ञाकरणं॥ लघीयश्च त्रिह्रस्वप्रदेशेषु च इग्भवतीति न पुनः संज्ञाकरणम्॥ ॥ ॥

से२

र्थकमेव स्यात्॥ अथ वचनादनंतरतमो भवेत्॥ एवमपि स्वप्रदेशेष्वज्ग्रहणमेव कुर्यादित्यर्थः॥ इदं तर्हीति॥ असत्यां ह्रस्वसंज्ञायां ह्रस्वादेश इति कर्तुं न युज्यते॥ ततश्च ह्रस्वविधिप्रदेशेषु बहुत्वलक्षण एच इग्विकल्पेनत्र द्रुरूप भवति॥ ॥श्री॥ ॥७॥

एम॰
१९७

ग्रहणानीति। गृह्यन्तेनेनार्थ इति ग्रहणं पदमुच्यते। ह्रस्वादेश इत्याद्यः प्रश्लेषनिर्देशास्य चकु प्रयोगाभावादङ् नगणितः। ननु मितां ह्रस्व इत्यत्र हेडवेष्ट
ने इत्यस्य हिडयतीत्यर्थे मे च इगिति वक्तव्यं। तथाखिस्सनव्ययस्येसञ्ज्ञापि परमनुमन्य इत्यर्थे मिति गौरवप्रसंगः। एवं तर्हि एच इगिति पंचरुक्तो प्युच्चा

त्रिर्ह्रस्वप्रदेशेषु एच इग्भवतीति षड् ग्रहणानि। संज्ञाकरणे पुनरष्टौ। ह्रस्वसंज्ञा वक्तव्या। त्रिर्ह्रस्वप्रदेशेषु ह्रस्वग्रहणं कर्तव्यं ह्र
स्वो ह्रस्वो ह्रस्व इति एच इग्घ्रस्वादेश इति। सोयमेवं लघीयसा न्यासेन सिद्धे यदुरीयांसं यत्नमारभते तस्यैतत्प्रयोजनं दीर्घप्लुत
योः पूर्वसंज्ञा मा भूदिति॥ ॥अचश्च॥ ॥किमयमलोन्त्यस्य शेषः आहोस्विदलोन्त्यापवादः। कथं चायं तच्छेषः स्यात्कथं वा तद
पवादः। यद्येकं वाक्यं तच्चेदं च। अलोन्त्यस्य विधयो भवन्ति अचो ह्रस्वदीर्घप्लुता अन्त्यस्येति ततोयं तच्छेषः। अथ नाना वाक्ये
अलोन्त्यस्य विधयो भवन्ति अचो ह्रस्वदीर्घप्लुता अन्त्यस्य [illegible] वानन्त्यस्य वेति ततोयं तदपवादः। कश्चात्र विशेषः। ह्रस्वादिविधि
रलोन्त्यस्येति चेद्वृश्चिप्रच्छिश्रामादिप्रभृतिहनिगमिदीर्घेष्वज्ग्रहणं। ह्रस्वादिविधिरलोन्त्यस्येति चेद्वृश्चिप्रच्छिश्रामादिप्रभृतिह
निगमिदीर्घेष्वज्ग्रहणं कर्तव्यं। वृश्चिप्रच्छ्योर्दीर्घः अच इति वक्तव्यं। अनन्त्यत्वाद्धि न प्राप्नोति। श्रामादीनां दीर्घः अच इति वक्त
व्यं। अनन्त्यत्वाद्धि न प्राप्नोति। हनिगम्योर्दीर्घः अच इति वक्तव्यं। अनन्त्यत्वाद्धि न प्राप्नोति॥ ॥

यमाणो प्रतिपत्तिलाघवं भवतीति लाघवोपलक्षणपरमिदं भाष्यं द्रष्टव्यं। ह्रस्वदीर्घप्लुत इति सौत्रत्वान्निर्देशस्य लिंगव्यत्ययेन पुंस्त्वं॥ ॥अचश्च॥ ॥
इको गुणवृद्धी इत्यनेनेन समानमिदं। श्रामादिप्रभृतीति। प्रभृतिग्रहणेन ष्ठिवुक्लम्वादयो गृह्यन्ते॥ [illegible] ॥ ॥ ॥

-पदातिविति: अर्भेधनइतिमती कोपाघनेनतरपवादयक्षोहृषणोध्वाराल्लुवा आलुणकुजमिसत्रनासक्षोहृणंस्थितमेवेतिसूचितं एवमन्यत्रापी सप्ततुनामी सेत्रेसेवव्याख्यानं प्रकोयणेसत्रलेनतस्माधानाजेरवनंस्यप्रवात्मकलक्ष्मवामकलादितिवदंति ७२

भा०क्रै०प्र०
१९८
158

भिद्यत इति॥ यकारादौ परेगे तस्य यो वय वो ऽजि लेवुमत्र प्रसंगः। येद्राल जेवय कारादिना विधेष्यते तत्रात्र यव धानान्नास्ति प्रसंगः एवमन्यत्रापि ज्ञेयं॥ ॥

अस्तु तर्हि नदपवादः। अचश्चेन्नपुंसकह्रस्वात्लसार्वधातुकनामिदीर्घेषु नं सप्तमिते खुः। अचश्चेन्नपुंसकह्रस्वात्लसार्वधातुकनामिदीर्घेषु नं सप्तम
ति षे धोवत्क्व्यः। ह्रस्वो नपुंसके प्रातिपदिकस्य यथेह भवति रै अतिरि। नौ अतिनु। एवं सुवाग्ब्राह्मणकुलमित्यत्रापि प्राप्नोति। अ वैधातुकयोर्दी
र्घः यथेह भवति चीयते स्तूयते एवं छिद्यते भिद्यते इत्यत्रापि प्राप्नोति। नामिदीर्घः यथेह भवति अग्नी नौ वायू नामिति एवं षण्णामित्यत्रापि प्राप्नो
ति। नै पुद्रो खुः। नोपधाया इत्येतन्नियमार्थं भविष्यति। प्रकृतस्यैष नियमः स्यात्। किंच प्रकृतं नामीति। तेन भवेदिह नियमान्न स्यात् षण्णामिति।
अन्यते तन्यते इत्यत्रापि प्राप्नोति। अथाप्येवं नियमः स्यात् नोपधायाः [illegible] नाम्येवेति। एवमपि भवेदिह नियमान्न स्यात् अन्यते तन्यते
इति। षण्णामित्यत्र तु प्राप्नोति। अथाप्युभयतो यं नियमः स्यात् नोपधाया एव नामिनाम्येव नोपधाया इति। एवमपि भिद्यते छिद्यते सुवाकू
ब्राह्मणकुलमित्यत्रापि प्राप्नोति। एवं तर्हि ह्रस्वो दीर्घः प्लुत इति यत्र ब्रूयादच इति तत्रोपस्थितं द्रष्टव्यं। किं कृतं भवति। द्वितीया षष्ठी प्रादुर्भाव्यते
तत्र कामचारः। गृह्यमाणेनाचं विशेषयितुमचा वा गृह्यमाणं। यावता कामचारः। इह तावद् दृचि प्रच्छि शमादि प्रभृतिह निगमिदीर्घेषु गृह्यमाणे
नाचं विशेषयिष्यामः। एतेषां दीर्घो भवत्यच इति। इहेदानीं नपुंसकह्रस्वात्लसार्वधातुकनामिदीर्घेषु अचा गृह्यमाणं विशेषयिष्यामः। नपुंस
कस्य ह्रस्वो भवत्यचः अजंतस्येति। अकृत्सार्वधातुकयोर्दीर्घो भवत्यचः अजंतस्येति। नामिदीर्घो भवत्यच अजंतस्येति॥ ॥ ॥

कुला २

राम०
१९८

अजितिवर्त्तत इति। ततश्च ह्रस्वादिशब्दा इहानुवृत्ता नाचमुपस्थापयंति। तस्मात्स्वयमुपस्थानादिसाश्रितस्वरूपव्यापारा आश्रीयंते तेन ह्रस्व इत्येवं योच्चसो
चःस्थाने भवतीत्यर्थः संपद्यते। एवं दीर्घप्लुतयोरपि। अचेति। इहैव तदज्ग्रहणं क्रियतां पूर्वसूत्रे तु न वक्तव्यमिति प्रश्नः प्रतक्ष्येति। यथा प्रसाहारे अश्रु
ता आकारादयो दीर्घप्लुतसंज्ञे लभंते तथा संयोगोपि ह्रस्वसंज्ञः स्यादिति तु कुप्रसं[ग]ः। तित उच्छत्रमिति। परत्वा दीर्घलक्षणे वा तु क्रिसति सकृद्गतौ
विप्रतिषेध इति न्यायाद्ध्रस्वलक्षणः पुनर्न प्रवर्त्तते। न चैवं विधेविषये पुनःप्रसंगविज्ञानमस्ति निसवित्स्ययोर्विरोधाभावे णाबाधात्। यत्र हि पूर्वो वि

इहकस्मान्न भवति द्योः पंथाः स इति। संज्ञया विधाने नियमः। संज्ञया ये विधीयंते तेषु नियमः। किं वक्तव्यमेतत्। नहि। कथ
मनुच्यमानं गंस्यते। अजिति वर्त्तते तत्रैवमभिसंबंधः करिष्यते। अचः अज्भवति ह्रस्वो दीर्घः प्लुत इत्येवं भाव्यमान इति।
अथ पूर्वस्मिन्योगेऽज्ग्रहणे सति किं प्रयोजनं। अज्ग्रहणं संयोगाच्समुदायनिवृत्त्यर्थं। अज्ग्रहणं क्रियते संयोगनिवृत्त्य
र्थं। अच्समुदायनिवृत्त्यर्थं च। संयोगनिवृत्त्यर्थं तावत्। प्रतक्ष्य। प्ररक्ष्य। ह्रस्वस्य पिति कृति तुगिति तुग्मा भूदिति। अच्समु
दायनिवृत्त्यर्थं। तित उच्छत्रं। तित उच्छाया। दीर्घात्पदांताद्वेति तुग्मा भूदिति॥ ॥ ॥

धिः परं न बाधते तत्र पुनःप्रसंगविज्ञानं क्वचिदाश्रीयते। समुदाये वा कार्यं प्रतिव्याप्रीयमाणेऽवयवानां परतंत्रव्यापारान्नैव ह्रस्वलक्षणतुक्प्रसंगः। न
नु क्रियमाणेप्यज्ग्रहणे वर्णग्रहणे जातिग्रहणादच्समुदायस्यापि दीर्घसंज्ञाप्रसंगः। नैष दोषः। ऊकाल इति विशेषणादिह व्यक्तिराश्रीयते। नहि जा
तेः परिमाणमस्ति। व्यक्तिद्वारकं वा जातेः परिमाणमाश्रीयते। एकैकव्यक्तिसंख्या हि जातिर्न समुदायसंख्या॥ ॥श्री॥ ॥

उच्चैरुदात्तः॥ ॥षष्ठीनिर्दिष्टमिति। उच्चैर्नीचैरित्येते अव्यये अधिकरणशक्तिप्रधाने। तत्राच इत्यनुवृत्तौ सत्यां अयमर्थो भवति। उच्चैः स्थाने उपलभ्यमान उदात्तसंज्ञः स चाचुः स्थाने इति। हल्स्वरप्राप्ताविति। सत्यामच इत्यस्यानुवृत्तौ समासस्येत्यन्तोदात्तत्वं राजपुरुष इत्यादावेव स्यात्। न तु गणद्दषद् इत्यादौ। असत्यां त्वनुवृत्तौ समासस्य योऽन्तो दकारस्तस्य स्वरप्राप्तावविद्यमानवत्त्वादकारस्य स्वरः सिध्यति। एषा च परिभाषा यतोऽनाव इत्यत्रानाव इति प्रतिषेधेन ज्ञापिता। अन्यथा नावमित्यत्र नकारस्यै

उच्चैरुदात्तः॥ नीचैरनुदात्तः॥ ॥किं षष्ठीनिर्दिष्टमज्ग्रहणमनुवर्त्तते उताहो न। किं चातः। यद्यनुवर्त्तते हल्स्वरप्राप्तौ व्यंजनमविद्यमानवदित्येषा परिभाषा न प्रकल्प्यते। कथं हलो नाम स्वरप्राप्तिः स्यात् एवं तर्हि निवृत्तं। बहून्येतस्याः परिभाषायाः प्रयोजनानि। अथ प्रथमानिर्दिष्टमज्ग्रहणमनुवर्त्तते उताहो न। किं चार्थोऽनुवृत्त्या। बाढमर्थः यद्येते व्यंजनस्यापि गुणा लक्ष्यन्ते। ननु च प्रसक्षमुपलभ्यन्ते इषे त्वोर्जे त्वा। नैते व्यंजनस्य गुणाः। किं तर्हि एव। तत्सामीप्यात्तु व्यंजनमपि तद्गुणमुपलभ्यते। तद्यथा द्वयोरक्तयोर्वस्त्रयोर्मध्ये शुक्लं वस्त्रं तद्गुणमुपलभ्यते बदरपिटके रिक्तो लोहकंसस्तद्गुण उपलभ्यते। कुतो नु खल्वेतद् अच एवैते गुणाः स्युः तत्सामीप्यात्तु व्यंजनमपि तद्गुणमुपलभ्यते न पुनर्व्यंजनस्यैते गुणास्तत्सामीप्यादज् अपि तद्गुण उपलभ्यत इति॥ ॥ ॥

योऽपत्यादाकारस्य चानादित्वादुदात्तत्वं न भविष्यतीति किमनाव इति प्रतिषेधेन। अथ प्रथमानिर्दिष्टमिति। ननु को विशेषः यावता यत्र स्वरो विधीयते तत्र व्यंजनस्याविद्यमानत्वादच एव भविष्यति। अनुदात्तादेरन्तित्यादावनुवादेऽपि न दोषः। स्वत एव हलोऽनुदात्तत्वं भवतु अनुदात्ताजुपरागवशादात तदनुवादे न कार्यविधाने न कश्चिद्विशेषः। एवं तर्हि न्यायसुसारतार्थ एवायं विचारः। ननु चेति। बाधकाभावाच्चांशसिद्धिः। नैते इति। अन्यथाप्युपलंभोपपद्ये रितिभावः॥ ॥

ऽन्तरेणापि व्यंजनमिति। आप्याय स्वमितियथा। अत्र स्याकार उदात्तस्तिङः तस्य निघातः। तत्र चान्वयव्यतिरेकाभ्यां अच एवैते गुणाः। यदितु हल्लामप्येते गुणा अभविष्यन्तदा
हल्लामचोचमित्रस्वरतापुपालप्स्यत। यस्मात्त्वचामेव स्वरमनुविदधति हल्लस्तस्मान्न हल्लोस्वरोस्तीति निश्चयः। अन्वग्भवतीति। अनुगच्छतीत्यर्थः। शिष्टसमाचाराच्चेदं निवेच

ऽन्तरेणापि व्यंजनमच एवैते गुणा उपलक्ष्यन्ते न पुनरन्तरेण च व्यंजनस्योच्चारणमपि भवति। अन्वर्थं खल्वपि निर्वचनं। स्वयं राजन्त इति स्वराः। अन्व
ग्भवति व्यंजनं। उच्चनीचकस्यानवस्थितत्वात्संज्ञाऽप्रसिद्धिः। इदमुच्चनीचमनवस्थितपदार्थकं। तदेव कंचित्प्रत्युच्चैर्भवति कंचित्प्रति नीचैः। एवं हि क
श्चित्कंचिदधीयानमाह किमुच्चै रोरूयसे शनैर्वर्त्ततामिति। तमेव तथाधीयानमपर आह। किमन्तर्दन्तकेनाधीषे उच्चैर्वर्त्ततामिति। एवमुच्चनीचकस्यान
वस्थितत्वात्संज्ञाया अप्रसिद्धिः। एवं तर्हि लक्षणं करिष्यते। आयामो दारुण्यमणुता खस्येति उच्चैःकराणि शब्दस्य। आयामो गात्राणां निग्रहः। दा
रुण्यं स्वरस्य दारुणता रूक्षता। अणुता खस्य [illegible] कण्ठस्य संवृतता। उच्चैःकराणि शब्दस्य। अथ नीचैःकराणि शब्दस्य। अन्ववसर्गो मार्दवमुरुता खस्ये
ति नीचैःकराणि शब्दस्य। अन्ववसर्गो गात्राणां शिथिलता। मार्दवं स्वरस्य मृदुता स्निग्धता। उरुता खस्य महत्ता कण्ठस्येति नीचैःकराणि शब्दस्य॥०॥

नमभिहितं। नन्वत्र वर्णोस्ता दृष्टं किंचिदस्ति। अथवा गतिरपि व्यंजेरर्थः। विविधं गच्छत्यनुपरागवशादिति व्यंजनमित्ययमर्थः पर्यायान्तरेणाभाष्यकारेणाभिहितः। उपरागश्च पू
र्वपराच्सन्निधानेपि परेणाचा हल्लो भवतिन पूर्वेण। उच्चनीचकस्येति। श्रुतिप्रकर्षापकर्षलक्षणोच्चनीचत्वाश्रयः पर्यनुयोगः। न चानवस्थितवस्त्वाश्रयेण साधुत्वं भवति

=नविति कि· निर्वचनं हि तत्तत्पालर्यमोगेनवा भवति अर्थाभावेपि वर्णसादृश्येनवा यथा मंडयते मंडूकाइति·२= अर्थयोग एवास्मिन्व्यंजनानुगमनार्थत्वादित्याह·अथवेति·२=

॥छ ते॥ ॥

एतदपीति। श्रोत्राभिवक्त्रगतानायामारीच्यमोनत्कायो दैवस्पति। कार्ये च संकीर्णे। तथाहि। महाप्राणो नीचैरप्युच्चारयन् स्वरेण महान्तं देशमाप्नोति। अल्पप्राणस्तूच्चैरपि वदन्न ल्पं देशमाप्नोति। सिद्धं त्विति। प्रक्रमन्ते वर्णा यस्मिन्निति प्रक्रमः स्थानमुच्यते। तेनायमर्थः। एकस्मिंस्तात्वादिके स्थाने ऊर्ध्वाधरभागयुक्ते ऊर्ध्वभागे निष्पाद्यमान उदात्तः। अधरभागनिष्पन्नोनुदात्तः। एवं चोच्चैरित्यनेनोर्ध्वभागोपलक्षितेन नीचैरित्यधरभागः। अभ्यासस्य मधिगम्यश्रुत्यायं स्वरविशेषः षड्जादिवद्विज्ञेयः॥ ॥समाहा॥ ॥ कस्येति। समाहरणं समाहार इति भावसाधनं मत्वा कस्येति प्रश्नः। अचोरिति। तयोश्च समाहारः उपश्लेषरूपः। अन्यत्र त्वौत्तराधर्यरूपोपि संभवति। गांगेनूपइति

एतदप्यनेकान्तिकं। यच्चाल्पप्राणस्य सर्वोच्चैस्तद्धि महाप्राणस्य सर्वे नीचैः। सिद्धं तु समानप्रक्रमे वचनात्। सिद्धमेतत्। कथं। समानप्रक्रम इति वक्तव्ये। कः पुनः प्रक्रमः। उरः कण्ठः शिर इति॥ ॥समाहारः स्वरितः॥ ॥समाहारः स्वरित इत्युच्यते कस्य समाहारः स्वरितसंज्ञो भवति। अचोरित्याह। समाहारोचोः स्यान्नाभावात्। समाहारं अचोः स्येत्। तन्न। किं कारणं। अभावात्। नह्यचोः समाहारोस्ति। नन्वयमस्ति गांगेनूपइति। नैषोचोः समाहारः। अन्योयमुदात्तानुदात्तयोः स्थाने एकादेशः प्रपन्ने। एवं तर्हि गुणयोः॥ ० ॥

स्थानिनोरेकाराकारयोरुदात्तानुदात्तयोः समाहारात्स्थानिधर्मेणादेशस्यापि तथा व्यपदेशः। समाहारोचोः स्यादिति। कार्यं त्वकस्मादित्यादौ स्थानिद्वारकोपि समाहारव्यवहा[illegible]रो नास्ति। यत्राप्यस्ति गांगेनूप इति तत्राप्यसौ गौणः। तत्र गंगेशब्दोणन्तत्वादन्तोदात्तः। स प्रथमैकवचने तस्मादनुदात्तेन सहैकादेश उदात्तः। अनूपशब्दे अनोरप्रधानकनीयसी इत्यन्तोदात्तत्वादनुदात्तादिस्तत्र एकादेशः स्वरितो वानुदात्ते पदादाविति स्वरितः। एवं तर्हि गुणयोर्नैरन्तर्येणोपलंभादस्ति समाहारः॥०॥

योदि॰

अच्प्रकरणादिति। प्रकरणं प्रस्तावः। ननु स्वरितत्वादनुवृत्तिः। तस्याः पूर्वं प्रसाख्यानात्। तदयमर्थः। पूर्वे सूत्रयोः सामर्थ्याक्षिप्तो जेवसंज्ञौ उदात्तानुदात्तशब्दौ निता
विहानुवृत्तावचं प्रसाययतः ननु गुणं। सिद्धमिति। गुणिनोरचोः समाहारासंभवात्सामर्थ्याद्गुणयोः समाहाराश्रयणमित्यर्थः। कथं पुनरिति। स्वरित इत्यनया संज्ञयायो

गुणयोश्चेत्ताच्प्रकरणात्। गुणयोः समाहार इति चेत्तत्र। किंकारणं। अच्प्रकरणात्। अजिति वर्त्तते। सिद्धं त्वच्समुदायस्याभावात्तद्गुणे संप्रत्ययः।
सिद्धमेतत्। कथं। अच्समुदायो नास्तीति कृत्वा तद्गुणस्याचः समाहारगुणस्य संप्रत्ययो भविष्यति। कथं पुनः समाहार इत्यनेनाच्छब्दः प्रतिनिर्दिष्टः। म
तुब्लोपोऽत्र द्रष्टव्यः। तद्यथा। पुष्यकाः एषां ते पुष्यकाः। कालकाः एषां ते कालकाः इति। एवं समाहारवान्समाहारः। अथवा अकारो मत्वर्थीयः। तद्यथा।
तुंदो घाट इति। यद्येवं त्रैस्वर्यं न प्रकल्पते। तत्र को दोषः। त्रैस्वर्येणाधीमह इत्येतन्नोपपद्यते। नैतद्गुणापेक्षं। किं तर्ह्यजपेक्षमेतत्। त्रैस्वर्येणाधीमहे
त्रिप्रकारैरज्भिरधीमहे। कैश्चिदुदात्तगुणैः कैश्चिदनुदात्तगुणैः कैश्चिदुभयगुणैः। तद्यथा। शुक्लगुणः शुक्लः कृष्णगुणः कृष्णः। य इदानीमुभयगुणः
स तृतीयामाख्यां लभते। कल्माष इति वा सारंग इति वा। एवमिहापि उदात्त उदात्तगुणः [illegible] अनुदात्तः अनुदात्तगुणः। य इदानीमुभयगुणः
स तृतीयामाख्यां लभते स्वरित इति॥ ॥ ॥

ग्यत्वादच्संज्ञित्वेनाक्षिप्तः। अचाच्समाहारो भवति। मतुब्लोप इति गुणगुणिनोरभेदोपचाराद्भूमानार्थस्य मतुपः प्रयोग इत्यर्थः। अकार इति। अर्श आदेराकृति
गणत्वात्। त्रैस्वर्यमिति। उदात्तानुदात्तगुणव्यतिरेकेण स्वरितत्वाभावात्त्रैस्वर्यव्यवहारो न स्यात्। अस्ति चायं व्यवहारः। अजपेक्षमिति। स्वरशब्देनाच उच्यंते। त्रय ए
व स्वराः त्रैस्वर्यमिति स्वार्थे ष्यञ्॥ ॥ ॥

=अर्द्धह्रस्व इत्यादयव्ववचनत्वेन प्रमाणं वचनत्वाभावात्कथं मात्रत आह॰ अर्द्धह्रस्वेति॰१= एकव्यापेति॰ अष्टुओमादिवदिति भावः॥२= एवमपि दीर्घादर्द्धमात्राकालावयवविभागाभावादोषस्तेन आह॰ तत्रप्रयोगेति॰३=

भा०कौ०प्र०
२०१
२०१

तस्मादिति:॥ ॥ऊकालपरिमाणा ह्रस्वसंज्ञा कृता नाप्यपवृक्तस्येति न्यायाद्दीर्घप्लुतावयवो ह्रस्वग्रहणेन न गृह्यते इत्यालोच्याह॥ अर्द्धह्रस्वमिति। कन्येति। कन्या राजमनुष्याणां तत इति स्वरितः। शक्तिके शक्तिके इति। स्वरितमाम्रेडिते सूयेति स्वरितः प्लुतः। मात्रं च इति। अर्द्धह्रस्वशब्दः प्रमाणवाची रूढिशब्दः। प्लुतस्य त्वर्द्धह्रस्वोपादाने। अर्द्धमात्रात्वेनाभिधीयते। ततः प्रमेये मात्रचं विधाय तस्य प्रमाणे लइति लोपः क्रियते। तत्र यथा ह्रस्वे बुध्यार्द्धमात्रा विभज्यते एवं दीर्घप्लुतयोरपीति। किमर्थमिति। नैवं भूतमिहाल्वाख्या

तस्मादित्युदात्तमर्द्धह्रस्वं॥ ॥अर्द्धह्रस्वमित्युच्यते तत्र दीर्घप्लुतयोर्न प्राप्नोति। कन्या। शक्तिके शक्तिके। ने षष्ठीषु॰। मात्रचो लोपेत्र द्रष्टव्यः। अर्द्धह्रस्वमात्रमर्द्धह्रस्वमिति। किमर्थं पुनरिदमुच्यते। आमिश्रीभूतमिवेदं भवति। तद्यथा क्षीरोदके संपृक्ते आमिश्रीभूतत्वान्न ज्ञायते कियत्क्षीरं कियदुदकं कस्मिन्नवकाशे क्षीरं कस्मिन्नोदकमिति। एवमिहाप्यामिश्रीभूतत्वान्न ज्ञायते कियदुदात्तं कियदनुदात्तं कस्मिन्नवकाशे उदात्तं कस्मिन्ननुदात्तमिति। तदाचार्यः सुहृद्भूत्वान्वाचष्टे इयदुदात्तमियदनुदात्तं अस्मिन्नवकाश उदात्तमस्मिन्नवकाशे ऽनुदात्तमिति। यद्येवमेवं सुहृत्त्किमन्यान्यप्येवंजातीयकानि नोपदिशति। कानि पुनस्तानि। स्थानकरणानुप्रदानानि। व्याकरणं नामेयमुत्तरा विद्या सोऽसौ छन्दःशास्त्रेष्वभिविनीत उपलब्ध्यधिगन्तुमुत्सहते। यद्येवं नार्थोऽनेनेदमप्युपलब्ध्याधिगमिष्यति॥ ॥ ॥

नंदृश्यते संध्यक्षरादिविषयस्यापि विभागस्यान्वाख्यानप्रसंगादिति प्रश्नः। आमिश्रीभूतमि[illegible]वेति। तत्वतोऽर्द्धमात्रास्वेव विभाग इतीवशब्द उपात्तः। क्षीरोदके इति। नियतव्यक्तिविवक्षायां जातिपरत्वाभावादेकवद्भावो न कृतः। उत्तराविद्येति। पुराकल्पे एवो अघत्ते तूत्तरेति पश्पशायामाख्यातं॥ ॥ ॥

एम०
२०१

=अनामिश्राः पृथगवस्थिता अवयवा आमिश्राः संपद्यते अवयवविकृपेण तथा भूताः आमिश्रीभूताः अवयवविकृपेण परिणता अवयवा उच्यन्ते। क्षीरोदकसमुदायस्तु नावयवा अस्य विजातीय संबंधेन किंतु संयोगसंबंधेनेति नासावयवी तीवशब्दउपात्तः। पृथगनुपलभ्यमानतत्स्वरूप

संज्ञाकरणमिति। प्रदेशेषु चैकदेशप्रसारणयनात्समुदायन्यासेऽस्थाने। उभयमिति। स सप्पष्टरूपौ रवे महतो येस्वव्याप्तिर्भवति सुखेन विभागस्वरूपपरिज्ञानात्। उदात्तादेरिति।
उदात्तादेः प्रतिपादकं यच्छास्त्रं तदाद्युदात्तस्येति तत्स्वरितादेरपि प्राप्नोति। तत्र च प्रत्ययः कदाचित्स्वरितादिरपि स्यादित्यर्थः। अन्वाख्यानमेवेति। न केवलमिदं सूत्रं यावदु
च्चैरुदात्तः इत्यादि संज्ञाकरणमपीमं दबुद्धिप्रतिपादनार्थं। सिद्धो हि वेदाध्यायिनां शिक्षायामेवोदात्तादिव्यवहारः। स्वरितस्येति। आद्य ईकारह्रस्वोदात्तादिसाकारप्रश्ले

संज्ञाकरणं तर्हीदं तस्य स्वरितस्यादितो अर्धह्रस्वमुदात्तसंज्ञं भवतीति। किं कृतं भवति। त्रिरुदात्तप्रदेशेषु स्वरितग्रहणं न कर्तव्यं भवति। उदात्तस्वरी
तपरस्य सन्नतरः। उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य। नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानामिति। एतदपि नास्ति प्रयोजनं। संज्ञा
करणं नाम यतो न लघीयः। कुत एतत्। लघ्वर्थं हि संज्ञाकरणं। लघीयश्च त्रिरुदात्तप्रदेशेषु स्वरितग्रहणं। न पुनः संज्ञाकरणं। त्रिरुदात्तप्रदे
शेषु नवाक्षराणि। संज्ञाकरणे पुनरेकादश। एवं तर्हि अस्य यमनेन क्रियते। अन्वाख्यानं संज्ञा च। कथं पुनरेकेन यत्नेनोभयं लभ्यं। लभ्यमित्याह।
कथं। अन्वर्थग्रहणात्। अन्वर्थग्रहणं विज्ञास्यते। तस्य स्वरितस्य आदितो अर्धह्रस्वमुदात्तसंज्ञं भवति। ऊर्ध्वमात्तमिति चात्र उदात्तं। यदि तर्हि सं
ज्ञाकरणं उदात्तादेर्य उच्यते तत्स्वरितादेरपि प्राप्नोति। अन्वाख्यानमेव तर्हीदं मंदबुद्धेः। स्वरितस्यार्धह्रस्वोदात्तादोदात्तस्वरितपरस्य सन्नतरा इत्येतस्मात्तस्मात् आदित्वकारश्च
ऊर्ध्वमुदात्तादनुदात्तस्य स्वरित इत्यतः कर्तव्यं॥ ×तत ऊर्ध्वमुदात्तादनुदात्तस्य स्वरितात्कार्यं स्वरितादिति
पः इदं न वक्तव्यं अनुदात्तादनुदात्तस्य स्वरित इत्येतस्मात्स्वराः कर्तव्यात्तेन स्वरितात्संहितायामनुदात्तानामित्येकश्रुतौ विधीयमानायां उदात्तादिति स्वरितस्य सिद्धं भ
वति। तेन मेऽर्घ्या सरस्वतिं प्रमतीनां नामानि अत्र उदात्तादनुदात्तानामेकश्रुतिर्भवति॥ ॥ ॥

=स्वरितप्रदेशि ... एकादेश उदात्तेनोदात्त इत्यनुदात्तस्य ... भावः।१८= ... स्वरितस्यापि ... भावः।२=

कर्तरीति। आश्रयात्सिद्धत्वं स्वरितस्य भविष्यतीत्यभिप्रायः। कार्यमिति। अत्रेति स्वरितमिति स्वरितत्वं तच्च सिद्धमित्यत्रैव स्यात्। स्वरितोदात्तार्थमिति। स्वरितस्य यउदात्तो विधी यते स आश्रमिकस्यासिद्धत्वान्न प्राप्नोति। सुब्रह्मण्योमिति। सुब्रह्मण्यामाधुरिति यत्रस्य यत्तित्त्वात्स्वरितः। तत्रायं कादेशः स्वरितानुदात्तयोरन्तरतम्यात्स्वरि तः। तत्र ओमाङोश्चेत्युदात्तस्वरितयोरेकादेशः स्वरित एवं तस्य सिद्धत्वादुदात्तत्वं सुब्रह्मण्यायामिति च स्वरूपमेव एत्येतेनतु निगदोऽत्रस्येतेः। स्वरितोदात्ताच्चेति।

किंप्रयोजनं। स्वरितादिति सिद्ध्यर्थे। स्वरितादिति सिद्धिर्यथा स्यात्। स्वरितात्संहितायामनुदात्तानामिति। इमं मे गंगे यमुने सरस्वति शुतु
द्रि। कर्तरि हि स्यात्। यः सिद्धः स्वरितः कार्यं देवदत्त यज्ञदत्तौ। स्वरितोदात्तार्थे च। स्वरितोदात्तार्थे च तत्रैव कर्त्तव्यं। न सुब्रह्मण्यायां स्वरितस्य तूदा
त्तः। इंद्र आगच्छ। कर्तरि हि स्यात्। यः सिद्धः स्वरितः सुब्रह्मण्योमिंद्र आगच्छ। स्वरितोदात्तार्थश्चासिद्धश्चास्वरितार्थे। स्वरितोदात्तार्थश्चास्वरितार्थे। न तत्रैव कर्त्तव्यं।
इंद्र आगच्छ हरिव आगच्छ। स्वरितपरसन्नतरार्थे च। स्वरितपरसन्नतरार्थे च तत्रैव कर्त्तव्यं। उदात्तस्वरितपरस्य सन्नतरः। माणवक जटि
लकाध्यापक स्य इ। कर्तरि हि स्यात्। यः सिद्धः स्वरितः। माणवक जटिलकाभिरूपक कर्तर्यहि व कर्त्तव्यं। न व कर्त्तव्यं। देव ब्रह्मणोरनुदात्त
वचनं ज्ञापकं सिद्धः स्वरित इति। यद्येतज्ज्ञाप्यते। स्वरितोदात्तास्सरणानुदात्तस्य स्वरितत्वं प्राप्नोति। न ब्रूमो देवब्रह्मणोरनुदात्तवचनं ज्ञा
॥पकं सिद्ध इह स्वरित इति किं तर्हि परमेतत्कांडमिति॥ ॥ ॥

=उदात्तेन ... सुब्रह्मण्यायामित्यनेन ... उंकार्ये तस्यासिद्धत्वात् ... कार्यानुदात्त एवेत्यर्थः।१८=

आगच्छेत्यत्र गशब्दाकारस्य स्वरितस्योदात्तत्वे कृते उदात्तादनुदात्तस्य स्वरित इति छ शब्दाकारस्य स्वरितत्वं प्राप्नोति। न्यद्धि। तिन्यधी चेति पूर्वपदस्य कृतिस्व
रस्य तत उदात्तस्वरितयोर्यण इस्य कारे स्वरितस्यासिद्धत्वात्पूर्वस्य सन्नतरो न स्यात्। देव ब्रह्मणोरिति। लिंगात्पाठक्रम बाधेन क्रमो न रमाश्रीयते। अन्यथा स्वरि
तस्यासिद्धत्वादनुदात्तस्यानुदात्तविधानमनर्थकं स्यात्। यद्येतदिति। स्वरितस्यैव सिद्धत्वमनेन लिंगेन ज्ञाप्यत इत्यर्थः। न ब्रूम इति। सन्निवेशांतरज्ञापनार्थे लिं

=उदात्तेति ... स्वरितो ... इति ... =अनुदात्तस्वरित ... इति भावः।२= देवब्रह्मणोः सुब्रह्मण्यामित्यंतर्गतयोः स्वरितस्योदात्तत्वे ... ततः शेषनिघातेऽनुदात्तस्य स्वरितः।२=
... दि।१८=

एकश्रुति॥ ॥ किमिदमिति। कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्यय उभयगतिरिह शास्त्रे भवतीति च न्यायद्वयसंभवात्प्रश्नः। यथा न दोष इति। न हि दूरादिति विशेषणमेक-
वचनस्योपपद्यते। संबोधनस्य तु क्रियारूपत्वादपादानत्वापादूरादिति विशेषणसंभवः। व्याप्तिप्रश्चान्वर्थग्रहणे भवति। किं पुनरिति। उदात्तानुदात्तौ राग दर्शनविशात्प्रश्नः। यावदु-
च्चैरिति। यदि चोदात्तश्रुतिरभविष्यत्तदा यज्ञकर्मणीत्येकश्रुतेः सिद्धत्वात् उच्चैस्तरां वा वषट्कार इति सूत्रं नाकरिष्यत इत्यर्थः। यावदसन्न इति। तत्रैकश्रुत्यनुवृत्तेर्वसिद्धत्वात् सन्न-

एकश्रुति दूरात्संबुद्धौ॥ ॥ किमिदं पारिभाषिक्याः संबुद्धेर्ग्रहणं? देवा ब्रह्माण इत्यत्र न प्राप्नोति। अथान्वर्थग्रहणं न दोषो भवति। यथा न दोष-
स्तथास्तु। किं पुनरियमेकश्रुतिरुदात्ता आहोस्विदनुदात्ता। नोदात्ता। कथं ज्ञायते। यदयमुच्चैस्तरां वा वषट्कार इत्याह। कथं कृत्वा ज्ञापकम्। अनन्तरं
निर्देशः। यावदुच्चैस्तावदुच्चैस्तराम्। यदि तर्हि नोदात्ता। अनुदात्ता। अनुदात्ता च न। कथं ज्ञायते। यदयमुदात्तस्वरितपरस्य सन्नतर इत्याह। कथं कृत्वा
ज्ञापकम्। अनन्तरं निर्देशः। यावत्सन्नस्तावत्सन्नतरः। सैषा ज्ञापकाभ्यामुदात्तानुदात्तयोर्मध्यमेकश्रुतिरन्तरालं ह्रियते। अपर आह। किं
मियमेकश्रुतिरुदात्ता आहोस्विदनुदात्ता। उदात्ता। कथं ज्ञायते। यदयमुच्चैस्तरां वा वषट्कार इत्याह। कथं कृत्वा ज्ञापकम्। तत्रैतदनिर्देशः॥
उच्चैर्दृष्ट्वा उच्चैस्तरा[illegible] मिसेतद्भवति। यदि तर्ह्युदात्ता। नानुदात्ता॥ एकवचनं संबुद्धिरिति आहोस्विदन्वर्थग्रहणं संबोधनं संबुद्धिरिति। किं चातः

न्तरविधानमनर्थकं स्यात्। अन्तरालं ह्रियत इति। हरतेर्द्विकर्मकत्वात्प्रधानकर्मणि लकारः। क्षीरोदकवदुदात्तानुदात्तयोर्भेदतिरोधानमेकश्रुतिरित्यर्थः। स्वरिते तु वि-
भागेन तयोरुपलब्धिः। उच्चैर्दृष्टेति। सोमस्याग्ने वीहीत्यौ वषडिति सन्नमन्त्रे यज्ञकर्मणीति सन्ने नैकश्रुतिर्विहिता तदपेक्षया वौषट्शब्दस्योदात्ततरत्वं विधीयते। सति चै-
कश्रुतेरुदात्तानुदात्तान्तरापेक्षः प्रकर्षो युज्यते। यथा मलिने वस्त्रे शौक्ल्यानुबोधः सद्भावात्तदपेक्षो वस्त्रान्तरे शुक्लशुक्लतरव्यपदेश इत्यर्थः॥ ॥

भा०कै०प्र०
२०३
203

युक्तेन

सन्नं दृष्ट्वेति। एकश्रुतिगतमिदमस्यार्थः। सोऽन्येनेति। अनुदात्तेनोपरक्तः। यथा शुक्लः पटो वर्णान्तरद्रव्येण संसृष्टः। कस्यचित्तु स्वरितस्योदात्तभागेनानुदात्तेनानुरज्यत इति पृथक् स्वरितो निर्दिष्टः। स्वरितस्य भेदा जात्यादयोऽष्टौ ते भाष्यकारेणाप्रकृतत्वादिह नोक्ताः। इयं चैकश्रुतिराहुतासंबोधनवाक्यस्य भवति। श्रुतत्वादुदात्त एवाविधानसामर्थ्यात्॥ ॥न सुब्रह्म॥ ओकार इति। नेदमपूर्वं विधानं अपि तु सूत्रव्याप्तारस्वेतिमपदप्येते। यथा चोदात्त ओकारस्तथात स्यादित इत्यत्रोक्तं। ओमभ्यादान इति तु प्लुतो दात्तत्वं न भवति। तस्या यज्ञकर्मविषयत्वादित्याहुः। इन्द्र आगच्छेति। द्वशब्द आमन्त्रितत्वादाद्युदात्तः तस्य द्वितीयो वर्णो विवर्ज्यमानस्वरेण

अनुदात्तश्च। कथं ज्ञायते यदयमुदात्तस्वरितपरस्य सन्नतर इत्याह। कथं ह्रस्वाज्ज्ञापकात्। तन्त्रेणेतरनिर्देशः। सन्नं दृष्ट्वा सन्नतर इत्येतद्भवति। त एते तन्त्रेतरनिर्देशे सप्त स्वरा भवन्ति। उदात्तः। उदात्ततरः। अनुदात्तः। अनुदात्ततरः। स्वरितः। स्वरिते य उदात्तः सोऽन्येन विशिष्टः। एकश्रुतिः सप्तमः॥ ॥न सुब्रह्मण्यायां स्वरितस्य तूदात्तः॥ ॥सुब्रह्मण्यायामोकार उदात्तः॥ सुब्रह्मण्यायामोकार उदात्तो भवति। सुब्रह्मण्यों॥ आकार आख्याते। पदादेश्चोदात्तो भवति। इन्द्र आगच्छ हरिव आगच्छ। वाक्यादौ च द्वे द्वे उदात्ते भवतः। इन्द्र आगच्छ। हरिव आगच्छ। मघवन्वर्जं। आगच्छ मघवन्। सुत्यापराणामन्तः। सुत्यापराणामन्त उदात्तो भवति। द्व्यहे सुत्यां त्र्यहे सुत्यां। असावित्यन्तः। असावित्यन्त उदात्तो भवति। गार्ग्यो यजते। वात्स्यो यजते॥

॥ ॥

नुदात्तः। स उदात्तादनुदात्तस्य स्वरित इति स्वरितः तस्यानेनोदात्तत्वं। आकार आख्यात इति। तिङः तेन गच्छशब्दे परत आकार उपसर्गत्वादुदात्तः। पदादिश्चेति। आकारस्य रस्य गच्छेत्यस्यादिरुदात्तः। तिङ्ङतिङ इति निघाते प्राप्ते स्वरिते च कृते तेनेनोदात्तविधानात्। वाक्यादौ चेति। अनन्तरोक्तप्रक्रिययेति भावः। मघवन्वर्जमिति। मघवन्नित्यस्यामन्त्रितस्येति निघातविधानात्। सुत्यापराणामिति। सुत्याशब्दः परो येभ्यस्तेषामित्यर्थः। द्व्यह इति। टजन्तत्वादन्तोदात्तत्वं। असावित्यन्त इति। इदं वा चनिकं। असावितिप्रथमान्तोपलक्षणं। गार्ग्य इति। त्रित्वादाद्युदात्तत्वे प्रा

रामं०
२०३

=अलवशब्दार्थमिसर्थः। देवब्रह्मत्वस्यैवानेनार्थः। नत्रपदासरत्वाभावादामंत्रितस्येत्यस्याप्राप्तेः। ननु अलन्नपि देयब्राह्मणा विद्यमानवत्पक्षे परासवत्वाभावादामंत्रितस्येति निघातो न सिध्यतीति तदर्थमप्येतदुक्तमेवेति वाच्यं। छंदसि सर्वविधीनां व्यवस्थितत्वात् प्रयोगानुसारात्।

अमुष्येति। पुत्रसंतोपलक्षणमेतत्। दाक्षेरिति। पूर्ववदाद्युदात्तत्वं प्राप्तं। देवब्र॥ ॥ अनुदात्तत्वमेक इति। ये देवा ब्रह्माणः इति पदयोर्द्वैप्यविकरणाप्रमाद्। ननु दा हि पूर्वस्यामंत्रितस्याविद्यमानत्वाद्वयोरपि पदयोरामंत्रिताद्युदात्तत्वे शेषनिघाते च कृते। नेनानुदात्तः क्रियते। यदा तु देवा ब्रह्माण इत्यनयोः सामानाधिकरण्यं न तदा विभाषितं विशेषवचने बहुवचनमिति पक्षे विद्यमानत्वादामंत्रितस्येति निघातस्य सिद्धत्वान्न्यायेनानार्थ इत्यन्ये। मतमितिमतभेदप्रदर्शनार्थमेके इत्युक्तं॥ ॥ स्वरितात्॥ ॥ श्लोकयोरिति। पुत्रमुनाय जतेतिवत्संख्यायाः विवक्षितत्वात्। अग्निर्वेशप इति। युक्तेत्वादादिरुदात्तः। शेषनिघातः। ततः द्वितीयो वर्णो उदात्तादिति

=युगपत्संख्यायाः श्लोकेद्विवानुदात्तानामिसस्यो विशादमभावाप्यम्मतीतिभावः १९=

अमुष्ये संतः। अमुष्येसंतउदात्तो भवति। दाक्षेः पितायजते। स्यांतस्योपोत्तमं च। स्यांतस्योपोत्तममुदात्तं भवति। जैलस्य गार्ग्यस्य पितायजते। वात्स्यस्य पितायजते। वानामधेयस्योपोत्तमं भवति। देवदत्तस्य पितायजते। देवस्तस्य पितायजते॥ ॥ देवब्रह्मणोरनुदात्तः॥ ॥ देवब्रह्मणोरनुदात्तत्वमेके। देवब्रह्मणोरनुदात्तत्वमेक इच्छेति। देवा ब्रह्माणः। देवाब्रह्माणः॥ ॥ स्वरितात्संहितायामनुदात्तानां॥ स्वरितात्संहितायामनुदात्तानामिति श्लोकयोरेकश्रुत्यवचनं। स्वरितात्संहितायामनुदात्तानामिति चे श्लोकयोरेकश्रुत्यं वक्तव्यं। अग्निर्वेशपः पचतीति किं पुनः कारणं न सिध्यति। बहुवचनेन निर्देशः क्रियते। तेन बहूनामेवैकश्रुत्यं स्यात् श्लोकयोर्न स्यात्। नैष दोषः। नात्र निर्देशस्तंत्रं। कथं पुनस्ते

" नैव चनामनिर्देशः क्रियते तच्चा तं चे स्यात् नत्कारी च मवं स्न देपी च॥ ॥ ॥

स्वरितः। तस्मात्परौ द्वावनुदात्तौ। पचतीति। धातुरुदात्तः। शप्तिपावनुदात्तौ। ततः शवकारः स्वरितः। ततः पर एको नुदात्तः। श्लोकयोरित्यत्र द्विशब्देन द्वित्वमुच्यते एकशब्देन चैकत्वं। तेन द्वित्वे एकत्वे सतीत्यर्थः॥ नात्रेति। तंत्रशब्दोत्र प्रधानवाची। यथा ग्रहं संमार्ष्टीति संख्यानविवक्षया नेतयेत्तापीत्यर्थः। तत्कारीति। असत्सां बहुत्वसंख्यायां बहुवचनमेव न स्यादिति तद्विवक्षणीयं नात्र निर्देशस्तंत्रमिति वचनात्तदेवाविवक्षितमिति विरोध इत्यर्थः॥ ॥ ॥

=संख्येयपरत्वेऽनेकानामितिस्यादतआह। द्वीति। २= विशेषदृतिभावः। २=

=संख्यानेतिप्रधानगतसंख्यानविवक्षतेत्यर्थः। संमार्ष्टीत्यत्र ग्रहाणां प्राधान्यसद्भावेपि उद्देश्यत्वरूपमार्थप्राधान्यं तेषामस्त्येव तथापि तेषामुत्तमेत्यत्र यजेतेत्सत्रं तु पशोः शाब्दमार्थं चाप्राधान्यं। यागोद्देशेन पशोर्गुणस्य विधाना

अर्थं नियमपक्षे सजातीयस्य नियमपक्षे वाऽर्थनिरोधाविवक्षायां विभक्तिषु प्राप्तासु यथाकथंचित् प्रथमादिक्रमे कारणाभावादेकवचनं कविदनुवादकविभक्तिः नयेत्सकलविशेषसंग्राहकं शब्दसंस्कारार्थं बहुवचनं भविष्यतीति भावः। १ = नियतव्यक्तिविवक्षायां जातिपरत्वं नास्तीति स्फी...

नांतरीयकत्वादिति। शब्दसंस्कारार्थमेवात्र बहुवचनं विवक्ष्यते न कार्यार्थमित्यर्थः। तुषपलालानीति। तुषसहितानि पलालानीति तत्पुरुषः। द्वंद्वे तु जातिवाचित्वादेकवद्भावप्रसंगः। एवं शकलकंटकानीति। व्यवहितानामिति। स्वरितादिति पंचमीनिर्देशादनंतरस्यैव कार्येण भाव्यमिति मन्यमान आह। इममे गंगे इत्यत्र मे शब्दात्स्वरितात्परस्यैव गंशब्दस्यानंतरस्य स्यान्न

नांतरीयकत्वादत्र बहुवचनेन निर्देशः क्रियते। अवश्यं कया चिद्विभक्त्या केन चिद्वचनेन निर्देशः कर्तव्य इति। तद्यथा कश्चिदन्नार्थी शालिकलापं सपलालं सतुषमाहरति। नांतरीयकत्वात्स यावदादेयं तावदादाय तुषपलालान्युत्सृजति। तथा। कश्चिन्मांसार्थी मत्स्यान्सकंटकान्सशकलानाहरति नांतरीयकत्वात्स यावदादेयं तावदादाय शकलकंटकानुत्सृजति। एवमिहापि नांतरीयकत्वाद्बहुवचनेन निर्देशः क्रियते। अविशेषेणैकश्रुत्यं। [illegible]

अविशेषेणैकश्रुत्यमिति चेद्व्यवहितानामप्रसिद्धिः। अविशेषेणैकश्रुत्यमिति चेद्व्यवहितानां न प्राप्नोति। इमं मे गंगे यमुने सरस्वति शुतुद्रि। अनेकमपीति तु वचनात्सिद्धं। अनेकमप्येकमपि स्वरितात्संहितायामेकश्रुतिर्भवतीति वक्तव्यं। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं स्वरितात्संहितायामनुदात्तानामिति चेद्द्व्येकयोरैकश्रुत्यवचनमविशेषेणाव्यवहितानामप्रसिद्धिरिति। नैष दोषः। कथं। एकशेषनिर्देशोऽयं। अनुदात्तस्य चानुदात्तयोश्चानुदात्तानां चानुदात्तानामिति॥ ॥ ॥

द्वितीयादीनां च बहुवचनादिरित्यर्थः। एकशेषनिर्देशोऽयमिति योगारंभपक्षे वार्त्तिकोपादाने नैकशेषः क्रियते। अनुदात्तयोश्चानुदात्तानामिति च कृते एकशेषे पुनरेकशेषः कर्तव्यः। आकृतिपक्षाश्रयेणानुपसाख्यातेः सूत्रे ज्ञासाख्यायामिति बहुवचनं कृतं। ततश्चैकद्विबहुषु स्वरितात्परस्याः जातेरानंतर्येणोपलंभात्सर्वेषामेकश्रुत्यस्य सिद्ध

ति२

एवमपीति। सहविवक्षायामेकशेषविधानात्समुदितानां कार्यप्रसंगः। प्रभृतिग्रहणे न चैकशेषवाक्येनुदात्तौ मिस नैव चानुदात्तयोरप्यनुदात्तागमस्येनेइति दर्शयति। प्रत्येकमिति। निर्देश एव सहविवक्षा। कार्यप्रवृत्तिस्तु प्रत्येकं। यथा देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामित्युक्ते देवदत्तादयः पृथगेव भुंजते॥ ॥ अपृक्त एकाल्प्रत्ययः॥ ॥

एवमपि षट्प्रभृतीनामेव प्राप्नोति। षट्प्रभृतिषु ह्येकशेषः परिसमाप्यते। प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टेति ह्येकयोरपि भविष्यति॥ ॥ अपृक्त एकाल्प्रत्ययः॥ ॥ अपृक्तसंज्ञायां हल्ग्रहणं स्वादिलोपे हल्ग्रहणार्थं। अपृक्तसं[illegible] ज्ञायां हल्ग्रहणं कर्त्तव्यं। एकहल्प्रत्ययोऽपृक्तसंज्ञो भवतीति वक्तव्यं। किं प्रयोजनं। स्वादिलोपे हलः अपृक्तग्रहणार्थं। एवं हि स्वादिलोपे हल्ग्रहणं न कर्त्तव्यं भवति। हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हलिति। अपृक्तस्येव सिद्धं। अणिञोर्लुगर्थं मल्ग्रहणं। अणिञोर्लुगर्थमल्ग्रहणं कर्त्तव्यं। किं प्रयोजनं। अणिञोर्लुक्यल्ग्रहणं न कर्त्तव्यं भवति। ण्यक्षत्रियार्षञितो यूनि लुगणिञोरिति। अपृक्तस्येव सिद्धं। अणिञोर्लुगर्थे [illegible]मिति चेत्सोऽतिप्रसंगः। अणिञोर्लुगर्थमिति चेत्सोऽतिप्रसंगो भवति। इहापि प्राप्नोति फाण्टाहृतेरपत्यं माणवकः फाण्टाहृत इति। एवं च न सामर्थ्योत्तरं भविष्यति॥ ॥ ॥

स्वादिलोपे इति। इमे देति लोपः अपृक्तग्रहणे नैव निवृत्तिः सिध्यतीत्यर्थः। अणिञोरिति। परद्वयोश्चारणमेव गौरवमिति भावः। एवं वचनेनेति। लुगपवादे णो विज्ञास्यते। अन्यथा एवं लुकि सिद्धे णविधानमनर्थकं स्यादित्यर्थः॥ ॥ ॥७॥ ॥

भा०कौ०प्र०
२०५

फड्ढिः वृत्सर्थमितिायत्रिन्त्रो च्चेतिमान्नस्य फ्कोबाधनार्थं णावचनं स्यात्तस्य चत्तुकूस्यादेवेस र्थेः कस्मान्न भवतीति। प्रत्ययस्य विशेषणमल्ग्रहणमिति तदंत विधि सङ्गा वइतिमला प्रश्न ः॥ इदं तु नाश्रितमनुनासिकपरत्वादिति। अल्ग्रहणं सामर्थ्यादिति। यद्यलं तस्यस्याल्केवलस्य चाघंतवङ्गावात्र राः अल्ग्रहणेन नकिंचि द्यावृत्तिं तस्यात। दर्विरिति। ननु हलंत त्वादेन प्राप्तिरेवनास्ति। नैष दोषः। अयं सांप्रतिको विशब्द इति छिवादिषु भूतपूर्वगतिर्नेलभ्यते। तथा एकसंज्ञायां हल्ग्रहणेन हल्त्वा नुगत्वेस्य
भावो

वचनप्रामाण्यादिति चेत् फड्ढिः वृत्सर्थं वचनं। वचनप्रामाण्यादिति चेत् फड्ढिः वृत्सर्थमेतत्स्यात्। प्रगतो मा भूदिति। पैलादिषु च वचनात् सिद्धं। यद्येतावत्प्रयोजनं स्यात् पैलादिष्वेवास्य पाठं कुर्वीत। तत्र पाठादन्येषामपि फ्को निवृत्तिर्भवति। एवं तर्हि सिद्धे यदयं णां शास्ति तज्ज्ञापयत्याचार्यो नास्य लुग्भवतीति। तान्येतानि त्रीणि ग्रहणानि भवंति। अपृक्तसंज्ञायां हल्ग्रहणं कर्तव्यं। स्वादिलोपे हल्लोग्रहणं न कर्तव्यं। अणित्रो लुक्रियहणं कर्तव्यं। अल्ग्रहणे पि वै क्रियमाणे तान्येव त्रीणि ग्रहणानि भवंति। अपृक्तसंज्ञायामल्ग्रहणं कर्तव्यं। स्वादिलोपे हल्लो [illegible] ग्रहणं कर्तव्यं। अणित्रो लुक्रियहणं न कर्तव्यं भवति। तत्र नास्ति लाघवकृतो विशेषः। अयमस्ति विशेषः। अल्ग्रहणे क्रियमाणे र कयहणं न करिष्यते। कस्मान्न भवति दर्विः जागृविरिति। अलेवयः प्रत्ययः। किं वक्तव्यमेतत्। न हि। कथमनुच्यमानं गंस्यते। अल्ग्रहणसामर्थ्यात्। यदि चयोल्वा प्रश्नः स्यात् अल्ग्रहणमनर्थकं स्यात्। हल्ग्रहणेऽपि वै क्रियमाणे एकत्रग्रहणं न करिष्यते। कस्मा
तत्र

तायथा गुरोश्च हल इत्यत्र गुरुमान्। हल्लेवेति। हलः प्राधान्यात्प्रत्ययस्य विशेषणत्वादित्यर्थः। छिवादिषु भूतपूर्वगसाश्रयणाद्यौ चेत् कल्पना अत्र हल्शब्देन तदंतोग्रहणोक्तिं न ग्रेणी॥ ॥श्री॥ ॥७॥ णी ॥

एम०
२०५

=तिलोपइति· यासुट्शिष्टत्तिलोपइत्यर्थः।।२८= विसर्गार्थमिति· अन्यथा हि आदिसत्रहलंतयोस्तिस्योरित्यर्थस्यापि संभवनयाहन्यात् अन्यादित्यादौ यासुट्शिष्टयोस्तिस्योर्लोपः स्यादिति भावः॥२८=

हल्ग्रहणसामर्थ्यादिति। किं बाह्ययोरपि हल्त्वं तयोर्दर्विरित्यादौ विप्रसयोरपीति किमनेन न व्यवच्छिन्नं स्यात् इत्यर्थः। हलन्तस्य यथा स्यादिति। ननु श्वासस्सेकग्रहणे हन्यादित्या
द्येतित्लोपः स्यादिति कर्तव्यं हल्ग्रहणे क्रियमाणे एकग्रहणं। अल्ग्रहणे तु क्रियमाणे न कर्तव्यं। कृते तु ज्ञापनार्थं तदृशितं भाष्ये। यद्यप्ययमर्थो निपातनादेकाजना
दि. सत्येकग्रहणे न ज्ञापितस्तथापि मंदबुद्धीनामनुग्रहाय पुनरिह ज्ञापितः। अप्रकृतप्रदेशेषु हल्ग्रहणे नैव सिद्धे संज्ञाविधानं विस्पष्टार्थं। एवं दिग्दृष्टिसज्ञास्य

× तत्पुरुषः समानाधिकरणपदः कर्मधारयसंज्ञो भवतीति वक्तव्यं· सिध्यति· सूत्रं तर्हि भिद्यते· यथान्यासमेवास्तु· ननु चोक्तं तत्पुरुषः समानाधि × दे

ते
किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते। हल्ग्रहणसामर्थ्यात्। यदि चयोर्हल्त्वान्यश्चेत्तत्स्यादल्ग्रहणमनर्थकं स्यात्। अस्त्यन्यदल्ग्रहणे
स्य प्रयोजनं। किं। हलन्तस्य यथा स्यादज्जन्तस्य माभूदिति। एवं तर्हि सिद्धे यदल्ग्रहणे क्रियमाणे एकग्रहणं करोति तज्ज्ञापयत्याचार्यो ऽन्यत्र वर्ण
ग्रहणे जातिग्रहणं भवतीति। किमेतस्य ज्ञापने प्रयोजनं। इमेहेल्ग्रहणस्य जातिवाचकत्वात्सिद्धमिंधप्रयुक्तं तदुपपन्नं भवति॥ ॥
तत्पुरुषः समानाधिकरणः कर्मधारयः॥ ॥ तत्पुरुषः समानाधिकरणः कर्मधारय इति चेत्समासैकार्थत्वादप्रसिद्धिः॥ तत्पुरुषः समा
नाधिकरणः कर्मधारय इति चेत्समासैकार्थत्वात्संज्ञाया अप्रसिद्धिः। एकोयमर्थस्तत्पुरुषो नाम। अनेकार्थाश्रयं च सामानाधिकरण्यं।
सिद्धं तु पदसामानाधिकरण्यात्। सिद्धमेतत्। कथं। करणः कर्मधारय इति चेत्समासैकार्थत्वादप्रसिद्धिरिति। नैष दोषः॥

रिभाषात्वं व्यवस्थापितमिह कथं संज्ञात्वेन व्यवहारः। पाणिन्ये सामान्यात् परिभाषासंज्ञात्वेन व्यवह्रियत इत्यदोषः॥ ॥तत्पुरुषः॥ ॥समासैकार्थत्वा
दिति। भिन्नप्रवृत्तिनिमित्तप्रयुक्तस्यानेकस्य शब्दस्यैकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यमुच्यते। नीलोत्पलादिस्तु तत्पुरुष एक एवेति सामानाधिकरण्यमनुप
पन्नं। वृत्तिपदानां तु सामानाधिकरण्यमुपपद्यते तत्पुरुषत्वं तु नैषां नास्ति॥ ॥ ॥ ॥

ऐकपद्यमिति। पदशब्देनार्थ उच्यते। ऐकार्थ्यमित्यर्थः। अथवा समासाद्विभक्त्युत्पत्तौ सत्यामैकपद्यमुच्यते। एकविभक्तित्वमिति। एककारकत्वमित्यर्थः। त
द्य इति। ननु मुख्यस्य तत्पुरुषस्य प्रदर्शने तरेण सामानाधिकरण्ये संभवत्येव राजपुरुषः शोभन इत्यादौ तत्कथं गौणस्य ग्रहणं। नैष दोषः। तत्पुरुषस्य प्रदर्शनेतरे
ण सामानाधिकरण्ये बहिरंगं। अंतरंगं त्वेकविभक्तिः पदानामिति तदेवाश्रीयते। तत एव सामर्थ्यात्तत्पुरुषशब्दो गौणार्थवृत्तिः परिगृह्यते। तेन समासावयवाना

अयं तत्पुरुषोऽस्त्येव प्राथमकल्पिको यस्मिन्नैकपद्यमैकस्वर्यमेकविभक्तित्वं च। अस्ति तादर्थ्यात्ताच्छब्द्यं। तत्पुरुषार्थानि पदानि
तत्पुरुष इति। तद्यथा तादर्थ्यात्ताच्छब्द्यं तस्येदं ग्रहणं॥ प्रथमानिर्दिष्टं समास उपसर्जनं॥ ॥ प्रथमानिर्दिष्टं समास उपसर्जन
मिति चेदनिर्देशात्प्रथमायाः समासे संज्ञाप्रसिद्धिः॥ प्रथमानिर्दिष्टं समास उपसर्जनमिति चेदनिर्देशात्प्रथमायाः समास
उपसर्जनसंज्ञाप्रसिद्धिः। न हि कष्टादीनां समासे प्रथमां पश्यामः। सिद्धं तु समासविधाने वचनात्। सिद्धमेतत्। कथं। समा
सविधाने प्रथमानिर्दिष्टमुपसर्जनसंज्ञं भवतीति वक्तव्यं॥ ॥ ॥

मेव पदानां कर्मधारयसंज्ञा विधीयते। समुदाये च वाक्यपरिसमाप्त्या परसमुदायस्यैकैव कर्मधारयसंज्ञा ननु प्रसक्ता। तत्पुरुषसंज्ञाप्रकरणेऽयं संज्ञा न कृता। एका संज्ञाधि
कारे तत्पुरुषसंज्ञाया बाधा मा भूदिति॥ प्रथमानिर्दिष्टं॥ ॥ अनिर्देशात्प्रथमाया इति। समासे किं प्रथमानिर्दिष्टं भवितुमर्हति यस्मात्समासे प्रथमा विधीयते। न च
तथाभूतस्य संभवः समासे हि कृते तत एव प्रथमोत्पद्यते न तु तदवयवात्। अंतर्वर्तिन्याश्च विभक्त्याः प्रथमानिर्दिष्टत्वेनाश्रीयमाणे कष्टश्रित इत्यत्र श्रितशब्दस्यैवो
पसर्जनसंज्ञा स्यान्न कष्ट[illegible]शब्दस्य। निर्दिष्टग्रहणं चानर्थकं स्यात्। समासे प्रथमांतमुपसर्जनमिति वक्तव्यं स्यात्॥ ॥ ॥

सर्वत्रेति। यथोदेवापके समासप्राक्त्वेऽस्य सामान्यरूपेणोपस्थितत्वात्संज्ञा सर्वत्र प्राप्नोतीत्यर्थः॥१॥ यस्य श्रितादेरिति। कार्यकाल॰ समासप्रयोजकस्येत्यर्थः॥२॥ तत्र [illegible] विधिः संबंधैकवाक्यतां [illegible] तासमित्यन्येषामर्थ इति भावः॥२॥

नवेति। मुख्यार्थो संभवाद्गौणो योगस्यातेरित्यर्थः। यस्य विधाविति। निर्देशापेक्षया समासस्याधारत्वात्प्रथमानिर्दिष्टस्य सर्वत्रोपसर्जनसंज्ञा प्राप्नोतीति भावः। रा
जकुमारीति। सत्युपसर्जनत्वे ह्रस्वः स्यात्पूर्वनिपातश्च वस्याच्च सिद्धेत्विति। यस्य श्रितादेः समासविधौ तं श्रितादिकं प्रतीत्यर्थः। महतीसंज्ञेति। लोकेऽप्रधानमुपस
र्जनमुच्यते इहापि तथैवाश्रीयत इत्यर्थः। यद्येवं पूर्वकायोऽर्द्धपिप्पली पुरुषव्याघ्र इत्यादिषूपसर्जनसंज्ञा प्रधानस्य न प्राप्नोति। नैष दोषः। अन्वर्थसंज्ञा हि

मिर

तत्र हि वक्तव्यं। न वा तादर्थ्यात्ताच्छब्द्यं। न वा वक्तव्यं। किं कारणं। तादर्थ्यात्ताच्छब्द्यं भविष्यति। समासार्थं शास्त्रं समास इति। यस्य विधौ प्र
थमानिर्दिष्टस्ततोऽन्यत्रोपसर्जनसंज्ञाप्रसंगः। यस्य विधौ प्रथमानिर्देशः क्रियते ततोऽन्यत्रापि सर्जनसंज्ञा प्राप्नोति। राज्ञः कुमारी राजकु
मारी श्रितः। श्रितादिसमासे द्वितीयान्तं प्रथमानिर्दिष्टं तस्य षष्ठीसमासेऽप्युपसर्जनसंज्ञा प्राप्नोति। सिद्धं तु यस्य विधौ तं प्रतीति वचनात्
सिद्धमेतत्। कथं। यस्य विधौ यत्प्रथमानिर्दिष्टं तत्प्रति तदुपसर्जनं भवतीति वक्तव्यं। तत्र हि वक्तव्यं। न वक्तव्यं। उपसर्जनमिति मह
पं२ तीसंज्ञा क्रियते। संज्ञा च नाम यतो न लघीयः। कुत एतत्। लघ्वर्थं हि संज्ञाकरणं। तत्र महत्याः संज्ञायाः करण एतत्प्रयोजनं अन्वर्थसंज्ञा
यथा विज्ञायेत। अप्रधानमुपसर्जनमिति। प्रधानमुपसर्जनमिति च संबंधिशब्दावेतौ। तत्र संबंधादेतद्गंतव्यं यं प्रति यदप्रधानं तं प्र
ति तदुपसर्जनसंज्ञं भवतीति। अथ यत्र द्वे षष्ठ्यौ ते कस्मात्तत्र प्रधानस्योपसर्जनसंज्ञा न भवति राज्ञः पुरुषस्य राजपुरुषस्येति॥ ॥

यत्रासोऽर्थः संभवति तत्र प्रवृत्तिनिमित्तापेक्षा प्रवर्त्तते। अन्यत्र तु विधानसामर्थ्यान्निरपेक्षा। यथा कर्मप्रवचनीयसंज्ञास्तत्सादीनामिति प्रथमानिर्दिष्टसामर्थ्या
दर्थादीनां संज्ञा प्रवर्त्तते। अथ यत्रेति। परिहारान्तरं सज्ञावादेत उच्यते। अन्वर्थाश्रयणे न द्वे तदपि सिध्यति॥ ॥ ॥

प्रथमानिर्दिष्टसामर्थ्यादिति [illegible]

[illegible]

=नासौ निघतरस्य स्याख्यानं नवति दिव्यतेः इति प्रतिपेगिहेनराजानं नसमानीतिनस्यापर्पः॥२=

षष्ठ्यंतयोश्चेति। पूर्वनिपातप्रकरणइदमुक्तं। तत्र हि पूर्वनिपातः प्रत्याख्यायते न वा अनिष्टादर्शनादिति। अथाप्यारभ्यते तथापि राजशब्दस्यैव पूर्वनिपातः न पुरुषश
ब्दस्य। एवं हि गुणापेक्षया समासैकार्थी भवति। अन्यथा वाक्यसमासयोर्भिन्नार्थता स्यादित्यर्थः। तथा हि। पुरुषो राजापेक्षया प्रधानमेवार्थेतिना सो भिद्यते राजापेक्षया तं व्य
तिरिच्यते। अतो प्रधानस्यैव राज्ञः पूर्वनिपातः। शब्दशब्दार्थयोर्विति। नन्वेतत्तत्र प्रत्याख्यातं परमयुक्तमिति रिसाद्दो द्वौ इति शब्दौ स्यातामिति। एवं तर्ह्येनयोर्थाश्रयणेनास्य परि
हारस्योक्तत्वादत्र सूक्ष्मेक्षिकानकृता॥ ॥एकविभक्तिच॥ ॥समासइतिवर्त्तते। मुख्यस [struck through]

षष्ठ्यंतयोश्चोपसर्जनत्वउक्तं। किमुक्तं। षष्ठ्यंतयोः समासेऽर्थाभेदात्प्रधानस्यापूर्वनिपातइति। एवं न चेदमकृतं भवतिउपसर्जनं पूर्वं इति।
अर्थश्चाभिन्नइतिकृत्वाप्रधानस्य पूर्वनिपातो न भविष्यति। यद्यपितावदेतदुपसर्जनकार्यपरिहृतमिदमपरं प्राप्नोति। राज्ञः कुमार्याराज
कुमार्योः। गोस्त्रियोरुपसर्जनस्येति ह्रस्वत्वं प्राप्नोति। उक्तं वा। किमुक्तं। परवल्लिंगमितिशब्दशब्दार्थाविति। तत्रौपदेशिकस्य ह्रस्वत्वमाति
देशिकस्य श्रवणं भविष्यति॥ ॥एकविभक्तिचापूर्वनिपाते॥ ॥द्वितीयादीनामप्येतेनोपसर्जनसंज्ञा प्राप्नोति। तत्रको
॥दोषः। तत्रापूर्वनिपातइतिप्रतिषेधः प्रसज्येत॥ ॥ ॥

[struck through]
मासएवेहगृह्यते। समासेविधानत्वेपदेकविभक्तीति। समासार्थवावाक्यं समासोगृह्यते। सर्वस्य च शब्दस्यैकविभक्तित्वमितिविशेषेणोपादानसामर्थ्याद्यस्य पर्यायेणापि न सर्ववि
भक्तित्वं तदुपसर्जनसंज्ञं। यथा निष्कौशांबिरित्यत्र कौशांबीशब्दो निष्क्रमणक्रियापेक्षयापादानत्वात्संबंधात्संचम्यंत एव न त्वस्य क्रियांतरापेक्षः शक्यं तरा विभविः
। द्वितीयादीनामिति। कष्टादयः श्रितादिविशेषणत्वादेकविभक्तिकाइत्यनेनोपसर्जनसंज्ञानेषां प्राप्नोति। ततश्चापूर्वनिपातइतिप्रतिषेधः प्राप्नोति। पूर्वेहत्रस तुनी

=वारूविकार्थप्रतिपादनपरमेतत्तत्सूत्रं प्रकृते कश्चिदस्ति विशेषः। नपुंसके तु तद्धितार्थे पंचगु वस्त्रमित्यत्रास्ति विशेषः।२ = पंचगुरिति मध्यपिगोस्त्रियोरिति सत्रं लौकिकोपसर्जनग्रहणादुदाहरणमन्यथासिद्धिः। शास्त्रीयमेवोपसर्जनं तत्रेष्यते न परमः। अगोर्दस्य परमाणुदिसत्र ह्रस्वाजावप्रसंगः इति वक्ष्यते भाष्यं पंचगुरवी अतिकेश। मा

ननु चेष्टमिति। प्रतिषेधयुक्तत्वायुक्तत्वेन विरोधात्पर्यत्वादिति भावः। नोत्सहत इति। अपवादविषयं प्रकल्प्योत्सर्गस्य प्रवृत्तेर्नात्र। पंचगुरिति। द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वक्तव्य इति वचनात्परवल्लिंगं न भवति। अलंकुमारिरिति। पर्यादयो ग्लानाद्यर्थे चतुर्थ्येति समासः॥ ॥ इत्युपाध्यायजैयटपुत्रकैयटकृते

नाप्रतिषेधात्। नायं प्रसज्यप्रतिषेधः पूर्वनिपाते नेति। किं तर्हि पर्युदासोयं यदन्यत्पूर्वनिपातादिति। पूर्वनिपातेऽव्यापारः। यदि केनचित्प्राप्नोति तेन भविष्यति। पूर्वेणा च प्राप्नोति। तेन भविष्यति। अप्राप्तेर्वा। अथवा अनंतरायाः प्राप्तेः सा प्रतिषिध्यते। कुत एतत्। अनंतरस्य विधिर्वा भवति प्रतिषेधो वेति। पूर्वा प्राप्तिरप्रतिषिद्धा तया भविष्यति। ननु चेयं प्राप्तिः पूर्वां प्राप्तिं बाधते। नोत्सहते प्रतिषिद्धा सती बाधितुं। एकविभक्त्यावषष्ठ्यंतवचनं। एकविभक्त्यावषष्ठ्यंतानामिति वक्तव्यं। इह माभूत्। अर्द्धं पिप्पल्या अर्द्धपिप्पलीति। उक्तं वा किमुक्तं। परवल्लिंगमिति शब्दशब्दार्थाविति सत्रौपदेशिकं ह्रस्वत्वमातिदेशिकस्य श्रवणं भविष्यति। कानि पुनरस्य योगस्य प्रयोजनानि। द्विगुप्राप्तापन्नालंपूर्वोपसर्गाः कार्थे॥ द्विगुः। पंचभिर्गोभिः क्रीतः [illegible] पंचगुः। दशगुः। प्राप्तो जीविकां प्राप्तजीविकः। आपन्नो जीविकामापन्नजीविकः। अलं पूर्वोऽस्त्वं कुमार्यै अलंकुमारिः। उपसर्गाः कार्थे निष्कौशांबिः। निर्वाराणसिः॥ ॥

इति श्रीमद्भगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य द्वितीये पादे प्रथममाह्निकं॥ ॥ ॥

महाभाष्यप्रदीपे प्रथमस्याध्यायस्य द्वितीये पादे प्रथममाह्निकं॥ ॥श्री॥ ॥ ॥

अर्थवदधातुः॥ अभिधेयवचनोत्रार्थशब्द आश्रीयते। तत्राधातुरप्रत्यय इति पर्युदासाश्रयणादर्थवत एव संज्ञा भविष्यति नार्थो ऽर्थवद्ग्रहणेनेत्याशंक्याह। अर्थवदिति। व्यपदेशायेति। संज्ञिन इति वाक्यशेषः। पर्युदासाश्रये हि नञ्धर्मेणासादृश्यमाश्रीयत इत्यप्रतिपत्तिः स्यादिति भावः। वर्णानां माभूदिति। विशिष्टसंज्ञिव्यपदेशफलं दर्शयति। क्वचिद्वर्णानां चेति पाठः। तत्र चशब्देन पदसमुदायो ऽनर्थको दशदाडिमानीत्यादिः समुच्चीयते। किं च स्यादिति। संख्याकर्मादिषु स्वादीनां विधानादनर्थकेभ्यः स्याद्युत्पत्तिर्न भविष्यतीति प्रश्नः। वनमिति। नन्वधातुरिति नान्तस्य प्रतिषेधो भविष्यति। नैतदस्ति। प्रतिवर्णमत्र विभक्त्युत्पत्तिप्रसंगः। न च प्रतिवर्णं धातुसंज्ञासमावेशः। अयं भावः। अविशेषेण स्वादयउत्पद्यन्ते तेषु लत्वेष्वर्थे नियमः प्रकृतार्थापेक्षया वा प्रत्ययनियम इति स्यादेव स्याद्युत्पत्तिः अन्यथा दिवत्। यत्तूक्तं संघातस्यैकार्थ्यात्सुब भावो वर्णादिति तद्वर्णानाम

अर्थवदधातुरप्रत्ययः प्रातिपदिकं॥ ॥ अर्थवदिति व्यपदेशाय वर्णानां च माभूदिति। किं च स्यात्। वनं धनमिति नलोपः

" प्रातिपदिकांतस्येति नलोपः प्रसज्येत। अधातुरिति किं मर्थं अहन्वत्रम्॥ ॥ ॥

मविर

र्थवत्त्वापक्षे। तत्र हि तत्रैणैकेव विभक्तिः समुदायावयवेर्थगतमेकत्वं प्रत्याययिष्यति। एकमेव हि तदेकत्वं। तच्चैकेनैव हि सुपा प्रत्याययितत्वमितस्य वयवेभ्यो विभक्तिर्न स्यादिति। अनर्थकस्य तु प्रातिपदिकसंज्ञायां प्रत्याययितव्यार्थस्याभावात्समुदायादिव प्रतिवर्णं विभक्त्युत्पत्तिप्रसंगः। नलोप इति। विभक्तेस्तु श्रवणं न भवति। समुदायस्य पृथक्प्रातिपदिकसंज्ञायां तदंतर्भावात्लुको भावात्। नलोपस्योपलक्षणमेतत्। ज्ञत्वादिज्ञशत्वादीनामपि प्रसंगः। अहन्निति। विशेषविहितत्वात्स्वरादाद्युत्पत्तौ सत्यामडागमस्य धातुभक्तत्वात्प्रातिपदिकसंज्ञायां सत्यां नलोपप्रसंगः। न चाप्रत्यय इति प्रत्ययलक्षणेन प्रतिषेधः। नडिः संबुध्योरिति ज्ञापनान्नलोपे विधीयमाने प्रत्ययलक्षणेनाप्रत्यय इति निषेधाभावात्॥ ॥

राम॰
२०८

= अप्रत्ययइतिनतदंतस्य निषेधप्रसाद्येनाह पुत्रीयतीति प्रत्ययांतस्य स्वनिषेधप्रसाध्येनाह अत्रेति = प्रतिषेधप्रसंगइति नन्वेवं वेदिषियानित्यत्राप्रत्ययनिषेधेमात्रेतद्धितग्रहणस्य चरितार्थता अप्रत्ययग्रहणस्याभावे एव नियमप्रक्रमात् सत्यप्रत्ययांतस्य निषेधोन प्राप्तयस्यापि अर्थव=
= ग्रहणसामर्थ्याद्विशिष्टार्थवत्त्वस्योक्तत्वादानर्थक्यात् इदियानिपदेतु प्रत्ययमात्रस्य प्रातिपदिकसंज्ञेष्यत एवेतिनतत्रनिषेधप्रसक्त्यर्थमप्रत्ययग्रहणमितिभावः इदं च कार्यकालपक्षे यथोद्देशपक्षेतु भिद्धि विसर्वस्यायांप्रवृत्तावपि संज्ञाया एकदेशविकृतन्यायेनानिवृत्तेरस्याः

धातुग्रहणं करोतीति। पुत्रीयतीत्यादौ प्रातिपदिकत्वादेव लुक् सिद्ध इति भावः। श्येनायत इति। अप्रत्यय इति निषिद्धा प्रातिपदिकसंज्ञा। तत्र तद्धितग्रहणमिति। तद्धितग्रहण-
मत्र नियमार्थं। कृद्ग्रहणं तु प्रतिषेधार्थं। भिद् छिद् इत्यत्र ह्यधातुरिति प्रतिषेधप्रसंगः। अनेकपदस्य संग इति। अनेकं पदमस्मिन्निति अनेकपदः समुदायस्तस्य संज्ञाप्रसंगः।
अनेकस्यापि पदस्येति। समुदितस्येति बोद्धव्यं। प्रतिपदं तु नैव संज्ञाप्राप्तोऽप्रत्यय इति निषेधात्। समुदायस्य तु निषेधो न प्रवर्त्तते। प्रत्ययग्रहणे यस्मात्स विहित इति व

= न च पुत्रीयेत्यस्मिन् कृत्कार्थवत्त्वाभावादेव संज्ञा न भविष्यतीति वाच्यं धातुग्रहणाभावे ऽर्थवत्त्वेन कृत्कार्थवत्त्वस्याजाजादिति माङ्कुर्वात् =

अधातुरिति शक्यमवक्तुं। कस्मान्न भवति अहन्वृत्रमिति। आचार्यप्रवृत्तिर्ज्ञापयति न धातोः प्रातिपदिकसंज्ञा भवतीति यदयं सुपो धातुप्रातिपदिक-
योरिति धातुग्रहणं करोति। नैतदस्ति ज्ञापकं प्रतिषिद्धार्थमेतत्स्यात्। अपि काकः श्येनायत इति। अप्रत्यय इति शक्यमवक्तुं कांडे कुड्ये। अप्रत्यय इति शक्य-
मवक्तुं। कस्मान्न भवति कांडे कुड्ये इति। तद्धितग्रहणं नियमार्थं भविष्यति। कृत्तद्धितांतस्यैव प्रत्ययांतस्य प्रातिपदिकसंज्ञा भवति नान्यस्येति।
अर्थवदनेकपदस्य संगः। अर्थवदिति प्रातिपदिकसंज्ञायां अनेकस्यापि पदस्य प्रातिपदिकसंज्ञा प्राप्नोति। दशदाडिमानि षडपूपाः कुंडमजाजिनं
पललपिंडः अधरोरुकमेतत्कुमार्याः स्फैयकृतस्य पिता प्रतिशीन इति। समुदायो ह्यानर्थकः। समुदायोऽनर्थक इति चेदवयवार्थवत्त्वात्समु-
दायार्थवत्त्वं यथा लोके। समुदायोऽनर्थक इति चेदवयवार्थवत्त्वात्समुदायार्थवत्त्वं अवयवैरर्थवद्भिः समुदाया अप्यर्थवंतो भवंतीति यथा लोके।

चनात्समुदायाच्च प्रत्ययस्याविधानात्प्रत्ययांतत्वाभावात्। न विद्यते प्रत्ययो यस्मिन्सोऽयमप्रत्यय इत्यप्राश्रयितुं न युज्यते। बहुपटव इत्यस्यापि समुदायस्य नि-
षेधप्रसंगात्स्वरे दोषप्रसंगात्। समुदायो ह्यानर्थक इति। पदार्थानां समन्वयाभावात्। अवयवार्थत्वादिति। अवयवधर्माणां च समुदायेऽव्यपदेशात् इति च प्रातिपदि-
॥ कत्वे सुब्लुक्प्रसंगः॥ ॥

भा०कै० प्र० १०९ २०७

एषैषेति। एषा या वाचो युक्तिः सा एषा एतत्समाणो स इत्यर्थः। अकारो मत्वर्थीय इति। तत्त्वेनावयवधर्मेण समुदाये व्यपदेशः। किं तर्हीदं द्यादिवद्यौगिक इत्यर्थः। मत्वं तादिति। मत्वं तान्मतुब्भवति। सरूपप्रसङ्गो नेष्ट इति वचनात्। तस्मादेकगोपूर्वादिति ठञो भाष्यकारवचनप्रामाण्याल्लोपः। अत इति च तत्र निवृत्तं गोत्रिकादि सिद्धार्थं। गवां समूहो गोत्रा सास्मिन्नस्तीति गोत्रिकं। अथवा मत्वं तान्मत्वर्थीयो लुप्यते इत्यनेनावयवधर्मस्य समुदाये उपचारमाह। इह तु मुख्येऽर्थे वर्तते संभवसु पचु।

= तत्राच्छिल्पोपजीविषु उपजीव्येषु जनमंत्रिपुरोहितादिस्मराजनसंघातो नगरमित्युच्यते। तत्रोपजीव्यानां राजादीनां सर्वेषां मेलकं संसर्गो गोमत्वेन तत्संघातोपजीविनां नरपदार्थभूतानां पामरगणानां मत्वं नापि गोमत्त्वं यथा पितथा यथा वा भिदं नगरं गोमदिदं नगरमिति उपजीव्येन प्रधानेन

तद्यथा लोके आढ्यमिदं नगरं गोमदिदं नगरमित्युच्यते। न च सर्वे तत्र आढ्या भवन्ति सर्वे वा गोमन्तः। यथा लोक इत्युच्यते लोके चावयवा अर्थवन्तो न समुदायाः। अनर्थकाश्चावयवा अर्थवन्तो न समुदायाः। यस्य हि य इत्थं भवति स तेन कार्यं करोति। यस्य च या गावो भवन्ति स तासां क्षीरं घृतं वोपभुङ्क्ते अन्यैरेतद् दृष्टुमशक्यं। कातहीयं वाचोयुक्तिः आढ्यमिदं नगरं गोमदिदं नगरमिति। एषैषा वाचो युक्तिः। इह तावदाढ्यमिसकारो मत्वर्थीयः। आढ्याः अस्मिन्सन्तीति तदिदमाढ्यमिति। गोमदिदं नगरमिति मत्वं तान्मत्वर्थीयो लुप्यते। एवमपि वाक्यप्रतिषेधोऽर्थवत्त्वात्। वाक्यस्य प्रातिपदिकसंज्ञायाः प्रतिषेधो वक्तव्यः। देवदत्त गामभ्याज शुक्लां देवदत्त गामभ्याज कृष्णामिति। किं कारणं। अर्थवत्त्वात्। अर्थवद्ध्येतद्वाक्यं न वै पदार्थादन्यैस्योपलब्धिर्भवति वाक्ये॥ ॥ ॥ ॥

स्यार्थ

तस्मादयोयो न युक्तः। अर्थवद्वाक्यमिदानीं दर्शयति। एवमपीति। अर्थवद्वीति। पदार्थानां समन्वयावगमात्। न वै पदार्थादिति। पदानि स्वं स्वमर्थं प्रतिपादयन्ति वाक्यं पदार्था एवत्वाकाङ्क्षायोग्यतासन्निधिवशात् परस्परसंसृष्टा वाक्यार्थ इत्यर्थः। न तु वाक्यं वाक्यार्थो वा पृथगस्ति॥ ॥ ॥

एम० १०९

पदार्थाभिसंबंधस्येति। अनियतं पदं नियतं वाक्यं विशिष्टार्थस्य पदार्थसंसर्गरूपस्य वाचकं। अन्यथा त्वशब्दो वाक्यार्थः स्यात्। कर्त्ता निर्दिष्ट इति। संबोधनविषयम
नियतक्रियं कर्त्तृमात्रमित्यर्थः। यद्विशेषेवस्थानमिति। पदार्थसंसर्गरूपे वाक्यार्थ इत्यर्थः। अत एव वाक्यमेव मुख्यः शब्दो वाक्यार्थ एव मुख्यः शब्दार्थः। सादृश्यात्त्वन्वय
व्यतिरेकौ कल्पितौ लाघवार्थमाश्रित्य पदपदार्थव्यवस्थापनं क्रियते। प्रतिवाक्यं तु संकुलससंभवाच्छब्दव्यवहाराभावप्रसंगात्। बहुपटव इति। घोसेनार्थेना

पदार्थादन्यस्यानुपलब्धिरिति चेत्पदार्थाभिसंबंधस्योपलब्धिः। पदार्थादन्यस्यानुपलब्धिरिति चेत् इदमुच्यते। पदार्थाभिसंबंधस्योपलब्धि
र्भवति वाक्ये। इह देवदत्त इत्युक्ते कर्त्ता निर्दिष्टः कर्म क्रिया गुणो वा निर्दिष्टो। गामित्युक्ते कर्म निर्दिष्टं कर्त्ता क्रिया गुणो वा निर्दिष्टो। अभ्याजेत्युक्ते
क्रिया निर्दिष्टा कर्त्ता कर्मणी गुणश्चानिर्दिष्टः। शुक्लामित्युक्ते गुणो निर्दिष्टः कर्त्ता कर्मणी क्रिया चानिर्दिष्टा। इहेदानीं देवदत्त गामभ्याज शुक्लामि
त्युक्ते सर्वं निर्दिष्टं। देवदत्त एव कर्त्ता नान्यः। गामेव कर्म नान्यत्। अभ्याजेति क्रिया नान्या। शुक्लामेव न कृष्णामिति। एषां पदार्थानां सामान्ये वर्त्त
मानानां यद्विशेषेवस्थानं स वाक्यार्थः। तस्मात्प्रतिषेधः। तस्मात्प्रतिषेधो वक्तव्यः। न वक्तव्यः। अर्थवत्समुदायानां समासग्रहणं नियमा
र्थं। अर्थवत्संग्रहणं नियमार्थं भविष्यति। समास एवार्थवतां समुदायानां प्रातिपदिकसंज्ञो भवति नान्य इति। यदि नियमः क्रियते प्रकृति

मुदायानां समास॰ ‘‘प्रत्ययसमुदायस्य प्रातिपदिकसंज्ञा न प्राप्नोति। बहुपटवः उच्चकैः नीचकैरिति॥ ॥

येन विधिरिति सूत्र॰

र्थवान्प्रत्ययः प्रकृतिस्तु वा चेनेत्यर्थवत्समुदायोयं भवति। उच्चकैरिति। तन्न अपतितत्वाद्ग्रहणे न गृह्यत इति परान्नाश्रीयते नाप्यकच् अमप्लुत इति तद्वयं दोषः
।तदा हि सुबंतस्याकचि कृते अव्ययादिति सुब्लुगभावात्सुपो धातुप्रातिपदिकयोरिति लुग्भिष्यते स च न प्राप्नोति॥ ॥ ॥

=नामप्रातिपदिकत्वात्‌ इत्याशयः॥१२॥=नियमवाधेकदेशोविकृतमनन्यवदितिपरिहर्तुं प्रश्नयति॥ किंपुनरिति॥ इतरआह॥ प्रातिपदिकेति॥ एकदेशपाह॥ नैषदोषइति॥ इतरआह॥ नैवंशक्यमिति॥ पुनरेकदेशी प्रकारान्तरेणपरिहरति॥ एवंतर्हीति॥ इतरआह॥ सतर्हीति॥ नियमबाधेकदेशपाह॥ ननुचेति॥ अनेकान्तस्यैवविवेचन॥

=नियमेनप्रकृतिप्रत्ययसमुदायस्यापर्थवत्त्वेपीत्यावनिः स्यादनर्थकप्रत्ययान्तपर्युदासः स्यादितिसामर्थ्यमितिप्रसमस्त॥

राका२ काग८

किंपुनरत्रेति। उच्चैरित्यादेर्घुन्प्रत्ययापिसिध्यतीतिमन्यतः। इतरोबहुपटवइतिनसिध्यतीतिमन्यमानआह। प्रातिपदिकादिति। स्वरइति। बहुपटवइतिवकारस्योदात्तत्वंप्राप्नोति। टकारस्यचेष्यते। प्रकृतस्यनेकदेशत्वादिति। नह्यसौप्रकृतेरेकदेशइत्यर्थः। अप्रत्ययइतिप्रतिषेधंशास्तीत्युक्तेकश्चिद्ब्रूयाद्बहुपटवइत्यत्राप्यप्रत्यय इतिप्रतिषेधःप्राप्नोतीत्यतआह। सचतदंत प्रतिषेधइति। प्रत्ययग्रहणेयस्मात्सविहितइतितदंतविधिःसंज्ञाविधौचप्रत्ययग्रहणेतदंतविधिर्निवारि

किंपुनरत्रप्रातिपदिकसंज्ञयाप्रार्थ्यते। प्रातिपदिकादितिस्वाद्युत्पत्तिर्यथास्यात्‌। नैषदोषः। यथैवानामप्रातिपदिकत्वात्स्वाद्युत्पत्तिर्नभवति एवंलुगपिनभविष्यति। तत्रयैवासावंतर्वर्तिनीविभक्तिस्तस्याःश्रवणंभविष्यति। नैवंशक्यं। स्वरेहिदोषःस्यात्‌। बहुपटवइत्येवंस्वरःस्यात्‌ बहुपटवइतिचेष्यते। पठिष्यतिह्याचार्यः चितःसप्रकृतेर्बह्वकजर्थमिति। तस्मिंश्चपुनर्लुप्तायांप्रकृतस्यनेकदेशत्वादंतोदात्तत्वंनभविष्यति। एवंतर्ह्याचार्यप्रवृत्तिर्ज्ञापयतिभवतिप्रकृतिप्रत्ययसमुदायस्यप्रातिपदिकसंज्ञेति। यदयमप्रत्ययइतिप्रतिषेधंशास्ति। सचत दंत प्रतिषेधः। सतर्हिज्ञापकार्थःप्रत्ययप्रतिषेधोवक्तव्यः॥ ननुचायंप्राप्त्यर्थोपिवक्तव्यः। नार्थःप्राप्त्यर्थेन। कृत्तद्धितग्रहणंनियमार्थंभविष्यति। कृत्तद्धितान्तस्यैवप्रत्ययान्तस्यप्रातिपदिकसंज्ञाभवतिनान्यस्यप्रत्ययान्तस्येति॥ ॥

तः। अप्रत्ययइत्ययंतुप्रतिषेधविधिः पटुशब्दाच्चात्रजस्युत्पन्नोनबहुपटुशब्दादितिबहुपटवइत्येतदप्रत्ययान्तमेव। अथवाप्रत्ययइतिबहुव्रीत्याश्रयणा त्प्रत्ययादेरपिबहुपटवइत्यस्यनिषेधःप्राप्नोतीत्याह। सचेति। अप्रत्ययइतितत्पुरुषआश्रीयते। तस्यस्वपदार्थत्वेनांतरंगत्वादितिभावः। प्राप्त्यर्थइतिप्रति षेधप्राप्त्यर्थइत्यर्थः॥ ॥ ॥

=पर्युदासेपिप्रत्ययस्यसंज्ञित्वाभावान्नदोषइतिभावः॥१२॥=

=भेदः समासीयवाक्ये पदार्थयोर्भेदे ससाकांक्षात्वं संसर्गश्चेतरान्वयः । नन्वकुपत्यवद्दसत्त्रं भेदः एकैकस्यैवोभाभ्यां प्रकृतिप्रत्ययाभ्यां प्रतिपादनात् ॥ २ = समासत्वादेवेति । अयं भावः । भेदसंसर्गद्वारकार्थवत्वेन नियमस्य तुल्यजातीयं ताश्रयणे पितथा सतामां सुबंतानां सुबंतानां प्रातिपदिका =

= तिर्वाच्यः समुदायः स एव नियमेन व्यावर्त्यः तेन तु सुबंतानां तिङंतानामित्येवं यदि कश्चिद्ब्रूयात् तत्रेदमुत्तरं जहिकर्मणेत्येनेनायः समास = अस्मिन्सति प्रातिपदिकसंज्ञाप्रसक्ता तुल्यजातीयं सुबंततिङंतसमुदायं व्यावर्तयेदेवेति । आरभ्य इत्यस्य प्रवर्त्यते इत्यर्थः । किन्निमार्थमिति ।

= विस्तरमोहेत्यादेः ॥ २ =

= समासमहाभाष्यं ॥ २ =

सएषोनन्यार्थ इति । ज्ञापकार्थ एवेत्यर्थः । सुबंतानामिति । एतच्चोपलक्षणं । भेदसंसर्गद्वारकार्थवत्वयुक्तानां यस्मात्सुबंतानां सुबंतानामपि समासो दृश्यते । अश्वक्री

तीत्यादौ गतिकारकोपपदानां [illegible] कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेरिति वचनात् । देवदत्तो ग्राममं ग

तइत्यादेः सुबंतसमुदायस्यैव वाक्यस्य नियमेन निवृत्तिः स्यादित्यभिप्रायेणाह । सुप्तिङ् समुदायस्येति । जहिकर्मणेति । ननु समाससंज्ञेयं समासांतोदात्ता

सएषोनन्यार्थः प्रत्ययप्रतिषेधो वक्तव्यः प्रकृतिप्रत्ययसमुदायस्य वा प्रातिपदिकसंज्ञा वक्तव्या । उभयं न वक्तव्यं । तुल्यजातीयस्य नियमः । क

श्च तुल्यजातीयः । यथाजातीयकानां समासः । कथं जातीयकानां समासः । सुबंतानां । सुप्तिङ् समुदायस्य तर्हि प्रातिपदिकसंज्ञा प्राप्नोति ।

सुप्तिङ् समुदायस्यापि प्रातिपदिकसंज्ञा आरभ्यते । जहिकर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधातीति । तन्नियमार्थं भविष्यति । एतस्मै

व सुप्तिङ् समुदायस्य प्रातिपदिकसंज्ञा भवति नान्यस्येति । तिङ् समुदायस्य तर्हि प्रातिपदिकसंज्ञा प्राप्नोति । तिङ् समुदायस्यापि प्राति

पदिकसंज्ञा आरभ्यते । आख्यातमाख्यातेन क्रियासातत्य इति । तन्नियमार्थं भविष्यति । एतस्यैव तिङ् समुदायस्य प्रातिपदिकसंज्ञा भ

वति नान्यस्येति । अर्थवत्तानोपपद्यते केवलेनावचनात् । अर्थवत्तानोपपद्यते वृक्षशब्दस्य । किं कारणं । केवलेनावचनात् । नहि केवले

॥ न वृक्षशब्देनार्थो गम्यते केनतर्हि सप्रत्ययकेन ॥ ॥ ॥

र्थो । नैष दोषः । समासत्वादेव प्रातिपदिकत्वमिति तन्तुल्यजातीयतात्प्रतिपादनार्थमेतदुपन्यस्तमिति । तिङ् समुदायस्येति । परस्पधावतीत्यादेः । ततश्च प्रातिपदि

कांतोदात्तत्वप्रसंगः । आख्यातमिति । न तच्च समासेन तुल्यजातीयानां सर्वेषां वाक्यानां नियमान्निवृत्तिः सिद्धेत्यर्थः । अपर्थवत्तेति । अर्थवत्ता संज्ञानिमित्तत्वे

नेहोपात्तासा च वाक्यस्यैव वा पदस्य केवलस्य लोके प्रयुज्यमानस्योपपद्यते न तु प्रकृतिभागस्य केवलस्य प्रयोगाभावाद्दर्शवदव्यवहार्यत्वात् ॥ ॥

वी ०

=प्रसिद्धिर्नत्वस्यार्थवत्वे किं केवलस्य प्रयोगः आपाद्यते उत तत्र प्रमाणं नास्ती(ति)पृच्छ्यते इति विकल्प्य नाद्य इत्याह- अन्यथेति- द्वितीयं प्रत्याह- अर्थवत्त्वादिति- अन्वयं प्रयोगः- प्रकृतिप्रत्ययौ तत्तदर्थसंबंधिनौ तत्तदर्थान्वयव्यतिरेकानुविधायकान्वयव्यतिरेकवत्त्वात् प्रमदवदिति- नच तत्प्रत्ययस्यार्थवत्त्वेपि प्रत्येकमन...

नवेति। अन्यथासिद्धः केवलस्याप्रयोगः। न केवला प्रकृतिः प्रयोक्तव्या न च केवलः प्रत्यय इति नियमात्। अर्थवत्त्वं च अन्वयव्यतिरेकाभ्यामस्त्येवेति भावः। अन्वयव्यतिरेकाभ्यामिति। अन्वयोनुगमः सति शब्दे अर्थावगमः। व्यतिरेकः शब्दाभावे तदर्थानवगमः। विषम इति। यद्येकः शब्द एकस्मिन्नर्थे नियतः स्यात्तत एतन्नाप्रत्ययेन नित्यसंबंधात् केवलस्याप्रयोगः। न वा एष दोषः। किं कारणं। प्रत्ययेन नित्यसंबंधात्। नित्यसंबद्धावेतावर्थौ प्रकृतिः प्रत्यय इति। प्रत्ययेन नित्यसंबंधात् केवलस्याप्रयोगो न भविष्यति। अन्य इवायं दोषः। न्यग्रोधश्चैष आम्नायः। कोविदारश्चैष। अर्थवत्त्वं नोपपद्यते केवलेनावचनादिति यद्वा न स्याप्रसिद्धोदितः केवलस्याप्रयोगे हेतुमाह। एवं च किल नाम कृता चोद्यते समुदायस्यार्थे प्रयोगादवयवानामप्र[illegible]सिद्धिरिति। सिद्धं त्वन्वयव्यतिरेकाभ्यां। सिद्धमेतत्। कथं। अन्वयाद्व्यतिरेकाच्च। कोसावन्वयो व्यतिरेको वा। इह वृक्ष इत्युक्ते कश्चिच्छब्दः श्रूयते वृक्षशब्दः अकारान्तः सकारश्च प्रत्ययः। अर्थोपि कश्चिद्गम्यते मूलस्कंधपलाशवानेकत्वं च। वृक्षावित्युक्ते कश्चिच्छब्दो हीयते कश्चिदुपजायते कश्चिदन्वयी। सकारो हीयते औकार उपजायते वृक्षशब्द अकारान्तोन्वयी। अर्थोपि कश्चिद्धीयते कश्चिदुपजायते कश्चिदन्वयी। एकत्वं हीयते द्वित्वमुपजायते मूलस्कंधपलाशवानन्वयी। ते मन्यामहे यः शब्दो हीयते तस्यासावर्थो हीयते यः शब्द उपजायते तस्यासावर्थो योर्थ उपजायते यः शब्दोन्वयी तस्यासावर्थः योर्थोन्वयी। विषम उपन्यासः। बहवो हि शब्दा एकार्था भवंति। तद्यथा इंद्रः शक्रः पुरंदरः। कंदुः कोष्ठः कुसूल इति। एकश्च शब्दो बह्वर्थः। तद्यथा। अक्षाः पादा माषा इति॥ ॥

घुज्येत तत्रकुयात्तत्त्वनियमः। ततः प्रकृतेरेवसर्वेर्थाः स्युः। यथा दधिमधु अग्निचिदिति। प्रत्ययः क्वचिद्द्योतकः। प्रत्ययस्यैव वा सर्वेर्थाः स्युः। इयानधुनेति यथाप्र [illegible] ॥ कृतिस्त्वर्थाभिधाने सहायकमात्रं कुर्यात्॥ ॥ ॥

=यथेति- एवं प्रयोगः वृक्षासिति सकारः पदप्रयोगेन वृक्षाजीनवोधविषमप्रावदर्थसंबंधी प्रत्ययत्वात् इत्यादिति प्रत्ययवत् नःतथा तत्रैव वृक्षशब्देप्रसु... [illegible] निति... नेनताद्ध्यगावदर्थसंसाधनीयं- तथाचक्रकौचित्यस्याचित् प्रत्ययेनैव सर्वार्थबोधनीयो न्यदाचापतस्य प्रकृ...

ततः किमनसाधीय इति। प्रकृतिः स्वार्थे न स्वार्थेनाभिदधाति द्योतिकास्तु विभक्त्य इति सिद्धे वार्थवत्ता। प्रत्यय एवेति। ततश्च प्रकृतेरर्थवत्ता न सिध्यतीति तदवस्थो दोष इत्यर्थः। सामान्यशब्दा इति। प्रकृतिप्रत्ययौ स्वार्थे नार्थेनाभिदध्यात् वृक्ष इत्युक्ते सर्वार्थसंख्याप्रतीयेत प्रत्ययो वा सर्वस्य प्रातिपदिकस्यार्थे प्रत्याययेदित्यर्थः। यत्तस्तु खल्विति। प्रकर

=विशेषः संयोगविप्रयोगादिः प्रकरणं वक्तृभेदादिरेतदिति एते स्वादयः प्रत्ययाः ... सामान्यशब्दाः स्युरिति ... नान्वस्तु नानार्थत्वं न

ततः किमनसाधीयोऽर्थवत्ता सिद्धा भवति। न ब्रूमोऽर्थवत्ता न सिध्यतीति। वर्णितार्थवत्ताऽन्वयव्यतिरेकाभ्यामेव। तत्र कुत एतदयं प्रकृत्यर्थोऽयं प्रत्ययार्थ इति। न पुनः प्रकृतिरेवोभावर्थौ ब्रूयात्प्रत्यय एव वा। सामान्यशब्दा एते एवं स्युः। सामान्यशब्दाश्च नान्तरेण विशेषं प्रकरणं वा विशेषेष्ववतिष्ठन्ते। यत्तस्तु खलु वृक्ष इत्युक्ते स्वभावतः कस्मिंश्चिदर्थे प्रतीतिरुपजायते। अतो मन्यामहे नेमे सामान्यशब्दा इति। न चेदिमे सामान्यशब्दाः प्रकृतिः प्रकृत्यर्थे वर्तते प्रत्ययश्च प्रत्ययार्थे। किं पुनरिमे वर्णा अर्थवन्त आहोस्विदनर्थकाः। वर्णस्यार्थवदनर्थकत्वे उक्तम्। किमुक्तम्। अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात्। वर्णव्यत्यये चार्थान्तरगमनात्। वर्णानुपलब्धौ चानर्थगतेः। संघातार्थवत्त्वाच्च। संघातस्यैकार्थ्यात्सुबभावो वर्णात्। अनर्थकास्तु प्रतिवर्णमर्थानुपलब्धेः। वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनादिति। ननु चेदमपरिहृतं संघातार्थवत्त्वाच्चेति। तस्य परिहारः। संघातार्थवत्त्वाच्चेति चेद्दृष्टो ह्यतदर्थेन गुणेन गुणिनोऽर्थभावः। संघातार्थवत्त्वाच्चेति दृष्टो ह्यतदर्थेन गुणेन गुणिनोऽर्थभावः। तद्यथा। एकस्तन्तुस्त्वक्त्राणेऽसमर्थः। तत्समुदायश्च कम्बलः समर्थः। एकश्च तण्डुलस्तुषनिघातेऽसमर्थः। तत्समुदायश्च वर्द्धितकं समर्थम्। एकश्च बल्वजो बन्धनेऽसमर्थः तत्समुदायश्च रज्जुः समर्था भवति॥ ॥ ॥

णादिना विनैवेति भावः। अतदर्थेनेति। अतत्प्रयोजनेनेत्यर्थः। गुणेनेति। अवयवेन। सद्ध्यवयविन उपकारकत्वाद्गुणः। अवयवी तु गुणी। अर्थभावः प्रयोजनोत्पत्तिः। व

=समुदायार्थप्रयोजकेनेत्यर्थः। अनेन संघातघटकवर्णपक्षकार्थवत्त्वसाधक ... संघातार्थवत्त्वरूपहेतोरप्रयोजकत्वशंका विघटिता। संघातार्थे ... पूर्वकाले ... कार्यकारणभावस्थानेवांतिकत्वमुच्यते। १२ ॥ बल्वज ... स्त्वणविशेषः॥ ॥ ॥

याचयावतीति। अयं समुदायः काचिदिसर्थे वर्त्तते। विहतानीति। विक्षिप्तानीसर्थः। अनर्थकस्येति। निपातानां द्योतकत्वादभिधेयाभावे ऽपि द्योसार्थे सद्भावाद्येषामर्थवत्त्वं तेषां सिध्यसेव संज्ञायस्तु द्योसोप्यर्थो नास्ति तदर्थं वचनं निघातो यथा स्यादिति। अर्थवदनर्थकयोरससपि सामर्थ्ये संज्ञाविधानसामर्थ्यान्निघातोभ

विषमउपन्यासः। भवतिहितत्रयाचयावतीचार्थमात्रा। भवतिहि किंचित्प्रसेकस्तं तुस्त्रकारोसमर्थः। एकश्चतंडुलः क्षुत्प्रतिघाते समर्थः। एकश्च बल्वजोबंधने समर्थः। इमे पुनर्वर्णाः असंतमेवानर्थकाः। यथा तर्हि रथांगानि विहतानि प्रसेकं व्रजिक्रियां प्रसमर्थानि भवंति। तत्समुदायश्च रथः समर्थः। एवमेषां वर्णानां समुदाया अर्थवंतः अवयवा अनर्थका इति। निपातस्यानर्थकस्य प्रातिपदिकादिति स्वाद्युत्पत्तिः सुबंतमिति पदसंज्ञा परस्य पदादिति निघातो यथा स्यात्। नैतदस्ति प्रयोजनं। ससामपि प्रातिपदिकसंज्ञायां स्वाद्युत्पत्तिं न प्राप्नोति। किं कारणं न हि प्रातिपदिकसंज्ञायामेव स्वाद्युत्पत्तिः प्रतिबद्धा। किं तर्हि। एकत्वादिष्वर्थेषु स्वादयो विधीयंते। न चैषामेकत्वादयः संति। नैष दोषः। अविशेषेणोत्पद्यंते। उत्पन्नानां नियमः क्रियते। अथ वा प्रकृतानर्थानपेक्ष्य नियमः। के च प्रकृताः। एकत्वादयः। एकस्मिन्नेवार्थे एकवचनं न द्वयोर्न बहुषु। द्वयोरेवार्थयोर्द्विवचनं नैकस्मिन्न बहुषु। बहुष्वेवार्थेषु बहुवचनं नैकस्मिन्न द्वयोरिति। अथवाचार्यप्रवृत्तिर्ज्ञापयति अनर्थकानामप्येषां भवसर्थवत्कृतमिति॥ ×प्रातिपदिकत्वं निपातस्यानर्थकस्य प्रातिपदि

वतीसेके। समानवाक्यता निमित्तो निघातो न सामर्थ्यनिमित्तः। साचेहास्ति। आख्यातं साव्ययकारकविशेषणं वाक्यमिसत्र परे। नहीति। स्वादिविधिवा वाक्यसंख्याविधिर्वा केनैकवाक्यत्वात्। अविशेषेणेति। नानावाक्याश्रयणात्। नियमश्चार्थो नांन प्रसयानामिसनर्थकेभ्योपि ते भवंति। अथ वेति। प्रसयनियमे ऽपि दोषाभाव इसर्थः॥

तिपदिकाषणावाक्यस्य २

अधिपरी इति। क्रियायोगे गतुपसर्गसंज्ञयोर्विधानादनर्थकयोः क्रियायोगाभावात्प्राप्तिरेव नास्तीति संज्ञाविधानं यथोक्तार्थस्य ज्ञापकं संपद्यते। अनर्थकं च निपा
तपातयोः साधारणार्थेन याऽधिकद्योतता भावादुच्यते न तु सर्वात्मना अर्थाभावात्। तिवेकादेश इति। तिप् तिशशब्दादारभ्य सुपः पकारेण प्रत्याहारः। अन्तवत्त्वादिति।
स्यात् तुनिर्

यदयमधिपरी अनर्थकाविति सनर्थकयोगे गत्युपसर्गसंज्ञा बाधिकां कर्मप्रवचनीयसंज्ञां शास्ति। किं पुनरयं पर्युदासः यदन्यत्प्रत्ययादिति आ
होस्वित्प्रसज्यायं प्रतिषेधः। प्रत्ययो नेति। कश्चात्र विशेषः। अप्रत्यय इति चेत्तिवेकादेशे प्रतिषेधोऽन्तवत्त्वात्। अप्रत्यय इति चेत्तिवेकादेशे प्रति
षेधो वक्तव्यः। कोऽदे कुट्यै। किं कारणं। अन्तवत्त्वात्। तिवृति पो रेकादेशं अतिपोऽन्तवत्स्यात्। अस्त्यन्यत्तिपइति क्त्वा प्रातिपदिकसंज्ञा प्राप्नोति। अ
स्तु तर्हि प्रसज्यप्रतिषेधः प्रत्ययो नेति। न प्रत्यय इति चेदूडेकादेशे प्रतिषेध आदिवत्त्वात्। न प्रत्यय इति चेदूडेकादेशे प्रतिषेधः प्राप्नोति। ब्रह्मबन्धूः
। किं कारणं। आदिवत्त्वात्। प्रत्ययाप्रत्ययोरेकादेशः प्रत्ययस्यादिवत्स्यात्तत्र प्रतिषेधः प्राप्नोति। किं पुनरत्र प्रातिपदिकसंज्ञया प्रार्थ्यते। प्रा
तिपदिकादिति स्वाद्युत्पत्तिर्यथा स्यात्। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति उत्पद्यन्ते ऊडन्तात्स्वादय इति। यदयं नोङ्धात्वोरिति विभक्तिस्व
रस्य प्रतिषेधं शास्ति॥ ॥ ॥ ॥

पूर्वं प्रत्ययसदृशस्य प्रातिपदिकसंज्ञाकार्यमिति पूर्वं प्रसक्तं तद्भावः आदिवत्त्वादिति। परकार्ये प्रतिषेधे कृत्ये परमस्ये कादेशस्यादिवद्भावः यदयमिति। अथवा प्राति
पदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणमिति स्वादय उत्पद्यन्ते॥ ॥श्री॥ ॥ ॥

=यथोद्देशपक्षाश्रयेणाह। नञ्रेति। न च कार्यकालपक्षे स्मृत्युपनीतयोर्मृत्प्रातिपदिकसंज्ञा तदन्तेन तत्र आवादतिदेशः कार्येति वाच्यं तत्पक्षे कार्यभेदेन संज्ञाभेदाभ्युपगमात् उपनिप्रयोजिकायाः संज्ञायाः ... प्रातिपदिकत्वस्य प्रत्यय इति प्रतिषेधः कस्मान्नेति वाच्यं बहिरङ्गेण प्राति...

मा॰कै॰प्र॰
२१३
२१३

देइति। तच्चान्तरङ्गत्वात्प्रत्ययोत्पत्तेः प्रागेव ब्रह्म बन्धु पाहृत्य प्रवृत्ता प्रातिपदिकसंज्ञेत्यूङ्कादेशस्य पूर्वं प्रसंगे तद्वद्भावादस्येव प्रातिपदिकत्वमिति न दोषः। राजेति। तत्र नलो
पो न स्यात्। अत्राप्यन्तरङ्गत्वात्पूर्वमेव प्रवृत्ता प्रातिपदिकसंज्ञा बहिरङ्गेण प्रतिषेधेन न शक्यते निवर्तयितुमिति परिहारोस्ति। नङि संबुध्योरिति। ननु हे सुराजन्निति समा
सप्रातिपदिकसंज्ञार्थः प्रतिषेधः स्यात्। न चोत्तरपदे प्रत्यय इति प्रतिषेधः मध्येपवादन्यायात्। एवं तर्हि समासेपि प्रत्यय इति वर्त्तते। अन्यथा सुराजा अतिराजे

समुदाय
अथवा देशत्र प्रातिपदिकसंज्ञे अवयवस्यापि स्यापि। तत्रावयवस्य या प्रातिपदिकसंज्ञा तयो तद्वद्भावात्स्वाद्युत्पत्तिर्भविष्यति। सुब्लोपे च प्रत्य
यलक्षणत्वात्। सुब्लोपे च प्रत्ययलक्षणेन प्रतिषेधः प्राप्नोति। राजा तक्षा। प्रत्ययलक्षणेन प्रत्ययो नेति प्रतिषेधः प्राप्नोति। नैष दोषः।
आचार्यप्रवृत्तिर्ज्ञापयति न प्रत्ययलक्षणेन प्रतिषेधो भवतीति। यदयं नङि संबुध्योरिति प्रतिषेधं शास्ति। अथवा पुनरस्तु पर्युदासः।
ननु चोक्तम् प्रत्यय इति चेत्त्रिबेकादेशे प्रतिषेधो न वक्तव्यादिति। प्रसज्यप्रतिषेधेप्येष दोषः। देशत्र प्रातिपदिकसंज्ञे अवयवस्यापि सम
दायस्यापि। गृह्यते च प्रातिपदिकप्रातिपदिकयोरेकादेशः प्रातिपदिकग्रहणेन। तस्मादुभाभ्यामपि वक्तव्यं स्यात्। ह्रस्वो नपुंसके यत्त
स्येति। किं च नपुंसके। नपुंसकं यस्य गुणाः कस्य च नपुंसकं गुणाः। प्रातिपदिकस्य॥ ॥कृत्तद्धितसमासाश्च॥ ॥समासग्रहणं किं
मर्थं। समासग्रहणमुक्तं। किंतु। अर्थवत्समुदायानां समासग्रहणं नियमार्थमिति॥ ॥ ॥

तादेविध्यर्थता यां संभवत्यां नियमार्थं समासग्रहणं न स्यात्। यत्तस्येति। सत्त्वं तत्र च शक्तिसंख्याप्रधानं। न चैतयोर्लिङ्गयोगः। न चातद्वद्भावेनार्थः शक्योतिदेष्टुमिति
न भवति ह्रस्वः। अथवा नपुंसके प्रातिपदिकार्थस्यैव संभवतीति प्रातिपदिकग्रहणं मुख्यप्रातिपदिकग्रहणार्थमिति तद्वद्भावेन यत्प्रातिपदिकं तस्य ह्रस्वाभावः।
अत्र च सूत्रे परस्मै सन्नमर्थवत्त उदाहरणं। स्वसन्नौ तुल्रं तत्वादेव सिध्यतीति योगस्यारंभो नर्थकः स्यात्। अस्वसन्ति पक्षस्य चेदमेव सूत्रं ज्ञापकमित्याहुः॥ ॥

राम॰
२१३

=तिङंतेभ्यः सामानाधिकरण्याद्धनसंख्योपादानवत्लिंगोपादानशंका भवेत् [illegible] पवर्णितन्यायेन सामानाधिकरण्यादिति भावः ॥ ३ = नात्रेति अधिकरणत्वादिकं योगवृत्त्युत्तराण्यः ॥ ४ = ननु कारकं क्रियायाम् प्रयस्येति कर्पं नपुंसकस्याधिकरणमत आह ब्राह्मणेति ४ =

ह्रस्वो नपुंसके ॥ ॥ प्रातिपदिकग्रहणमिति । नपुंसकं लिंगं द्रव्यस्यैव संभवति । द्रव्यवाचित्वं च प्रातिपदिकस्यैव । न सुबंतस्य । शक्तिप्रधानत्वात् । नापि तिङंतस्य क्रियाप्रधानत्वादिति प्रश्नः । क्रांडे इति । द्वयोरपि शक्तिशक्तिमतो रभिधानादस्ति नपुंसकार्थे वृत्तित्वं सुबंतस्यापीति भावः । रमते ब्राह्मणकुलमिति । यथैव साधनाश्रयां संख्यामुपादत्ते तथा तल्लिंगमपि । अव्ययप्रतिषेध इति । यथोपवर्णितन्याये नाव्ययस्यापि लिंगयोगात्प्राप्तिः । दोषा ब्राह्मणकुलमिति । दोषासहचरितत्वा ब्राह्मणकुलमेव दोषाशब्देनोच्यते इति ह्रस्वप्रसंगः । नात्राव्ययमिति । दोषाशब्दो रात्राविसर्थे वर्त्तते दिवाशब्दोप्यहनी सत्वेति ब्राह्मणकुलसाधनां क्रियाणामधिकरण

मारव्यातेर

क्रियते र

ह्रस्वो नपुंसके प्रातिपदिकस्य ॥ ॥ प्रातिपदिकग्रहणं किमर्थं । नपुंसकह्रस्वत्वे प्रातिपदिकग्रहणं तिङ्निवृत्त्यर्थं । नपुंसकह्रस्वत्वे प्रातिपदिकग्रहणं तिङ्निवृत्त्यर्थं । तिङंतस्य ह्रस्वत्वं मा भूत् । कांडे कुड्ये रमते ब्राह्मणकुलमिति । अव्ययप्रतिषेधश्च । अव्ययानां प्रतिषेधो वक्तव्यः । इह मा भूत् । दोषा ब्राह्मणकुलं दिवा ब्राह्मणकुलं । स तर्हि वक्तव्यः । न वक्तव्यः । नात्राव्ययं नपुंसके वर्त्तते । किं तर्हि अधिकरणमत्राव्ययं नपुंसकस्य । इह तर्हि प्राप्नोति । कांडीभूतं वृषलकुलं कुड्यीभूतं वृषलकुलमिति । न वा लिंगाभावात् । न वा वक्तव्यं । किं कारणं । लिंगाभावात् । अलिंगमव्ययं । किं पुनरयमव्ययस्यैव परिहार आहोस्वित् तिङंतस्यापि । तिङंतस्यापीत्याह । कथं । स्वि

१ अव्ययं हि किंचिद्विभक्त्यर्थप्रधानं किंचित्क्रियाप्रधानं ॥ ॥ ॥

कालो भवन् ब्राह्मणकुलस्याधिकरणं भवति दोषा दृश्यते चरस्यधीते वेति । आधेयप्रधानेनाधिकरणस्य क्रियाधारणात् । कांडीभूतमिति । प्रकृतिविकारयोरभेदविवक्षायां च्विप्रत्ययः । द्वयोरप्यत्र तयोर्नपुंसकत्वाद्ध्रस्वप्रसंगः । कृते ह्रस्वे च्वौ चेति दीर्घो भविष्यतीति चेद्ध्रस्वस्य बहिरंगत्वाद्दीर्घे कर्त्तव्ये असिद्धत्वाद्दीर्घाप्रसंगः । एवं रमते इत्यत्रापि ह्रस्वे सति टेरेत्वस्याप्रसंगः । न वेति । असत्ववाचित्वाद्द्रव्यस्य नेते न लिंगं प्रतिपाद्यत इत्यर्थः ॥ ॥ ॥

नचैतयोरिति। आख्यातस्य ग्रन्त्याश्रयद्रव्य संख्याप्रतिपादने सामर्थ्यं नतुतल्लिंगप्रतिपादने। विचित्रत्वाद्भाव शक्तीनां कांडे इति षतद्दृत्वापि संख्यायाः प्राधा न्यान्नपुंसकत्वायोगः। अव श्यमिति। यद्यवयवधर्मेणासमुदायो व्यपदिश्यत इत्यर्थः। यत्रस्येति। साक्षात्तस्यैवपदान पुंसकत्वं तदाह्रस्वः। यस्तत्वव्यद्वारकं तस्य

उच्चैर्नीचैरितिविभक्त्यर्थप्रधानं। हिरुक् पृथगितिक्रियाप्रधानं। तिर्वंतं चापि किंचिद्विभक्त्यर्थप्रधानं किंचित्क्रियाप्रधानं। कांडेकुड्ये इ तिविभक्त्यर्थप्रधानं रमते ब्राह्मणाकुलमितिक्रियाप्रधानं। नचैतयोरर्थयोर्लिंङ्ग.संख्याभ्यां योगोस्ति। अवश्यं चैतदेवं विज्ञेयं। क्रि यमाणेपिहि प्रातिपदिकं इहप्रसज्येत कांडेकुड्ये द्वेह्यत्र प्रातिपदिकसंज्ञे। अवयवसाप्रिसमुदायस्यापि। एद्यतेच प्रातिपदि कप्रातिपदिकयोरेकादेशः प्रातिपदिकग्रहणेन। तस्मादुभाभ्यामपि वक्तव्यं स्यात् ह्रस्वो नपुंसके यत्रस्येति। किंच नपुंसके। नपुं सकंयस्यगुणः। कस्यचनपुंसकंगुणः। प्रातिपदिकस्य। यत्रेकादेशादीर्घत्वेषु प्रतिषेधः। यत्रेकादेशादीर्घत्वेषु प्रतिषेधो वक्तव्यः। युगवरत्राय। युगवरत्रार्थे। युगवरत्रेभ्यः। यत्रेकादेशदीर्घत्वेषु बहिरंगलक्षणत्वात्सिद्धं। बहिरंगा एते विधयः। अंतरंगं ह्र स्वत्वं। असिद्धं बहिरंगमंतरंगे। उपसर्जनस्वत्वेचाक्किं। यत्रेकादेशादीर्घत्वेषु प्रतिषेधो वक्तव्यः। एवद्वेभ्यः। उपसर्जनेक्किं बहिरंगल

×ग्रहणे×५ ×नहु॰ ११ क्षणत्वात्सिद्धमिसेव बहिरंगा एते विधयः। अंतरंगं ह्रस्वत्वं। असिद्धं बहिरंगमंतरंगे॥०॥

माभूतात्र यथा तस्यैव अनुपजातव्यतिरेकस्येत्यर्थः। विभक्त्यंतं चोपजातव्यतिरेकमिति ह्रस्वाभावः। सूत्रकारेण तु प्रातिपदिकग्रहणं मुख्यप्रातिपदिकग्रह णार्थं कृतं। प्रातिपदिकस्यैव नपुंसके वृत्तिसंभवात्। तेनोत्तवद्भावातिदिष्टप्रातिपदिकस्य ह्रस्वाभावः। पुगंवरत्रापेति। दीर्घकृते पुनर्ह्रस्वः। पुनर्दीर्घ इति चक्रक

गोस्त्रि योरुपसर्ज्जनस्य॥ ॥ क्वचिरस्यर्थमिति। धातुस्त्रियाऽपिकृदंतत्वादेरेनांनिर्द्देशः। भाष्यकारस्तु तदेव विभज्य व्याचष्टे। कृतस्त्रिया धातुस्त्रियाश्चेति। स्वरितेनेति। स्वरितेनाधिकार इति योगेनैकधा व्याख्यातस्तत्र यत्र स्वरितत्वं प्रतिज्ञायते तत्र तदधिकारोऽगृ स्यते इत्ययमपि तस्यार्थः। स्त्रियां क्विन्निसेतस्य प्रकरणविहितानां तुहृस्वभावितामाबादग्रहणं। अपस्त्री प्रत्ययेने सेवं तदिति। ननु षड्ः संप्रसारणं इत्यत्राति कारीषगंध्यपुत्र इत्यत्र संप्रसारणाभावार्थमनुपसर्ज्जनस्त्रीप्र

=इत्स्वभादित्वाभावादिति। नचातिमतेरिस्यादौ संभवः। गुणस्यवरिसंगत्वेनास्त्रित्वादिति भावः।१=

गोस्त्रियोरुप सर्ज्जनस्य॥ ॥गोटाङ्ग्रहणं कृन्निहृस्वार्थं। गोटाङ्ग्रहणं कर्त्तव्यं। किमिदं टादिति प्रत्याहारग्रहणं। कुसन्निविष्टानां प्रत्याहारः। टापः प्रभृत्या ष्यङोङ्कारात्। किं प्रयोजनं। कृन्निहृस्वार्थं। कृत्स्त्रिया धातुस्त्रियाश्च हृस्वत्वं मा भूदिति। अतितंत्रीः अतिश्रीः अतिलक्ष्मीः इति। तत्तर्हि वक्तव्यं। न वक्तव्यं। स्त्रीग्रहणं स्वर्यिष्यते। तत्र स्वरितेनाधिकारगतिर्भवति। स्त्रियामितिसेवं प्रकृत्यये विहितास्तेषां ग्रहणं विज्ञास्यते। स्वरितेनाधिकारगतिर्भवतीति न दोषो भवति। यद्येवं प्रत्ययग्रहणमिदं भवति। तत्र प्रत्ययग्रहणेय स्मात्तदादेर्ग्रहणं भवतीति। इह न प्राप्नोति। अतिराजकुमारिः अतिसेनानीकुमारिरिति। अपस्त्री प्रत्ययेने सेवं तत्॥ ॥

त्ययविषयस्तदादिनियमप्रतिषेधः प्रदर्शित इत्युपसर्ज्जनत्वादिहनियमेन भाव्यं। नैषदोषः। क्वचिदुपसर्ज्जनेपि तदादिनियमो न भविष्यति। हल्ङ्याब्भ्य इत्यत्र दीर्घग्रहणात्। अन्यथा निष्कौशांबिरित्यादावुपसर्जनत्वादद्याबंतत्वात्तुलोपो न भविष्यतीति किं दीर्घग्रहणेन। कथं तर्ह्यनुपसर्जनादित्यत्र कौंभकारेयो न सिध्यतीत्युक्तं यावता कारशब्दात्प्रदिङीपिकृते तदादिनियमाभावात्कुंभकारीशब्दाद्ढग्भविष्यति। नैषदोषः। तदादिनियमाभावे कारीशब्दादपिकदाचिड्ढक्स्यात्॥ ॥

पुंवद्वचनमिति। यथा पुंविषये ईकारः श्रूयते न तु ह्रस्वत्वं प्रतिपद्यते तथेयसोपि परत्वमर्थः। गोकुलमिति। प्रथमानिर्दिष्टमिति गोशब्दस्योपसर्जनत्वं। राजकु
मारीपुत्र इति। राजकुमारीशब्दः समासप्रातिपदिकं। इह तु कुमारीपुत्र इति कुमारीशब्दस्य प्रत्ययांतत्वात् प्रातिपदिकत्वाभावः। उभयत इति। प्रातिपदिके
स्त्रीप्रत्यये चेहाश्रीयते। तत्र पदि प्रातिपदिकसंज्ञा न तत्र स्त्रीप्रत्ययः परो नास्ति। स्त्रीप्रत्यये च परे सति अपि प्रातिपदिकत्वाभावः। गोंतस्येति। उपस

ईयसो बहुव्रीहौ पुंवद्वचनं। ईयसो बहुव्रीहौ पुंवद्भावो वक्तव्यः। बह्व्यः श्रेयस्योस्य बहुश्रेयसी। विद्यमानश्रेयसी। पूर्वपदस्य
च प्रतिषेधो गोसमासनिवृत्त्यर्थो। पूर्वपदस्य च प्रतिषेधो वक्तव्यः। किं प्रयोजनं गोसमासनिवृत्त्यर्थो। गोनिवृत्त्यर्थे समा
सनिवृत्त्यर्थे च। गोनिवृत्त्यर्थे तावत्। गोकुलं गोक्षीरं गोपालकमिति। समासनिवृत्त्यर्थो। राजकुमारीपुत्रः सेनानीकु
मारीपुत्र इति। किमुच्यते समासनिवृत्त्यर्थमिति न पुनरसमासेपि किंचित्पूर्वपदं यदर्थः प्रतिषेधः स्यात्। अंतरेण समा
सं प्रातिपदिकं सोपसर्जनस्य ह्रस्वो भवतीत्युच्यते। न चांतरेण समासं स्त्र्यंतं प्रातिपदिकमुपसर्जनमस्ति। ननु
चेदमस्ति। ███ खट्वापादः ███ मालापाद इति। एकादेशे कृते तेन वत्त्वात् प्राप्नोति। उभयत आश्रयणे नांतादिवत्। गोनिवृत्त्यर्थेन तावन्ना
र्थः। गोंतस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवतीत्युच्यते। न चैतद्गोंतं। ननु च व्यपदेशिवद्भावेनैतद्गोंतं। व्यपदेशिव███द्भावोऽप्रा
जेनग्रहणे न गोस्त्रियोर्विशेष्येते। पश्चान्नामभ्यां प्रातिपदिकमिति तदंतविधिः ग्रहणवतेसेतत्र प्रत्ययविधिविषयत्वादिह नोपतिष्ठते। व्यपदेशिवद्भाव इति। न
नु तेऽप्राप्ते एतस्य चेसत्रेतस्य चेति सर्वस्य शेष इत्युपाख्यानात् तत्स्वरूपमिति स्यानुवर्तनुसाना क्रोकुलमिति ह्रस्वः। आप्नोत्येव। नेषदोषः। स्वरूपमिति नानुवर्तते। तथा
वाधं ███ न वक्तव्ये नविधिस्तदंतत्वे प्रयोजनमुक्तं। तस्य चेसेत न तत्रसव्याजिकस्य शेषो नस्त्वस्य। अगोपुत्र इत्यसत्रापि न भवति। अत्र व्यस्य प्रातिपदिकं गोंतमस्त्र

पंचकुमारीप्रिय इति। त्रिपदे बहुव्रीहौ कृते द्वयोः पदयोर्द्विगुसमास इति पंचकुमारीशब्दः पूर्वपदं न भवति। कपिचेति। अंतरंगत्वाद्ध्रस्वः प्राप्नोतीति ततः कबिति भावः। कपी [illegible] तिच विषयसप्तमी। कुक्कुटमयूर्याविति। समासार्थैः वयवार्थस्य प्राधान्यादनेकमिति समासानुरसाः पंचमा निर्दिष्टत्वाच्च मयूरीशब्दस्योपसर्जनत्वं।

समासनिवृत्त्यर्थे नापि नार्थः। स्त्र्यंतस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवतिइत्युच्यते। अप्रधानमुपसर्जनमिति च संबंधिशब्दा वेतौ। तत्संबंधादेतत्कृतं यं यत्प्रति यदप्रधानं तत्स्यचेत्सोंतो भवतीति। एवं स्वरूपं चैतद्वेदितव्यं। उच्यमानेपि प्रतिषेधे इह प्रसज्येत पंचकुमार्यः प्रिया यस्य पंचकुमारीप्रियः। दशकुमारीप्रिय इति। कपि च। कपि च प्रतिषेधो वक्तव्यः। बहुकुमारीकः। बहुवृषलीकः। द्वंद्वे च। द्वंद्वे च प्रतिषेधो वक्तव्यः। कुक्कुटमयूर्यौ। उक्तं वा। किमुक्तं। कपि तावदुक्तं न कपीति प्रतिषेध इति। द्वंद्वे तदप्युक्तं। के णा इति या ह्रस्वत्वप्राप्तिः तस्याः प्रतिषेध इति। कुत एतत्। अनंतरस्य विधिर्वा भवति प्रतिषेधो वेति। एवं स्वरूपं चैतद्वेदितव्यं। यो हि मन्यते याचया वती ह्रस्वत्वप्राप्तिस्तस्याः सर्वस्याः प्रतिषेध इति। इहापि तस्य प्रतिषेधः प्रसज्येत। प्रियंग्रामणि ब्राह्मणकुलमस्य प्रियग्रामणिकः प्रियसेनानिक इति। इदं तर्ह्युक्तं कपि कृते नंतस्त्वाद्ध्रस्वत्वं न भविष्यतीति। इदमिह संप्रधार्यं कपि क्रियतां ह्रस्वत्वमिति। किमत्र कर्तव्यं। परत्वात्कप्। अंतरंगं ह्रस्वत्वं। अंतरंगतरः क ॥ प्। ननु चायं समासांत इत्युच्यते ॥ ॥

अनंतरत्वादिति। समासांत इति वचनात्कबेव समासस्यांत इति स्त्रीप्रत्ययांतं समासप्रातिपदिकं भवति। परत्वादिति। सावकाशश्च कप् बहुयवा गूक इत्यादौ। अंतरंगमिति। उपसर्जनस्त्रीप्रत्ययांतप्रातिपदिकमात्रापेक्षत्वात्। कप्तु समासविशेषं बहुव्रीहिमुत्तरपदमपेक्षत इति बहिरंगः। अंतरंगतर इति। पराम्पुप ग्राम्यापेक्षया ॥ प्रकर्षप्रत्ययः ॥ ॥ ॥

तादर्थ्यादिति। ततश्चावयवापेक्षत्वात्कपः समुदायापेक्षो ह्रस्वो बहिरंगः द्वंद्वे प्युक्तमिति। परिहारांतरमप्यत्रास्ति। अवयवार्थो वेव परस्परसहितौ द्वंद्वार्थ इति मांधान्याउपसर्जनत्वाभाव इति॥ ॥लुक्तद्धितलुकि॥ ॥अवंत्यादीनामिति। अवंती सभव स वंतिशब्द उपसर्जनं। ङीप्रत्ययश्चास्ति लुक्च तद्धितस्य छतत इत्यस्ति लुक्प्राप्तिः। अलुक्परत्वादिति। यत्र स्त्रीप्रत्ययांतात्परस्य तद्धितस्य लुक् तत्र लुकाभाव्यं। अत्र तु कृते लुकि स्त्रीप्रत्ययः कृतः। नहीति। लुको नीरूपत्वात् बुद्धिपरिकल्पितं लुकः परत्वमाश्रित्य वार्त्तिककृता तोक्तं अलुक्परत्वादिति। नचजातिरिति। उपसर्जनग्रहणे न स्त्रीप्रत्ययो विशेष्यते। अप्रधानं चेहोपस

तादर्थ्यात्तच्छब्द्यं भविष्यति। येषां पदानां समासः न तावत्तेषामन्यद्भवति। कपं तावत्सती क्षते। द्वंद्वे प्युक्तं। किमुक्तं। परवल्लिंगमिति शाब्दशब्दार्थाविति। तत्रोपदेशिकस्य ह्रस्वत्वमातिदेशिकस्य श्रवणं भविष्यति॥ ॥लुक्तद्धितलुकि॥ ॥तद्धितलुकवंत्यादीनां प्रतिषेधो वक्तव्यः। अवंती कुंती कुरूः। तद्धितलुक्यवंत्यादीनामप्रतिषेधो लुक्परत्वात्। तद्धितलुक्यवंत्यादीनामप्रतिषेधः। अनर्थकः प्रतिषेधोऽप्रतिषेधः। लुक्कस्मान्न भवति। अलुक्परत्वात्। लुग्ग्रहणे सुच्यते। नचात्र लुकं पश्यामः। लुकीति नैषा परसप्तमी शक्या विज्ञातुं। नहि लुका पौर्वापर्यमस्ति। कात र्हि सत्सप्तमी। लुकि सतीति। सत्सप्तमी चेत्प्राप्नोति। एवं तर्हीदमिहव्यपदेश्यं सदाचार्यो नव्यपदिशति। किं उपसर्जनस्येति वर्ततेइति नच जातिरुपसर्जनं॥ ॥इद्गोण्याः॥ ॥इद्गोण्यानेति वक्तव्यं। गोण्यानेसेव सिद्धं नार्थ इत्वेन। का रूपसिद्धिः। पंचगोणिः। णिः ह्रस्वता हि विधीयते। ह्रस्वत्वमत्र विधीयते गोस्त्रियोरुपसर्जनस्येति। इति वा वचनेतावत्। इदिस्ते वोच्येत नने तिवाकोन्वत्र विशेषः॥०॥

जेनं गृह्यते न शास्त्रीयमसंभवात्। अवंती सत्र चापसत्वक्षणा जातिः स्त्रीत्वपुंस्त्वाभ्यां धान्येनाभिधीयत इत्यर्थः। अपमातिपदिकत्वाच्चात्र ह्रस्वाभावः। आमलकमित्यादौ तु तद्धितांतत्वात्प्रातिपदिकसंज्ञा। लिंगविशिष्टस्यैव चेहोपासना लिंगविशिष्टपरिभाषायाउपस्थानाभावः। कुरूरित्यत्रापि उभयत आश्रयणे नांतादिवद्भिः प्रातिपदिकत्वं॥ ॥इद्गोण्याः॥ ॥इति वा वचनइति। इतीतिसप्तमी। इच्छब्दे प्युच्चमाने गौरवाभाव इत्यर्थः॥ ॥

गोणीरिति। यद्यत्र मात्रचोलुक् क्रियते तदा लुकि प्रतिषिद्धे सिद्धत्वेव ह्रस्वत्वं। तस्मात्प्रमाणविधाने परिमाण ग्रहणस्य प्रयोजनं तद्धितमन्तरेण प्रियगोणीमाणं शरुः प्रमेयेवर्ज्जते तदपि प्रथमायथा स्यादिति। एवं चानुपसर्जनत्वादमेदोपचारेण प्रमेय इत्वात्प्राप्तो ह्रस्व इतीत्वं विधीयते। सर्वत्र तर्हि गोणाइत्वप्रसंगः। एवं तर्ह्युपसर्जनस्येति वर्ज्जते न तु तद्धितलुकीति। तेन पञ्चस्वार्थोपसर्जनमर्थान्तरं प्रसाध्यते तत्रत्वविधिः। ह्रस्वत्वं तु नस्यात्प्राति पदिकत्वात्। अशिष्यमिति। गोण्यो रिसमानेतरंगोणा इति लुगपवादह्रस्वार्थं वक्तव्यं। ननु सूच्या इति। इत्वं माप्नोतीति शेषः। क्वचित्तु ननु सूच्या इति पाठस्तत्रेत्वमिष्यत इत्यध्याहारः। इद्ग्रहणे सति योगविभागोऽनुमतो

= इ दिति केचियोगः गोण्यास्त्रमित्यत्वंमासावनिकलाम नद्धितलुकीत्यनुवर्तने तेना निप्रसंगइतिभावः।

मात्रार्थे वाकृतं भवेत्। अथवा मात्रार्थमिदं वक्तव्यं। गोणीमात्रमिदं गोणिः। अपर आह। गोण्या इत्वं प्रकरणात्। अशिष्यं गोण्या इत्वं। किं कारणं। प्रकरणात्। प्रकृतं ह्रस्व इति वर्ज्जते। ननु सूच्याः। सूच्याद्यर्थमथापि वा। सूच्याद्यर्थमिदं द्रष्टव्यं। पंचसूचिः। दशसूचिः। इद्गोण्या इति वक्तव्यं ह्रस्वता हि विधीयते। इति वा वचनेनावत् मात्रार्थे वाकृतं भवेत्। गोण्या इत्वं प्रकरणात् सूच्याद्यर्थमथापि वा॥ ॥लुपियुक्तवद्व्यक्तिवचने॥ ॥व्यक्तिवचन इति किमर्थं। शिरीषाणामदूरभवो ग्रामः शिरीषाः। तस्य ग्रामस्य वनं शिरीषवनं। किं च स्यात्। विभाषौषधिवनस्पतिभ्य इति णत्वं प्रसज्येत। अपर आह। कटुकबदर्या अदूरभवो ग्रामः कटुकबदरी षष्ठी युक्तवद्भावेन मा भूदिति। अथ व्यक्तिवचन इत्यप्युच्यमाने कस्मादेवात्र न भवति। षष्ठ्यपि हि वचनं। नैवं पारिभाषिकस्य वचनस्य ग्रहणं। किं तर्हि अन्वर्थग्रहणं। उच्यते वचनमिति।

गोणीरिति तु मात्रचो लोपेन सिध्यति॥ ॥लुपि युक्तवत्॥ ॥प्रकृत्यर्थसंबंधिनौ लिंगसंख्ये प्रत्ययार्थे अतिदिश्येते। शिरीषा इति वरणादित्वात् णोलुप् ग्रामवाचित्वाद्बहुस्पतित्वाभावात्तत्त्वाभावः। पुल्लीवनस्पतिर्नैयइ सम्पमेदेणत्व विधौनाश्रितइति प्रत्ययाभावे शिरीषस्यास्ति वनस्पतित्वं। षष्ठीति। प्रकृत्यर्थगतस्य व्यतिरेकस्य प्रत्ययार्थे अतिदेशस्त्वष्टीप्रसंगः। षष्ठ्यपीति। वचनशब्देन स्येकवचनादयः प्रत्यया उच्यन्ते। तत्र वाच्या वस्थायां षष्ठीदर्शनात् स्याएवात्रातिदेशः प्राप्नोतीत्याशंकेः। एकवचनादि संज्ञाविधानकालेः तु निष्पादीवचनशब्दोऽपि संज्ञात्वेन नि युक्त इति प्रत्ययं पारिभाषिकं वचनमुच्यते। अन्वर्थग्रहणमिति। संख्याल्लक्षणो योऽति

षष्ठ्यपि प्रयुज्यत इति। संख्यातिदेशेन तद्वचनेन षष्ठीशब्देन प्रवर्तितत्वं। षष्ठ्यपि संख्यायाः प्रातिपदिकेति भावः। षष्ठीशब्देन च षष्ठ्यर्थः संख्यालक्षणो योऽभिधीयते। अथवा
षष्ठ्यप्युच्यते संख्याप्रतिपादनार्थमित्यर्थः। लुपोक्तत्वादिति। लुप्तग्रहणेनेन शब्देनोक्तत्वादित्यर्थः। अभिहितः सोऽर्थोऽन्तर्भूतः प्रातिपदिकार्थः संपन्न इति व्यतिरेकाभा
व इत्यर्थः। आतिदेशिकीति। संख्यायामतिदिष्टायां तद्वाची शब्दः प्रयोक्तव्यः वाक्ये च षष्ठी दृश्यत इति तस्या एव च प्रसंगः। प्रागपीति। प्रत्ययार्थेन प्रकृतिवाच्यं वस्तु संबद्धं
वाक्यावस्थायां वृत्त्यवस्थायां चेत्यर्थः। वक्तुश्चेति। चशब्दो भिन्नक्रमः प्राग्वृत्तेरिव स्यानन्तरं द्रष्टव्यः। तत्रायमर्थः। प्राग्वृत्तेर्ये लिंगसंख्ये च शब्दाद्वृत्तस्य च ये ते अति
देष्टुं कामचारः। वृत्तस्येति। प्रत्ययासत्तेरिति भावः। वृत्तावुपसर्जनस्यापि क्वचित् संख्याविशेषावगतिर्भवति। यथा ताक्षीनो मामकीन इति आदेशात् संख्याभेदाध्यवसायः।

एवमपि षष्ठीमाप्नोति। षष्ठ्यपि प्रयुज्यते। लुपोक्तत्वान्नस्यार्थे स्यादितीयस्य प्रयोगेणानभिहितत्वं। किंकाराणां रक्तायो नाम प्रयोग इति। आति
देशिकी तर्हि प्राप्नोति। एवं तर्हि प्रागपि वृत्तेर्युक्तं वृत्तं चापीह यावत्तायुक्तं। वक्तुश्च कामचारः प्राग्वृत्तेर्लिंगसंख्येये। प्रागपि वृत्तेर्युक्तं वनस्पति
भिर्नगरं। वृत्ते चापि युक्तं वनस्पतिभिर्नगरं। वृत्ते च युक्तवद्भावो विधीयते। कामचारश्च प्रयोक्तुः प्राग्वृत्तेर्ये लिंगसंख्ये ते अतिदेष्टुं। वृ
त्तस्य वा ये लिंगसंख्ये ते। यावता कामचारः वृत्तस्य ये लिंगसंख्ये ते अतिदेक्ष्येते न प्राग्वृत्तेर्ये॥ ॥ ॥

तथेह प्रत्ययार्थे निर्दिष्टसंख्यावगमात्प्रकृत्यर्थेन तदवसायः। यथा आदेशे प्रथमासामानाधिकरण्यदर्शनाल्लुदितवदवगतिः। तत्र च वृत्तावुपसर्जनं प्रधानमभिध
त्ते इति व्यतिरेकाभावात्संख्यामात्रप्रतिबद्धा प्रातिपदिकार्थमात्रे प्रथमैव भवति। क्वचिदधिकोऽप्यर्थः प्रयुज्यते। अथवा प्राग्वृत्तेर्ये लिंगसंख्ये ते अतिदेक्ष्येते। षष्ठी क
स्मान्न भवति। सामान्यातिदेशे विशेषानतिदेश इति। तत्रायमर्थः। वाक्यावस्थायां प्रकृत्यर्थस्य ये लिंगसंख्ये ते अतिदिश्येते। षष्ठी तु व्यतिरेकनिबंधना। न चेह प्रत्य
यार्थस्य व्यतिरेकोऽस्ति। न च व्यतिरेकसहिता संख्यातिदिश्यते। संख्यामात्रातिदेशे संबंधसहितसंख्यातिदेशाभावात्॥ ॥ ॥

किमर्थमिति। अन्तरेणाप्यतिदेशं लिंगसंख्ये सिद्धे यथा आपो दाराः इत्यादाविति भावः। अन्यत्रेति। अभेदं लिंगसंख्ययो राश्रित्य वार्त्तिककारेण परि तं। भाष्यकार स्त्वाच
क्षे निबंधनमेतावता येन वृत्तिना व्याचष्टे। अभिधेयवदिति। अभिधानवदिति। अभिधानशब्देनोपसर्जनमभिधीयते तेन हि प्रधानार्थोऽभिधीयते तस्य चार्थद्वारको
भेदः

किमर्थं पुनरिदमुच्यते। अन्यत्राभिधेयस्य व्यक्तिवचनभावाल्लुपि युक्तवदनुदेशः। अन्यत्र अभिधेयवल्लिंगवचनानि भवंति। क्वान्यत्रा
लुकि। लवणः सूपः लवणा यवागूः लवणं शाकमिति। अन्यत्राभिधेयवद्व्यक्तिवचनानि भवंति लुकि। इहाप्यभिधेयवल्लिंगवचनानि प्रा
प्नुवंति इष्यंते चाभिधानवत्स्युरिति तच्चांतरेण यत्नं न सिध्यतीति लुपि युक्तवदनुदेशः। एवमर्थमिदमुच्यते। अस्ति प्रयोजनमेतत्।
किं तर्हीति। लुपोऽदर्शनसंज्ञित्वादर्थगतिर्नोपपद्यते। लुम्नामेयमदर्शनस्य संज्ञा क्रियते। न वा अदर्शनस्य लिंगसंख्येऽतिदेष्टुं
लुपोऽदर्शनसंज्ञित्वादर्थगतिर्नोपपद्यते। न वादर्शनस्याशक्यत्वादर्थगतिः। न वा एष दोषः। किं कारणं। अदर्शनस्याशक्यत्वा
त् अदर्शनस्य लिंगसंख्येऽतिदेष्टुमशक्ये इति कृत्वा। दर्शनसहचरितो योऽर्थस्तस्य गतिर्भविष्यति साहचर्यात्। योगाभावाच्चान्यस्य। अ
दर्शने च योगो नास्तीति कृत्वा। दर्शनसहचरितो योऽर्थस्तस्य गतिर्भविष्यति साहचर्यात्। समासउत्तरपदस्य बहुवचनस्य लुपः। स
मासउत्तरपदस्य बहुवचनस्य लुपः युक्तवद्भावो वक्तव्यः। मधुरापंचालाः। किं प्रयोजनं। नियमार्थं। समासउत्तरपदस्यैव। क्वमा

लिंगसंख्यायोगः न वादर्शनस्येति। अभावरूपत्वादिति भावः। योगाभावादिति। अदर्शने न प्रकृत्यर्थो न युक्त इत्यर्थः। मधुरापंचाला इति। वर्जिपदार्थो एवापे
क्षितपरस्पराद्वंद्वार्थ इति सिद्धे नियमः क्रियते। अत एव मधुरागोदा इति भवति। ननु मधुरागोदाविति भवति द्वंद्वे प्रियगोदार्थस्य द्वित्वानतिक्रमात्॥ ॥

=न यासमन्तया जाते र्विशेषणानामित्युक्ते न कथमन्वयोऽत आह - असमर्थमिति - एवं च नञ्‌ ... पदस्याप्यन्वयो न दोषायेति भावः २ =

विशेषणानां चाजातेः ॥ कथमिति। किं सामानाधिकरण्येन संबंधः विशेषणानां युक्तवद्भावो व्यक्तिवचने जातिस्तु यदा विशेषणं तदा नेति। अथ वैयधिकरण्येन जातेर्यो निर्विशेषणानि तेषां नेति। अजातेरिति असमर्थसमासः भवति नानञः संबंधात्। उभयथाप्याशंक्याह इति प्रतिषेधस्येति प्रश्नः। आजातिप्रयोगादिति। सत्त्वेच्छा

विशेषणानां चाजातेः ॥ कथमिदं विज्ञायते जातिर्येद्विशेषणमाहोस्विज्जातेर्यानि विशेषणानीति। किं चातः। यदि विज्ञायते जातिर्येद्विशेषणमिति। सिद्धं पंचाला जनपद इति। सुभिक्षः संपन्नपानीयः बहुमाल्यफल इति न सिध्यति। अथ विज्ञायते जातेर्यानि विशेषणानीति। सिद्धं सुभिक्षः संपन्नपानीयः बहुमाल्यफल इति। पंचाला जनपद इति न सिध्यति। एवं तर्हि नैवं विज्ञायते जातिर्येद्विशेषणमिति नापि जातेर्यानि विशेषणानीति। कथं तर्हि विशेषणानां युक्तवद्भावो भवति। आजातेः। आजातिप्रयोगात्। किमर्थं पुनरिदमुच्यते। विशेषणानां वचनं जातिनिवृत्त्यर्थं। जातिनिवृत्त्यर्थोयमारंभः। किमुच्यते जातिनिवृत्त्यर्थ इति न पुनर्विशेषणानामपि युक्तवद्भावो यथा स्यादिति। समानाधिकरणत्वात्सिद्धं। समानाधिकरणत्वाद्विशेषणानां युक्तवद्भावो भविष्यति। यद्येवं नार्थोऽनेन। लुपोऽन्यत्रापि जातेर्युक्तवद्भावो न भवति। क्वान्यत्र। बदरी सूक्ष्मकंटका मधुरा वृक्ष इति। किं पुनः कारणमन्यत्रापि जाते युक्तवद्भावो न भवति॥ ॥ ॥

उ० - श्लेषः न तु नञः। तत्रायमर्थः। तावद्युक्तवद्भावो भवति यावज्जातिर्न प्रक्रांता। यदा तु जातिः प्रक्रम्यते विशेषणत्वेन विशेष्यत्वेन वा तदा युक्तवद्भावो न भवति। बदरी सूक्ष्मकंटकेति। मधुरादीनां विशेषणानां वृक्षस्य उपनिपाते तल्लिंगसंख्यायोगः। वृक्षोपनिपाते तु वृक्षाश्रयलिंगसंख्यायोगः॥ ॥

=नमक्रांतेति - यथा पंचालाः सुभिक्षा इति - यदा त्वि - अत एव पंचालाः सुभिक्षो जनपदः पंचालाजनपदः सुभिक्ष इत्येव भवति - २ = ननु जातेर्विशेष्यलिंगं ... [illegible]

आविष्टलिङ्गेति। आविष्टं लिङ्गं यया साऽऽविष्टलिङ्गेत्यर्थः। सर्वत्र सर्वेषां लिङ्गानां सद्भावेऽपि केनचिच्छब्देन किंचिल्लिङ्गं प्रकाश्यत इति शब्दविशेषापेक्षयाऽऽविष्टलिङ्गत्वमुच्यते। उत्पत्तिप्रभृत्याविनाशादिति। जातेरुत्पत्तिविनाशायोगात् प्राकृतव्यवहारगतावुत्पत्तिविनाशौ गृह्येते तेनासंसारं यावच्छब्दो व्यवहारस्तावज्जातेर्नियतलिङ्गत्वमित्यर्थः। गुणवचनानामिति। पदसंस्कारपक्षे वाचनिकमेतत्। पदे हि पदान्तरनिरपेक्षे संस्क्रियमाणे नपुंसकलिङ्गं सर्वनाम प्राप्तमेकत्वं चैव स्वान्तरनिरपेक्षत्वात्सन्निहितमित्युत्सर्गप्राप्ते इति प्राप्ते भाविनो बहिरङ्गस्याश्रयस्य संबन्धिन्यौ लिङ्गसंख्ये अनेन प्रतिपाद्येते। विशेषणानां गुणवचनानामित्यर्थः। युक्तव

×लिंगा·नियत×४

आविष्टलिङ्गा जातिर्यल्लिङ्गमुपादाय प्रवर्त्तते। उत्पत्तिप्रभृत्याविनाशान्न तल्लिङ्गं न जहाति। न तर्हीदानीमयं योगो वक्तव्यः। वक्तव्यश्च। किं प्रयोजनम्। इदं तत्र तत्रोच्यते। गुणवचनानां शब्दानामाश्रयतो लिङ्गवचनानि भवन्तीति। तदनेन क्रियते। हरीतक्यादिषु व्यक्तिः। हरीतक्यादिषु व्यक्तिर्भवति युक्तवद्भावेन। हरीतक्याः फलानि हरीतक्यः फलानि। खलतिकादिषु वचनं भवति युक्तवद्भावेन खलतिकस्य दूरभवानि वनानि खलतिकं वनानि॥ ॥ ॥ ॥

वद्व्यक्तिवचने। आश्रयवल्लिङ्गसंख्ये इत्यर्थः। यदा तु वाक्यसंस्कारस्तदायमनुवाद एव। आश्रयविशेषस्य पूर्वमेव प्रक्रमे विशेषणानामपि तन्निष्ठत्वान्नान्तरीयकतयो लिङ्गसंख्ययोः सिद्धत्वात्। यदा तु जातिविशेषणं तदा न भवति युक्तवद्भावः। हरीतक्यादिष्विति। नियमार्थमेतत्। तेन वचनमभिधेयाश्रयं भवति। खलतिकमिति। खलतिर्नाम पर्वतः तस्यादूरभवानि वनानीति लिङ्गमभिधेयाश्रयमेव भवति॥ ॥५॥ ॥

=यथावस्तीरदूरति=

=ननु गुणवचनरूपविशेषणार्थं विशेषणानामिति चेत्तर्हि तं तच्च जातिशब्दानामपि विशेषणत्वे प्राप्नोति। विशेषणानामित्यत्र गुणवचनानामित्यर्थस्याभावात् ... न च जातेराविष्टलिङ्गत्वादित्यसिद्धिः। विशेषणानामित्यस्याभावेन तथा च कुंश्चक्रत्वे पितत्वाद्भावे

=२०=

मनुष्यलुपीति। विशेषणानामयं प्रतिषेधः। तेन चञ्चाऽभिरूप इत्यभिधेयाश्रये लिङ्गसंख्ये भवतः। तृणमयः पुरुषश्चञ्चा। तत्सदृशो मनुष्यश्चञ्चा। संज्ञा
यामिति विहितस्य कनो लुम्मनुष्ये इति लुप्॥ ॥तदशिष्यं संज्ञाप्रमाणत्वात्॥ ॥किं पाञ्चाला इति। प्रत्यासत्तिन्यायाश्रयेणाप्रश्नः। नेत्या हेति।
प्रत्यासत्तेः सामर्थ्यबलत्वात्॥ न हि टिघुभादिसंज्ञानां प्रमाणत्वं युक्तवद्भाववशात् स्यात् शिष्यत्वे हेतुरूपपद्यते। संबन्धाभावात्। संज्ञानमिति। अव
युगमः संप्रत्यय इत्यर्थः॥ तत्र यथा आपो दाराः सिकता इत्युक्ते लिङ्गसंख्याविशेषावगतिरुपलक्ष्यमानाप्रमाणं। एवं पञ्चालाः वरणा इत्यादावपि।

मनुष्यलुपि प्रतिषेधः। मनुष्यलुपि प्रतिषेधो वक्तव्यः। चञ्चाऽभिरूपः। वध्रिका दर्शनीयः॥ तदशिष्यं संज्ञाप्रमाणत्वा
त्॥ ॥किं या एताः कृत्रिमाष्टिघुभादिसंज्ञाः तत्प्रामाण्यादशिष्यं नेत्याह। संज्ञानं संज्ञा॥ ॥जात्याख्यायामेक
स्मिन्बहुवचनमन्यतरस्यां॥ ॥इदमयुक्तं वर्तते। किमत्रायुक्तं। बहवस्तेऽर्थास्तत्र युक्तं बहुवचनं। तद्यदेक
वचने शास्तितत्रैव बहुवचनं शिष्यते एतदयुक्तं। बहुष्वेकवचनमिति नाम वक्तव्यं॥ श्री ॥

न च पञ्चालादयो यौगिकाः अपि तु जनपदादीनामेताः संज्ञाः ततो योगानवगमात्तद्धितो नोत्पद्यत इति लुबपि न वक्तव्यः। तत्र सर्वेषां लिङ्गानां
सर्वत्र भावात् क्वचिच्छब्दे न प्रत्याप्यमानं वस्तुकस्यचिल्लिङ्गस्य व्यञ्जनं इति दारादिषु नियतलिङ्गतास्तिज्ञा। बहुलमप्यवयवगतं प्रक्रिगते वास्य
त्र समारोप्यत इति संख्यायोगोऽपि सिद्धः। एकास्तिकतेत्याद्यपि शिष्टप्रयोगदर्शनास्ति ख्यति॥ ॥जात्याख्यायां॥ ॥जातिरूपलक्षणां
द्रव्यं तु शब्दार्थ इति दर्शनाश्रयेणाह। इदमयुक्तमिति। बहुष्वेकवचनमिति। अत्र पक्षे जातेरुपलक्षणत्वेनाख्या जात्याख्येति व्याख्यानं॥ ॥

जातिपदार्थपक्षाश्रये गोत्ररमाह। जात्याख्यायामिति। गार्ग्यो गार्ग्यत्वमिति। गोत्रस्यापि जातित्वाभ्युपगमादेतदुक्तं। बहुषु गर्गेषु गार्ग्यत्वस्याभिन्नस्याभावात्
। एकस्मिंस्तु पिण्डेऽवस्थाभेदानुगताद्वित्वत्वादिका जातिर्जात्याख्यायामिति वचेऽर्थान्तरं गृह्यते। जातिपदार्थवादिमते सर्वे शब्दा जात्यर्थाभिधायिन इति सामर्थ्या
नशाम

ऽयमुत्तरं पठति। जात्याख्यायां सामान्याभिधानादैकार्थ्ये। जात्याख्यायां सामान्याभिधानादैकार्थ्ये भविष्यति। यत्र व्रीहौ व्रीहित्वं
यवे यवत्वं गार्ग्ये गार्ग्यत्वं। तदेकं। तच्च विवक्षितं। तस्मैकत्वादेकवचनं प्राप्नोति। इष्यते च बहुवचनं स्यादिति। तच्चान्तरेण यत्नं न सिध्य
तीति जात्याख्यायामेकस्मिन्बहुवचनमेवमर्थमिदमुच्यते। अस्ति प्रयोजनमेतत्। किं तर्हीति। तत्रैकवचनादेशे उक्तं। किमु
क्तं। व्रीहिभ्य आगत इत्यत्र घेर्ङितीति गुणः प्राप्नोतीति। नैष दोषः। अर्थातिदेशात्सिद्धं। अर्थातिदेशोऽयं। नेदं पारिभाषिकस्य व
चनस्य ग्रहणं। किं तर्हि। अन्वर्थग्रहणं। उच्यते वचनं। बहूनामर्थानां वचनं बहुवचनमिति। यावद्ब्रूयादेकोऽर्थो बहुवद्भवतीति ता
ऽवद्बहुवचनमिति॥ ॥ ॥

भिन्नपिण्डविषया जातिराश्रीयते। बहूनामिति। बहूनामर्थानां बहुत्वमेवोच्यत इत्येकस्मिन्नर्थे बहुत्वमनेनातिदिश्यत इति बहुत्वाद्बहुवचनं भवतीति ना
स्ति स्थान्यादेशभावः। एवं तिष्यपुनर्वस्वोरित्यत्रापि द्विवचनबहुवचनशब्दाभ्यां द्वित्वबहुत्वयोरभिधानादर्थातिदेश एव तथा स्थान्यादेशभावाभावः॥ ॥

संख्याप्रयोगे इति। एकस्यैव बहुत्वातिदेशः क्रियमाण एकशब्दप्रयोगेऽपि प्राप्नोतीति प्रतिषेध उच्यते। उभयप्राप्त्यर्थेऽपि प्रक्षाश्रयेण प्रसाख्यानमाह। अशिष्य

संख्याप्रयोगे प्रतिषेधः। संख्याप्रयोगे प्रतिषेधो वक्तव्यः। एको व्रीहिः संपन्नः सुभिक्षं करोति। एको यवः संपन्नः सुभिक्षं करोति।
अस्मदो नामयुव प्रत्ययोश्च। अस्मदो नाम्नि युवप्रत्ययप्रयोगे च प्रतिषेधो वक्तव्यः। नामप्रयोगे। अहं देवदत्तो ब्रवीमि। अहं यज्ञद
त्तो ब्रवीमि। युवप्रत्ययप्रयोगे। अहं गार्ग्यायणो ब्रवीमीति। अहं वात्स्यायनो ब्रवीमि। युवग्रहणेन नार्थः। अस्मदो नामप्रत्ययप्रयोगे
नैसेव। इदमपि सिद्धं भवति। अहं गार्ग्यो ब्रवीमि। अहं वात्स्यो ब्रवीमि। अपर आह। अस्मदः सविशेषणस्य प्रयोगे नेत्येव। इद
मपि सिद्धं भवति। अहं पटुर्ब्रवीमि। अहं पण्डितो ब्रवीमि। अशिष्यं वा बहुवत्त्वस्यैकत्वाभिधानात्। अशिष्यो बहुवद्भावः। किं
कारणम्। एकत्वाभिधानात्। एकत्वे न हि द्रव्याण्यभिधीयन्ते। बहवस्तेषां तत्र युक्तं बहुवचनम्। किमुच्यते एकत्वाभिधा
नादिति। यावता इदानीमेवोक्तं सामान्याभिधानादेकार्थ्यमिति। जातिशब्देन हि द्रव्याभिधानम्। जातिशब्देन द्रव्यमभिधीयते
जातिरपि। कथं पुनर्ज्ञायते जातिशब्देन द्रव्यमभिधीयत इति। एवं कश्चिन्महति गोमण्डले गोपालकमासीनं पृच्छति अस्त्यत्र कां
चिद्गां पश्यसीति। स पश्यति पश्यति चायं गाः पृच्छति कांचिदत्र गां पश्यसीति। नूनमस्य द्रव्यं विवक्षितम्। तद्यदा द्रव्याभिधा
नं तदा बहुवचनं भविष्यति। यदा सामान्याभिधानं तदैकवचनं भविष्यति॥ ॥ ॥
मिति। तत्र कदाचिज्जातेः प्राधान्यं कदाचिद्द्रव्यस्येति यथेष्टं प्रयोग उपपद्यते॥ ॥७॥ ॥७॥ ॥९॥

तरे२

अस्मदो द्वयोश्च॥ ॥ तद्यथेति। एकेन्द्रियमहं जानेचेन्द्रियाणामौदासीन्येन संविधान तात्कर्त्तृत्व विवक्षेति वयं पश्याम इत्यादि सिद्धं। शरीर इवेन्द्रियेष्वहंकारो सादृश्य मित्यनेन्द्रियाणामभिधानात्। पारतंत्र्यविवक्षायां लिङिन्द्रियाणामहं ब्रवीमीत्येकवचनं सिद्धं। युष्मद [illegible] स्मदो श्चैकशेषः स्मदो र्थ द्वयाभिधानाद्विवचनमिति नार्थोनेन योगेन। संप्रसय मामाएणा च युष्मदि गुरौ पक्षे बहुवचनं सिद्धं॥ ॥ फल्गुनीप्रोष्ठपदानां च नक्षत्रे॥ बहुवत्तेर्थो इति॥

अस्मदो द्वयोश्च॥ ॥ अयमपि योगः शक्योऽवक्तुं। कथं अहं ब्रवीमि आवां ब्रूवः। वयं ब्रूम इति। इमानीन्द्रियाणि कदाचित्स्वातंत्र्येणाविवक्षितानि भवन्ति। तद्यथा। इदं मेऽक्षि सुष्ठु पश्यति। अयं मे कर्णः सुष्ठु शृणोतीति। कदाचित्पारतंत्र्येण। अनेनाक्ष्णा सुष्ठु पश्यामि अनेन कर्णेन सुष्ठु शृणोमीति। तद्यदा स्वातंत्र्येण विवक्षा तदा बहुवचनं भविष्यति। यदा पारतंत्र्येण तदैकवचनं द्विवचने भविष्यतः॥ ॥ फल्गुनीप्रोष्ठपदानां च नक्षत्रे॥ अयमपि योगः शक्योऽवक्तुं। कथं उदिते पूर्वे फल्गुन्यौ उदिताः पूर्वाः फल्गुन्यः। उदिते पूर्वे प्रोष्ठपदे उदिताः पूर्वाः प्रोष्ठपदा इति फल्गुनीसमीपगते चन्द्रमसि फल्गुनीशब्दो वर्त्तते। बहुवत्तेर्थास्तत्र युक्तं बहुवचनं। यदा तयोरेवाभिधानं तदा द्विवचनं भविष्यति॥ ॥ छन्दसि पुनर्वस्वोरेकवचनं॥ ॥ विशाखयोश्च॥ ॥ इमावपि योगौ शक्याववक्तुं। कथं। पुनर्वसुविशाखयोः सुपां सुलुक्पूर्वसवर्णेति सिद्धं। पुनर्वसुविशाखयोः सुपां सुलुक्पूर्वसवर्णे स्वेव अमावास्यामप्यादिसमं इत्थं प्रविष्टे नचंद्रेण नक्षत्राणां योगो स्वे वेति तदापि बहुवचनं अर्द्धे च्योः छत्रिण इति न्यायेन सिद्धं। एकसंतुनारायां फल्गुनीशब्दोन वर्त्तते इत्येकवचनाभावः। सर्वत्र च लौकिकः प्रयोगः प्रमाणे नाश्रीयत इत्यनवस्था न भवति॥ ॥

पर्यायेति द्रव्यकर्मणा क्रियायाः ... कालकर्मणस्त्वकर्मतायाः क्रियायाः कालसंबन्धश्रवणमिति तयोरन्तरङ्गबहिरङ्गभावो बोध्यः

भा॰कै॰प्र॰ २२१ २२१

तिष्यपुनर्वस्वोः ॥ ॥ नक्षत्र इति किमर्थमिति। तिष्यपुनर्वसवो माणवका इत्यत्र गौणत्वान्न भविष्यतीति प्रश्नः। उत्तरवादिनस्त्वयमभिप्रायः। तिष्येणायुक्तः कालस्तिष्यः तिष्ये जातो माणवक इति यौगिकत्वान्नास्ति गौणार्थत्वं। ज्योतिषि वर्त्तत इति। नन्वेकेनैव नक्षत्रग्रहणेन कालमाणवकयोर्निवृत्तिः सिद्धा तत्र किं द्वितीयेन नक्षत्रग्रहणेन। नैतदस्ति। अन्तरङ्गः कालः बहिरङ्गो माणवक इत्यन्तरङ्गस्यैव कालस्य [illegible] केन नक्षत्रग्रहणेन निवृत्तिः स्यात्। यथा कर्मणि श्रुतान्तरङ्गद्रव्यकर्म निषिध्यते न कालकर्मेति मासमास्ते देवदत्तेनेत्यत्रापि भावे लकारः सिद्धो भवति। द्वितीये तु नक्षत्रग्रहणेन बहिरङ्गोपि माणवको निवर्त्यते। ननु नक्षत्र

तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यं ॥ ॥ तिष्यपुनर्वस्वोरिति किमर्थं। कृत्तिकारोहिण्यः। नक्षत्र इति किमर्थं। तिष्यश्च माणवकः पुनर्वसू च माणवकौ तिष्यपुनर्वसवः। अथ नक्षत्र इति वर्त्तमाने पुनर्नक्षत्रग्रहणं किमर्थं। अयं तिष्यपुनर्वसुशब्दोऽस्त्येव ज्योतिषि वर्त्तते। अस्ति च कालवाची। तद्यथा। बहवस्तिष्यपुनर्वसवोऽतिक्रान्ताः। कृतरेण तिष्येणागत इति। तद्यो ज्योतिषि वर्त्तते तत्रस्येदं ग्रहणं। अथवा नक्षत्र इति वर्त्तमाने पुनर्नक्षत्रग्रहणस्यैतत्प्रयोजनं विदेशस्थमपि तिष्यपुनर्वस्वोः कार्यं तदपि नक्षत्रस्यैव यथा स्यात् तिष्यपुष्ययोर्नक्षत्राणि यलोपो वक्तव्य इति नक्षत्रग्रहणं न कर्त्तव्यं भवति। अथवा नक्षत्र इति वर्त्तमाने पुनर्नक्षत्रग्रहणस्यैतत्प्रयोजनं तिष्यपुनर्वस्वोः पर्यायवाचिनामपि यथा स्यात्। तिष्यपुनर्वसू

इदद्वन्द्वसूत्रेऽर्थात् कालमाणवकयोर्निवृत्तिः सिद्धैवेत्याह। अथवेति। तिष्यपुनर्वस्वोरिति योगविभागः क्रियते। नक्षत्र इति चानुवर्त्तते। तेनायमर्थो तिष्यपुनर्वस्वोः कार्यं तन्नक्षत्रद्वन्द्वे एव भवतीत्यर्थः। यलोपे कृते तमेव नक्षत्रग्रहणमित्यभिप्रेत्याह। अथवेति। स्वरूपग्रहणे प्राप्ते पर्यायग्रहणार्थं द्वितीयं नक्षत्रग्रहणं। पुनर्नक्षत्रग्रहणोऽसमर्थस्यैवायमनपेक्षितो पात्तशब्दस्यातिदेश इति पर्यायाणामपि ग्रहणं सिद्धं॥ क्षत्र॥

राम॰ २२१

=तिष्यपुष्ययोर्नक्षत्राणि यलोपः ... इति भावः=

तिष्यपुनर्वसवउन्मुग्धा इति। केचिदाहुः पुरुषाऽन्यपदार्थः नक्षत्राणांतु बहुव्रीहिरितिद्विवचनप्रसंगः। अन्येत्वाहुः। नक्षत्रवृत्तेः समासस्यग्रहणे पुरुषाणामन्यप
दार्थत्वे प्रसंगएव नास्तीत्यवयवेन विग्रहः समुदायः समासार्थ इति तिष्यादयएव विपर्यासविषया बहुव्रीहिणोच्यंते इत्यस्तिप्रसंगः। जातिर्द्वंद्व इति। कथमनयोर्जाति
शब्दत्वंयावता जातिप्रदेशेषु भिन्नाधारा जातिर्गृह्यते न त्ववस्थाभेदकलितभेदैकवस्तुविषया। एवंतर्हि प्रतिमन्वंतरमन्यानि नक्षत्राणीति दर्शनेभिन्नाधारा

अथद्वन्द्व इतिकिमर्थं। यस्तिष्यस्तौ पुनर्वसू येषांत इमेतिष्य पुनर्वसवउन्मुग्धाः। बहुवचनस्येतिकिमर्थं। उदितंतिष्यपुनर्वस्वोःक
र्यंचान्नैकवचनं। जातिर्द्वंद्वएकवद्भवतीति। अप्राणिनामितिप्रतिषेधः प्राप्नोति। एवंतर्हि सिद्धे सतियद्बहुवचनग्रहणंकरोति॥ तज्ज्ञा
पयत्याचार्यः सर्वोद्वंद्वो विभाषयैकवद्भवतीति। किमेतस्यज्ञापनेप्रयोजनं। बाभ्रवशालङ्कायनं बाभ्रवशालंकायना इत्येतत्सिद्धं
भवति। अथवानात्र भवन्तःप्राणिनः प्राणाएवात्र भवंतः॥ ॥ इतिश्रीमद्भगवत्पतंजलिविरचितेव्याकरणमहाभाष्ये
प्रथमाध्यायस्यद्वितीये पादेद्वितीयमाह्निकम्॥ ॥ ॥

जातिः संभवतीति न कश्चिद्दोषः। सर्वोद्वंद्व इति। अप्राणिजातिद्वंद्वो नित्यमेकवद्भवति प्राणिद्वंद्वस्तु विकल्पेनान्यायसिद्धस्त्वार्थो बहुवचनग्रहणेन लिंगेन
सूच्यते एकवद्भावप्रकरणं हि विषयविभागार्थमारब्धं प्राणंगादीनां समाहारएवेति नतु प्राणंगादीनामेव समाहार इति। ततस्तत्प्रकरणानुपात्तानां समाहा
रेतरेतरयोगयोर्द्वंद्वः सिद्धएव। अथवेति। नह्येते षु लोके प्राणिव्यवहारः सिद्ध इतिभावः। प्राणाएवेति। तदधीनस्थितित्वात्प्राणिनामेत एवप्राणा उच्यंते॥ ॥
इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे प्रथमस्याध्यायस्यद्वितीयपादेद्वितीयमाह्निकं॥ ॥

=तस्येमपर्यकेलेद्विवचनाद्नुपपत्तिः संख्यार्थकत्वे [illegible] प्रसंगादित्याह

सरूपाणां रूपग्रहणमिति। सरूपसान्तरंगत्वादहेयत्वादुपदेशानपेक्षणाच्च तल्लक्षणमेव समानत्वं ग्रहीष्यते प्रतिपत्तिलाघवं च समानानामिसुच्यमाने भवति। रूढश
ब्दत्वात् समानशब्दस्य तुल्यार्थत्वावगमात्। सरूपाणामिति पुनरुच्यमाने पदद्वयार्थावगमपूर्विकान्यपदार्थावगमात् प्रतिपत्तिगौरवं भवतीति प्रश्नः॥ शास्त्रीयेष्वेति सं
रूपमित्यत्र रूपग्रहणेन त्वापित्वे व्याकरणे रूपवदर्थोप्यंगीक्रियत इति ततश्चार्थरूपाभ्यां समानत्वं गृह्येतेत्यर्थः॥ शास्त्रानुशासनमस्तावात् शब्दसंबंधि रूपं गृह्यते न तु
चेत्स्वग्राह्यमित्याह श्रुतौ चेति। श्रोत्रोपलब्धावित्यर्थः। अथवा श्रोत्रेन्द्रियं श्रुतिरुच्यते। एकग्रहणमिति। शेषग्रहणे शेष इति भावसाधनपक्षे प्राथम्यादेकस्यैव शे
षो भविष्यतीति शिष्यत इति शेष इति कर्मसाधनपक्षेप्येकत्वसंख्याया विवक्षितत्वादेक एवावशिष्यत इति प्रश्नः। द्विबह्वोरिति द्वित्वबहुत्वविषयस्यानेकस

रूपाणामेकशेष एकविभक्तौ रूपग्रहणं किमर्थं समानानामेकशेष एकविभक्तावितीयत्युच्यमाने यत्रैव सर्वं समानं शब्दार्थे यत्रैव सा
तं वृक्षाः प्लक्षा इति इह न स्यादक्षाः पादा माषा इति। रूपग्रहणे पुनः क्रियमाणे न दोषो भवति। रूपं निमित्तत्वेनाश्रीयते श्रुतौ च रूपग्रहणं अथैक
ग्रहणं किमर्थं सरूपाणां शेष एकविभक्तावितीयत्युच्यमाने द्विबह्वोरपि शेषः प्रसज्येत। एकग्रहणे पुनः क्रियमाणे न दोषो भवति। अथ शे
षग्रहणं किमर्थं सरूपाणामेकविभक्तावितीयत्युच्यमाने आदेशोयं विज्ञायेत तत्र को दोषः। अग्नष्वश्वाश्वाश्वौ। अग्नीं तर्यंतो ह्युदात्तवतस्याणितो
कए१ "ह्युदात्तवानादेशः प्रसज्येत लोपलोपिता च न प्रकल्पेत तत्र को दोषः॥१॥ ॥

शब्दस्येत्यर्थः। तत्र भावसाधनपक्षे व्याप्तिन्यायाश्रयेणानेकस्यापि शेषः स्यात्। कर्मसाधनपक्षेपि संख्यायेत्वादप्राधान्यात् संख्याया अविवक्षा स्यात्। यथाग्रहं सम्मा
र्ष्टीति भावः। शेषग्रहणमिति। सरूपाणामेकः साधुर्भवतीति वाक्यशेषोध्याहरिष्यत इति भावः। आदेशो यमिति षष्ठीस्थाने इति नियमात्। तत्र को दोष इति। अंतरतम एक
आदेशः प्रवर्तिष्यत इति भावः। इतरस्तु सरेदोषमाह अग्नश्वाश्वश्वेति ह्युदात्तवदिति द्वावुदात्तवंतावश्वशब्दोपस्य समुदायस्य सह्युदात्तवानादेशोपि
द्वावुदात्ता [illegible] वुदात्तगुणयुक्तावकारौ यस्येति ह्युदात्तवानुच्यते। एतच्चोपलक्षणं तेन ह्यनुदात्तस्य ह्यनुदात्त आदेशः प्राप्नोतीति लोपलोपितेति लोपनीयस्य लोपि
"तं लोपसंबंधो न प्राप्नोतीत्यर्थः॥१॥ ॥

नन्वश्वशब्दे श्रूयमाणे ह्युदात्तानुदात्तयोरनुग्रहायां तत्र न भवति भाषायां भयस्वरकरएकरवादेशोभविष्यतीति चेन्न तत्रैव रूपेण साक्ष्यग्रहणमिसत्र नियमकाभावेन पर्यायेण प्रत्युर्वाद्रत्वात्॥१=

गर्गा इति प्रकृतिरर्थो भेदादेकैकवयञ्प्रत्ययान्तस्य बहवः यञा कृते च एकत्वात् अवधानाभावादनेकस्यापि प्रत्ययस्य परत्वं न विरुध्यते तत्र गर्गा यय इति स्थिते पदाग्गर्ग शब्दमुक्त्वा प्रत्यया नामेव एकोऽयं शब्दः आदेशः क्रियते तत्र तस्य बहुत्वात् लुक् सिध्यति यदा तु विरूपाणामपि समानार्थानामेकशेषवदेकः आदेशः समकृतिकः क्रियते तत्र गर्गयय इत्यस्यान्यशब्द यशब्दयो गगयशब्द आदेशः तत्र यशब्दान्तस्य बहुत्वे ञिः ननु प्रत्ययमात्रस्येति भावः। यञन्त यद्बहुत्वमिति आदेशपक्षेऽपि वचनसामर्थ्यात् तस्यादेकत्वात् यञ बुद्ध्युत्पादा यञन्तमेतदित्यास्थीयते काश्यपा इति काश्यप इगपत्यमिति कृतिरिनी वे प्रकृत्या विति विहितस्य कनोजी विकार्थे चापपप इति लुप्

गर्गा वत्साः विदा उर्वाः यञो बहुषु ञो बहुष्विति सुच्यमाने लुक् प्राप्नोति मा भूदेवं यञन्तं पत् बहुषु अञन्तं यद् बहुष्विति एवं भविष्यति नैवं शक्यमिह हि दोषः स्यात् काश्यपप्रतिकृतयः काश्यपा एक विभक्त्या विति किमर्थं पयः पयो जरयति वासो वासः छादयति ब्राह्मणाभ्यां च कृतं ब्राह्मणाभ्यां देहीति किमर्थं पुनरिदमुच्यते प्रत्यर्थं शब्दनिवेशान्नैकेनानेकस्याभिधानं प्रत्यर्थं शब्दाः अभिनिविशन्ते किमिदं प्रत्यर्थमिति अर्थमर्थं प्रति प्रत्यर्थं शब्दनिवेशादेतस्मात्कारणात् नैकेन शब्देनानेकस्याभिधानं प्राप्नोति तत्र को दोषः तत्रानेकार्थाभिधाने नेकशब्दत्वं तत्रानेकार्थाभिधाने अनेकशब्दत्वं प्राप्नोति इष्यते च एकेनाप्यनेकस्याभिधानं स्यादिति तच्चान्तरेण यत्नं न सिध्यति तस्मादेकशेषः एवमर्थमिदमुच्यते अस्ति प्रयोजनमेतत् किं तर्हीति॥ २॥ ॥ ॥

=द्व्याणां भिन्नरूपेणोपस्थितो हेतुमाह विशिष्टेति ४=

ततः काश्यपः काश्यपश्च काश्यपश्च काश्यपयश्चेति प्रतिकृतिप्रचयविवक्षायामेकः काश्यपशब्दः प्रयुज्यते स च बहुर्थोऽन्तं च इति लुक्प्रसङ्गः लौकिकस्य गोत्रस्यात्र ग्रहणमिति परिहार उत्तरत्र वक्ष्यते इतीह नोक्तः पप इति उत्तरत्रार्थे विप्रतिषेधादिति प्रत्याख्यानं करिष्यते किमर्थं पुनरिति जातिः शब्दार्थः तस्याश्चैकत्वादनेकशब्दाप्रयोगः आश्रयगतसंख्याप्रतिपादनाय द्विवचनबहुवचने भविष्यत इति मन्यः द्रव्यपदार्थ उपलक्षणत्वाकृतिरिति दर्शने तु च मारक्षमित्याह प्रत्यर्थमिति यावंति द्रव्याणि विशिष्टगुणक्रियाविषयतया विवक्षितानि तावन्तो शब्दा नामेकैकार्थो पक्षयाणां प्रयोगे प्राप्ते एकशेषारम्भ इत्यर्थः॥ ॥

किमिदमिति यदिदं हेतुरहितं दृष्टं तमाश्रित्य विरूपानेकशब्दप्रयोगदर्शनात् सरूपैकशेषः आरभ्यते तदा सरूपैकशब्दप्रयोगदर्शनाद्विरूपानेकशेषः किमिति नारभ्यत इति
प्रश्नः प्रयोगानुशब्दशास्त्रत्वानुगम्यमानायां न किंचिदारब्धं यं । द्रव्यपदार्थपक्षे विस्वभावादेकः शब्दो नेकमर्थं ख्यापयितुं प्रसाधयिष्यति । अन्यथा एकशेषारंभे विरू
पप्रत्यायकः स्यात् न हि स्वतोऽसतीं शक्तिमाचार्येण कर्तुं शक्यते मंदबुद्धिस्वलाद नार्थं च यथास्थितप्रयोगानुसरणे कोऽनुरोधः सरूपैकशेषारंभेन पुनर्विरूपाने
कशेषारंभे लाघवायैकशेषारंभश्चेत्तन्न लघीयसी विरूपप्रतिपत्तिः तत्र हि महत्त्वविषया बुद्धिरेकरूपैव भवति एकशेषे तु प्रवृत्तिनिवृत्तिविषयेति प्रतिप

किमिदं प्रसंख्ये शब्दाः अभिनिविशंते रसेतं दृष्टं तमास्थाय सरूपाणामेकशेष आरभ्यते न पुनः प्रसंख्ये शब्दाः अभिनिविशंते रसेतं दृष्टमास्था
य विरूपाणामनेकशेष आरभ्यते तत्रैतत्स्यात् लघीयसी सरूपनिवृत्तिः गरीयसी विरूपप्रतिपत्तिः तच्च न लघीयसी विरूपप्रतिपत्तिः किंका
रणं यत्र हि बहूनां सरूपाणामेकः शिष्यते तत्रावरतो द्वयोः सरूपयोर्निवृत्तिर्वक्तव्या स्यादेवमप्येतस्मिन्सति किंचिदाचार्यैः सुकरतरकं
चैकशेषारंभमन्यते किं पुनरयमेकविभक्तावेकशेषो भवति एवं भवितुमर्हतीति एकविभक्ताविति चेत् ३ ॥ ॥

त्रिगौरवप्रसंगः अवरतो द्वयोरिति । परत्रयाणामेकः शिष्यते तत्र द्वयोर्निवृत्तिर्वक्तव्या स्यात् ये सर्वे शेषशब्दस्य निवृत्तिविशिष्टावस्थानवाचित्वात् परत्र तु
द्वयोरेकशेषस्तदेकस्य निवृत्तिः चतुःप्रभृतीनां त्वेकशेषे त्रिप्रभृतीनां निवृत्तिरिति प्रवृत्तिनिवृत्तिलक्षणविषयभेदात् बुद्धिगौरवप्रतिपत्तिरित्यर्थः सुकरत
रकं चेति एवं हि प्रकरणमभिन्नरूपं भवति वृद्धो यूनेत्यादिभिः सूत्रैरेकशेषस्य विधानात् अनेकशेषारंभे तु इह पृथक्प्रस्थानं तथा गौरवं स्यादित्यर्थः
किं पुनरिति किमयमेकशब्दः संख्यावाची तुल्यतावाची वेति प्रश्नः एवं भवितुमिति संख्यावाचित्वे नैकशब्दस्य प्रसिद्धतरत्वात् ॥ ३ ॥

=मांतरीयकेति॰ द्विबहोरप्येकत्वसंख्याया अवश्यंभावान्नांतरीयकत्वान्नामादाय कर्तुरीप्सिततममित्येकवचनमितिभावः।१९=

नामावादिरिति॥ ड्याप्प्रातिपदिकादित्यत्रैकवचनांतानामेव द्वंद्वः क्रियते। वर्त्तिपदार्थानां सर्वत्र संख्याभेदावगमे प्रमाणाभावात् गुणोच संख्या विवक्ष्यते यथा
पशुना यजेतेति एवं चैकैकस्मात्प्रातिपदिकात्स्वादिविधिः स नवं न तु समुदायात् यत्र क्वचिद्गुणोपि संख्या न विवक्ष्यते यथा कर्तुरीप्सिततममि
ति द्वयोर्द्वन्द्वानां वेप्सिततमस्य कर्मसंज्ञा प्रवर्त्तते तत्र नांतरीयकसंख्याया उपादानमिति लक्ष्यसिद्ध्यर्थमाश्रीयते। ननु चेति अर्थवदवयवार्थातिरेकेणाप्र

नामावाद्विभक्तेः एकविभक्ताविति चेत्तन्न किं कारणमभावाद्विभक्तेर्न हि समुदायात्स्वाविभक्तिरस्ति किं कारणमप्रातिपदिकत्वात् ननु चा
र्थवत्प्रातिपदिकमिति प्रातिपदिकसंज्ञा भविष्यति नियमात्तन्न प्राप्नोति अर्थवत्समुदायानां समासग्रहणं नियमार्थमिति यदि पुनः पृथ
क्त्वेषां विभक्तिपरिणामे कृषोप उच्यते पृथक्त्वेषामिति चेदेकशेषे पृथक्विभक्त्युपलब्धिस्तदाश्रयत्वात् पृथक्त्वेषामिति चेत्
एकशेषे पृथग्विभक्त्युपलब्धिः प्राप्नोति किमुच्यते एकशेषे पृथग्विभक्त्युपलब्धिरिति यावता समयः कृतः न केवला प्रकृतिः प्रयो
क्तव्या न च केवलः प्रत्यय इति तदाश्रयत्वात् प्राप्नोति यत्र हि प्रकृतिनिमित्ता प्रत्ययनिवृत्तिस्तत्र प्रत्ययविकारायाः प्रकृतेः प्र
योगो भवति अग्निचित्सोमसुदिति यथा यत्र च प्रत्ययनिमित्ता प्रकृतिनिवृत्तिस्तत्र प्रकृतिकस्य प्रयोगो भवत्यधुना इयानिति

=विभक्त्याश्रयत्वात्तदेकं=
=शेषस्येत्यर्थः।२

सापेक्षायां सत्यां समुदायार्थोपजननात् सरूपसमुदायाभिनिवेशिन्येकाप्रातिपदिकसंज्ञास्ति तया सरूपसमुदायस्यैकं प्रातिपदिकमिति स्वाद्युत्पत्तिर
विरुद्धा अर्थवत्समुदायानामिति अविशेषेण नियमो न तु सर्वं तानामेवेति मन्यते इदानीं तुल्यपर्यायमेकशब्दमाश्रित्याह यदि पुनरिति पृथक्त्वे
षामिति वृक्षस्य वृक्षस्य इति स्थिते विभक्तौ परतो यानि सरूपाणि तेषामेकशेष उच्यमाने विभक्तिनिमित्तत्वात् प्रकृतिनिवृत्तेः केवलानां विभक्तीनां प्रयोगः प्रसं

= सुतिसीतिप्रसंगे प्रकृतिग्रहणेन तु ना ख्याकं साधु संयोगादिलोपो विनाशि वक्तादि सत्र परस्य सनु वृक्षस्यैकस्य परस्य सः संयोगस्य दायो दिश्यर्थात् अन्यथा काप्यशक्यस्थाने सर्वदोषापत्तेः। संयोगांतस्येत्यत्र तदंतग्रहणात् संयोगांतस्य सनः परांतस्येत्यर्थात् संयोगांतलोपः

संयोगांतलोपेनेति। वृक्षस्सस्स इति स्थिते संयोगांतलोपो भविष्यति ननु संयोगांतस्य पद स्य लोप उच्यते तत्र पूर्वपदं सकारांतं द्वौ सकारौ पदे इति पदत्रयं संपद्यत इति कु तो लोपः संयोगांतलोपस्य चापवादः संयोगादिलोपस्तेन भाव्यं पूर्वत्रासिद्धमिति वचनात् हल्ङ्यादिलोपेनैव च भाव्यं। अत्र व्याचक्षते संयोगस्यांतः सकार स्तस्य लोपः स च हल्ङ्याब्भ्य इत्यनेनेति संयोगादिलोपेनेति अत्रापेक्षपदस्य संयोगस्यादिर्नास्तीति हल्ङ्यादिलोपमेव संयोगादिलोपं प्रति प्रत्न्याः संयोग स्थौ सौ प्रसेकं हलो संयोगसंज्ञेति पक्षाश्रये आदिस्थवृक्षशब्दापेक्षया तस्य लोपो हल्ङ्याब्भिस्तनेनेत्यर्थः। अपर इति सूत्रे वृक्षसिति प्राप्नोति दुष्टत्वम्

संयोगांतलोपे न सिद्धं कुतो नु रत्वे तत्परयोर्वृक्षशब्दयोर्निवृत्तिर्भविष्यति न पुनः पूर्वयोरिति तत्रैतस्मात्पूर्वनिवृत्तावुपि सस्सां संयोगादिलोपे न सिद्धमिति। न सिध्यति तत्रावरतः द्वयोस्सकारयोः श्रवणप्रसंगेन यत्र च संयोगांतलोपो नास्ति तत्र च न सिध्यति क्व च संयोगांतलोपो ना स्ति द्विवचनबहुवचनयोः यदि पुनः समास एकशेष उच्यते किं कृतं भवति क्वचिद्द्वचनलोपः परिहृतो भवति न तर्हि समासग्रहणं कर्त्त व्यं न कर्त्तव्यं प्रकृतमनुवर्त्तते क्व प्रकृतं तिष्य पुनर्वस्वोर्नक्षत्रद्वंद्वे बहुत्वे च नस्य द्विवचनं नित्यमिति समास इति चेत्स्वरसमासांते षु दोषो भवति स्वरः अश्वश्चाश्वश्च अश्वौ समासांतोदात्तत्वे कृते एकशेषः प्राप्नोति इदमिह संप्रधार्यं समासांतोदात्तत्वं क्रियतामेकशेष इति

ति पादनपरं चैतत् न पुनः कदाचिद्वयाणां श्रवणप्रतिपादनार्थं द्विवचनबहुवचनयोरिति ये स्वभावाद्देव द्विवचनबहुवचनांताः प्रयुज्यंते गोदौ दाराः सिकता इत्यादयः तत्र द्विवचनबहुवचनेषु परत एकशेषे सति द्विवचनबहुवचनानां श्रवणप्रसंगः कृते कशेषाणां वा पुनरेकशेषे क्रियमाणे द्विवचनबहुवचनश्र वणप्रसंगः क्वचिद्द्वचनलोप इति। यस्त्वयाक्वचिद्द्वचनलोप उक्तः स परिहृतः अथ वा स्वरूपं परिहृतो न निर्दिष्ट इत्यर्थः स्वरसमासांतेष्विति समासे कृते समासां तोदात्तत्वे च पदिपूर्वपदे षष्ठ्यस्तदा सर्वानुदात्तत्वं प्राप्नोति मध्य परशेषस्तदाश्वशब्दस्यांतोदात्तत्वप्रसंगः॥ ॥ ॥

= नन्वेकशेषविधानात् त्र्याद्यि त्वबहुत्वयोरुपजननानाभावाद्द्विवचनबहुवचनपराणामसंभवात् आह ये स्वभावादिति ४ = कश्चिदिति वक्ष्यमाणं द्वयांगांतरं तु न परिहृतमिति भावः। १२ =

परत्वादिति ननु आप्रे समासांतोदात्तत्वे आरभ्यमाण एकशेषस्तस्य बाधकः नैतदस्ति निरवकाशो हि बाधको भवति। कृते च समासांतोदात्तत्वे एकशेषस्य प्रव
त्ते नाद्विरोधाभावाच्च नास्तु सर्गोपवादभावः। अक्षेति अक्षच्च अक्षच्च अक्ष इति स्थिते अंतर्वर्तिन्या विभक्तेर्लुक्कालुप्तत्वात्प्रत्ययलक्षणप्रतिषेधान्नास्येकविभक्तिपरते
ति एकशेषनिमित्तं समुदायाद्विभक्तिरुत्पद्यात संचनास्ति सारूप्यं एको हि अक्षशब्दः अपरः अक्षच शब्दः समासांतः समासस्येवावयवो नोत्तरपदस्येति चे
न्नहि तेन व्यवधानात् समासविभक्तेरेकशेषो न स्यात्। समासार्थस्योत्तरपदस्यांतः समासांत इत्यपि भाष्यकारस्य दर्शनमिति अक्षगच शब्दयोर्वैरूप्यमास्ति

परत्वात्समासांतोदात्तत्वं समासान्तोदात्तत्वे च द्वेषो भवति स्वसमासांत अक्ष अक्ष अक्षौ समासांते कृते असारूप्यादेकशेषो न प्राप्नोतीदमिह सं
प्रधार्यं समासांतः क्रियतामेकशेष इति किमत्र कर्तव्यं परत्वात्समासांतः समासांते च द्वेषो भवति अंगाश्रये चैकशेषवचनं अंगाश्रये च
कार्ये एकशेषो वक्तव्यः स्वसा च स्वसारौ च स्वसारः अंगाश्रये कृते सारूप्यादेकशेषो न प्राप्नोतीदमिह संप्रधार्यमंगाश्रयं क्रियतामेकशे
ष इति किमत्र कर्तव्यं परत्वादंगाश्रयं। तिङ्समासेति तिङ्समासवचनं तिङ्समासे तिङ्समासो वक्तव्यः एकतिङ्ग्रहणमनर्थकं समासे
तिङ्समास इत्येवानानर्थकं तिङ्समासे प्रकृते तिङ्समासो वक्तव्यः तिङ्विप्रतिषेधस्तिङ्कश्चिद्विधेयः कश्चित्प्रतिषेध्यः पचति पच

समाप्यकृतादौ दोषस्तु उक्ताइतितः अंगाश्रये चेति च शब्दादनंगाश्रयेपि यथा नौ स्वनावौ चेति। स्वसा च स्वसारौ चेति। किमर्थमेकमेकवचनांतं द्वितीयं तु द्विवचनां
तमिति चेत् सर्वथा वैरूप्यप्रतिपादनाय तथा हि षष्ठ्यां तर्वर्तिन्यां विभक्तौ लुप्तायामपि वचनसामर्थ्यात्प्रत्ययलक्षणमाश्रीयते तदात्र वैरूप्यमथा
पि समासविभक्तेरेकविभक्तिपरत्वं तथापि वैरूप्यं तिङ्समास इति समास एकशेषे विधीयमाने तिङ्समासेप्येकशेषो वक्तव्यः पचति तिङ्समासो वक्तव्य
इत्यर्थः॥ एकमिति विनापि तेनार्थस्यागमात् प्रकृतत्वादिति आख्यातमाख्यातेनेत्यत्र द्वंद्वसरूपाणामिति वक्तव्यं॥ ॥ ॥

मा०कै०प्र० २२५

यदिपुनरिति। दोषांतराभिधानायपुनरुपन्यासः। तदर्थमिति। पूर्वंदोषमात्रमुपन्यस्तंकेवलात्प्रातिपदिकात्। विभक्तेः श्रवणंप्राप्नोतीति। इदानींतुतत्प्रतिविधानापवचनेक्रिय माणेगौरवमापद्यतइत्येतत्प्रतिपाद्यतेति। तिङ्-तान्यवकाशइतिकारकभेदात्क्रियाभेदादनेकतिङ्। तत्प्रसंगेएकशेषोविधेयः। ततस्तु परत्वात्सरूपाणामेकशेषंबा धित्वाद्वंद्वःप्राप्नोति। सरूपतोविप्रतिषेधइतिपुनरेकशेषोनप्राप्नोति। सरूपिवापुनःप्रसंगविज्ञानेसत्स्वसमासांतेषुदोषएव। यदिपुनरिति। सप्तमीनिर्देशे प्रकृतिमात्रनिर्वृत्तौप्रसवयश्रवणप्रसंगः। षष्ठीनिर्देशेतुविभक्त्यंतानांनिवृत्त्याभावमितिनास्तिकेवलविभक्तिश्रवणप्रसंगःकश्चिदिति। शिष्यमाण

यदिपुनरसमासएकशेषउच्यते। असमासेवचनलोपः। यद्यसमासेवचनलोपोवक्तव्यः ननुचोक्तमेतैर्वचनलोपंचोदितः स्मः। द्विवचनबहुवच नविधिंद्वंद्वप्रतिषेधंचवक्ष्यति। तदर्थंपुनश्चोद्यते। द्विवचनबहुवचनविधिः। द्विवचनबहुवचनानिविधेयानि [illegible] वृक्ष वृक्षवृक्षौवृक्ष वृक्षवृक्षवृक्षाइति। द्वंद्वप्रतिषेधश्च। प्रतिषेधोवक्तव्यः। वृक्षश्चवृक्षश्चवृक्षौवृक्षश्चवृक्षश्चवृक्षश्चवृक्षाइतिचार्थेद्वंद्वइति [illegible] द्वंद्वः प्राप्नोति। नैषदोषः। अनवकाशएकशेषोद्वंद्वंबाधिष्यते। सावकाशएकशेषः। कोवकाशः। तिङ्-तान्यवकाशः। यदिपुनःएषकर्त्तव्येपोविभक्त्यं तानामेकशेषउच्येत। किंकृतंभवति। कश्चिद्वचनलोपःपरिहृतोभवति। विभक्त्यंतानामेकशेषेविभक्त्यंतानामेवतुनिवृत्तिर्भवति। एकविभक्त्यं तानामितितुएषविभक्तिप्रतिषेधार्थएकविभक्त्यंतानामितितुवक्तव्यं। किंप्रयोजनं। एषकृद्विभक्तिप्रतिषेधार्थएषविभक्त्यंतानामा ॥भूतब्राह्मणाभ्यांचदेहिब्राह्मणाभ्यांचकृतंनवार्थविप्रतिषेधाद्युगपद्वचनाभावः। नवाएषदोषः। किंकारणमर्थवि

प्रएकवचनश्रवणप्रसंगएवंएकविभक्त्यंतानामिति॥ सप्तमीनिर्देशमपास्यषष्ठीनिर्देशःकर्त्तव्यइत्यर्थः। किंप्रयोजनमिति। एकग्रहणस्यप्रयोजनप्रश्नः। षष्ठीनि र्देशस्यतुप्रयोजनमुक्तमेवकश्चिद्वचनलोपःपरिहृतइति। नवेति। एकविभक्त्यंतानामितिनकर्त्तव्यमेवप्रयोजनाभावात्। ततश्चानुसन्नायामेवविभक्तौप्रातिपदि ॥कानामेकशेषेकृतेशिष्यमाणस्यनिवर्त्तमानार्थाभिधानाद्द्विवचनबहुवचनसिद्धिः॥

द्वंद्वस्यवर

ब्राह्मणाभ्यःकृतंदेहीतिस्यात्

विभक्त्यंतानामेकशेषइतिपक्षेएकग्रहणमात्रमसारम्यानपरोयंग्रंथोनभवतिकिंनुप्रातिपदिकैकशेषसंपूर्णमेकविभक्तिः ... एकेति। नवेत्यस्यएकविभक्त्यंतानामितिमास्तिस्त्वर्थः। ब्राह्मणाभ्यांकृतंब्राह्मणेभ्यःदेहीतिमात्रस्यापाठ

अन्यथाएकग्रहणप्रयोजनप्रश्नेएकविभक्त्यंतानामितिकिमर्थमितिविशिष्यापेषवंपृष्टंपिनःस्यात्

राम० २२५

=एकविभक्तिग्रहणाभावे सुबन्तानामपि सरूपाणां सहविवक्षायामेकशेषः प्राप्नोतीत्यत आह प्रातिपदिकग्रहणमनुवर्त्तते ति ३=

विप्रतिषिद्धाविति। चतुर्थ्यन्तस्य शेषे ब्राह्मणेभ्य इत्युक्ते च कर्तृत्वं न प्रतीयते। तृतीयान्तस्य शेषे ब्राह्मणैरित्युक्ते संप्रदानत्वं न गम्यते एवमशब्दोनेकार्थं प्रत्यायनाय प्रभवति स शिष्यते नान्यः। अयं तर्हीति एकविभक्त्यन्तानामिति तु क्रियमाणे प्रस्तुतदोषः कश्चिदिति शिष्यमाणस्यैकवचनलोपो वक्तव्यः यदि पुनरिति एकविभक्ताविति न क्रियते दूरस्थानं तु सकृदुक्तस्ततः प्रातिपदिकग्रहणमनुवर्त्त्यानुवृत्तायामेव विभक्तौ सरूपाणां प्रातिपदिकानामेकशेषः क्रियते तिङ्. तेषु कथं उच्यते लावस्थायामेव पचतु पचतु इति स्थिते रूढत्वात् प्रातिपदिकत्वे सत्येकशेषः मातृमात्रोरिति कथमयं नि

विप्रतिषिद्धावेतावर्थौ कर्तृसंप्रदानमिति अशक्यौ युगपन्निर्देष्टुं तयोर्विप्रतिषिद्धत्वात् युगपद्वचनं न भविष्यति अनेकार्थो ऽयमश्च पुनरेकशेषः अनेकमर्थं संप्रत्याययिष्यामीति एकशेष आरभ्यते तस्मान्नैकशब्दत्वं तस्मादेकशब्दत्वं न भविष्यति अयं तर्हि दोषः कश्चिद्वचनलोपो द्विवचनबहुवचनविधिर्न्द्व प्रतिषेधश्चेति यदि पुनः प्रातिपदिकानामेकशेष उच्येत किं कृतं भवति वचनलोपः परिहृतो भवति प्रातिपदिकानामेकशेषे मातृमात्रोः प्रतिषेधः सरूपत्वात् प्रातिपदिकानामेकशेषे मातृमात्रोः प्रतिषेधो वक्तव्यः माता च जनयित्री माता च धान्यमातृमानारः किं कारणं सरूपत्वात् सरूपाणि ह्येतानि प्रातिपदिकानि किमुच्यते प्रातिपदिकानामेकशेषे मातृमात्रोः प्रतिषेधो वक्तव्य इति न पुनर्यस्यापि विभक्त्यन्तानामेकशेषस्तेनापि मातृमात्रोः प्रतिषेधो वक्तव्यः स्यात् तस्यापि ह्येतानि कचिद्विभक्त्यन्तानि सरूपाणि मातृभ्यां च मातृभ्यां चेति अथ मतमेतद्विभक्त्यन्तानां सारूप्ये भवितव्यमेवैकशेषेणेति

" प्रातिपदिकानामेवैकशेषे दोषो भवति एवं च कृत्वा चोद्यते॥ ॥

दोषः यावतैकशेषेणाभाव्यं एकशेषे सति विवक्षितार्थो न गम्यमानत्वादभावः। अयं ह्यत्रार्थो विवक्षितः जननीवाचिनः परिच्छेत्तृवाचिनश्च मातृशब्दस्यैकशेषप्रतिषेधो वक्तव्य इति एष चार्थो मात्रोरित्युक्ते न गम्यते। अथ मतमेतदिति। अर्थविप्रतिषेधादत्रैकशेषो न भवति कल्पते त्येकशेषेणाभिरित्यनुप्रयोगे पुनरर्थो न प्रतीयते नेति चोक्ते अर्थानवगतिः अभ्युपगम्यवादेनैतदुच्यते विभक्त्यन्तानां सारूप्य इति प्रातिपदिकावस्थायां सर्वदा सारू

भा०कै०प०
२२६

हरितेति॥ एषां प्रातिपदिकावस्थायां वैरूप्यमिति एकशेषो न प्राप्नोति विभक्तौ तु सारूप्यसद्भावात् सिध्यत्येकशेषः हरितस्य स्त्रीति नानेन पुंयोगः प्रतिपाद्यते तत्र
हि ङीषभावः हरितीति किं तर्हि अयमर्थः हरितशब्दस्य हरिणी सा च स्त्री न वेति प्रातिपदिकग्रहणं विछिन्नत्वादिह नानुवर्त्तते सारूप्यं चेहाश्रीयते
न च प्रातिपदिकानि लोके प्रयुज्यंते किं तर्हि पदान्येव शास्त्रेपि प्रक्रियालाघुपदेशो नानुमेयत्वात्प्रातिपदिकानां प्रयोगाभावः। तेन पदावस्थायां मातृ
माता र इति वैरूप्यादेकशेषाभावः। हरिणपावित्यादौ तु भवतीति दोषप्रतिविधानं कृतं अपरआह इति पृच्छासंभवप्रतिपादनार्थमिदमुक्तं इत्यर्थः इत

हरित हरिणश्येतश्येनरोहितरोहिणानां स्त्रियामुपसंख्यानं हरितहरिणश्येतश्येनरोहितरोहिणानां स्त्रियामुपसंख्यानं कर्त्तव्यं हरितस्य स्त्री
हरिणी हरिणस्यापि हरिणी हरिणी च हरिणी च हरिण्यौ श्येतस्य स्त्री श्येनी श्येनस्यापि स्त्री श्येनी श्येनी च श्येनी च श्येन्यौ रोहितस्य स्त्री रोहिणी रोहिण
स्यापि रोहिणी रोहिणी च रोहिणी च रोहिण्यौ न वा पदस्यार्थे प्रयोगात् न वा एष दोषः किं कारणं पदस्यार्थे प्रयोगात् पदमर्थे प्रयुज्यते विभक्त्यंतं च पदं रूपं चेहाश्री
यते रूपनिर्ग्रहश्च शब्दस्यानंतरेण लौकिकं प्रयोगं तस्मिंश्च लौकिके प्रयोगे सरूपाण्येतानि अपरआह न वा पदस्यार्थे प्रयोगात् न वा एष
पक्ष एवास्ति प्रातिपदिकानामेकशेष इति किं कारणं पदस्यार्थे प्रयोगात् पदमर्थे प्रयुज्यते विभक्त्यंतं च पदं रूपं चेहाश्रीयते रूपनिर्ग्र
हश्च शब्दस्यानंतरेण लौकिकं प्रयोगं तस्मिंश्च लौकिके प्रयोगे प्रातिपदिकानां प्रयोगो नास्ति अयाने न पक्षेणार्थः स्यात् प्रातिपदिकाना
मेकशेष इति गाढमर्थः किं वक्तव्यमेतत् नहि कथमनुच्यमानं गंस्यते एते नैवाभिहितं सूत्रेण सरूपाणामेकशेष एकविभक्ताविति क
थं विभक्तिः सारूप्येणाश्रीयते अनैमित्तिक एकशेषः एकविभक्तौ लौकिके प्रयोगे यानि सरूपाणि तेषामेकशेषो भवतीति॥ ॥

नीभाष्यकार एनं पक्षं समर्थयितुमाह अयाने नेति विभक्तिः सारूप्ये गतिः एकविभक्तिर्नैकशेषनिमित्तत्वेनेहोपात्ता किं तर्हि सारूप्योपलक्षणार्था ए
कविभक्तौ लौकिके प्रयोगे यानि सरूपाणि दृष्टानि तेषामेकशेषः स चानैमित्तिकत्वाद्विभक्तिं नापेक्षते भाष्ये प्रातिपदिकग्रहणस्योपलक्षणार्थत्वात्
ड्यंतादीनामपि हरिणादीनामेकशेषो भवति स्वरभिन्नानामिति वृचुनातु [illegible] एकशेषः [illegible] हरिन हरि [illegible] एकशेषे कृते

प्र०
२२६

=एकार्थत्वादिति यथा वाक्येष्ह सश्च रक्षश्चेति एकताम धिन्नस्य प्रथमं वो भूपश्चाद् द्विलोपश्च नेति न बाध्यते तथेति म न्यते एवं तु घटपटावित्यत्रापि द्विवचनं विधेयं स्यात् ४=

यत्र वेति। अनेनानैमित्ति कत्वमेव प्रतिपाद्यते। विभाग इति। कर्म्मोदिकारकमिह विभक्तिशब्देनोच्यते ते न हि प्रातिपदिकार्थो विभागेनावस्थाप्यते। गत्वेकस्मि
न्कारके विवक्षिते तन्निमित्तया विभक्त्या भाव्यं इत्येकविभक्त्यन्तानां सरूपाणामेकशेषः सिध्यतिकश्चिदिति अवस्थितस्य वचनस्य लोपो वक्तव्यः। तस्मिंश्चापि कृते प्रत्य
यलक्षणेन प्रत्ययान्तत्वात् प्रातिपदिकसंज्ञाया अभावात् द्विवचनबहुवचने न सिध्यत इति ते अपि वक्तव्ये नहि संख्यायोरिति तु ज्ञापकं नलोपविषयमेवाः प्यप्य
विशेषेणालुप्त प्रत्ययस्य प्रातिप दिकसंज्ञायां ज्ञापकं एवमप्येकार्थत्वाच्छिष्यमाणस्य द्विवचनबहुवचनासिद्धिरेव सहविवक्षायामिति एवं चैकैकस्यानेकार्थ्या

यत्र वा तत्र वेति॥ अथानेन पक्षेणार्थः स्यात् विभक्त्यन्तानामेकशेष इति ब्रूमः अर्थः किं वक्तव्यमेतत् न हि कथमनुमानं गम्यते एद्ग्वेते नैवापि हि
तं सूत्रेण सरूपाणामेकशेष एकविभक्ताविति कथं नेदं पारिभाषिक्या विभक्तेर्ग्रहणं किं तर्हि अन्वर्थग्रहणं विभागो विभक्तिरिति एकविभागे यानि सरूपा
णि तेषामेकशेषो भवतीति ननु चोक्तं कश्चिद्वचनलोपो द्विवचनबहुवचनविधिर्द्वन्द्वप्रतिषेधश्चेति नैष दोषः यत्तावदुच्यते कश्चिद्वचनलोपो द्विवचनबहु
वचनविधिरिति सहविवक्षायामेकशेषः युगपद्विवक्षायामेकशेषेण भवितव्यं न तर्हीदानीमिदं भवति वृक्षश्च वृक्षौ च वृक्षाश्च वृक्षाश्च
क्षा इति नैतत् सहविवक्षायां भवति अथापि निदर्शयितुं बुद्धिरेवं निदर्शयितव्यं वृक्षौ च वृक्षौ च वृक्षौ वृक्षाश्च वृक्षाश्च वृक्षा इति यदप्युच्यते द्वन्द्व
प्रतिषेधश्च वक्तव्य इति नैष दोषः [illegible] अनवकाशः एकशेषो द्वन्द्वं बाधिष्यते ननु चोक्तं सावकाश
एकशेषः को वकाशः तिङ्न्तान्यकाश इति न तिङ्न्तान्येकशेषारम्भं प्रयोजयन्ति किं कारणं यथाजातीयकानां द्वितीयस्य पदस्य प्रयोगे सामर्थ्य
मस्ति तथाजातीयकानामेकशेषः न च तिङ्न्तानां द्वितीयपदस्य प्रयोगे सामर्थ्यमस्ति किं कारणं॥
भिद्यानात् द्विवचनबहुवचनान्तानामेवैकशेषः न तर्हीति निसेनैकशेषेण भवितव्यमिति वाक्यं न प्राप्नोतीत्यर्थः॥ इतरेतरभिन्नार्थत्वात् एकशेषवत्सावकाशं न बाध्यत
इत्याह नैतदिति प्रसेकमत्र विवक्षेत्यर्थः। बाल्यस्य प्रक्रियावाक्ये नैव क्वसाद्यन्तं इत्याह यापीति यथाजातीयकानामिति द्रव्यवाचिनामित्यर्थः॥ ॥

यत्रकार

भा०कै०प्र० २२७ 227

एकादीनीति ॥ आख्यातवाच्या क्रियासर्वैव निवृत्तमेदास्तीयते भवद्भिरस्य तत्र सादैवसत्स्यिसाकृतेभेदात्मैदेशितिङः जातभेदस्यानवगमात् प्रकर्षोभ्या
वृत्त्यादयस्तु भेदनिबन्धना आश्रयभेदाभ्यावृत्त्यादिभेदनिमित्ता नैकत्वं क्रियायां विघ्नन्ति नैतानीति कर्तृकर्मसमवेतसंख्याभिधायिनी द्विवचनबहुव
चने इत्यर्थः ननु कर्तृकर्मणोर्लविधानादनेकस्मिन्कारके अनेके नैव लकारेणोच्यन्ते भवत्वनेको लकारः लकारजातेरभिधानात् लस्येस
त्र लजात्याश्रयादनेकस्यापि लस्य स्थाने अपि तत्त्वान्तर्यात्तर्हि द्विवचने बहुवचने भविष्यत इत्यदोषः तुल्यजातीयस्येति अवयवानां समुदायार्थे
तेत्र लात्समुदायविभक्तेरेवावयवार्थस्य संख्यावगमात् एषामवयवेभ्यो विभक्तिर्नोत्पद्यते विरूपसमुदाये तु सुबन्तानां द्वन्द्ववचने नायं न्या

एकादिक्रिया एकेनोक्तत्वान्नस्यार्थस्य द्वितीयस्य प्रयोगेण न भवितव्यं उक्तार्थानामप्रयोग इति यदि तर्ह्येकाक्रिया द्विवचनबहुवचनानि
न सिध्यन्ति पचतः पचन्ति नैतानि क्रियापेक्षाणि किं तर्हि साधनापेक्षाणि अथवा पुनरस्त्वेकविभक्ताविति नन्वचोक्तमेकविभक्ताविति
चेत्राभावाद्विभक्तेरिति नैष दोषः परिहृतमेतत् अर्थवत्प्रातिपदिकमिति प्रातिपदिकसंज्ञा भविष्यतीति ननु चोक्तं नियमात्तन्न प्राप्नोति
अर्थवत्समुदायानां समासग्रहणं नियमार्थमिति नैष दोषः तुल्यजातीयस्य नियमः कश्च तुल्यजातीयः यथाजातीयकानां समा
सः कथंजातीयकानां समासः सुबन्तानां ॥ ॥ ॥

योवाध्यते इत्यवयवेभ्य एव विभक्त्युत्पत्तिः सुबन्तानामिति यद्यपि गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिष्यते तथापि पू
र्वपदं तत्र सुबन्तमेवेति सोपि तरपेक्षया सुबन्तानामेव समासः अन्यथा नलोपादीनि पदकार्याणि पूर्वपदेन स्युः उत्तरपदमेव तु तत्रासुबन्तं इ
ह राजन् राजन् अ्ञो इति स्थिते परत्वान्निसलाच्चोपधाया दीर्घे कृते वैरूप्यादेकशेषो न प्राप्नोति उच्यते विरूपाणामपि समानार्थानामिति भविष्य
तिवक्तं तरंगत्वादीर्घत्वं हि नान्तरंगं उपधाविभक्तिविशेषमसंबुद्धिसर्वनामस्थानमपेक्षते इति बहिरंगं ॥ ॥ ॥

एम० २२७

ननु तोमेदसंसर्गकारकार्यवत्तस्य सुबन्तानामिस्यनेनोपलक्षणमकृतेनैवैकशेषवाक्येनकरतावच्छेदकोनेदसति संसर्गतानारदोषोवेदितव्यः ॥

=अस्मिन्पक्षे सुबंतात्तद्धिताः इत्यनंगीकृतस्य दोषः पूर्वपाठ समर्थयदिति ४= यदा लिंति तु यदेनैनतत्र वयतियदेकस्मादव्ययादेव न द्धितः किं पतेन दापरत्वाद्धौ कृतायामसारूप्यादेकशेषो न प्राप्नोतीति शेष एवेति अस्मिंस्तु पक्षे प्रातिपदि

सर्वत्रेति॥ पुरूप स्वाः इहो पश्चिप्राः एषु विभक्तौ परत एकशेषः। एकवचनांतानां वा समासो द्वैकस्यां विभक्तौ परतः सरूप समुदाया ह्य विहितायामेक विभक्तौ परतः प्रा
तिपदिकानां वा सहविवक्षायां प्रसेके द्विवचन बहुवचनांतानामिति। तत्र पश्चिमं पक्षत्रयमंगीकृत्य तत्र भिक्षा भिक्षा भिक्षा च भिक्षाम् इति स्थिते सर्ववि
क्तिभ्यो लुग्विधेर्बलवत्वात् लुकि कृते विभक्त्यभावादेक विभक्तौ परतो विधीयमान एकशेषो न प्राप्नोति प्रसज्य लक्षणं च नास्ति न लुमताङ्गस्येति प्रतिषेधात् प्राति
पदिकैकशेषपक्षे समर्थयत् ख्या प्रातिपदिकं तस्मात्तद्धिताः सुबंता इति कृते परत्वात् तद्धिते कृतायां वैरूप्यादेकशेषाप्रसंगः यदा तु सहविवक्षायां विभक्त्यंतानामे
कशेषः सुबंताच्च तद्धित इत्ययं पक्षस्तदा सुबंतसमुदायात्तद्धिताभावात्पूर्वमेकशेषः पश्चात्तद्धित इति न कश्चिद्दोषः॥ प्रातिपदिकानां चेति न नैमित्तिकत्वादेत

सर्वत्राप्सादिषूपसंख्यानं सर्वेषु पक्षेषु अप्सादिषूपसंख्यानं कर्तव्यं भिक्षाणां समूहो भैक्षमिति सर्वत्रेत्युच्यते प्रातिपदिकानां चै
कशेषे सिद्धं अप्सादिषु त्विष्यते बहुवचनाप्सादयः गर्गस्यापत्यं बहवो गर्गाः एका प्रकृतिर्बहवश्च यञः अप्सारूप्यादेकशेषो न प्रा
प्नोति न तु चयथैव बहवो यञः॥ ॥

=इदानीं सर्वत्रेत्यस्यार्थकथनं पितुमपक्षार्थत्वपक्षत्रयेपि इत्याह अप्सादिष्विति ५=

रंगत्वात् पूर्वमेकशेषः पश्चाद्वृद्धिरपवात तद्धित एव पश्चात् उस घत इति भावः बहवश्च यञ इति प्रसर्थे शब्दनिवेशात् बहुषु पक्षेषु बहवो यञ उत्पाद्याः तत्र गर्ग
यय यय इति स्थिते समुदायस्य तद्धितांतत्वात् प्रातिपदिकत्वात् तत एका विभक्तिस्तत्र प्रथममपयशब्दस्य प्रकृतिसंनिपातलक्षणत्वे रूपमिसेकशेषो न प्राप्नोति न
नु प्रकृतिं विहाय यय शब्दानां सारूप्यादेकशेषो विधास्यते नैतदस्ति विभक्त्युत्पत्तावभ्यंतरीकृता प्रकृतिर्विभक्तिलक्षितसारूप्याश्रये एकशेषे कथं हानुप्रा
प्यते न च यञः प्रकृत्यर्थानपेक्षः समुदायार्थः तत्कथं प्रकृतिवर्जित पदापि सहविवक्षायां विभक्त्यंतानामेकशेषः इति पक्षः तदा गर्गयञस्य यञस्य यञ स इति
स्थिते पूर्वस्य यञस्य शब्दस्य प्रकृतिसन्निपातादैरूप्यं प्रातिपदिकैकशेषपक्षेपि तथैव वैरूप्यमिसेकशेषो न प्राप्नोति॥ ॥

पां२

भा० कै० प्र०
२२८
228

एवं प्रकृतयोपीति । एकैकस्याप्यस्य प्रकृत्यर्थेन योगात् प्रधानभेदे च गुणानामभावस्या गार्ग्यशब्दानामेवैकशेषः क्रियत इत्यर्थः । यञ्यो बहुष्विति यदा यञन्ते
वैकशेषः क्रियते तदा शिष्यमाणो यञ्प्रत्ययो बहुषु वर्त्तत इति लुक् सिध्यति गार्ग्यशब्दानां त्वेकशेषे यञ्प्रत्ययो बहुषु न वर्त्तते किं तर्हि यञ्शब्दान्त इति लुङ् न सिध्यति । य
ञन्तं यदिति । तेनैव चेत्कृतं बहुत्वमिस्य पितृद्वन्द्वे नेति व्याख्यायते । काश्यपा इति एकस्मिन् काश्यपापत्ये ॰ण्लौकिकेन तत्र अति कृति बहुत्वे काश्यपशब्दानामेकशेषे कृते त्व

एवं प्रकृतयोपि बह्व्यः स्युः । नैवं शक्यमिह हि दोषः स्यात् गर्गा वत्सा विदा उर्वा इति । यञ्यो बहुषु यञ्यो बहुष्वित्युच्यमानो लुङ् न प्राप्नोति मा भूदेवं य
ञन्तं यद्बहुषु यञन्तं यद्बहुष्विति एवं भविष्यति ननु चोक्तं नैवं शक्यमिह हि दोषः स्यात् काश्यपप्रतिकृतयः काश्यपा इति नैष दोषः लौकिकस्य
तत्र गोत्रस्य ग्रहणं न चैतल्लौकिकं गोत्रं अथवा पुनरस्तु एका प्रकृतिर्बह्वर्थस्य यञः ननु चोक्तं असरूपादेकशेषो न प्राप्नोतीति इ
दं तु समानार्थानामेकशेषवचनात् सिद्धमेवं तत् कथं समानार्थानामेकशेषो भवतीति वक्तव्यं यदि समानार्थानामेकशेष उच्यते कथ
मक्षाः पादा माषा इति नानार्थानामपि सरूपाणां नानार्थानामपि सरूपाणामेकशेषो वक्तव्यः एकार्थानामपि विरूपाणामेकार्थो
नामपि विरूपाणामेकशेषो वक्तव्यः वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डौ कुटिलदण्डाविति वा ॥ ॥ ॥

ञन्तं बहुषु वर्त्तत इति लुक्प्रसङ्गः । लौकिकस्येति । अपत्यस्येत्यर्थः । न चैतदिति । प्रतिकृतिहि जीवत्वाभावेन तदञन्तमपत्यवाचि । एका प्रकृतिरिति । प्रकृत्यर्थस्यै
कत्वात् तेन न च बहूनामप्यपत्यानां संबन्धसंभवात् सिद्धमिति । सरूपप्रकृतिसंनिपाते कृते एकस्यैव रूपस्य सर्वेषां प्रकृत्यर्थे विशिष्टापत्याभिधायित्वात् स
मानार्थत्वमस्ति वक्रदण्डश्चेति द्वन्द्वनिवृत्त्यर्थमेतद्वक्तव्यं तेनैवाञ्यो बहुषु सिद्धपि पक्षे आश्रीयमाणे इष्टं सिध्यति परात्वञन्ते बहुषु सा आश्रीयते तदा व्यक्तिन्यायाश्रय
उश्च कुटिलदण्ड ॥ णात् वक्रदण्डश्च कुटिलदण्डश्चेति वाक्यमेव भवति न तु द्वन्द्व इति न वक्तव्यो विरूपाणामेकार्थानामेकशेषः ॥ ॥

कि

एम०
२२८

स्वरभिन्नानामिति॥ स्वरेणाभिन्नानामित्यर्थः। अक्षश्चेति। एको क्षशब्दः शेर्देवन इति समस्यांतत्वादंगोदात्तः। द्वितीयस्तु घञन्तत्वादाद्युदात्तस्तस्यैव शेषो भवति एको मीमांसकशब्दः एवुलन्तत्वान्मध्योदात्तः परस्तु मीमांसामधीते क्रमादिभ्यो वुन्निसाद्युदात्तस्तस्य शेषः। एकश्चेति द्वंद्वोप्यत्रानभिधानान्न भवति। अर्थासंप्रत्यायादिति पत्रे क शब्दो नेकमर्थमभिधातुं शक्नोतीति तत्रैकशेषो नास्ति अप्रयुक्तानामन्वाख्यानात्‌ एकाविति चोक्ते सहापादिरर्थो गम्यते न तु द्वावित्यर्थः। अ

स्वरभिन्नानांयस्योत्तरस्वरविधिः स्वरभिन्नानां यस्योत्तरस्वरविधिस्तस्यैकशेषो वक्तव्यः। अक्षश्च अक्षश्च अक्षौ मीमांसकश्च मीमांसकश्च मीमांसकौ इत्येकस्मान्न भवति एकश्च एकश्च द्वौ च द्वौ चेति संख्याया अर्थासंप्रत्ययादन्यपदार्थत्वाच्चानेकशेषः संख्याया अर्थासंप्रत्ययादेकशेषो न भविष्यति न ह्येकाविसनेनार्थो गम्यते अन्यपदार्थत्वाच्च संख्याया एकशेषो न भविष्यति एकश्च एकश्चेत्यस्य द्वावित्यर्थः द्वौ च द्वौ चेत्यस्य चत्वार इत्यर्थः। नैतौ स्तः परिहारौ पत्नावुच्यते संख्याया अर्थासंप्रत्ययादिति अर्थासंप्रत्ययेपि हि सत्येकशेषो भवति तद्यथा गार्ग्यश्च गार्ग्यश्च गार्ग्यौ न चोच्यते वृद्धयुवानाविति भवति चैकशेषः परमुच्यते अन्यपदार्थत्वाच्चेति अन्यपदार्थेप्येकशेषो भवति तद्यथा विंशतिश्च विंशतिश्च विंशती इति तत्पोश्चत्वारिंशदित्यर्थः॥ ॥ ॥

गार्ग्याय

न्यपदार्थत्वाच्चेति। असंदिग्धेन पदान्तरेणायमर्थः प्रत्याय्यत इत्यर्थः। गार्ग्याविति गार्ग्यश्च गार्ग्यश्चेत्यस्याप्यर्थस्य संभवात्‌ संदेहादर्थासंप्रत्ययः उत्तरकालं तु प्रकरणादिवशात्‌ संदेहनिवृत्तिः। ननु वृद्धो यूनेति वचनात्संदेहे प्येकशेषः स्यात्‌ अस्य तु निःसंदेहविषयसंभवात्कथं संदिग्धविषये प्रवृत्तिः नैतदस्ति अप्रशस्यादिष्वपि संदेहविषयेषु प्रवृत्तिदर्शनात्‌॥ ॥ ॥

=इदानीं तद्दयस्य मभिप्रेतं द्विशब्दादिरूपं दृष्टांतं दर्शयति । अथवेति । नेमे इति । घादयः । तेषामेकशेषशब्दत्वे हि तद्दृष्टांतेन नानैकशेषापादनं न तत्तेन पेतिभावः ।२= परस्परेति । एकशब्दयोः सहविवक्षायां शिष्यमाणैकशब्दस्य तदर्थाभिधानासामर्थ्याद्वैकश्चैकश्चेत्येवं तदपेक्षायुद्धैकस्मिन्न=
=र्थे द्वित्वोत्पत्तिरनंतरं तदर्थाभिधानसमर्थ द्विशब्दप्रवृत्तेस्तयोरत्वौ किंकृतविग्रहवाक्यं द्वौ च द्वौ चेतीति भावः ।२=

भा०कै०प्र०
२२९
229

एवं तर्हीति । अर्थासंप्रसयेसत्यन्यपदार्थत्वादिसंयं हेत्वर्थः । यदि तर्हीति । प्रसर्यंपक्षवृत्तिनिवेशात् एकशेषे सति एकस्यानेकार्थत्वं संभवति । यदा तु समुदायवाचित्वं द्व्या
दीनामभ्युपगम्यते तदा वचनादिवदेकवचनप्रसंगः । यत्तु वनानीति बहुवचनं न तत्समुदायप्रत्ययविवक्षायां न त्ववयवभेदविवक्षायां । समुदाया इति । समुदायवाचिन
इत्यर्थः । किं कृतमिति । एकश्चैकश्चेति विग्रहे कथं द्विशब्दः प्रवर्त्तत इति प्रश्नः । अन्योन्यकृतमिति । परस्परापेक्षयाद्वित्वोत्पत्तौ सत्यां प्रक्रियावाक्यमिदं भवति
द्वौ च द्वौ चेति । तत्रैको द्विशब्दः क्रियते मातेति यथा सुतजन्मनः प्राक् तत्कुमारव्यपदेशं स्त्री पश्चाल्लभते एवं संख्येयांतरापेक्षायां सत्यां पूर्वमप्रवृत्तो द्विशब्दः

एवं तर्हि नेमौ पृथक्परिहारौ एकः परिहारोऽयं संख्याया अर्थासंप्रसपादन्यपदार्थत्वाच्चेति । यत्र ह्यर्थासंप्रसयः एव वा अन्यपदार्थे तेन वा भवति तत्रै
कशेषः । गार्ग्यौ विंशती यथा । अथवा नेमे एकशेषशब्दाः । यदि तर्हि नेमे एकशेषशब्दाः समुदायशब्दास्तर्हि भवंति तत्र को दोषः । एकवचनं प्राप्नोति
एकार्था हि समुदाया भवंति पृथक्शतं वनमिति । सं तु तर्ह्येकशेषशब्दाः । किं कृतं सारूप्यं । अन्योन्यकृतं सारूप्यं सति पुनः केचित् अन्येपि शब्दाः येषा

=महनिनिमित्तं-२=

मन्योन्यकृतो भावः संति । लाहमाता पिता भ्रातेति । विषम उपन्यासः । सकृदेते शब्दाः प्रवृत्ता अपायेष्वपि वर्त्तंते इह पुनरेके नाप्यपायेन भवंति च
ता इति । अन्यदिदानीमेतदुच्यते सकृदेते शब्दाः प्रवृत्ता अपायेष्वपि वर्त्तंते इति यत्तु भवानस्मान् चोदयति संति पुनः केचिदन्येपि शब्दा ये षाम
न्योन्यकृतो भाव इति तत्रैते स्वाभिरूपन्यस्ताः तत्रैतद्भवानाह सकृदेते शब्दाः प्रवृत्ता अपायेष्वपि वर्त्तंत इति ॥ ॥

पश्चात्प्रवर्त्तत इत्यर्थः । अपायेष्वपीति । पुत्रविनाशेपि पितृव्यपदेशो न निवर्त्तते पितृविनाशे पुत्रव्यपदेशश्च तुल्यत्वे कापायेनास्ति चतुः प्रभृतेः प्रवृत्तिः । अन्यदि
दानीमिति । अवयवसाधर्म्ये सति वैधर्म्यत्व । भाव्यं अन्यथा तत्समेव सात् न तु साधर्म्यं तत्रैव धर्मो द्वावनेन कश्चिदपि हेतुः स्यादित्यर्थः । मातृ आदयः शब्दाः संबंधं
तरापेक्षयैकस्मिन्नाश्रये वर्त्तंत इति संबंधं तरविनाशेपि प्राश्रयसद्भावात् युक्तं यत्प्रवर्त्तंते द्व्यादयस्तु समुदायनिवेशिन एकापायेतत्समुदायाभावात्कथं प्रवर्त्तेरन् ॥

=आश्रयसद्भावोत्रबीजः । तेन न प्रतामातेति कथमिति न चोदनीयं ।१= दृष्टांतव्याप्तिरयं विषयस्य देतोस्तत्संबंधिदिशिष्टस्पदार्थांतिकेपक्षे भावाद्धेतुत्वं न स्यादित्यर्थः ।२=

एप्र०
२२९

एतच्च वार्त्तमिति ॥ एतद्युक्तं यदाश्रयसंनिधानादेकापाये पिमात्रादयस्तदपेक्षाः प्रवर्त्तन्ते तदसत्यम् ॥ इदानीमेतद्वैधर्म्यरहितं द्वितीयं दृष्टान्तं वक्ति । एकैक इति यथा घटादीनां परस्परं संनिधिकृतं कर्तृत्वमेकैकापाये च निवर्त्तते तथा द्यादिष्वपदे शेषोपीत्यर्थः ॥ कथं तत्रेति । न्याय्यमित्यध्याहारः । एकैक इति । परस्परनिरपेक्ष इत्यर्थः कारणमुद्यमनं चेदिति कर्तृत्वप्रतीताविलर्थः कार्यं कस्मिंस्तान्द्रष्टा नामेवमुक्तं । तत्तुल्यमिति तेनोद्यन्त्रा तुल्यं द्वितीयमुद्यन्तारमन्तरेणेत्यर्थः ॥ अथवा तत्तुल्यमिति द्यादिष्वपदेशेपि तेन तुल्यमित्यर्थः प्रथमेति एकस्मिन्पुरुषे क्रियायामेकत्वात्स एकशेषः पुरुषभेदेन तु प्रत्यक्तः परात्कादिभेदविरोधात्क्रियान्तरेण एकत्वादेकशेषो वक्तव्यः हन्तेचे

एतद्वार्त्तं एकैकोनोद्यन्तुमारम्भकोति यत्कथं तत्र एकैकः कर्त्ता स्यात्सर्वे वा स्युः कथं युक्तं कारणमुद्यमनं चेन्नोद्यच्छति चान्तरेण तत्तुल्यं तस्मात्स्यात् एकैकः कर्त्तारः सव्यपेक्षास्तु प्रथममध्यमोत्तमानामेकशेषोऽसरूपत्वात् प्रथममध्यमोत्तमानामेकशेषो वक्तव्यः पचति च पचसि च पचथः पचसि च पचामि पचावः पचति च पचसि च पचामि च पचामः किं पुनः कारणं न सिध्यति असरूपत्वात् द्विवचनबहुवचनाप्रसिद्धिरेकार्थत्वात् द्विवचनबहुवचनयोश्चाप्रसिद्धिः किं कारणमेकार्थत्वादेकोपमवशिष्यते तेनानेनतदर्थे न भवितव्यं किमर्थे न पदर्थ एकः किमर्थं एकः एक एकपदार्थः नैकार्थ्यं । नायमेकार्थः किं तर्हि द्व्यर्थो बह्वर्थश्च नैकार्थ्यमिति चेदारम्भानर्थक्यं नैकार्थ्यमिति चेदेकशेषारम्भोनर्थकः स्यात् इह

कशेषप्रकरणादिवशादर्थविशेषावसायः परानुपुष्कादसदीएवानेकार्थाभिधानसमर्थे [illegible] इति पक्षः अन्त्रापि च निवृत्तमेषाया एव क्रियाया आख्यातेनाभिधानं तदेकशेषो न वक्तव्यः द्विवचनेति प्रसत्यर्थे शब्दनिवेशे एकैकं शब्दः एकैकार्थाभिधायीति सहविवक्षायां निवृत्तेषु शब्दान्तरेषु शिष्यमाणे न शब्देनस्वस्मिन्नेवैकत्वार्थे अवस्थेयमिति भावः ॥ सर्वेषु पक्षेषु यं दोषः प्रातिपदिके एकशेषे द्विवचनबहुवचनानुत्पत्तिप्रसंगः विभक्त्युत्पत्तौ वा विभक्तौ वा परत्व एकशेषे ऽर्थाभावात् द्विवचनबहुवचनयोर्निवृत्तिप्रसंगः अथ स्वभावतः शिष्यमाणो ऽनेकार्थः किमेकशेषेण ॥ ॥ ॥

भा॰कै॰प्र॰
२३०
२३०

वाचनिकी चेतिं यद्यपि सर्वमेव स्वाभाविकं तथापि यत्र प्रयोगविप्रयोगौ दृश्येते तत्र विप्रयोगनिवारणाय यदुच्यते तद्वाचनिकमभिधीयते॥ स च द्व्यर्थ इति सरू-
पाणामेकशेषोऽनेकार्थश्चैकविभक्ताविति वक्तव्यमित्यर्थः सिद्धमिति॥ एकशेषारंभसामर्थ्यादयमर्थोऽवगम्यते शिष्यमाणः शब्दोऽनेकार्थाभिधायीति एकेन
द्यनेकार्थोऽभिधानायैकशेषः क्रियते एकार्थाभिधानेऽनेकशब्दाप्रसंगात् न चैक एकशेषः स्यादित्यर्थः॥ इतर एतत्सामर्थ्यमजानन्नाह कथमिति नच्चे

वाचनिकी वा तद्यदि तावत्स्वाभाविकी ऽशिष्य एकशेष एकेनोक्तत्वात् ऽशिष्य एकशेषः किं कारणमेकेनोक्तत्वात्तस्यार्थस्य द्वितीयस्य प्रयोगेण न भवितव्य
मुक्तार्थानामप्रयोग इति ऽथ वाचनिकी तद्वक्तव्यमेकोपमं वशिष्यते॥ स च द्व्यर्थोऽभवति बह्वर्थश्चेति न वक्तव्यं सिद्धमेकशेष इत्येवं कथं पुनरेकोऽयमवशिष्यत इ
सनेन द्व्यर्थता बह्वर्थता च शक्या लब्धुं तच्चैकशेषकृतं न स्यं तरेण तद्वाचिनः शब्दस्य प्रयोगं तस्यार्थस्य गतिर्भवति प्रथमश्च पुनरंतरेणापि तद्वाचिनः शब्दस्य
प्रयोगं तस्यार्थस्य गतिर्भवतीति कृतमनेन प्रेनात्र अन्तरेणापि तद्वाचिनः शब्दस्य प्रयोगं तस्यार्थस्य गतिर्भवतीति एवमिहाप्येकशेषकृतमेतत् येनात्रैकोप
मवशिष्यत इ सनेन द्व्यर्थतां च भवति उच्यते न तर्हि न तु गमयेत् तयोर्हि गामश्वं इति ब्रूयादश्वं वा गौरिति न ज्ञानुषि संप्रत्ययः स्यात् तेनानेकार्थाभिधा
[चैकार्थता]
नेय त्वं कुर्वेतावश्यं लोकः पृष्टतोऽनुगंतव्यः केष्वर्थेषु लौकिकाः कान् शब्दान् प्रयुंजत इति लोके चैकस्मिन् वृक्ष इति प्रयुंजते द्वयोर्वृक्षौ बहुषु वृक्षा इति॥
×अग्निचित्सोमसुदिति यथा॰ नेमन्यामहे लोप×२

कशेषकृतमिति एकशेषविधानेनैतत्प्रतिपादितमित्यर्थः॥ लोपकृतमिति लोपद्वारेणैतत्संगृहीतमित्यर्थः॥ ऽनेनेति एकशेषविधानेन उच्यते नेति वचनादनेकार्थ
कार्याणि प्रवर्त्तंतां यथा जातस्याख्यायामेकस्मिन्निति नत्वेकार्थः शब्द एकशेषविधानेनानेकार्थः संपद्यत इत्यर्थः गामश्वमिति अश्वधर्मसमारोपः केवलं प्रतीयते न
९तु तात्विकमश्वत्वमित्यर्थः॥ ॥श्री॰॥

एम॰
२३०

=तर्हि द्वन्द्वस्य वार्थेनयाव्याख्यानेमानं दर्शयति सर्वार्थं पद इति इत्यनेनादित्यं वाघदित नीलादेरन्यमतमतिपादनपरत्वे तत्संबद्धत्वापत्तिरिति भावः १=

परितर्हीति यदि चत्वोक्तः प्रमाणामित्यर्थः उच्येत तर्ही सतः प्रसंगतिस्तु वौयं च एकशेषप्रसारव्यानवादिनः तदपि प्रत्यर्थमेवेति अर्थाद्यभिधेयमुच्यते पञ्च द्व्यर्थः शब्दोनासौ
द्व्यर्थता जहातिबद्धूर्थस्त्ववद्धूर्थतां रोदसी द्यावा इतियथेत्यर्थः यावतामिति वृक्षश्च वृक्षश्चेति दर्शनादनारब्ध एकशेषे अनेकार्थे नैकस्य नस्यात् एकेनापीति सह विवक्षाया

परितर्हि त्वोकोवयं शास्त्रेषु प्रमाणं किमर्थमेकशेष आरभ्यते अथ किमर्थं लोप आरभ्यते प्रत्ययलक्षणमाचार्यः प्रार्थयमानो लोपमारभते एकशे
षारंभे पुनरस्य न किं प्रयोजनमस्ति न तु चोक्तं प्रत्यर्थशब्दनिवेशान्नैकेनानेकस्याभिधानमिति यदि चैकेनानेकस्याभिधानं स्यात् न प्रत्यर्थं शब्दनिवेशः कृ
तः स्यात् प्रत्यर्थं शब्दनिवेशान्नैकेनानेकस्याभिधानाद प्रत्यर्थमिति चेत् तदपि प्रत्यर्थमेव प्रत्यर्थं शब्दनिवेशान्नैकेनानेकस्याभिधानात् अप्रत्यर्थमि
ति चेत् एवमुच्यते पदप्येकेनानेकस्याभिधानं भवति तदपि प्रत्यर्थमेव पदपि त्वयार्थं वर्थौ प्रतितदपि प्रत्यर्थमेव पदपि त्वयार्थान् र्थान्प्रतितदपि प्रत्य
र्थमेव यावतामभिधानं ता [illegible] वतां प्रयोगेन्याय्यः यावतामर्थानामभिधानं भवति तावतां शब्दानां प्रयोग इ सेव पक्षो न्याय्यः यावतामभि
धानं तावतां प्रयोगेन्याय्य इति चेदेकेनाप्यनेकस्याभिधानं यावतामभिधानं तावतां प्रयोगो न्याय्य इति चेदेवमुच्यते एषोपि पक्षो न्याय्य एव पदप्येके
नानेकस्याभिधानं भवति यदि तर्ह्येकेनानेकस्याभिधानं भवति लक्षन्यग्रोधौ एकेनोक्तत्वादपरस्य प्रयोगोनुपपन्नः एकेनोक्तत्वात्तस्यार्थस्यापरस्य प्र
योगेण न भवितव्यं किं कारणमुक्तार्थानामप्रयोग इति एकेनोक्तत्वादपरस्य प्रयोगोनुपपन्न इति चेदनुक्तत्वात्प्लक्षेण न्यग्रोधस्य न्यग्रोधप्रयोगः एकेनोक्त
त्वादपरस्य प्रयोगोनुपपन्न इति चेदनुक्तः प्लक्षेण न्यग्रोधार्थ इति कृत्वा न्यग्रोध शब्दः प्रयुज्यते कथमनुक्तः परिहानीमेवोक्तमेकेनाप्यनेकस्याभिधानं
भवतीति सरूपाणामेकेनाप्यनेकस्याभिधानं भवति न पुनर्विरूपाणां किं कारणं अभिधानस्वाभाव्यात् अभिधानं पुनः स्वाभाविकं स्वाभाविकमभिधाने ॥

मेकएवप्लक्षशब्द उद्भूतावयवभेदं समुदायमभिधत्त इत्यर्थः प्लक्षन्यग्रोधाविति अत्रापि सहविवक्षायां समुदायार्थे प्रादुर्भावादेकेनैव समुदायस्य प्रतिपादनात् द्वितीयस्य प्रयो
गोनप्राप्नोतीत्यर्थः अनुक्तत्वादिति प्लक्षाविशुक्तेप्लक्षस्य प्लक्षान्तरेणासहत्वं गम्यते न तु न्यग्रोधेनेत्यर्थः ॥ ॥ ॥

उभयदर्शनाच्चेति सरूपस्य विरूपस्य चैकस्यानेकार्थाभिधायित्वदर्शनादित्यर्थः । द्यावेति । द्योशब्देन द्यावापृथिव्योरभिधानात् ततः परस्यौकारस्य सुपां सुलुगित्याकारः गोतो
णिदित्यौकारांतग्रहणात् णित्वाद्वृद्धिः एवादेशश्च । पृथिवी इति द्विवचनं तत्वाछंदसीति पूर्वसवर्णदीर्घः पृथिवीशब्देनात्र दिवस्पृथिव्योरभिधानं विरूपाणामिति प्रकरण
दिवशाद्यत्रार्थविशेषावसायस्तत्र प्रवृत्तिनिमित्तभेदेपि विरूपोऽनेकार्थाभिधायी दृश्यते तत्र सरूपः कथं न स्यात् यत्रैकं प्रवृत्तिनिमित्तमित्यर्थः तदेवं द्रव्याभिधा
नपक्षेपि प्रसाख्यात एकशेषः अनेकार्थप्रक्रमेऽनेकार्थ एक एव वृक्षशब्दः प्रयुज्यते न तु द्वंद्वः अनभिधानात् इदानीमाकृतिपक्षाश्रयेण प्रसाख्यानं करो

उभयदर्शनाच्च उभयं खल्वपि दृश्यते विरूपाणामप्येकेनानेकस्याभिधानं भवति तद्यथा द्यावा क्षामा द्यावाचिदस्मै पृथिवी नमेते इति विरूपाणां
किल नाम एकेनानेक[illegible]स्याभिधानं स्यात् किं पुनः सरूपाणां अर्थाकृत्यभिधानाद्वैकं विभक्तौ वाजप्यायनः आकृत्यभिधानादेकं शब्दं विभ
क्तौ वाजप्यायन आचार्यो न्याय्यं मन्यते एका आकृतिः सा चाभिधीयत इति कथं पुनर्ज्ञायते एका आकृतिः साभिधीयत इति प्रख्याविशेषात् न
हि गौरित्युक्ते विशेषः प्रख्यायते शुक्ला नीला कपिला कपोतिकेति यद्यपि तावत्प्रख्याविशेषान्नज्ञायते एका आकृतिरिति कुतस्त्वेतत्साभिधीयते
इति ॥ ॥

ति [illegible] आकृत्यभिधानादिति । जातिः पदार्थः तस्याश्चैकत्वादनेकशब्दप्रयोगप्रसंग एव नास्तीति किमेकशेषेणेत्यर्थः कथं पु
नरिति द्रव्यातिरेकेणाकृतेरनुपलंभादभावेमन्यमानस्य प्रश्नः प्रख्याविशेषादिति ॥ प्रख्याबुद्धिः तस्या अविशेषादेकरूपत्वात्तद्विषयस्याप्येकत्वं प्रतीयते गुणप्रमाणा
दिभिन्नेष्वपि पिंडेषु गौर्गौरित्येकाकारप्रत्ययोदयाद्व्यक्तिमेकेनालंबनेन सामान्येन भाव्यमिति जातिसद्भावएकत्वं चावसीयते गौरित्युक्त इति गौरित्येतेन शब्देनो
क्ते प्रसाधिते सामान्यलक्षणोऽर्थे विशेषानवधारणादेकं सामान्यस्यावसीयत इत्यर्थः । कुतस्त्वेतदिति भवतु सामान्यमेकं तस्य तु वाहदोहादिकायामर्थक्रियायाम
॥ योग्यत्वात् द्रव्यस्यैव योग्यत्वात् अभिधानं न्याय्यमिति मत्वा प्रश्नः ॥

अव्यपवर्गगतेष्वपीति। अव्यपवर्गोऽभेदः अविच्छेदः अविशेषप्रसङ्गतिः प्रतीतिरित्यर्थः। जातौ चाभिधीयमानायां द्रव्यद्वारको व्यवहारो ह्यादयत उपपद्यते जातितद्वतोस्त्वभेदो
पचनात् गौः शुक्ल इति सामानाधिकरण्यव्यवहारोऽप्युपपद्यते। अथ प्रख्याविशेषाद्व्यपवर्गगतेष्वपीति किमर्थमुभयोरुपादानं एकेनापि हेतुनैकत्वाभिधानयोः सिद्धत्वात्
नैष दोषः अनभिधीयमानापि जातिः सन्निधिमात्रेण प्रख्याविशेषे निमित्तं भवतीति प्रख्याविशेषेणाप्रत्यभिज्ञाप्रत्ययरूपेणैकत्वमेव प्रतिपादितं नाभिधानं
तथा न मितिः सर्वविशेषाभ्यन्तरीकरणेनाव्यपवर्गगता व्यपि प्रख्याया अविशेषो नास्ति भिन्नदृष्टान्तं च नवा द्वनमितिप्रत्ययस्य एकोपदिष्टमिति। एकस्मिन्नु
पदिष्टं गौरयं तत्पापप्रदानमस्पृश्य इत्यादि वस्तु अथ चैकमुपदिष्टं यस्य तदेकोपदिष्टं सकृदुपदिष्टं गोत्वादि सर्वत्र ज्ञापतत्र इत्यर्थः। उपोद्बलकमिति उद्बलं

अव्यपवर्गगतेष्वा॥ अव्यपवर्गगतेष्वपि मन्यामहे आकृतिरभिधीयत इति न हि गौरित्युक्ते व्यपवर्गो गम्यते शुक्ला नीला कपिला कपोतिकेति ज्ञापते चैको
पदिष्टं ज्ञायते खल्वप्येकोपदिष्टं गोरस्य कदाचिदुपदिष्टो भवति सतमन्यस्मिन्देशेऽन्यस्मिन्काले अन्यसंस्थां च वयोवस्थायां दृष्ट्वा जानाति अयं गौरिति कः पुन
रस्य विशेषः प्रख्याविशेषादित्यतः तस्यैवोपोद्बलकमेतत् प्रख्याविशेषात् ज्ञापते चैकोपदिष्टमिति धर्मशास्त्रं च तथा एवं च कृत्वा धर्मशास्त्रं प्रवृत्तं ब्रा
ह्मणो न हन्तव्यः सुरा न पेयेति ब्राह्मणमात्रं न हन्यते सुरामात्रं च न पीयते परिद्धश्च परार्थः स्यात्॥ २० ॥

प्रत्यक्षं तत्पूर्वकत्वादनुमानस्य उद्बलस्य समीपमनुमानमित्यर्थः प्रख्याविशेषादिति न प्रत्यक्षं जात्यालम्बनं प्रमाणमुपन्यस्तं ततो विप्रतिपन्नप्रतिपादनानु
मानमिह जातिसद्भावे ज्ञापते चैकोपदिष्टमित्यनेनोक्तं देशकालावस्थापिण्डान्तरेष्ववाधितप्रत्यभिज्ञाप्रत्ययोऽन्यथानुपपत्त्या सामान्यसद्भावोऽनुमीयते इत्यर्थः
अथ वा बलमुद्दीपयत्युपोद्बलकमुपबृंहकमुच्यते धर्मशास्त्रं च तथेति अनेनैतद्दर्शयति न सादृश्ये कार्यक्रियाकारित्वादिनिमित्ता भ्रान्ता प्रत्यभिज्ञा
सर्वत्रेति यावत् किं तर्हि अभिन्नविषयनिमित्तास्मृतिकारणामप्यविगीतप्रमाणभावस्मृतोपनिबद्धवचनानां [illegible] जात्याश्रयेण सर्वव्यवहारप्रवर्तनादि
त्यर्थः॥

=प्रयोगस्तु विमतः प्रत्ययो जातिविषयो देशादिभेदेप्यबाधितैकाकारप्रत्ययत्वात् संमतवदिति ३= =प्रत्यभिज्ञाप्रमाणं शाब्दसामुपलभ्यमेतत् ४=

भा० कै० प्र०
२३२
232

एकं ब्राह्मणमिति । एकस्यैव द्रव्यस्य ब्राह्मणशब्दवाच्यत्वादिति भावः । तस्येति । अपवर्गगतिरभ्यंतास्तिकारणमपि तथैव व्यवहारदर्शनादित्यर्थः । नचैकमनेकस्थं कथं भवति । नहि देवदत्तो युगपत् मधुरायां स्रुघ्ने च भवतीत्यत आह । अस्ति चेति । अवयवी यथानेकावयवस्थः तथापि तत्तज्जातिविशिष्टानां सौदृश्यं तल्लेनोपात्तं । इत्येकबुद्धिविषय इति । एकस्याप्यनेक इति वाक्यशेषः । शरद्घा उर्णावेगपी भावेरुतेवृतिः प्रत्ययः सर्वत्रेति सर्वेषु यागेषु द्रव्यत्वरंगतां प्रतिपद्यत इत्यर्थः । ए

एकं ब्राह्मणमहत्वा एकां च सुरामपीत्वान्यत्र कामचारः स्यात् कः पुनरत्र विशेषः अपवर्गगते प्रत्येतस्तः तस्यैवोपोद्बलकमेतत् अपवर्गगतेष्वधर्मशास्त्रं चतथेति । अस्ति चैकमनेकाधिकरणस्थं युगपत् अस्ति खल्वप्येकमनेकाधिकरणस्थं युगपदुपलभ्यते अस्तीसाह किं आदित्यः तद्यथा एक आदित्योनेकाधिकरणस्थो युगपदुपलभ्यते । विषम उपन्यासः नैको द्रष्टा आदित्यमनेकाधिकरणस्थं युगपदुपलभते एवं तर्हि इन्द्रवद्विषयः तद्यथा एक इन्द्रोनेकस्मिन् क्रतुशते आहूतो युगपत् सर्वत्र भवति एवमाकृतिर्युगपत् सर्वत्र भविष्यति । अवश्यं चैतदेवं विज्ञेयमेकमनेकाधिकरणस्थं युगपदुपलभ्यत इति नैकमनेकाधिकरणस्थं युगपदिति चेत्प्रत्येकशेषो हि मन्यते नैकमनेकाधिकरणस्थं युगपदुपलभ्यत इति एकशेषेतस्य दोषः स्यात् एकशेषेपि नैको वृक्षशब्दोनेकमर्थं युगपदभिदधीत अवश्यं चैतदेवं विज्ञेयमाकृतिरभिधीयत इति द्रव्याभिधाने ह्याकृत्यसंप्रत्ययः द्रव्याभिधाने सत्याकृतेरसंप्रत्ययः स्यात् तत्र को दोषः । तत्रासर्वद्रव्यगतिः तत्रासर्वद्रव्यगतिः प्राप्नोति असर्वद्रव्यगतौ को दोषः गौरनुबन्ध्यो जोग्नीषोमीय इति एकः शास्त्रोक्तं कुर्वीत अपरोशास्त्रोक्तं अशास्त्रोक्तं च क्रियमाणे विगुणं कर्म कृतं पेपीति । यद्येकस्यानेकसंबंधो नाभ्युपगम्यते तदैकः शब्दोनेकं अर्थं संबंधाभावान्न प्रत्याययेदित्यर्थः ॥ उक्तमेवार्थं समर्थयितुमाह द्रव्याभिधाने हीति । श्रुतिविहितानां सर्वव्यवहाराणामप्रवृत्तिः स्यादित्यर्थः ॥ ॥ ॥

राम०
२३२

ननु चेति ॥ सर्वविषया चेदाकृतिश्चोद्यते तदा सर्वव्यक्तिविषयमनुष्ठानं विना वैगुण्यमेव स्यादित्यर्थः अथानुष्ठानसिध्यै एकद्रव्यविषयमेव कर्मेति क्रियते तत्रा-
प्युच्यते एकाकृतिरिति चेति चशब्दस्तु पादस्य पूरणार्थो वा यत्तया समुच्चये वा सचेदानीमिति एकत्वे जातेरेकशब्दप्रवृत्तेः सिद्धत्वादेकशेषारंभः प्रत्याख्या-
येत अनेकत्वे तु द्रव्यस्यैवैकशेष इत्यर्थः । एवं तर्हीति सर्वाभिर्व्यक्तिभिः संबंधस्य तुल्यत्वात् सर्वत्रैवाभिन्नबुद्ध्युत्पादनात् प्रत्येकं परिसमाप्तत्वादे-
कस्मिन्नपि द्रव्ये तत्कर्म क्रियमाणं जातोक्तमेव भवतीत्यर्थः यथादित्य इति प्रतिदेशं यथा सर्वैस्तत्रादित्य उपलभ्यते तथा जातिरपीत्यर्थः । ननु चेति द्र-

ननु च यस्याप्याकृतिः पदार्थः तस्यापि यद्यनवयवेन चोद्यते न चानुबध्यते विगुणं कर्म भवति विगुणे च कर्मणि फलानवाप्तिः एका-
आकृतिरिति च प्रतिज्ञा हीयेत यच्चास्य पक्षस्योपादाने प्रयोजनं एकशेषो न वक्तव्य इति स चेदानीं वक्तव्यो भवति एवं तर्ह्यनवयवे-
न चोद्यते प्रत्येकं च परिसमाप्यते यथा आदित्यः ननु च यस्यापि द्रव्यं पदार्थः तस्याप्यनवयवेन चोद्यते प्रत्येकं च समाप्यते एक-
शेषस्तु यावत्कृत्यः तस्यापि तर्हि द्विवचनबहुवचनानि साध्यानि चोदनायां चैकस्य ॥ परि ॥

द्येऽपि पदार्थे जातेरनभिधेयाया उपलक्षणत्वेनाश्रयणात्पीतिस्त्वमेदं द्रव्यमात्रं विशिष्टजातिपुंक्तशब्देनोच्यते प्रत्येकं च परिसमाप्यत इति ॥ शास्त्रमिस्य व्याह-
रः ॥ अथवा जातिरुपलक्षणभूता प्रत्येकं परिसमाप्यत इति व्याख्येयं । एकशेषस्त्वियेति जात्युपलक्षितस्य द्रव्यस्य शब्देनाभिधाने तस्याभिधेयानेकत्वे शब्दत्वप्रसंगादित्य-
र्थः । तथापीति जातेरेकत्वात् द्वित्वबहुत्वनिबंधनानि द्विवचनबहुवचनानि न सिध्यन्तीति भावः । एवं भाष्यकारेण पक्षयोः साम्यं दर्शितं ॥ वाक्यकारस्तु जातिप-
क्षाश्रयणस्य प्रयोजनानि समुच्चयेनाचष्टे चोदनायां चैकस्येति सामान्यस्याग्रपादैः २२ ॥ तेनैकत्वे ॥

=जात्युपलक्षितस्य द्रव्यस्यानुगतत्वात्सर्वभिन्नत्वात् क्रियते ... एकगोत्वावच्छिन्नत्वं ...

उपाधिवृत्तेरिति॥ अष्टाकपालत्वादिरुपाधिः। तस्य वृत्तिः प्रवृत्तिः एतदुक्तं भवति॥ यदि आग्नेयादिशब्देन सामान्यमभिधीयते तदा तेनाशेषद्रव्याणामाक्षेपात् प्रति द्रव्यमष्टाकपालत्वमुपाधिर्युज्यते। इष्येत तु पदार्थे एकेनैव यजमानेन सकृदेवाष्टाकपालः पुरोडाशो निरूप्येत नान्येन नाप्यन्यदेत्यर्थः। कः पुनरित्यादिगौरनूबन्ध्य इत्यात्ग्नेयमष्टाकपालमित्यादि विधानयोरित्यर्थः। एकानिर्देशेनेति निष्पन्नो हि पशुर्यागसाधनायोपादीयते अप्रयाणिर्वेशेनेति आग्नेयोऽष्टाकपालः चोदनयैवोत्पाद्यते न तु चोदनायाः पूर्वं निष्पन्न इत्यर्थः। तत्र निर्देशेन भेदाग्रहणात् द्रव्यांतरेऽपि प्रवृत्तिः स्यान्न तु निर्वेशे सा दृष्टपाग्रहणादित्यपाश्रयणीया जातिः द्रव्याभिधान

उपाधिवृत्तेः चोदनायां चैकस्योपाधिवृत्तेर्मन्यामहे आकृतिरभिधीयते इति आग्नेयमष्टाकपालं निर्वपेत् एकं निरूप्य द्वितीयश्चेन्निरूप्यते यदि द्रव्यं पदार्थः स्यादेकं निरूप्य द्वितीयस्य तृतीयस्य च निर्वपणं न प्रकल्प्येत कः पुनरेतयोर्जातिचोदनयोर्विशेषः एकानिर्देशेन अपशुनिर्वेशे न द्रव्याभिधानं व्यादिः द्रव्याभिधानं व्याडिराचार्यो न्यायं मन्यते द्रव्यमभिधीयत इति तथा च लिंगवचनसिद्धिः। एवं च कृत्वा लिंगवचनानि सिद्धानि भवंति ब्राह्मणी ब्राह्मणौ ब्राह्मणा इति चोदनासु च तस्यारंभात् चोदनासु च तस्यारंभात् मन्यामहे द्रव्यमभिधीयत इति गौरनुबंध्यो जो अग्नीषोमीय इति आकृतौ चोदितायां द्रव्ये आरंभणालंभनप्रोक्षणविशसनादीनि क्रियंते न चैकमनेकाधिकरणस्थं युगपत् न खल्वप्येकमनेकाधिकरणस्थं युगपदुपलभ्यते न ह्येको देवदत्तो युगपत् स्रुघ्ने भवति मथुरायां च विनाशे प्रादुर्भावे च सर्वं तथा स्यात् किं विनश्येच्च प्रादु

मिति जाते द्वित्रिविकल्पाक्षमत्वेनाभावं मन्यमानो व्याडिर्द्रव्यमेव शब्देनाभिधीयत इति मन्यते आकृतौ चोदितायामिति आकृतिवादिपक्षे शब्देनाकृतिश्चोद्यते द्रव्ये तु कार्यं प्रवर्त्तते अयुक्तं चैतत् न ह्यन्यचोदनेनान्यस्य कार्ये क्रियमाणे यथोक्तं कृतं भवति तस्मात् द्रव्यमेव शब्देनोच्यत इति न्याय्यं न चैकमिति न च हेतुरहितेनादित्यदृष्टांतेन साध्यसिद्धिर्भवति देवदत्तदृष्टांतेन विपर्ययस्यापि साधनात् स्यादेतत् इति अभिव्यंजकविनाशे जातेस्तिरोभावात् पिंडांतरेऽप्येवेति प्रसंगो न स्यात् शतं प्रत्यय इवैकापाय इत्यर्थः। यद्वा अपाश्रयापाये आश्रितस्याप्यपायः अवयवापाये अपि च इवेति जातेर्विनाशप्रसंग इत्यर्थः॥ =आतिर्व्यंजकत्वं यावदभ्योर्नप्रसेकत्रितयाश्रिताह॥२॥

आकृतौ चोदितायामिति कार्यसंबंधित्वेन चोदितायामित्यर्थः। न च एषघटस्तेनव्यावेष्ट अयुक्तं चैतदिति ३= आप्य आरंभणं द्रव्यस्य संपादनं ६= आकृतिवादे इत्यनंतरमाह न चैकमिति ६= नचेति अनेकव्यक्तिस्थस्याकृतिर्न च ...

प्र०
२३३

=अन्यथा गोत्वस्य व्यासज्यवृत्तित्वात् आश्रयस्याप्रत्यक्षत्वे अप्रत्यक्षत्वं स्यात्॥१= नापातीति। उत्पन्नगविमत्वं नरादायातीति न शक्यं वक्तुं तस्यानिःक्रियत्वात्। प्रागाश्रयाभावाच्च न चनासीत्। अत्र हेतुरस्ति पश्चादिति। यतः पश्चाद् देवास्ततः पूर्वं नासीदित्यर्थः। एतेन माया=
=सीन्नापूर्वं न तत्र गोत्वमिति पराश्रस्त। ननु सक्रियत्वमंगीकृत्यांशेन न त्यक्ष्यति इत्यत आह। नचांशवदिति। निरवयवत्वेनांशाभावादित्यर्थः। ननु पूर्वाधारं सत्कार्ये वायातीत्यत आह। जहातीति। पूर्वं चापि प्रतीतेः। तस्मात् सर्वगेति वाच्यं तत्तत्र सर्वत्र दृश्येते साह।

गोर्जातइति जाते नगो पिंडे नगोत्वमभिव्यक्तं तच्च सर्वोश्रय वर्तीति एकगो पिंडप्रत्यक्षत्वे सर्वगोपिंडप्रत्यक्षत्वप्रसंगः अनवकाशमिति पदार्थोत्तरप्रत्ययस्यावकाशाभावा त्। अथवा सर्ववस्तुव्यापि गोत्वमेष्टव्यं अन्यथा नायाति न चतत्रासीदस्ति पश्चात्तचांशवत् जहाति पूर्वं नाधारमहो व्यसनसंततिरिति दोषापत्तिः। ततश्च अन्येष्वेव कत्र सा व्याः भेदात्सर्वगा यदि जातिर्दृश्येत सर्वत्रेति सर्वेषु पदार्थेषु गोप्रत्ययप्रसंगः। अस्ति च वैरूप्यमिति। तस्मात् द्रव्यमेवास्तु न तु सामान्यं नत्वेकस्य भेदाभेदौ विरुद्धौ उप पद्येते इत्यर्थः। एकार्थक्रियाकारित्वादिनिमित्तस्तु प्रत्यभिज्ञाप्रत्ययं गौर्गौरिति। भेदाधिष्ठानः समुच्चयः सामान्यस्यैकत्वाभिधेयत्वयोरन्यथासिद्धिरित्यर्थः। आकृताव

गोर्जातइति सर्वगामूर्तमनवकाशं स्यात्। अस्ति च वैरूप्यं। अस्ति खल्वपि वैरूप्यं गौश्च गौश्च खंडो मुंड इति। तथा च विग्रहः एवं च कृत्वा वि ग्रह उपपन्नो भवति गौश्च गौश्चेति। अर्थेषु च मुक्तसंशयं। अर्थेषु च मुक्तसंशयं भवति। आकृतावपि पदार्थे एकशेषो वक्तव्यः। अ क्षाः पादा माषा इति। लिंगवचनसिद्धिर्गुणस्यानित्यत्वात्। लिंगवचनानि सिद्धानि भवंति कुतः गुणस्यानित्यत्वात्। अनित्या गुण ॥ उपायिनो अपायिनश्च किं पुनरेते शुक्लादयः ॥

=अथ वैश्यादिनोक्तदोषापरिहरति। सर्वेति। पश्चात्मनां सर्वगतत्वे विकल्पविच्छेदरेकस्यैव दृश्यत इति।२=

=आद्यकारयोक्तदीयादोषस्तु जातेः भत्वेकं परिसमाप्तं गीका॥

पीति यदर्थे आकृतिपक्षपरिग्रहः तदेव नास्ति ध्वति नहि शक्रराक्षदेवानां आदिष्वेकाकृतिसद्भावः इदानीमाकृतिवादी दोषान् परीहर्तुमाह। लिंगेति। आकृतिसद्भावः पूर्वमेव प्रत्यक्षानुमानागमप्रवृत्तिभिः प्रतिपादितः सर्वगतत्वेपि पदार्थो नो विचित्रशक्तियोगात् कश्चित् स्वार्थः कांचिदेवाकृतिमभिव्यनक्ति न तु सर्वा सर्वैः गुण श्चात्र द्वित्वस्त्रीत्वादयो विवक्षिताः तेषां आकृतेरेकार्थसमवायलक्षणः संबंध इत्याकृतावपि पदार्थे लिंगसंख्यासिद्धिरित्यर्थः। अनित्या इति। कदाचित्स्त्रीत्व युक्तेन पिंडेनाकृतिर्व्यज्यते कदाचित्पुंस्त्वयुक्तेन कदाचिदेकाधारस्या प्रतिपद्यते कदाचिदनेकाधारस्येत्यर्थः। किंपुनरेते इति। ते हि गुणत्वेन प्रसिद्धा न च तदनित्यत्वं लिंगवचनसिद्धौ हेतुरुपपद्यत इति प्रश्नः॥

=प्रकृत्यर्थसमानाधिकृतत्वेएकवचनमित्यादिदर्शनपोदिता देरस्मिन्पक्षेवाकार्थः।२=

प्रकरणादर्थनिश्चय इत्याह नेत्याहेति । वचनपरिहारस्त्विति । लिंगपरिहारे न कश्चिद्दुष्यति वचनपरिहारे त्वभिधीयमाने एकाकृतिरिति प्रतिज्ञाहानिः द्वित्वबहुत्वसंबंधस्या
प्यभ्युपगमात् । द्विवचनबहुवचनवदनेकशब्दत्वमपि स्यात् नोतीत्येकशेषोपि वक्तव्य इत्यर्थः । गुणाविवक्षा नित्यत्वादिति । स्वतन्त्राया आकृतेरेकत्वं द्रव्यगतं द्वित्वबहुत्वविवक्षा
यां तु द्विवचनबहुवचने भवतः । आश्रयधर्मैराश्रितानां व्यपदेशः यथा संपन्नो यवो व्रीहिः संपन्ना इति संपत्तिविनाशाभ्यां द्रव्यगताभ्यां जातिर्व्यपदिश्यते तथा लिंग

नेत्याह स्त्रीपुंनपुंसकानि सत्त्वगुणाः एकत्वद्वित्वबहुत्वानि च कदाचिदाकृतिरेकत्वेन युज्यते कदाचिद्द्वित्वेन कदाचिद्बहुत्वेन कदाचित्स्त्रीत्वेन कदा
चित्पुंस्त्वेन कदाचिन्नपुंसकत्वेन भवेल्लिंगपरिहार उपपन्नः वचनपरिहारस्तु नोपपद्यते यदि हि कदाचिदाकृतिरेकत्वेन युज्यते कदाचि द्वित्वेन कदाचि
द्बहुत्वेन एका आकृतिरिति च प्रतिज्ञा हीयेत यच्चास्य पक्षस्योपादाने प्रयोजनमुक्तमेकशेषो न वक्तव्य इति स च इदानीं वक्तव्यो भवति एवं तर्हि
लिंगवचनसिद्धिर्गुणाविवक्षा नित्यत्वात् लिंगवचनानि सिद्धानि भवंति कुतः गुणाविवक्षाया अनित्यत्वात् अनित्या गुणाविवक्षा कदाचि
दाकृतिरेकत्वेन विवक्षिता भवति कदाचित् द्वित्वेन कदाचिद्बहुत्वेन कदाचित्पुंस्त्वेन कदाचित्स्त्रीत्वेन कदाचिन्नपुंसकत्वेन भवेल्लिंगपरिहार उपपन्नः
वचनपरिहारस्तु नोपपद्यते यदि कदाचिदाकृतिरेकत्वेन विवक्षिता भवति कदाचित् द्वित्वेन कदाचिद्बहुत्वेन एका आकृतिरिति च प्रतिज्ञा हीयेत य
च्चास्य पक्षस्योपादाने प्रयोजनमुक्तमेकशेषो न वक्तव्य इति स चेदानीं वक्तव्यो भवति लिंगपरिहारस्त्वपि नोपपद्यते किं कारणं आविष्टलिंगा जाति
र्यल्लिंगमुपादाय प्रवर्त्तते उत्पत्तिप्रभृत्याविनाशान्न तल्लिंगं जहाति तस्मान्न वैयाकरणैः शक्यं ॥

संख्याभ्यामपीत्यर्थः भवेदिति । अभ्युपगमे विरोधाभावात् वचनपरिहारस्त्वभ्युपगमं विहाय द्वित्वबहुत्वयोगेऽभ्युपगते एकत्वहानादनेकशब्दत्वप्रसंगाच्चेत्यर्थः । लिंगप
रिहारस्त्वपीति । विशेषणानां चाजातेरित्यत्रोक्तमाविष्टलिंगा जातिरिति तत्त्वस्यैकमेवाश्रयगतं लिंगमुपादत्ते सर्वदा जातिः यथा ग्राम्यपशुजातयः स्त्रीत्वमेवोपाद
दते गावः इति अन्यास्तु पुंस्त्वमेव ब्राह्मणा इमे इतियर्थेत्यर्थः तस्मादिति सिद्धान्तवादी युक्तं पक्षमाश्रयति ॥ ॥

=ब्राह्मणीर्दार्यान्यथेपसादौ लिंगांतरेणपुंस्त्वादिसंबंधोनस्यात्.१=अन्यथहस्तकुमापित्वादिति.निर्दमकस्यात्मनःशक्ष्याबाध्यत्वादंतःकरणतादात्म्यापन्नस्यैवतुबाध्यत्वात्मत्वादंतःकरणगतस्तनुमापितमात्मनइत्सर्थः।तदुक्तंहरिणा.अचेतनेषुसंक्रांतंचैतन्यमिवदृश्यते.भाति

भगं

लौकिकमिति स्तनकेशादिसंबंधरूसर्थः। तस्मिन्नाश्रीयमाणेलिंगांतरेणासंबंधोनस्यात् तस्मात्त्वसिद्धांतव्यवस्थाश्रीयते गुणानां सत्त्वरजस्तमःपरिणामरूपाणांशब्दादीनां वृद्धिक्रम ध्यस्थावस्थाः शब्दैकगोचराः लिंगत्वेनपरिगृह्यंते आत्मनस्त्वपरिणामिरूपत्वादप्रवृत्तिधर्मत्वेप्यन्यसंबंधसनुष्यापित्वाद्धिंगयोगः वाचनिकानीतिसंकीर्णप्रयोगोपलं

=इतिक्रमममध्यावस्थाःप्रदत्तयः१=

लौकिकंलिंगमास्थातुंअत्रवृश्चंकश्चित्स्वकृतांतत्रास्थेयः कोसौस्वकृतांतः संस्त्यानप्रसवौलिंगंसंस्त्यानप्रसवौलिंगमास्थेयौकिमिदंसंस्त्यानप्रसवावितिसंस्त्याने स्त्यायतेड्ट्स्त्रीसूतेःसप्प्रसवेपुमान् ननुचलोकेपिस्त्यायतेरेवस्त्रीसूतेश्चपुमान् अधिकरणसाधनोलोकेस्त्रीस्त्यापसस्यांगर्भइतिकर्तृसाधनश्चपुमानिति इहपुनरुभयंभावसाधनंस्त्यानंप्रवृत्तिश्च कस्यपुनस्त्यानंस्त्रीप्रवृत्तिर्वापुमान् गुणानांकेषांशब्दस्पर्शरूपरसगंधानांसर्वाश्चपुनर्मूर्तयएवमात्मिकाःसंस्त्यानप्रसवगुणाःशब्दस्पर्शरूपरसगंधवत्यःपत्राल्पीयांसोगुणाःतत्रावरतस्त्रयःशब्दःस्पर्शोरूपमितिरसगंधौनसर्वत्रप्रवृत्तिःखल्वपिनित्यानहीहकश्चिदपिस्वस्मिन्नात्मनिमुहूर्तमप्यवतिष्ठते वर्धतेयावदनेनवर्धितव्यमपचयेनवायुज्यतेतच्चोभयंसर्वत्रपद्युभयंसर्वत्रकुतोव्यवस्थाविवक्षातःसंस्त्यानविवक्षायांस्त्रीप्रसवविवक्षायांपुमान् उभयोरप्यविवक्षायांनपुंसकंतत्रलिंगवचनसिद्धिर्गुणाविवक्षानित्यत्वादितिलिंगपरिहारउपपन्नःवचनपरिहारस्तुनोपपद्यतेवचनपरिहारश्चाप्युपपन्नःइदंतावदयंप्रष्टव्यःअपयमप्रक्ष्यपदार्थःकथंतस्यएकवचनद्विवचनबहुवचनानिभवंतीतिएवंसवक्ष्यतिएकस्मिन्नेकवचनंद्वयोर्द्विवचनंबहुषुबहुवचनमितिपदितस्यापिवाचनिकानिनस्वाभाविकानिअहमप्येवंवक्ष्यामिएकस्मिन्नेकवचनंद्वयोर्द्विवचनंबहुषुबहुवचनं॥ ॥

मौंतअसंकरार्थोयदाद्रव्यपदार्थिकस्यवाचनिकोवचननियमः॥तदाकृतिवादिनोपिसत्येवंव्याचष्टे एकाश्रयसंबंधविवक्षायामाकृतेरेकवचनंयथापशुनायजेतेति

१अनेकाश्रयसंबंधविवक्षायांद्विवचनबहुवचने॥ ॥

=गौर्गौर्दवालाइत्यादावेकस्मिन्नपिद्विवचनबहुवचनयोर्दर्शनादित्सर्थः१=असंकरार्थइति.अवयवादिगतमवयविन्यारोप्यमाणांद्वित्वंबहुत्वंबाद्विवचनबहुवचनयोरसौनिमित्तमाश्रित्यासंकरार्थइत्सर्थः१=

भा०कै०प्र०

२३५

२३५

ननु द्रव्यस्यानभिधेयत्वात्कथं तत्कृत आकृतेर्वचनोपकार इत्याह नहीति तत्र यथा पचति पचतः पचन्तीति क्रियाप्राधान्येपि साधनसंख्याकृतो वचनभेदः एवमाकृतिप्राधा न्येपि द्रव्यसंख्याकृत इत्यदोषः॥ पदसावितिं जातितद्वतोरभेदाध्यवसायात् द्रव्यात्मा जातिः प्रतीयमानात्तद्गतलिंगसंख्याग्राहिणी स्यात् चोदना सु चतस्रा रंभादि

नत्याकृतिपदार्थिकस्य द्रव्यं न पदार्थः द्रव्यपदार्थिकस्य वा आकृतिर्न पदार्थः उभयोरुभयं पदार्थः कस्यचित्प्रधानभूतं किंचिद्गु णभूतं आकृतिपदार्थिकस्य आकृतिः प्रधानभूता द्रव्यं गुणभूतं द्रव्यपदार्थिकस्य द्रव्यं प्रधानभूतमाकृतिर्गुणभूता गुणवचनवद्वा गुणवच नवद्वा लिंगवचनानि भविष्यन्ति तद्यथा गुणवचनानां शब्दानामाश्रयतो लिंगवचनानि भवन्ति शुक्लं वस्त्रं शुक्ला शाटी शुक्लः कंबलः शुक्लौ कंबलौ शुक्लाः कंबला इति यदसौ द्रव्यं श्रितो भवति गुणस्तस्य यल्लिंगं वचनं च तद्गुणस्यापि भवति एवमिहापि य दसौ द्रव्यं श्रिता आकृतिस्तस्य यल्लिंगं वचनं च तदाकृतेरपि भविष्यति अधिकरणगतिः साहचर्यात् आकृतावारंभणादीनां सं भवो नास्तीति कृत्वा आकृतिसहचरिते द्रव्ये आरंभणादीनि भविष्यन्ति॰ न चैकमनेकाधिकरणस्थं युगपदादित्यवद्विषयः॥ न खल्वप्येक मनेकाधिकरणस्थं युगपदुपलभ्यत इत्यादित्यवद्विषयो भविष्यति॰ तद्यथा॰ एक आदित्यो नेकाधिकरणस्थो युगपदुपलभ्यते॰ विषम उपन्यासः॥ नैको द्रष्टानेकाधिकरणस्थमादित्यं युगपदुपलभते॰ एवं तर्हीन्द्रवद्विषयः॥ तद्यथैक इन्द्रो नेकस्मिन्क्रतुशत आहूतो युगपत्स

र्वत्र भवति एवमाकृतिर्युगपत्सर्वत्र भविष्यति

ति पदुक्तं तत्परिहारार्थमाह अधिकरणगतिरिति यथाग्निरानीयतामिति सुक्ते केवलस्याग्नेरानयनासंभवात् नान्तरीयकत्वाद चोदितमपि पात्रमानीय ते एवमेव वाक्येनानयनं यत्पात्रस्य स्यात्तथा आकृतावारंभणादीनि चोद्यमानानि सामर्थ्यात्साहचर्यात् द्रव्यमभिनिविशन्ते सर्व एवाकृतेः क्रियायोगोन

एम०

२३५

=यथेन्नैकमित्यादिना नानेकत्वसाधक स्य मन्यसभिज्ञाहेतुकस्यादित्यदृष्टान्तकानुमानस्यानेकत्वसाध्यकेन युगपद्देशएयवृत्तेनानुपलभ्यमानत्वहेतुकेन देवदत्तदृष्टान्तकानुमानेन सत्प्रतिपक्षितत्वे [illegible] नपि पुनरादित्यदृष्टान्तोपन्यासे नस्याय माणयः॥ लाघवानुग्राहिकत्वमस्य=

=भिज्ञानाभावाभ्यां मित्यकल्पनयानेकत्वकल्पने गौरवान्सत्प्रतिपक्षितत्वमिति॰ तत्र द्वयमिति॰ विषम उपन्यास इति॰ नैक इति॰ एतेन प्रत्यभिज्ञाहेतुकानुमानस्यैकद्रष्टृकानेकाधिकरणैक युगपदुपलंभाभावरूपोपाधियुक्तत्वादेवदत्तदृष्टान्तकानुमानेनानेकत्वकल्प

अनाश्रितत्वादिति । यथा गुणानां द्रव्याधीनस्थितित्वादाश्रितत्वं नैवमाकृतेः । अन्यापि प्रत्ययाभिधानयोराकृतिनिमित्तयोर्भावान्निमित्तत्वं तस्या इत्यर्थः । इतरः
संबंधमात्रमाश्रितत्वमत्वाप्त्छति । किमुच्यत इति । अनेकात्म्यादिति । पूर्वोक्त एवार्थो विशिष्यानेन प्रतिपाद्यते नित्या आकृतिरेका सर्वत्रगा तद्विपरीतं द्रव्य-
मिति भेदात् द्रव्यविनाशेपि न जातेर्विनाशः । गुणानां तु द्रव्याधीनस्थितित्वस्तन्नित्वादाश्रयनाशे वृश्चनाश इति न तैर्व्यभिचारः वृक्षस्थो वितान इति । यथा
वृक्षस्योपरि द्राक्षादिलतावितानः स्थितो न वृक्षविनाशमनुविनश्यति तथा जातिरपीत्यर्थः । वैरूप्यविग्रहादिति । द्रव्याणां स्वगतभेदमपि बद्धे वै

अविनाशो

नाश्रितत्वात् द्रव्यविनाशे आकृतेरविनाशः कुतः अनाश्रितत्वात् अनाश्रिता आकृतिर्द्रव्यं किमुच्यते अनाश्रितत्वादिति परिहरन्नीमे वो-
क्ते अधिकरणगतिः साहचर्यादिति । एवं तर्हि अविनाशो नैकात्म्यात् द्रव्यविनाशे आकृतेरविनाशः कुतः अनेकात्म्यात् अनेका आत्मा
आकृतेर्द्रव्यस्य चैतद्यथा वृक्षस्थो वितानो वृक्षे छिन्नेपि न विनश्यति वैरूप्यविग्रहो व्यभेदात् वैरूप्यविग्रहाव पि द्रव्यभेदाद्विच्छतः य-
र्थेषु च सामान्यात्सिद्धं विभिन्नार्थेषु च सामान्यात्सिद्धं सर्वत्र अस्योत रुक्षः पद्यते पादः मिमीतेः माषः तत्र क्रियासामान्यात्सिद्धं । अपरस्त्वा-
ह पुराकल्प एतदासीत् षोडशमाषाः कार्षापणं षोडशपणाश्च माषसंबद्धः तत्र ॥ ॥ ॥

रूप्यविग्रहाविसर्थेः तत्र द्रव्यगतभेदोपचारादे कस्यामप्याकृतौ समुच्चयोपपत्ताविग्रहो न विरुध्यते । क्रियासामान्यादिति । भिन्नासु क्रियासु अभिन्नप्रत्ययाभिधान
निमित्तं पत्सामान्यं तदेव द्रव्येष्वपि तन्निमित्तं भवति यथा याचक इत्याश्रयांतरगतमपि हि सामान्यं समवेतसमवायात् द्रव्ये उपकरोति । यथा गैरिकादिगतं लोहितत्वं संयु-
क्तसमवायात्पटे लोहितप्रत्ययमादधाति । पुराकल्प इति । पुराकल्पे प्रसिद्धोर्थः संप्रति निमित्ताभावेपि तथैव व्यपदिश्यते । माषसं वद्ध इति । तत्र षोडशभागत्वे
न माषः प्रसिद्धः तथैव कार्षापणो माषः षोडशभाग इति षोडशत्वं नाम सामान्यमुपादय माषशब्द इति सिद्धमेकशब्दत्वं ॥ ॥

=ननु क्रियाणामनेकत्वात्कथं तासां सामान्यत्वमत आह भिन्नास्विति ॥=

=तत्र षोडशेति माषाणां संबंध इति विग्रहे संबंधवद्धो माषः षोडशभागत्वेन प्रसिद्धः षोडशभावः कार्षापणमित्यत्र षोडशभागस्येव माषत्वात् एवं च कार्षापणषोडशभागे ...

संख्यासामान्यादिति संख्यैव सामान्यमभिन्नप्रत्ययहेतुत्वात्। ननु षोडशसंख्या षोडशसु पदार्थेषु व्यासज्य स्थिता न त्वेकस्मिन् षोडशे। एवं तर्हि षोडशसंख्यापूरणत्वं ना-
मय सामान्यं तत्संख्यामूलत्वात्संख्यासामान्यमुच्यत इत्यदोषः। अथ यदित्थाद्यभिन्नेषु संज्ञिष्वेकाकृतियोगात् कथमेकशब्दवाच्यत्वं। उच्यते। अभिन्नडित्थशब्दगतं डित्थशब्दत्वं ना-
म यथा शब्देष्वभिन्नप्रत्ययाभिधानहेतुः तथा सोयमिति शब्दार्थयोरभेदाध्यवसायादध्यस्त डित्थशब्देषु संज्ञिष्वपि संबंधिसंबंधादभिन्नप्रत्ययाभिधाननिमित्तमिति सि-
द्धमेकशब्दवाच्यत्वं तथा तावित्येतावितिच परोक्षत्वप्रत्यक्षत्वादिकं सामान्यमाश्रयणीयं। गोत्वाश्वत्वे सामान्ये इति व्यावृत्तेष्वनुवृत्तप्रत्ययहेतुसामान्यानामपि सामान्य-

संख्यासामान्यात्सिद्धं। वृद्धोप्रनात तल्लक्षणश्चेदेव विशेषः। इह कस्मान्न भवति। अजश्च बर्करश्च अश्वश्च किशोरश्च उष्ट्रश्च करभश्चेति।
तल्लक्षणश्चेदेव विशेष इत्युच्यते नचात्र तल्लक्षण एव विशेषः। तल्लक्षण एव विशेषोपत्यसमानायामाकृतौ शब्दभेदः ॥ ॥

अनुगतः स संबंधोपाधिरपि सामान्यमेवानाश्रीयत इति भावः। कार्योन्नीयमाना हीति। ननु तस्यैकशब्दत्वरूपकार्येण गोत्वाश्वत्वेऽश्वत्वे ... सामान्यत्वमेकमात्रं ... उपाधिरूपमंगीकार्यमिति पूर्वस्मात् ... भेद इति भावः। निरूपाख्यत्वं विशिष्य निर्वक्तु

माश्रयितव्यम्। अथ वा निःसामान्यानि सामान्यानीति तार्किकदर्शनं न वैयाकरणैर्नियोगत आस्थेयं कार्योन्नीयमाना हि तेषां पदार्था इति सामान्येष्वपि सामा-
न्यमस्ति अभावाश्चत्वार इत्यत्रापि निःरूपाख्यत्वं सामान्यं कल्पनीयं। तदेवं सर्वत्राकृतिसद्भावात्सिद्धमेकशब्दत्वं। वृद्धो इह कस्मादिति। उभयगतिरिह शास्त्रे संभवतीति
निमित्तात्प्रश्नः। अथ वा वृद्धशब्द इह शास्त्रे अपत्यविशेषेण परिभाषित इति सता वृद्धयो वाचीगत्यते तस्मात्कचर्याच्च युवशब्दोपि तथैवेति प्रश्नः। अजोष्ट्राश्वशब्दानां
जातिशब्दत्वेप्यन्तरशब्दान्तरसंनिधानात् वृद्धावस्थाभिधायित्वं दृष्टं। अन्यथा सामान्यविशेषशब्दानां द्वन्द्वो न स्यात्। सामान्यशब्देन सर्वविशेषाणामाक्षेपात् विशे-
षैः सह समुच्चयाभावात्। वक्ष्यमाणं मनसि कृत्वाह तल्लक्षणश्चेदिति। इतरोऽगृहीताभिप्राय आह तल्लक्षण इति। परिहारस्तु वक्ष्यते॥ २९ ॥

स्त्रीपुंवच्च इदमिति॥ प्रतिस्त्रीशब्दस्य स्त्रीत्वं प्रतिज्ञायते तस्याश्चाधिकारविहितटाबादिप्रत्ययग्रहणं ततश्चायमर्थः पुंवत् स्त्रीप्रत्ययो न भवतीत्यभावातिदेशः क्रि
यते स्त्रीत्वाभावे तु शब्दग्रहणमर्थग्रहणं वा तत्र शब्दग्रहणपक्षे स्त्रीशब्दस्य पुंशब्दस्येव रूपं भवतीति स्त्रीत्वमनिवृत्तमेव अर्थग्रहणपक्षे तु पुमर्थातिदेशात् तदर्थप्रति
बद्धानां कार्याणां सिद्धिः तत्रार्थस्य प्राधान्याद् उष्टत्वाच्चार्थपक्ष एवाश्रीयते अस्त्रियामितीति प्रत्ययप्रसङ्गप्रतिषेधः तदा दोषः प्रत्युदासे तु शिष्यमाणः शब्दो निवर्त्स्यमा

स्त्रीपुंवच्च॥ इदं संदिग्धेवत् स्त्रीग्रहणे पुवि चार्यते स्त्रीग्रहणे स्त्रीप्रत्ययग्रहणं वास्यात् स्त्र्यर्थग्रहणं वा स्त्रीशब्दग्रहणं वेति किं चातः यदि प्रत्ययग्र
हणं वा शब्दग्रहणं वा गार्गी च गार्ग्यायणौ च गार्ग्याः के न यशब्देन प्रयुज्यते अस्त्रियामिति हि लुगुच्यते इह वा गार्गी च गार्ग्यायणौ च गार्ग्यो न्यस्यपत
स्माच्छसो नः पुंसीति नत्वं न प्राप्नोति अथार्थग्रहणं न दोषो भवति यथा न दोषस्तथास्तु इह कस्मान्न भवति अजा च बर्करश्च वडवा च किशोरश्च
उष्ट्रा च करभश्चेति तल्लक्षणश्चेदेव विशेष इत्युच्यते न चात्र तल्लक्षण एव विशेषः तल्लक्षण एव विशेषः यत्समानायामाकृतौ शब्दभे
दः पुमान् स्त्रिया इह कस्मान्न भवति हंसश्च वरटा च चक्रश्च पक्षश्च उलिकश्च कच्छपश्च रोहिच्चेति तल्लक्षणश्चेदेव विशेष इत्युच्यते न चात्र तल्लक्षण एव
विशेषः तल्लक्षण एव विशेषः यत्समानायामाकृतौ शब्दभेदः॥ भ्रातृपुत्रौ स्वसृदुहितृभ्याम् किमर्थमिदमुच्यते न पुमान् स्त्रिया इत्येव सिद्धं न सिध्य
ति तल्लक्षणश्चेदेव विशेष इत्युच्यते न चात्र तल्लक्षण एव विशेषः तल्लक्षण एव विशेषो यत्समानायामाकृतौ शब्दभेदः एवं तर्हि सिद्धे सति
यदिमं योगं शास्ति तज्ज्ञापयत्याचार्यः पत्न्योर्भ्रात्रादिप्रकृतेष्वल्लक्षण एव विशेषः तत्रैकशेषो भवति किमेतस्य ज्ञापने प्रयोजनं हंसश्च॥१०॥

नार्थाभिधायी त्यस्ति स्त्रीसदृशोऽर्थ इति लुक् सिध्यति गर्गान्यस्यपे स्त्रीत्वस्यानिवृत्तत्वात् नायं पुंवद्भावेऽस्य उ सन्न इति नत्वं न सिध्यति भ्रातृ यत्समानायामिति एका
॥ प्रसत्वं नाम समानाकृतिरस्ति॥ ३० ॥ ॥

=ईश्वरादीनामावश्यानुकः प्रसंगे कदेशवात्तकतो मच विशेषो स्तीति न तत्रैकशेषः इत्यर्थः ॥१॥ =एकशेष इति सरूपाणामित्येकशेषस्तु न स्त्रीवाचकस्यापि विशेषापत्तेः ॥ न चेष्टापत्तिः ॥ एषा च एष चेति विग्रहे एतावितिपुंसः एकशेषाऽऽवाविति शिष्यमाणेन स्त्रीलिंगे

ऊर्द्धमिति ॥ गायत्रैकाः प्रत्ययप्रकृतिरन्यत्तु वैरूप्यं तत्रैकशेष इत्यर्थः ॥ स्वदादीनि सर्वैर्नित्यमित्येतद्वर्जेपि त्वा सर्वेत्र सरूपाणामित्यस्यानुवृत्त्या श्रयणात् यथोक्तार्थलाभः ॥ अत्रैवार्थ एतत्सूत्रं लिंगं पर्युदस्तरगम्येपि तल्लक्षणविशेषे पुमान् स्त्रियेत्येकशेषो भवति यथा गौश्चायं गौश्चेयमिति गावौ चरत इति वरटा चेति वरटौ हंसौ इत्येवं सूत्रइति पूर्वाचार्यैरुक्तत्वेनाकरणेऽपसमं तर्हि वृद्धमिति योत्रप्रभृतेरपत्यस्य वृद्धसंज्ञाकृता इदोपत्यस्त्रत्र च कृत्रिमस्य जीवतितु वंशे युवेत्यस्य ग्रहणं तत्साहचर्या

=पत्रानेति ॥ भवतीति शेनत्यादिविपरेन स्त्रीत्वपुंस्त्वकृतविशेषस्यराहित्यभावाभावरूपस्यगम्यत्वादिति भावः ॥२=

वरटा च कच्छपश्च दुलीच कूर्मश्चेति अत्रैकशेषो न भवति श्वदेयोर्योगयो भूयादन्यरिहारः ॥ यावद्ध्यात गोत्रं यूनेतिता वृद्धो यूनेति पूर्वसूत्रे गोत्रस्य वृद्धमिति संज्ञा क्रियते ॥ असरूपाणां युवस्थविरस्त्रीपुंसानां विशेषस्याविवक्षितत्वात् सामान्यस्य च विवक्षितत्वात् सिद्धं असरूपाणां युवस्थविरस्त्रीपुंसानां विशेषस्याविवक्षितः सामान्यं च विवक्षितं विशेषस्याविवक्षितत्वात् सामान्यस्य च विवक्षितत्वात् सरूपाणामेकशेष एकविभक्ताविसेवसिद्धं पुमान्स्त्रियेहकस्मान्न भवति ब्राह्मणवत्सा च ब्राह्मणीवत्सश्चेति ब्राह्मणवत्सा ब्राह्मणीवत्सयोर्द्विंगस्याविभक्तिपरस्य विशेषवाचकत्वादनेकशेषः ब्राह्मणवत्साब्राह्मणीवत्सयोर्लिंगस्य ॥

तद्वृद्धस्याप्यपत्यग्रहणमित्यर्थः असरूपाणामिति ॥ गगोपत्यत्वं सामान्यं वृद्धयूनोर्विवक्षितमिति सिद्धमेकशवृत्तं आरभ्यमाणेप्येकशेषे गार्ग्यौविति विशेषोनावधार्यते किं वृद्धयुवानौ प्रक्तौ तौ उत वृद्धाविति प्रकरणं घ्वपेक्षेत्तु विशेषावसाये सामान्योपक्रमेपितथेव विशेषो वसायिष्यत इतिन्यार्थ एकशेषारंभेण दृद्वोपि गार्ग्यगार्ग्यायणाविसन भिधानान्न भविष्यति स्त्रीपुंसयोरपि मृगक्षीरवज्ज्ञातिमात्रविवक्षायां ब्राह्मणविसादिप्रयोगसिद्धिः ब्राह्मणवत्सा चेति असत्र ॥ प्रकृते रूर्द्धुतंतल्लक्षणो विशेषः नचात्र कश्चिद्विशेषः स्त्रीपुंसयोरूपात्तः ॥ ॥

=तब्राह्मण इति ॥ स्त्रीत्वपुंस्त्वकृतइत्यर्थः ॥ नचात्रेति ॥ स्त्रीपुंसयोर्ब्राह्मणवत्सा ब्राह्मणीवत्सयोः कश्चित्स्त्रीत्वपुंस्त्वादिकृतो विशेषो नास्ति स्त्रीत्वपुंस्त्वकृत एव तु विशेषो वर्ततइति भावः ॥ अथवा कश्चिद्विशेषः प्रधानस्त्रीत्वपुंस्त्वकृतस्तस्य नत्वप्रधान

अविभक्तिपरस्येति एकविभक्तावित्यनुवर्त्तते ते न एकशेषनिमित्ते विभक्तौ परतः यत्र स्त्रीपुंसलक्षणो विशेषस्तत्रैकशेषः इह तु तस्याश्चातुर्वर्ण्यस्य च विभक्ताविशेषक
शेषाभावः कारिकाचेति इत्थमस्य विशेषस्य वाचकं तच्च नैकशेषनिमित्ते विभक्तौ परतोऽनन्तरमिति दोषः एतत्समाधानार्थं विचारयति कथमिति अर्थे स्त्रियाः
शब्दस्य कारकं विभक्तिपरत्वं कारिकाचेति शब्दस्त्रियाः टापा लक्षणमित्युक्तमिति सिध्यति नार्थपक्षे प्रयुक्तपर्यन्तराप्रकृतः तथाप्यधिकमित्यमस्ति न च तदर्थे स्त्री

अविभक्तिपरस्य विशेषस्य वाचकत्वादेकशेषो न भविष्यति यत्र लिंगं विभक्तिपरमेव विशेषवाचकं तत्रैकशेषो भवति नात्र लिंगं विभक्तिपरमे
व विशेषवाचकं यदि तर्हि यत्र लिंगं विभक्तिपरमेव विशेषवाचकं तत्रैकशेषो भवतीह न प्राप्नोति कारकस्य कारिका चकारकौ न ह्यत्र लिं
गं विभक्तिपरमेव विशेषवाचकं किं तर्हि इत्थमपि कथं पुनरिदं विज्ञायते शब्दो या स्त्री तल्लक्षणश्चेदेव विशेष इति आहोस्विदर्थो या स्त्री
तल्लक्षणश्चेदेव विशेष इति किं चातः यदि विज्ञायते शब्दो या स्त्री तल्लक्षणश्चेदेव विशेष इति सिद्धं कारकश्च कारिका च कारकौ इदं तु न सिध्य
ति गोमांश्च गोमती च गोमन्तौ अथ विज्ञायते अर्थो या स्त्री तल्लक्षणश्चेदेव विशेष इति सिद्धं गोमांश्च गोमती च गोमन्तौ इदं तु न सिध्य
ति कारकश्च कारिका च कारकौ उभयथापि पटुश्च पट्वी च पटू इत्येतन्न सिध्यति एवं तर्हि नैवं विज्ञायते शब्दो या स्त्री तल्लक्षणश्चेदेव विशेष
इति नाप्यर्थो या स्त्री तल्लक्षणश्चेदेव विशेष इति कथं तर्हि ॥ ३२

लक्षणमिति दोषः गोमती चेति नात्र शब्दः स्त्रिया कश्चिद्विशेषः कृतः अर्थपक्षे त्वत्र सिध्यति अर्थेनेकारस्य विशेषस्य कृतत्वात् पट्वी चेति नात्र यणादेशस्य लक्षणावा
क्ये शब्दः स्त्रीनिमित्तत्वेनोपात्तारूपताश्रयणेन यणादेशविधानात् न च तदभावे भवतस्तन्निमित्तत्वं नाप्यर्थः स्त्री यणादेशस्य निमित्तमिति दोषः ॥ ॥

भा०कै०प्र०
२३८
238

ष्या

शब्दार्थयोर्वृत्तिनाच्चयोगपद्येनोभयोर्ग्रहणं। अनियमस्त्वनेन प्रदर्श्यते तेन क्वचिच्छब्दस्त्रीकृतविशेषपरिग्रहः क्वचिदर्थस्त्रीकृतविशेषाश्रयणं। पद्वीसत्त्वच
भवतीकारोयणादेशस्य निमित्तमस्मिन्विषये तद्भावभावित्वादर्थोपि पारंपर्येण भवत्येवृत्तिनिमित्तमीत्वयणादेशयोः एवं तर्हीति। विस्पष्टं न व्यपदिशतीत्यर्थः
तत्रोपात्तस्य वायमर्थः येनात्र न भवत्येकशेषः इत्याह तदित्सनेनेति। स्त्रीपुंसयोः सहविवक्षायामेकशेषः स च प्रधानयोरेव भवतीति यत्र प्रधानस्त्रीपुंसकृतो

शब्दार्थयोर्यास्त्रीसद्भावेन च तल्लक्षणो विशेषस्स आश्रीयते एवं च कृत्वा इहापि प्राप्तिः ब्राह्मणवत्सा च ब्राह्मणीवत्सश्चेति एवं
तर्हीदमिह व्यपदेशं स्पष्टाचार्यो न व्यपदिशति किं तदित्सनुवर्त्तनेन तदित्सनेन प्रकृतौ स्त्रीपुंसौ प्रतिनिर्दिश्यते नैकौ च प्रकृतौ प्र
धानं या शब्दस्त्रीति प्रधानं यार्थे स्त्रीति। नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यां उपप्रयोगः शाकपार्थिवकुं कथं शुक्लं
शुक्लं कंबलः शुक्लं च वस्त्रं तदिदं शुक्लं ते इमे शुक्ले शुक्लश्च कंबलः शुक्ला च बृहतिका शुक्लं च वस्त्रं तदिदं शुक्लं तानीमानि शुक्लानि
निप्रधाने कार्यसंप्रसत्याच्छेषः प्रधाने कार्यसंप्रसत्याच्छेषो भविष्यति किं च प्रधानं नपुंसकं॥ ॥ ॥

विशेषस्तत्रैकशेषः इहाप्रधानकृतोपीसेकशेषाभावः नपुंसं शुक्ला च शुक्लं चेत्येकविभक्तौ विभक्त्यंतानां चैवैरूप्यादेकशेषो न प्राप्नोति शुक्लं शुक्ल शु
क्लं चेत्यत्रापि विभक्त्यंतानां सारूप्यात् एकविभक्तौ नुसरूपाणामेकशेषे पुंनपुंसकयोः पर्यायेण प्राप्नोतीति वचनमिदमेकवद्भावार्थं च प्रधाने
कार्यसंप्रसयादिति। शब्देनार्थस्याभिधानमिह कार्यं तच्च नपुंसकानपुंसकसन्निधौ नपुंसकस्यैव भविष्यतीति नार्थः सूत्रेणेत्यर्थः॥ ॥

एम०
२३८

=तथासतीनेति॰ एवंच गुणस्थितिरूपस्य नपुंसकस्य स्त्रीपुंसयोरेवांतर्भावप्रसंगात् विभागः।४= =तत्र कुक्कुटमात्रबोधोपपत्त्यादिरूपतमेवेत्यर्थः।४= नपुंसकस्यापि जन्मसमयावाद्धुयं चैव हि जायत इत्यनुपपन्नमत आह॰ यद्यपीति॰ ३=

कथमिति। यथा लोके कुक्कुटमात्रबोधे गच्छ त्वरा जागच्छतीति प्रधानं राजा प्रदिश्यते रात्रश्च प्राधान्यं तदधीनप्रवृत्तिनिवृत्तित्वादन्येषां इह तु नपुंसकस्य किंकृतं प्राधान्यमिति। स्थः

एवं हि लोके दृश्यत इति। यापि लावन्नपुंसकस्य प्राधान्यमाह। स्थितिर्नपुंसकं सा च सर्वत्र विद्यत इति स्थितिरूपत्वेन स्त्रीपुंसयोरपि विवक्षायां सिद्धो नपुंसकशब्दप्रयोगः। अनिर्ज्ञातेऽर्थ इति सामान्यरूपेण ज्ञाते स्त्रीत्वादिना तु विशेषेणानिर्ज्ञात इत्यर्थः। गुणसंदेह इति गुणाः स्त्रीत्वादयः। द्वयं चैवेति। यद्यपि नपुंसकस्य जन्म

तथापि पत्रजननासमर्थं तन्नपुंसकमिति नेह नपुंसकलक्षणं किं तर्हि शास्त्रीकगोचरत्वमेव लिंगलक्षणं तथा सति च नपुंसकं भवतीति प्रयोग उपपद्य

कथं पुनर्ज्ञायते नपुंसकं प्रधानमिति। एवं हि दृश्यते लोके अनिर्ज्ञातेऽर्थे गुणसंदेहे च नपुंसकलिंगं प्रयुज्यते किं जातमित्युच्यते। द्वयं चैव हि

जायते स्त्री वा पुमान्वा। तथा विदूरे अव्यक्तमात्ररूपं दृष्ट्वा वक्तारो भवंति महिषीरूपमिव ब्राह्मणीरूपमिव। प्रधाने कार्यसंप्रत्ययान्नपुंसकस्य

शेषो भविष्यति। इदं तर्हि प्रयोजनं एकवच्चास्यान्यतरस्यामिति वक्ष्यामीति एतदपि नास्ति प्रयोजनं आकृतिवाचित्वादेकवचनं आकृति

वाचित्वादेकवचनं भविष्यति पदा द्रव्याभिधानं तदा द्विवचनबहुवचने भविष्यतः। भ्रातृपुत्रौ स्वसृदुहितृभ्यां॥ ॥

तेमहिषीरूपमिति। रूपशब्दः संस्थानवचनः। यत्र इदानीं दृश्यमाने वस्तुनि निश्चयो नास्ति केवलं संभावनारूपः संदेहस्तत्रैकस्यापि शब्दस्य प्रयोगो भवति स्थाणुर

यं स्यादिति। एवमिहापि महिषीवैतत्संस्थानमित्यस्मिन्नर्थे महिषीरूपमिवेति प्रयुक्तं। रूपशब्दो न नपुंसकलिंगो दृष्टांतत्वेनोपात्तः। यत्र तु विशेषस्य निर्ज्ञानं प्रयु

क्ताः शाद्यः प्रयुक्ताः कंबला इति तत्र नास्ति नपुंसकप्रयोगः। संस्थारंभे अपरार्पिरापानावि सत्त्रैव कारानुवर्त्तनेनान्महस्य तस्योपाधेरधिकारादेकशेषाभावः॥ ॥

=सत्यारंभ इ किमर्थत्व्यानपक्षेतु स्थितेरूनयत्रसमावान्नपुंसकेनैव स्त्रीनपुंसकयोरभिधानेपि महदादिविशिष्टस्यानभिधानादेकशेषप्रयोगः।१=

भा०कै०प्र०
२३९
२३९

पित्रा किमर्थमिति। वृत्तिविषये भ्रात्रादिशब्दानां स्वस्रादिशब्दैः पित्रसाधितद्भु एकशेष इति मत्वा प्रश्नः कारणादिति निमित्तं च प्रवृत्तिनिमित्तं भ्रातृशब्दस्य स्वसृशब्दस्य चेति भ्रातृशब्देन न स्वसुरभिधानं प्राप्नोति एकशेषविषयमिति आरब्धे एकशेषे यथा भ्रातृशब्देन स्वसाभिधेया अन्यथैकशेषारंभो नर्थकः स्यात् एवमनारब्धेप्येक

पिता मात्रा श्वशुरः श्वश्र्वा किमर्थमिदमुच्यते न पुमान्स्त्रिया सेव सिद्धं भ्रातृपुत्रपितृश्वशुराणां कारणात्तद्व्येशवृत्तिवेशः भ्रातृपुत्रपितृश्वशुराणां कारणात् द्व्येशवृत्तिवेशो भवति भ्रातृपुत्रपितृश्वशुराणां कारणात् द्व्येशवृत्तिवेश इति चेत् तुल्यकारणत्वात्सिद्धं यदि तावद्विभजतीति भ्राता स्वसाप्येतद्भवति तथा यदि पुनातीति प्रीणातीति वा पुत्रः दुहितापि तद्भवति तथा यदि पातीति पा ल पतीति वा पिता माताप्येतद्भवति तथा श्वा प्रत्ययः श्वशुरः श्वश्रूमप्येतद्भवति दर्शनं वै हेतुः नहि स्वसरि भ्रातृशब्दो दृश्यते दर्शनं हेतुरिति चेत् तुल्यं दर्शनं हेतुरिति चेत्तुल्यमेतद्भवति स्वसर्यपि भ्रातृशब्दो दृश्यतां तुल्यं हि कारणं न वै एषु लोके संप्रत्ययः नहि लोके भ्राता आनीयतामित्युक्ते स्वसा आनीयते तद्विषयं चेत् तद्विषयं चैतत् द्रष्टव्यं भवति स्वसरि भ्रातृत्वं द्विविषयं एकशेषविषयं युक्तं पुनर्यन्नियतविषयाणामशब्दाः स्युः बाढं युक्तं अन्यत्रापि तद्विषय दर्शनात् अन्यत्रापि नियतविषयाः शब्दा दृश्यन्ते तद्यथा समाने रक्ते वर्णे गौर्लोहित इति भवति अश्वः शोण इति समाने च काले वर्णे गौः कृष्ण इति भवति अश्वो हेम इति समाने च शुक्ले वर्णे गौः श्वेत इति भवत्यश्वः कर्क इति॥

शेषे नि सत्याच्छब्दार्थस्य संबंधस्य सह विवक्षायामेव भ्रातृशब्दः स्वसुरभिधायको भविष्यति। न त्वविद्यमानसंबंधस्य शक्तिः शास्त्रेण नियम्यते अनभिधानाच्च भ्रातृपुत्रशब्दयोः स्वसृदुहितृभ्यां द्वंद्वाभावः॥ मातापितरौ श्वश्रूश्वशुरावितिद्वंद्व इष्यत एव॥ ॥ ॥

प्र०
२३९

=इष्यत एवेति। द्वमादं ... भ्रातृपुत्रशब्दयोः स्वसृदुहितृभ्यां द्वंद्वाभाव इति भावः। ८=

त्यदादीं त्यदादित इति॥ षष्ठ्या व्याश्रय इति तसिः आद्यादित्वाद्वा साचेति स्त्रीत्वे प्राप्ते पुंस्त्वं विधीयते पुंनपुंसकयोस्त्वेकशेषे शब्दपरविप्रतिषेधान्नपुंसकत्वं भवति
॥ अर्द्धं द्वन्द्वतत्पुरुषविशेषणानामिति न्यायसिद्धमिदं परवल्लिंगं द्वन्द्वतत्पुरुषयोरिति समासार्थस्य लिंगातिदेशात्तद्विशेषणस्यापि सर्वनाम्नस्तल्लिंगत्वसिद्धे

त्यदादीनि सर्वैर्नित्यं॥ त्यदादितः शेषे पुंनपुंसकतो लिंगवचनानि त्यदादितः शेषे पुंनपुंसकतो लिंगवचनानि भवंति सा च देवदत्तश्च तौ सा च कुंडे च तानि अर्द्धं द्वन्द्वतत्पुरुषविशेषणानां अर्द्धं द्वन्द्वतत्पुरुषविशेषणानामिति वक्तव्यं इह माभूत् स च कुक्कुटः सा च मयूरी कुक्कुटमयूर्यौ ते अर्द्धं पिप्पल्यास्तदर्द्धपिप्पली च सार्द्धपिप्पल्यौ ते अयमपि योगः शक्योऽवक्तुं कथं त्यदादीनां सामान्यार्थत्वात् त्यदादीनां सामान्यमर्थः आतश्च सामान्यं देवदत्तेऽपि हि स इत्येतद्भवति यज्ञदत्तेऽपि त्यदादीनां सामान्यार्थत्वात् शेषो भविष्यति इदं तर्हि प्रयोजनं परस्य शेषं वक्ष्यामीति परस्य चोभयवाचित्वात् उभयवाचि परं पूर्वं शेषदर्शनाच्च पूर्वस्य खल्वपि शेषो दृश्यते स च यश्च तावानय यावानय इदं तर्हि प्रयोजनं द्वन्द्वो माभूदिति एतदपि नास्ति प्रयोजनं सामान्यविशेषवाचिनोश्च द्वन्द्वाभावात् सिद्धं सामान्यविशेषवाचिनोश्च द्वन्द्वो न भवतीति वक्तव्यं यदि सामान्यविशेषवाचिनोर्द्वन्द्वो न भवतीत्युच्यते शूद्राभीरं गोबलीवर्दं तृणोलपमि
ति न सिध्यति नैष दोषः इह तावच्छूद्राभीरमिति॥ ॥ ॥

त्वात् सामान्यमर्थ इति॥ वस्तुमात्रं त्यदादिभिः परामृश्यत इति तदेवैषामर्थः परस्येति सहेत्युक्तौ शब्दपरविप्रतिषेधः शक्यते आश्रयितुं पूर्वशेषदर्शनाच्चेति सनिलारं
भे पूर्वशेषो न स्यादिति दोषप्रसंगः द्वन्द्व इति तदेवदत्तावित्यादिप्रयोगो माभूदित्यर्थः॥ सति ॥ ॥

= तत्रश्चायेति-गोबलीवर्द्दमित्येत्सर्थः यद्यपि पुंसामुत्कालनाऽऽशब्देन सामान्येन स्त्रीपुंसयोरभिधायकः किंतु कदाचित्स्त्रीणामेव कदाचित्पुंसामेवेति विशेषेण तथापि बलीवर्द्दपदसमभिव्याहारात्स्त्रीगवीणामेव वाचक इति भावः ॥१=

आभीरा इति॥ ब्राह्मणाद् उग्रकन्यायामाभीरो नाम जायते माहिष्योऽथ प्रजायेते विट्शूद्राङ्गयोर्नृपादिति स्मृतिः स्त्रिय एवेति तत्रश्चा उत्तगोशब्दः स्त्रीगवीनामेव वाचकः सामान्येनेति सामान्ये सर्वे विशेषाणां व्याप्तत्वान्नास्ति सामान्यविशेषयोः समुच्चय इत्यर्थः तं ब्राह्मणमिति तमित्यनेन गतत्वाद् ब्राह्मणशब्दस्य प्रयोगो न प्राप्नोति ब्राह्मणमित्यनेन गतत्वाच्च गार्ग्यशब्दस्येति भावः भवतीति सामान्ये उपक्रमे विशेषाभिधानमित्यर्थः येनैवेति॥ यथा सामान्यविशेषयोर्विशेषणविशेष्य

आभीरराजसंततराणि गोबलीवर्द्दमिति गावउत्कालितपुंस्का वाहायचविक्रयायच स्त्रिय एव दृश्यंते तृणोलपमितिच्छपामुलपमिति नामधेयं तर्हि वक्तव्यं न वक्तव्यं सामान्येनोक्तत्वाद् विशेषस्य प्रयोगो न भविष्यति सामान्येनोक्तत्वात्तत्स्यार्थस्य विशेषस्य प्रयोगेन भवितव्यं किं कारणं उक्तार्थानामप्रयोग इति न तर्हीदानीमिदं भवति तं ब्राह्मणमानय गार्ग्यमिति भवति यदा नियोगतस्तस्यैवानयनं भवति एवं तर्हि येनैव खल्वपि हेतुना एतद्वाक्यं भवति तं ब्राह्मणमानय गार्ग्यमिति तेनैव हेतुना वृत्तिरपि प्राप्नोति तस्मात्सामान्यविशेषवाचिनोर्द्वंद्वो न भवतीति वक्तव्यं ग्राम्यपशुसंघेष्वयमपि योगः शक्यो वक्तुं कथं गाव इमाश्चरंति अजा

ः इमाश्चरंति गावउत्कालितपुंस्का वाहायचविक्रयायच ॥ ॥ ॥

भावो दृश्यते तथा विशेषसन्निधौ तद्वर्जितेषु विशेषांतरेषु सामान्यशब्दस्य वृत्तिर्दृश्यते ब्राह्मणाऽऽयाता वसिष्ठोऽप्यायात इति तस्मात्तथाविधे विषयेऽपि वाचनिको द्वंद्वनिषेधः तस्मिंश्च सत्ययमेकशेषोऽनवकाश इत्यर्थः ग्राम्य स्त्री उत्सात्मकस्य संघस्य स्त्रीशब्देनाभिधानं यथा स्यादिति ह्यारंभः उभयात्मकत्वम

ः ग्राम्यत्वाद् अयमिति॥ ॥ ॥

=स्त्रियएवेति उत्क्रालितपुंस्कानां स्त्रीगवीणां संघस्यैव आधेन वाहनदिक्रियानर्हत्वं योग्यतायाः इदि भावः॥ वाहविक्रयानर्हयोर्गवस्तु वत्सयोरपि गावः परिच्छिन्नसंख्याकाः एवेति तेषां संघत्वं अपरिच्छिन्नसंख्यानां बहूनां समुदायस्य संघपदवाच्यत्व विवक्षणात् एतौ गावौ

स्त्रियएवेति॥ यद्यपि तत्र वृषभस्यापि संभवः॥ तथापि मत्वर्थाभवत् भूयस्त्वात् स्त्रीभिर्व्यपदेशो भवति अग्राम्यादिषु तु मिश्रत्वात् संघस्येति पुमान् स्त्रियेति पुंसः शेषः अनेकशफेष्विति उष्ट्राणां खाराणां एकत्वात् स्त्रीशेषाभावः तत्रानेन प्रकरणेन प्रयोगस्य नियतत्वात् जातिः क्वचिदाश्रयलिंगेन स्त्रीत्वेन व्यपदिश्यते

स्त्रियएवावशिष्यंते इदंतर्हि प्रयोजनं ग्राम्येष्विति वक्ष्यामीति इह माभूत् रुरव इमे पृषता इमे इति कः पुनरर्हति अग्राम्याणां पुंसः उत्क्रा
न्तयितुं ये ग्रहीतुमशक्याः कुत एव वा हायच विक्रयायच इदंतर्हि प्रयोजनं पशुष्विति वक्ष्यामीति इह माभूत् ब्राह्मणा इमे क्षत्रिया इमे कः पु
नरर्हति सपशूनां पुंसः उत्क्रालयितुं ये अशक्याश्वा हायच विक्रयायच इदंतर्हि प्रयोजनं संघेष्विति वक्ष्यामीति इह माभूत् एतौ गावौ च
रतः कः पुनरर्हति निर्ज्ञाते र्थे अन्यथा प्रयोक्तुं इदंतर्हि प्रयोजनं अतरुणेष्विति वक्ष्यामीति इह माभूत्॥ तरुणका इमे वत्सतरा इमे इति कः पुन
रर्हति तरुणानां पुंसः उत्कालयितुं ये अशक्या वाहायच विक्रयायच॥ अनेकशफेष्विति वक्तव्यं इह माभूत् अश्वाश्चरंति गर्दभाश्चरंती
ति॥ ॥इति श्रीभगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य द्वितीयपादे तृतीयमाह्निकं॥ पादश्च समाप्तः॥

क्वचित्संस्त्वेनेत्युक्तं भवति॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे प्रथमस्याध्यायस्य द्वितीये पादे तृतीयमाह्निकं॥ पादश्च द्वितीयः समाप्तः॥

 ॥श्री॥ ॥श्री॥ ॥

भूवादयो धातवः ॥ कुतोयमिति । लक्षणाभावं मत्वा कस्मान्निमित्ताद्वकार इति पृच्छति । यदि तावदिति । यणादेशेनेको निवर्तितत्वात् । अथासंहितये-
ति । अभ्युपगम्यवादोयं । न ह्येकस्मिन्पदे संहितास्ति । संहितैकपदे इति वचनात् । तस्मात्सर्वथा निर्देशोयं न संभवतीत्येवं परमेतत् । भूवादीनामिति ।
सूत्रोच्चारितेन भूवादिशब्देन लक्ष्यार्थो विवक्षितः ॥ तत्र वाचकसंबंधी भूवादीनां भूवादिशब्दवाच्यानां वकार इति व्यपदिश्यते । मंगलार्थ इति । ननु नि-
मित्ते पृष्टे प्रयोजनकथनमप्रस्तुतं । नैष दोषः । प्रयोजनकथनेन निमित्तस्यापि कथनात् । अत एव निपातनादागमरूपो वकारः कृतः ॥

भूवादयो धातवः ॥ कुतोयं वकारः । यदि तावत्संहितया निर्देशः क्रियते भ्वादय इति भवितव्यं । अथासंहितया भू आदय इति भवि-
तव्यं । अत उत्तरं पठति । भूवादीनां वकारोयं मंगलार्थः प्रयुज्यते । मांगलिक आचार्यो महतः शास्त्रौघस्य मंगलार्थं वकार-
मागमं प्रयुंक्ते । मंगलादीनि मंगलमध्यानि मंगलान्तानि शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्ति आयुष्मत्पुरुषाणि च अध्ये-
तारश्च मंगलयुक्ता यथा स्युरिति । अथादिग्रहणं किमर्थं । यदि तावत्पठ्यन्ते नार्थ आदिग्रहणेन । अथान्यत्रापि स्थितं पठन्नादिग्र-
हणं न करोति । क्वान्यत्र । मृडमृदगुधकुषक्लिशवदवसः क्त्वेति ॥ ॥ ॥

न चायमसाधुः वैयाकरणनिकाये प्रसिद्धत्वात् । तस्य च मंगलं प्रयोजनमित्यनेन प्रतिपादितं भवति । अपूर्वस्य हि लाभो दध्यादेर्लोके मंगलत्वं सू-
चयति । तथेहाप्यागमो वकारो मंगलार्थः संपद्यते । अथवा सति वकारेऽविकृते भूशब्दे उच्चार्यमाणे महाव्याहृतिस्मरणं मंगलं भवतीति पारंपर्येण
व[illegible]कारो मंगलार्थकः संपद्यते । नार्थ इति । भूवादी[illegible]न्पठित्वा ते धातव इति वक्तव्यं । यथा ते तद्राजा इति ॥ ॥ ॥

नन्तराममिति॥ सति पाठे गणार्थत्वान्न कृते ग्रंथ अस्ति त्व संबंधादिसर्थः। अत एव प्रतिषेधप्रकर्षः संबंधाभावे संतमेवाकरणमिति सत्यार्थस्य प्रतिपत्तये निर्दिष्टः।
एवं तर्हीति। सूत्रेषु ये पठ्यंते मृड मृद इत्यादयः तान्समाप्यते धातव इति वचनेन तु सिद्धे सतीत्यर्थः। अस्ति च पाठ इति। अनेनासंबंधकृत्वं परिहृतं। बाह्य अत्रेत्यने
न गतार्थत्वं निराकृतं। पाठे नेति। धातुपाठे पठिता ये तेषामेव धातुसंज्ञा। तेषां च पाठो नोपलक्षणार्थः। अपि तु इयत्ता प्रतिपादनार्थः। तत्र यदि क्रिया

अथ न पठ्यंते नन्तरसमर्थे आदिग्रहणेन। नह्यपठिताः शक्या आदिग्रहणेन विशेषयितुं। एवं तर्हि सिद्धे यदादिग्रहणं करोति तज्ज्ञा
पयत्याचार्यो अस्ति च पाठो बाह्य अत्र सूत्रादिति। किमेतस्य ज्ञापने प्रयोजनं। पाठेन धातुसंज्ञेत्येतदुपपन्नं भवति। पाठेन धातु
संज्ञायां समानशब्दप्रतिषेधः। पाठेन धातुसंज्ञायां समानशब्दानां प्रतिषेधो वक्तव्यः। या इति धातुर्या इत्याबंतः। वा इति धातु
र्वा इति निपातः। नु इति धातुः नु इति प्रत्ययश्च निपातश्च। दिव् इति धातुः दिविरिति प्रातिपदिकं किं च स्यात्। यद्येतेषामपि धातुसं
ज्ञा स्यात्। धातोरिति तव्यदादीनामुत्पत्तिः प्रसज्येत। नैष दोषः॥ ॥ ॥

वाची धातुरित्येतल्लक्षणं क्रियेत तत आणवयति वदयति सादीनामपि धातुसंज्ञा स्यात्। अथ सूत्रपठितानामनंतरं ते धातव इत्युच्येत तदा तत्रापठि
तानां न स्यात्। तस्मादुभयं वाच्यं इत्युक्तं। तत्र सूत्रवार्त्तिकभाष्यगणेषु ये पठ्यंते तेषु सूत्रकारादिप्रामाण्यादनुलेखनास्य यत्नीयाः। समानशब्दानामिति।
समानश्रुतीनामिति विपरीतानामक्रियावाचिनामित्यर्थः। तव्यदादीनामिति। यथैव दिवं पश्येति बाह्यक्रियापेक्षे कर्मणि द्वितीया भवति एवं तव्यदाद
यो ऽपि स्युरित्यर्थः॥ ॥

साधन इति॥ अंतरंगं धातुत्वाच्च क्रियापेक्षे साधने तव्यदादयः सावकाशाः बाह्यक्रियापेक्षे साधने नोत्पद्यंते इत्यर्थः। योपि शाकटपक्षे तिस्वार्थिकस्तुमुन्सोप्यनभि
धानान्न भविष्यति। याः पश्येति। यच्छब्देन धातुरिति विभक्तिरुत्पद्यते। तस्मात्‌ लेटापि च कृते धातुसंज्ञायामातो धातोरिति लोपप्रसंगः। त्वस्तू इति। ननु एधो

साधनेत व्यदादयो विधीयंते। साधनं च क्रियायाः क्रियाभावात्साधनाभावः। साधनाभावात्त सामपि धातुसंज्ञायां तव्यदादयो न भ
विष्यंति। इदं तर्हि याः पश्य। आतो धातोरिति लोपः प्रसज्येत। नैष दोषः। अनाप इत्येवं सः। अस्य तर्हि वाशब्दस्य निपातस्य धातु
रिति प्रातिपदिकसंज्ञायाः प्रतिषेधः प्रसज्येत। अप्रातिपदिकत्वात्स्वाद्युत्पत्तिर्न स्यात्। नैष दोषः। निपातस्यानर्थकस्य प्रातिप
दिकत्वं चोदितं। तत्रानर्थकग्रहणं न करिष्यते। निपातः प्रातिपदिकमित्येव। इदं तर्हि त्वस्तू इति। अपि च स्तु धातुः स्तुवं यो रियुव
ङादेशः प्रसज्येत। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति न प्रत्ययस्यो वुङादेशो भवतीति। यदयं तत्र स्तुग्रहणं करोति। अस्य
तर्हि दिवृ शब्दस्य धातुरिति प्रातिपदिकसंज्ञायाः प्रतिषेधः प्रसज्येत। अप्रातिपदिकत्वात्स्वाद्युत्पत्तिर्न स्यात्। नैष दोषः।
आचार्यप्रवृत्तिर्ज्ञापयत्युत्पद्यंते दिवृ शब्दात्स्वादय इति। पदयं दिवः सावोत्वं शास्ति। नैतदस्ति ज्ञापकं। अस्ति ह्यन्यदेतस्य वचने

तुपुपठितः। न चास्य तेन सारूप्यं नैष दोषः। प्रयोगेनु शब्दएव धातुः तेन चास्य सारूप्यमस्त्येव। यद्यपि चापं सानुबंधकस्तथापि धातुष्वननुबंधकप
रिभाषाकैश्चिन्नाश्रीयते। अथ वोपलक्षणार्थमिदं तेन स्थाएवेएरस्तुदाहरणं॥ अक्षद्यू रिति। अत्र कृदंतत्वात्प्रातिपदिकत्वं॥ ॥

नवैवमत्रेष्यत इति॥ शिष्टप्रयोगाभावात्। तस्माद्द्विवचोरि ति ज्ञापकमेवाइतरेतराज्ञापकत्वं विघटयति। अनिष्टं चेति। एवं तर्हीति। धातुः सानुबंधक इति भा-
वः। एवमपीति। अधातुरिति प्रातिपदिकसंज्ञानिषेधान्निरनुबंधकात्सोरसंभवः। उभयसंभवे चास्याः परिभाषाया उपस्थानं नान्यथा। इयानवधिरिति।
अवधिमानवधिनोपलक्ष्यते। तेन विशिष्टावधिपरिच्छिन्नस्य धातुसंज्ञा विधेयेत्यर्थः। भ्वेधशब्द इति। तत्र भ्वेधशब्दाद्वृद्ध्यादिप्रसंगः। न चार्थपाठः
परिच्छेदकः। तस्यापाणिनीयत्वात्। अभियुक्तैरुपलक्षणतयोपात्तत्वादनेकार्थत्वदर्शनादर्थस्य नियामकत्वाभावात्। क्रियावचन इति। एवं सति समा-

नवैवमत्रेष्यते॥ अनिष्टं च प्राप्नोतीष्टं च न सिध्यति। एवं तर्ह्यननुबंधकग्रहणे न सानुबंधकस्येत्येवमेतस्य न भविष्यति। एवमप्यननुबं-
धकोदिवशब्दो नास्तीति कृत्वा सानुबंधकस्य ग्रहणं विज्ञास्यते। परिमाणग्रहणं च। परिमाणग्रहणं च कर्तव्यं। इयानवधिर्धातुसंज्ञो भवती-
ति वक्तव्यं। कुतो ह्येतत्। भूशब्दो धातुसंज्ञो भविष्यति न पुनर्भ्वेधशब्द इति। यदि पुनः क्रियावचनो धातुरित्येतल्लक्षणं क्रियेत। का पुनः
क्रिया। ईहा। का पुनरीहा। चेष्टा। का पुनश्चेष्टा। व्यापारः। सर्वथा भवाञ्छब्देनैव शब्दानाचष्टे न किंचिदर्थजातं निदर्शयत्येवंजातीयका

न शब्दानां प्रतिषेधो न वक्तव्यः। नापि परिमाणग्रहणं। नहि भ्वेधशब्दसमुदायः क्रियावाची। का पुनरिति। द्रव्यमतिरेकेण तस्याः सत्तामसंभावयतः प्रश्नः।
ईहेति। ईहाचेष्टाशब्दयोरन्यत्र व्यापारविशेषवचनत्वेपीह व्यापारमात्रवचनत्वं बोद्धव्यं। कस्यचित्केनचिच्छब्देन सोर्थः प्रसिद्ध इत्यनेकपर्यायोपादानं। सर्वथेति।
यावद्द्रव्यव्यतिरेकेण क्रियासद्भावे प्रमाणं नोक्तं तावत्पर्यायोपादानमात्रेण तस्याः स्वरूपं न निश्चीयत इत्यर्थः॥ अर्थजातमिति। अर्थस्य रूपमित्यर्थः॥ ०॥

अशक्येति॥ आरम्भात्प्रभृत्या अपवर्गात्परीभूता अवयवासाध्यमानावस्थाभूतभविष्यद्वर्तमान संदसदनेकावयवसमूहरूपासद्वस्तुविषयेंद्रियग्राह्यान भवतीत्यर्थः॥ पिंडीभूतेति॥ यथा परमाणवः पिंडीभूता उपलभ्यंते न केवलाः एवं पिंडीभावाभावात् क्रियानप्रत्यक्षेत्यर्थः॥ गर्भो निलुंठितइति॥ यथा कुक्षिस्थो गर्भो ऽप्रत्यक्षस्तथा क्रियेत्यर्थः। अथवा निलुंठितो निर्गतः कुक्षेर्गर्भः प्रत्यक्षः नैवं क्रियेति वैधर्म्येण दृष्टांतः॥ सासा विति॥ या पूर्वमुक्तासा सावनुमानेन प्रतीयत इत्यर्थः॥ कोसा विति॥ यो भावे लुङ् स नपुंसकः॥ असुत्र त्वभिधेयवत्प्रागनियतलिंगः॥ अथवा मन्यते ऽयं त्वनुमान इति रूपं॥ यस्मिन्सन्निहितेइति॥ यस्मिन्वस्तुनि सन्निहिते सति पचतीत्येतत्प्रयुते नासति सा क्रिया॥ क्वचित्तु साधने सन्निहिते इति पाठः॥ तत्रायमर्थः॥ य

क्रियानामेयमत्यंतापरिदृष्टा अशक्यापिंडीभूता निदर्शयितुं॥ यथा गर्भो निर्लुठितः॥ सासावनुमानगम्या॥ कोसावनुमानः॥ इह सर्वेषु साधनेषु सन्निहितेषु कदाचित्पचतीत्येतद्भवति कदाचिन्न भवति॥ यस्मिन्सन्निहिते पचतीत्येतद्भवति सा नूनं क्रिया॥ अथवा यया देवदत्त इह भूत्वा पाटलिपुत्रे भवति सा नूनं क्रिया॥ ॥ ॥

स्मिन्सन्निहिते सति पचतीत्येतत्साधनविषये भवतीति॥ स्यादेतत्॥ मृगतृष्णिकाविषयजलज्ञानवत्पचतीत्येतदसत्सविषयमेव ज्ञानमित्याशंक्याह॥ अथवेति॥ देशांतरप्राप्तिलक्षणेन कार्येणाऽबाधितेन क्रियाख्यं कारणमनुमीयत इत्यर्थः॥ ननु प्रत्यक्षाप्रवृत्तौ संबंधग्रहणाभावात्कथं क्रियाविषयमनुमानं प्रवर्त्तते॥ नैष दोषः॥ धातुवाच्यस्य समूहस्य युगपदसन्निधानादप्रत्यक्षत्वेप्येकैकस्य तु क्षणस्य प्रत्यक्षत्वे बुध्यानाऽक्षणान्संकलय्य पचतीति प्रयुज्यते॥ यदाप्येकस्मिन्क्षणे पचतीति प्रयोगस्तदा तत्र समूहरूपारोपणाशब्दशक्तिस्वभावाच्चैकः क्षणो नैव धातुवाच्यः॥ ॥

किं करोति पचतीति। सामान्यविशेषभावेन सामानाधिकरण्यं क्रियाविशेषवचनाः पचादयः प्रतीयंत इत्यर्थः। यदा तु किं करोतीति पृष्टे न करोत्यास्त एव केवलमि

= ननु सामान्ये सर्वविशेषाणामंतर्भावात् सामान्यशब्देन विशेषवाचकशब्दप्रयोग एव न प्राप्नोतीति [illegible] सामान्यविशेषभावेनेति [illegible] =

कथं पुनर्ज्ञायते क्रियावचनाः पचादय इति। यदैतेषां करोतिना सामानाधिकरण्यं। किं करोति पचति किं करिष्यति। पक्ष्यति। किमकार्षीत्।

अपाक्षीत् इति। तत्र क्रियावचने उपसर्गप्रत्ययप्रतिषेधः। क्रियावचने धातावुपसर्गप्रत्यययोः प्रतिषेधो वक्तव्यः। पचति। प्र

पचति। किं पुनः कारणं प्राप्नोति। संघातेनार्थगतेः। संघातेन ह्यर्थो गम्यते सप्रकृतिकेन सप्रत्ययकेन सोपसर्गेण च। अस्तिभवति

विद्यतीनां धातुत्वं। अस्तिभवतिविद्यतीनां धातुसंज्ञा वक्तव्या। यथा हि भवता करोतिना पचादीनां सामानाधिकरण्यं दर्शितं न तत

था स्यादीनां निदर्श्यते। न हि भवति किं करोसि सन्तीति। प्रत्ययार्थस्य व्यतिरेकात् प्रकृत्यंतरेषु। प्रत्ययार्थस्य व्यतिरेकात् प्रकृत्यंतरेषु

मन्यामहे धातुरेव क्रियामाहेति। पचति पठति। प्रकृत्यर्थोन्यश्चान्यश्च प्रत्ययार्थः स एव। धातोः स्वार्थाभेदात् प्रत्ययांतरेषु। धातोः

स्वार्थाभेदात् प्रत्ययांतरेषु मन्यामहे धातुरेव क्रियामाहेति। पाकः पचनं पाक इति। प्रत्ययार्थोन्यश्चान्यश्च भवति। प्रकृत्यर्थः स एव॥ ०॥

= सामानाधिकरण्यादिति। अयं भावः। जिज्ञासितविशेषधर्मप्रकारकबोधजनकोत्तरसापेक्षो [illegible] किं करोतीति [illegible] पाकं करोतीत्यर्थकपचतीति

तिष्ठति वनं तदा व्याप्तारमात्रस्य भावरूपं भावितौ विशेषविषयः प्रश्नः। प्रतिवचनं विशेषनिराकरणेनेति बोद्धव्यं। संघातेनेति। संघातस्यैव प्रयोगादर्थवत्त्वात् के

(वलानां तु धातूनामप्रयोगादानर्थक्यम्॥

= नन्वेवमपि करोत्यर्थनिषेधपूर्वकमास्त इति प्रतिवचनादस्यादीनां क्रियावचनता [illegible]

= अयमाशयः। किं शब्दघोत्याया धर्मविशेष जिज्ञासाया धर्मविशेषबोधकवाक्यादितः [illegible] कर्मविशेषा [illegible] =

[illegible marginal note]

भा० कै० प्र०
२४४
२५५

अतिशब्दश्चेति। यद्यप्ययं प्रत्ययसमुदायस्तथापि प्रकृतिभागावबोधपरत्वात्प्रत्ययभागपर्यालोचने नादरादेवमुक्तं। अथवा पूर्वाचार्यैः कैश्चिदतिं प्रत्ययत्वेन कल्पि

कथं पुनर्ज्ञायतेयं प्रकृत्यर्थोयं प्रत्ययार्थ इति। अन्वयव्यतिरेकाभ्यां। अन्वयाद्व्यतिरेकाच्च। कोसावन्वयो व्यतिरेको वा। इह पचतीत्युक्ते कश्चि
च्छब्दः श्रूयते पच्छब्दश्चाकारान्तः। अतिशब्दश्च प्रत्ययः। अर्थोपि कश्चिद्गम्यते विक्लित्तिः कर्तृत्वमेकत्वं च। पठतीत्युक्ते कश्चिच्छब्दो हीय
ते कश्चिदुपजायते कश्चिदन्वयी। पच्छब्दो हीयते पठ्शब्द उपजायते अतिशब्दोन्वयी। अर्थोपि कश्चिद्धीयते कश्चिदुपजायते क
श्चिदन्वयी। विक्लित्तिर्हीयते पठिक्रियोपजायते कर्तृत्वं चैकत्वं चान्वयी। ते मन्यामहे यः शब्दो हीयते तस्यासावर्थो योर्थो ही
यते यः शब्द उपजायते तस्यासावर्थो योर्थ उपजायते यः शब्दोन्वयी तस्यासावर्थो योर्थोन्वयी। विषम उपन्यासः। बहवो हि
शब्दा एकार्था भवन्ति। तद्यथा। इन्द्रः शक्रः पुरुहूतः कण्डुः कोष्ठः कुसूल इति। एकश्च शब्दो बह्वर्थः। तद्यथा। अक्षाः पादा माषा इ
ति। अतः किं न साधीयोर्थवत्तान्वयव्यतिरेकाभ्यामेव। तत्र कुत एतदयं प्रकृत्यर्थोयं प्रत्ययार्थ इति। न पुनः प्रकृतिरेवोभावर्थौ ब्रू
यात्प्रत्यय एव वा। सामान्यशब्दा एत एवं स्युः। सामान्यशब्दाश्च नान्तरेण प्रकरणं विशेषणं वा विशेषेष्ववतिष्ठन्ते। यतस्तु खलु नियोगतः पच
तीत्युक्ते स्वभावतः कस्मिंश्चिद्विशेषे पच्शब्दो वर्तते। तो मन्यामहे नेमे सामान्यशब्दा इति। न चेत्सामान्यशब्दाः प्रकृतिः प्रकृत्यर्थ एव वर्तते प्रत्ययः

सिद्धप्रव ति· नापि [illegible] र्थवत्तान सिध्य तीति व र्णितात्सर्थवत्ता

तदिति तदपेक्ष्यैतदुक्तं। किन्न साधीय इति। यदा प्रकृतिरेव क्रियां साधनं चाह तदा सिद्धमेव प्रकृतेः क्रियावाचित्वं। प्रत्यय एव वेति। ततश्च प्रकृतेर्नित्या क्रिया
वाचित्वं॥

राम०
२४४

अधिरुपरिभाव इति। ततस्माधीत इत्यस्य विशिष्टा ये उक्तानां शास्त्राणां पठने विधिपूर्वकं वा करोतीत्यर्थः। अध्येतीत्यत्र विशिष्टस्मरणरूपं ज्ञानं धात्वर्थः। सोपि

तत्रकथं२

क्रियाविशेषक उपसर्गः। पचतीत्यत्र क्रिया गम्यते तां सो विशिनष्टि। यद्यपि तावदत्रैतच्छक्यते वक्तुं यत्र धातुरुपसर्गं व्यभिचरति। यत्र न खलु
तं व्यभिचरति अध्येति अधीत इति। यद्यप्यत्र धातुरुपसर्गेण व्यभिचरति उपसर्गस्तु धातुं व्यभिचरति तेन मन्यामहे य एवास्याधेरन्यत्रार्थः
स इहापीति। कः पुनरन्यत्राधेरर्थः। अधिरुपरिभावे वर्त्तते। इह तर्हि व्यक्तमर्थान्तरं गम्यते तिष्ठति प्रतिष्ठत इति। तिष्ठतीति व्रजिक्रियायाः
निवृत्तिः प्रतिष्ठत इति व्रजिक्रिया गम्यते। तेन मन्यामहे उपसर्गकृतमेतत् येनात्र व्रजिक्रिया गम्यत इति। सोयं दृष्टापचारः आदिकर्मणि
वर्त्तते। न चेदं नास्ति बहूर्थो अपि धातवो भवन्तीति। तद्यथा। वपिः प्रकिरणे दृष्टः छेदने चापि वर्त्तते। केशश्मश्रु वपतीति। ईडिः स्तुतिचो
दनायाच्ञासु दृष्टः प्रेरणे चापि वर्त्तते। अग्निर्वा इतो वृष्टिमीट्टे मरुतोमुतश्च्यावयन्तीति। करोतिरभूतप्रादुर्भावे दृष्टः निर्मलीकरणे
चापि वर्त्तते। पृष्ठं कुरु पादौ कुरु उन्मृदानेति गम्यते। निक्षेपणे चापि वर्त्तते। कटे कुरु घटे कुरु अश्मानमितः कुरु स्थापयेति गम्यते। एवमि
हापि तिष्ठतिरेव व्रजिक्रियामाह तिष्ठतिरेव व्रजतिक्रियायाः निवृत्तिं। अयं तर्हि दोषः। अस्ति भवति विद्यतीनां धातुत्वमिति॥ ॥

ति। अन्यत्रापि प्रयोगात्। ततश्चान्यत्रास्य योर्थो द्योत्यः स एवेहाप्यनुमीयते। अनेकार्थत्वाद्धातूनां तिष्ठतिरेव गतिवाचीति निर्णयः॥ ॥

=एवमिति-पचादिभानुधाच्यमाकत्वसमानाधिकरणत्वाज्जवतिवाच्यात्मभरणस्यपचादीनामात्मभरणवाचकत्वमितिसर्वः।२-भाष्येपचादीनांचधातुसंज्ञानप्राप्नोतीति-अयंभावः।नउक्तंसामानाधिकरण्यंभाववाचकत्वसाधकं-यथाशुक्लादिमात्रानांरूपवाचकत्वेनरूपत्व=
=याचकत्वतथापाकत्वेनात्मभरणसामानाधिकरण्यपिनात्मभरणवाचकत्वं-अथरूपत्वादर्वस्तुनोरूपेसमवायाच्छुक्लत्वसामानाधिकरण्याद्रुपलक्षणत्वेपिनश्रुक्लादिशब्दवाच्यमितिआत्मभरणस्यनदृष्टान्तेनोपलक्षणत्वेपिपचादिधातुवाच्यतानमुक्तेति-७=

भाववचन इति॥ भावशब्दः क्रियामात्रवाची। यथाय स्यच भावेनेतिभावे घञ् इति च। तेन पचादीनामपिधातुसंज्ञासिध्यति अस्तिभवतिविद्यतीनामपि भावरूपार्थाभि धायित्वात्। भवतिपचतीति। आत्मभरणवचनोभवतिः। तत्रात्मभरणं विरुद्धैकार्थसमवायैः पा कत्वादिभिरविरुद्धैकार्थसमवायां। यथा शुक्लं रूपमिति शुक्लेगु णे शुक्लत्वं रूपत्वं चास्तीति शुक्लादयो रूपवचनाः। एवं पचादयो भाववचनाइत्यर्थः। कः पुनरिति। यदि क्रियैव भावस्तदापक्षान्तरोपादानमनर्थकं अथान्यस्तदा।

यदिपुनर्भाववचनोधातुरित्येतल्लक्षणंक्रियेत। कथंपुनस्तोयतेभाववचनाः पचादय इति। यदेतेषां भवतिना सामानाधिकर ण्यं। भवतिपचतिभवतिपक्ष्यतिभवतिअपाक्षीदिति। कः पुनर्भावः। भवतेः स्वपदार्थो भवनं भाव इति।

। यदि भवतेः स्वपदार्थो भवनं भावः। विप्रतिषिद्धानां धातुसंज्ञा न प्राप्नोति। भेदः छेदः। अन्यो हि भावः। अन्यो ऽभावः। स्यात स्यान्यो भावः अन्यो ऽभाव इति। यो हि यस्य भावमिच्छति स न तस्याभावं। यस्य चाभावं न तस्य भावं। पचादीनां च धातुसंज्ञा न प्रा मोति। यथा हि भवता क्रियावचने धातौ करोतिना पचादीनां सामानाधिकरण्यं निदर्शितं न तथा भाववचने धातौ निदर्श्यते। करोतिः पचादी नां सर्वान्कालान्सर्वान्पुरुषान्सर्वान्वचनान्यनुवर्त्तते। भवतिः पुनर्वर्त्तमानकालत्वं चैकत्वं च। कातर्हीयं वाचोयुक्तिः भवतिपचतिभवतिपक्ष्यतिभ

व्याप्तिरितिप्रश्नः। स्वपदार्थ इति। स्वग्रहणमुपचरितार्थनिरासार्थं। गौणोपि पदार्थो भवति न तु स्वः। अयमिचारात्। पदग्रहणं प्रकरणाद्यनपेक्षस्य प्रतिपादनार्थं। भ वनं भाव इति विग्रहः कर्तृसाधननिरासार्थः। भेद इति। विनाशो भेदः छेदः घटरज्ज्वादेः स च भावविरोधीति भावः। सर्वान्पुरुषानिति। किं करोषि पचामि किं करोमि पचे त्यादौ विपरीतापि पुरुषानुवृत्तिः सर्वग्रहणेन विवक्षिता भवति। पुनरिति। न हि भवति भविष्यति पक्ष्यसभूदपाक्षीद्भवतः पचतो भवन्ति पचन्तीति। कातर्हीति।
=विनाशस्यस्वार्थप्रदर्शनं-छेदः-अयमिति-तत्रभेदोघटादेःछेदोरज्ज्वादेरितिक्रमेणान्वयः।२=

एधैधेति॥ या एषा त्वया एष्टा सैषा वर्तमानस्वरूपे सर्थेः प्रचादय इति। साध्यसाधनसंबंधः न तु सामान्यविशेषभावइत्यर्थः। नन्वन्यत्रोक्तं तिङ्भिरभिहितो भावः क्रियया
समवायं न गच्छति। न हि भवति पठति पचति इति। न तत्र ते नैतद्द्विरूपत्वेन। तत्राहुः॥ कर्तृकर्मभावेन क्रिया आख्यातवाच्य क्रियया सं बध्यत एव। भवति पचति प
प्रपमृगो धावतीति। करणादिभावेन तु न संबध्यते। तथा प्रयोगादर्शनात्। भवेदपि भवेदिति। एकस्याः क्रियायाः आत्मापेक्षः साध्यसाधनभावो विरुद्ध इति
भावः। कालभेदादिति। स्वाभाविकमन्यत्वं कालसाधनभेदेन व्यज्यते। एकस्येति। अपि भवेदिति सत्त्वयोर्भवतिस्तस्याः ऐश्वर्यादिविशिष्टदेवदत्तादिकर्तृका सत्ता व

एषैषा वाचोयुक्तिः पचादयः क्रियाः भवतिक्रियायाः कर्त्र्यो भवंति। यद्यपि तावदत्रैतच्छक्यते वक्तुं यत्रान्या चान्या च क्रिया। यत्र तु खलु सैव
क्रिया तत्र कथं। भवेदपि भवेत् स्यादपि स्यादिति। अत्राप्यन्यत्वमस्ति। कुतः। कालभेदात् साधनभेदाच्च। एकस्या उभवतेर्भवतिः साधने सर्वका
लप्रत्ययः अपरस्य वा त्वं साधनं वर्तमानकालश्च प्रत्ययः। यावता चाप्यन्यत्वमस्ति पचादयश्च क्रियाः भवतिक्रियायाः कर्त्र्यो भवं
तीति। अयं स्त्वयं कर्तृसाधनः भवतीति भाव इति। किं कृतं भवति। विप्रतिषिद्धानां धातुसंज्ञा सिद्धा भवति। भवेद्धि प्रतिषिद्धानां धातुसंज्ञा सिद्धा
स्यात्। आतिपदिकानामपि तु प्राप्नोति वृक्षः प्लक्ष इति। किं कारणं। एतान्यपि हि भवंति। एवं तर्हि कर्मसाधनो भविष्यति भाव्यतेयः स भाव इ
ति। क्रिया चैव हि भाव्यते। स्वभावसिद्धं तु द्रव्यं एवमपि भवेत् केषांचिन्न स्यात्। ये त्वेते संबंधिशब्दास्तेषां प्राप्नोति। माता पिता भ्रातेति॥ ० ॥

र्तमानार्थेः तथाभूता हि सत्ता प्राप्यत इति वर्तमानकालः प्रत्ययः। सा तु सत्ता भवेदिस्स्याः सत्तायाः कर्तृत्वेन निर्दिष्टेति भेदोस्त्येव। अस्त्वयमिति। भेदादयो भवंतीति
तद्वच्चैनां सिध्यति धातुसंज्ञा। एतान्यपीति। एतत्प्रतिपाद्यानि वस्तूनीत्यर्थः। भाव्यते यः स भाव इति। ते न साध्यमानार्थवाचिनो धातुसंज्ञेत्यर्थः। स्वभावसिद्धमिति। शब्द प्र
त्यय तु सारे णैत उच्यते। कृत तथा क्रियमाणता कर्तृव्यता युक्तान्यपि द्रव्याणि सिद्धरूपाण्येव प्रातिपदिकेनाभिधीयंते। शब्दैरेत रेणाहुतेषामवस्थांतरं प्रतिपाद्यते। मातेति। मातृत्वं

सर्वेषेति॥ पाठाश्रये समानशब्दानां प्रसंगः कर्तृसाधने भावशब्दे वृक्षादीनां प्रसंगः। कर्मसाधने मात्रादीनामित्यर्थः। इदानीं समाधानमाह। पठिष्यती
ति। पठितानामेव भाववचनानां धातुसंज्ञा नान्येषामित्यर्थः। अप्रत्ययमिति। भवतीति भूरिति क्तौ रिक्तिबुक्तिन तु कर्मणि। अर्थेस्त्वमिन्न एव। यो हि भवति स
एव भाव्यते नान्यः। नेदमिति। वृद्धिशब्दं मंगलार्थस्य प्रयुक्तत्वा[ ]दकारे मंगलार्थो नोपयुज्यते। भुवमिति। जायमानमर्थं येभिदधति ते धातवइ

सर्वेषां वयं धातिपदिकं प्रयुदासाद्वयमुच्यामहे। पठिष्यति त्वाचार्यः भूवादिपाठं धातिपदिकाणां वयस्यादिनिवृत्त्यर्थे इति। यावता पठि
ष्यति पचादयश्च क्रियाः भवन्ति क्रियायाः कर्त्र्यो भवन्तीति। अस्त्वयं कर्तृसाधनो भवतीति भाव इति। किं वक्तव्यमेतत्। नहि। कथ
मनुच्यमानं गंस्यते। एतेनैवाभिहितं सूत्रेण भूवादयो धातव इति। कथं। नेदमादिग्रहणं वृद्धेरादिकरणं मङ्गलार्थे साधनः। भुवं वदं
तीति भूवादय इति। भाववचने धातौ तदर्थप्रतिषेधः। भाववचने धातौ तदर्थस्य प्रतिषेधो वक्तव्यः। शिप्रेष इति। किं च स्यात्। अशि
तीसात्वं प्रसज्येत। तद्धि धातोर्विहितं। इतरेतराश्रयं च प्रत्यये भाववचनत्वं तस्माच्च प्रत्ययः। इतरेतराश्रयं च भवति। का इतरेतरा
श्रयता। प्रत्यये भाववचनत्वं तस्माच्च प्रत्ययः। उत्सन्ने हि प्रत्यये भाववचनत्वं [ ] गम्यते। सच तावद्भाववचनादुत्पाद्यः तदेतदितरेतरा
श्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते॥ ॥

=नतु सन्नेति। नेनवक्ष्यमाणेन भुवादिपाठानां भाववचनत्वाभावः प्रतिपादित इति भावः।

सर्वेषः। भवतिरत्र जन्मवाची। रत्यनेनैतु सत्तावाचीति सिद्धा पर्योऽभिधायिनां संज्ञा न भव[ ]ति। शिप्रेषेइति। भावार्थाभिधायित्वात्प्रत्ययस्य धातुसंज्ञाप्र
संगाद्धात्वं प्राप्नोति तद्धि नैमित्तिकं शितितु प्रतिषिध्यते। एकारोच्चारणं तु परागमेक मेणोर्लकारस्तदर्थं। पाठस्तु नतावदस्य मननमिव जनेन। इतरेतराश्रयं
चेति। प्राकृशाद्ध्यापारात्समुदाय एव नास्ति कुतोऽन्वयव्यतिरेकाभ्यामर्थस्य प्रविभागः तस्मिंश्चासति भाववचनापरिज्ञानाद्धातुत्वं न भवतीत्येतदित्यर्थः॥

भावमाहेति। मनाकर्त्तृस्वरूपभावार्थाभिधायित्वे पुत्रादिषु नाम्नां नामिक्रियाकर्तृस्वरूपभावाभिधायित्वेन सर्वः॥

सिद्धं त्विति॥ एवं स्थिता एव पचसादयः समुदायाः संसृष्टार्थाभिधायिनः केवलं समुदाये स्थोतेष्वप्रक्रियायामर्थविभागः शब्दविभागश्चोपोद्बियते इत्यर्थः। अनाश्रित्येति। पारमार्थिकं नाश्रीयते परिकल्पितं त्वाश्रीयत एव। तल्लतोहि शब्दान्तराण्येवार्थान्तरेषु प्रयुज्यन्ते। प्रथमभावग्रहणं चेति। तदर्थप्रत्ययपरिहारोयं। प्राथम्यस्यापेक्षिकत्वात् सद्भावति। कुत इति। पुत्रीयतीति। नात्र प्रथममुच्चार्यमाणः पुत्रशब्दो भावमाह। सनाद्यन्ता धातव इत्यस्य प्रसाख्यानेऽयं दोषः। सिद्धेति। प्रथम आद्यो भावोऽप्रथमेनापि क्रियावाभिधीयते न तु द्वितीयः। यिष्य इत्यत्र तु प्राप्नोति। स्वार्थिकेन प्रत्ययेन प्रथम एव भावोऽभिधीयते न तु द्वितीयः। अभिधानत

सिद्धं तु निसप्राप्त्वाद नाश्रित्य भाववचनत्वं प्रत्ययः। सिद्धमेतत्। कथं। नित्याः शब्दा नित्येषु च शब्देषु अनाश्रित्य भाववचनत्वं प्रत्ययउत्पद्यते। प्रथमभावग्रहणं च। प्रथमभावग्रहणं च कर्त्तव्यं। प्रथमं यो भावमाहेति। कुतः पुनः प्राथम्यं। क्रियावृत आहो स्विदर्थतः। क्रियातः। यदि क्रियातः सनादीनां धातुसंज्ञा न प्राप्नोति। पुत्रीयति वत्सीयतीति। अथार्थतः सिद्धाः सनादीनां धातुसंज्ञा स एव तु दोषः। भाववचनेन तदर्थप्रतिषेध इति। एवं तर्हि नापि क्रियातो नाप्यर्थतः किं तर्हि अभिधानतः। यः समध्यमेऽभिधानेयः प्रथमं भावमाह॥०॥

इति। अन्येनानभिहितं भावं य आह स धातुः। क्षिप्य इत्यत्र तु प्रत्ययेनाभिहितं भावं प्रत्यय आहेति न तस्य धातुसंज्ञाप्रवृत्तिः। यथा प्रथममयं राजानं पश्यतीत्यस्यार्थो यदन्येनादृष्टं पश्यतीति तथेहापि प्राथम्यमभिधानक्रियापेक्षमाश्रीयते अन्येभ्यो भावाभिधायिभ्यो यः प्रथमं भावमाहेति। समध्यम इति। द्रौणाहार्थपक्षो दुष्टत्वात् परित्यज्योपादीयमानं मध्यममिति व्यपदिश्यते। तदेवनिर्दोषत्वाच्छोभनत्वेन विशेष्यते। चिकीर्षतीत्यत्र कर्त्तृत्वेनोपसर्जनेनाभिधानमन्येनानभिहितं सन्प्रत्यय आहेति प्रवर्त्तते धातुसंज्ञा। अत्र पक्षे यथा क्षिप्य इति प्रत्ययस्य धातुसंज्ञा न भवति तथा स्वार्थिकानां आपादी

इहेति। नदर्थेऽप्रसयप्रतिषेधः इतरेतराश्रयं च। प्रथमभावग्रहणं च सिद्धं तु नित्यशब्दत्वादिति च। केवलं प्रथमभावग्रहणमपनीय प्रथमक्रियाग्रह
णं कर्त्तव्यं तत्रेदमिति। किं करोतीति प्रश्नेऽस्त्यादिभिः प्रतिवचनाभावादक्रियावचनत्वमेषामिति मन्यते। यच्चाप्युक्तमिह सर्वेषु साधनेषु सन्निहितेषु
कदाचित्पचतीत्येतद्भवति कदाचिन्नेति तदस्त्यादिषु नास्ति। न ह्यस्तीति कदाचिद्भवति सर्वदेति पाकादिभिर्वैधर्म्यं। यथा पचतितरामिति प्रकर्षो भ
वति नैवमस्तितरामिति। किं यत्तदिति। यत्तच्छब्दाभ्यां कारकवैचित्र्यं निदर्श्यते। प्रवृत्तिविशेष इति। सर्वा प्रवृत्तिः प्रवृत्त्यन्तराद्भिद्यते इत्यस्त्येव प्र
वृत्त्याः क्रियात्वं। अन्यथेति। पुष्कौदने मंदप्रयत्नः प्रवर्त्तते मांसौदने तु संवेगेन। यथा च भोजनक्रियाणां परस्परवैलक्षण्यात्प्रवृत्तिविशेषत्वं नैव

इह येऽप्येवंभाववचनं धातोर्दोषास्ते क्रियावचनेऽपि। तत्र तत्र स एव परिहारः। तत्रेदमपरीहृतं अस्तिर्भवतिविद्यतीनां धातुत्वमिति। त
स परिहारः। कां पुनः क्रियां भवान्मन्यते आह अस्तिभवतिविद्यतीनां धातुसंज्ञा न प्राप्नोतीति। किं यत्तद्देवदत्तः कंसपात्र्यां पाणिनौ
दनं भुंक्त इति। न ब्रूमः कारकाणि क्रियेति किं तर्हि कारकाणां प्रवृत्तिविशेषः क्रिया। अन्यथा च कारकाणि पुष्कौदने प्रवर्त्तन्ते
अन्यथा मांसौदने। यद्येवं सिद्धा अस्तिभवतिविद्यतीनां धातुसंज्ञा। अन्यथा हि कारकाणि प्रवर्त्तन्तेऽन्यथा म्रियतौ। षड्भावविकारा इ
ति ह स्माह वार्ष्यायणिः। जायतेऽस्ति विपरिणमते वर्द्धतेऽपक्षीयते

नश्यतीति॥

मस्मादीनां। यद्येवमिति। अत्रापि प्रवृत्त्यन्तरापेक्षयास्त्येव प्रवृत्तिविशेषरूपत्वमित्यर्थः। अन्यथेति। अस्तावात्मभरणरूपा प्रवृत्तिर्म्रियतौ तत्सागरूपा उ
त्पत्तिप्रभृत्या विनाशाच्च सत्तानुषंगादस्तीति प्रत्ययस्य सन्निहितेषु साधनेषु सत्तिरवश्यंभाविनीति कादाचित्कत्वाभावः। प्रकर्षप्रत्ययोऽपि दृश्यते विद्यतेतरामि
ह धान्यमिति। अद्वैवार्थे आगममाह। षड्भावविकारा इति। भावस्य क्रियायाः षट् प्रकारा इत्यर्थः। तेषु चास्तिः पठित इति तस्यापि क्रियात्वमित्यर्थः। अप
वा भाव [illegible] स्य सत्तायाः एते प्रकाराः सत्तैवानेकक्रियात्मिका साधनसंबंधादवसीयमानसाध्यरूपा जन्मादिरूपतयावभासते। एते च भावविकारा निरुक्ते निपुणं

सर्वथेति ॥ भावविकारपरिसंख्यानस्याव्यापकत्वमित्यर्थः । एवं तर्हीति । अनुमानेन क्रियात्वं प्रतिपादयति । अन्यथा स्थित इत्युक्ते वृद्धिक्षयनिवृत्तिर्न प्रतीयेत । अथ देति । क्रियान्तरधर्मसमन्वयेनास्त्यादीनां क्रियात्वं प्रतिपाद्यते । घट इत्युक्ते कालविशेषावगतिर्नास्ति । अस्ति अभूत् भविष्यतीति कालविशेषा

सर्वथा स्थित इत्यत्र धातुसंज्ञा न प्राप्नोति । बाध्यो द्योतेऽस्ति ष्ठतिः । एवं तर्हि क्रियायाः क्रिया निवर्त्तिका भवति द्रव्यं द्रव्यस्य निवर्त्तकम् । एवं हि कश्चित्कंचित्पृच्छति किमवस्थो देवदत्तस्य व्याधिरिति । स आह वर्द्धत इति । अपर आह अपक्षीयत इति । अपर आह स्थित इति । स्थित इत्युक्ते वर्द्धतेश्चापक्षीयतेश्च निवृत्तिर्भवति । अथ वा नान्तरेण क्रियां भूतभविष्यद्वर्त्तमानाः कालाः व्यज्यन्ते । अस्त्यादिभिरपि भूतभविष्यद्वर्त्तमानकालाः व्यज्यन्ते । अथ वान्यस्य दृष्टेनान्यदा दृश्यं तेन भविष्यति किं करोति अस्तीति । अथ यद्येव क्रियावचनो धातुरिसेषपक्षो व्यापि भाववचनो धातुरिति किं गतमेतदियता सूत्रेण आहोस्विदन्यतरस्मिन्पक्षे भूयः सूत्रं कर्त्तव्यम् । गतमित्याह । कथम् । अयमादिशब्दोऽस्त्येव व्यवस्थायां वर्त्तते । तद्यथा । देवदत्तादीन्समुपविष्टानाह देवदत्तादय आनीयन्तामिति ते उ[illegible] त्याप्यानीयन्ते । अस्ति प्रकारे वर्त्तते । तद्यथा । देवदत्तादय आढ्या अभिरूपा दर्शनीयाः पट्ववं तः । देवदत्तप्रकारा इति गम्यते । प्रत्येकं चादिशब्दः परिसमाप्यते । भ्वादय इति च वादय इति च [illegible] तद्यदा तावत्क्रियावचनो धातुरिसेषपक्षः तदा भू इत्येवमादयः आदिशब्दः स व्यवस्थायां वर्त्तते यादस्तत्र यः आदिशब्दः स प्रकारे भूइ त्येवमादयो वा इत्येवं प्रकारा इति ॥ ॥ ॥

वगमात्साध्यमानस्य चार्थस्य कालेन योगात्क्रियात्वावसायः ॥ अथ वेति । निर्ज्ञातायां सत्तायां किं करोतीति प्रश्नासंभवादस्तीति प्रतिवचनाभावः । ननु क्रियात्वाभावादित्यर्थः । यदा तु प्रत्यासन्नविनाशाशंकया देवदत्तः किं करोतीति प्रश्नः तदास्तीत्यावदितिप्रतिवचनं भवत्येव । अथ यद्येवेति । परीसंख्या परिसंख्यानतया

॥ १० ॥

तदावेसन्नेति॥ अपदादीनामादौ वा यत्तिगंधनयोरिति पठितव्यं। अदादिगणो गणानामादौ। तेन सर्वै धातुपाठसन्निविष्टा गृहीता भवंति। यदि तर्हि नि। क्रियावच
नो धातुरिति भाववचनो धातुरिति वा लक्षणं क्रियते नार्थः पाठेनेत्यर्थः। भूवादिपाठ इति। यथा भोक्तुं पाक इति क्रियाश्रयाणि तुमुनादीनि भवंतितथा धातुसं
ज्ञापि स्यादिति पाकादीनां घ्यंतव्यादीनां च पाठेनासौ निवर्त्यते। तथा हि कृष्य कृ इत्यादीनां च क्रियाप्रधानानामव्ययानां। एतेषामपीति। तेषामपाठे नि

यदा तु भाववचनो धातुरित्येष पक्षस्तदावेसन्त्रय आदिशब्दः स एव स्याद्यां भू इत्यत्र य आदिशब्दः सः प्रकारे वा इत्येवमादयो भू इ
त्येवं प्रकारा इति। यदि तर्हि लक्षणं क्रियते नेदानीं पाठः कर्तव्यः। कर्तव्यश्च। किं प्रयोजनं। भूवादिपाठः प्रातिपदिकाणवयसादिनिवृत्त्यर्थः
। भूवादिपाठः कर्तव्यः किं प्रयोजनं। प्रातिपदिकाणवयसादिनिवृत्त्यर्थः। प्रातिपदिकनिवृत्त्यर्थः आणवयसादिनिवृत्त्यर्थश्च। के पुनराण
वयसादयः। आणपयति। वट्टति। वड्डयति। स्वरानुबंधज्ञापनाय च। स्वरानुबंधज्ञापनाय च पाठः कर्तव्यः। स्वरेणानुबंधेन च ज्ञास्यामीति।
न त्वंतरेण पाठं स्वरा अनुबंधा वा शक्या विज्ञातुं। ये त्वेतेऽन्याय्यविकरणा उदात्ता अननुबंधकाः पठ्यंते तेषां पाठः शक्योऽकर्तुं। एतेषा
मप्याणवयसादिनिवृत्त्यर्थः पाठः कर्तव्यः। न कर्तव्यः। शिष्टप्रयोगादाणवसादीनां निवृत्तिर्भविष्यति। स चावश्यं शिष्टप्रयोग उपास्यः
॥ येऽपि पठ्यंते तेषामपि विपर्यासनिवृत्त्यर्थः। लोके हि कश्चिदेकैकं प्रयुंजते द्वयपर्थौदिसि॥ ॥

वृत्तिराणवसादिवत्स्यात्तस्मादाणवयसादिष्वेषां निवृत्तिर्यथा स्यात्तन्मध्ये मा प्रविक्षन्नित्येवमर्थस्तेषामपि पाठः कर्तव्य इत्यर्थः। शिष्टप्रयोगादिति। प्रयुक्तानामि
दमन्वाख्यानं न चाणवयसादयः शिष्टैः प्रयुज्यंते इति नास्ति तेषां शास्त्रेणानुविधानमिति भावः। एतेनैव न्यायेन प्रातिपदिकनिवृत्त्यर्थोऽपि पाठो न प्रयुज्यते
॥ न हि पाकादयः शब्दाः धातुविहितप्रत्ययपरा लोके प्रयुज्यंते॥ ॥ ॥

उपदेशे॥ ॥ उद्देशोपदेशशब्दयोरुपसर्गभेदेऽपि अभिन्नार्थत्वं प्रक्रमत उपक्रमते इत्येतयोरिव मन्यमानः पृच्छति। उपदेश इति किमर्थमिति॥ अत्र आँ अपर
ति। अयं नोपदिष्टः किं तर्हि आङोऽनुनासिकश्छन्दसीति लक्षणेनान्तरतम आङः स्थाने विहितः। यदि त्वाङ आँ छन्दसी सर्वलक्षण ज्ञ आङ भवि ष्यदेशोऽप्युपदेशेऽनुनासिकः।

उपदेशेऽजनुनासिक इत्॥ ॥ उपदेश इति किमर्थं। अत्र आँ अपः उद्देशोयोऽनुनासिकस्तस्य मा भूदिति। कः पुनरुद्देशोपदेशयोर्वि
शेषः। प्रत्यक्षमाख्यानमुपदेशः। गुणैः प्रापणमुद्देशः। प्रत्यक्षं तावदाख्यानमुपदेशः। तद्यथा। अगोज्ञाय कश्चिद्गां सक्थनि
कर्णे गृहीत्वा उपदिशत्ययं गौरिति। स प्रत्यक्षमाख्यातमाह उपदिष्टो मे गौरिति। गुणैः प्रापणमुद्देशः। तद्यथा। कश्चित्कंचिदाह देव
दत्तं मे भवानुद्दिशत्विति। स इह स्थः पाटलिपुत्रस्थं देवदत्तमुद्दिशति अंगदी कुंडली किरीटी व्यूढोरस्को वृत्तबाहुर्लोहिताक्ष
स्तुंगनासो विचित्राभरण ईदृशो देवदत्त इति। स गुणैः प्राप्यमाणमाहोद्दिष्टो मे देवदत्त इति। इत्संज्ञायां सर्वप्रसंगोऽविशेषात्।
इत्संज्ञायां सर्वप्रसंगः सर्वस्यानुनासिकस्येत्संज्ञा प्राप्नोति। अस्यापि प्राप्नोति। अत्र आँ अपः। किं कारणं। अविशेषात्। न हि कश्चि
द्विशेष उपादीयते। एवंजातीयकस्यानुनासिकस्येत्संज्ञा भवतीति। अनुपादीयमाने विशेषे सर्वप्रसंगः। किमुच्यतेऽनुपादी

प्रत्यक्षमाख्यानमिति। इंद्रियगोचरार्थस्य यदाख्यानं स उपदेश इत्यर्थः। प्रसिद्धधर्मोपादानेन तु यत्ख्यातिपादनं स उद्देशः। प्रत्यक्षमाख्यानमिति क्वचित्पाठः। त
त्राख्यानमाख्यातमिति भावे क्तोऽपि ज्ञेयः। ईदृश इति। एतैः शब्दैर्योदृशो बुद्ध्यावबोधः प्रतिभासते तादृशो बाह्य इत्यर्थः। लक्षणेनेति। लक्ष्यतेऽनेनेति लक्षणं गुणास्ते
ना प्युपदेशो भवतीत्यर्थः॥ ॥

इषेत्वकमधीष्वेति। इषेत्वकमिति पूर्वेण संबध्यते। स तस्मा याचष्टे इषेत्वकमिति। इषेत्वा शब्दो यस्मिन्ननुवाके स्ति तमाचष्टे इत्यर्थः। गोषदादिभ्यो वुन्निति
वुन्प्रत्ययः। किमर्थमाचष्ट इत्याह। अधीष्वेति। अध्ययनार्थमाचष्ट इत्यर्थः। अकार्ये त्वोप इति। यदि त्वोपोभिमतो भविष्यदाङ्गेत्वोप श्छेदसी

संकीर्णावुद्देशोपदेशौ। प्रत्यक्षमप्याख्यानमुद्देशः। गुणैः प्रापणमुपदेशः। प्रत्यक्षं तावदाख्यानमुद्देशः। तद्यथा। कश्चित्कं
चिदाह। अनुवाकं मे भवाननुदिशत्विति। स तस्मा याचष्टे इषेत्वकमधीष्व शन्नोदेवीयकमधीष्वेति। स प्रत्यक्षमाख्यातमाह। उ
द्दिष्टो मेऽनुवाकस्तमध्येष्य इति। गुणैः प्रापणमुपदेशः। तद्यथा। कश्चित्कंचिदाह। ग्रामांतरं गमिष्यामि पंथानं मे भवा
नुपदिशत्विति। स तस्मा याचष्टे। मुष्टिं च वृकाश्री हस्तदक्षिणो गृहीतव्यः। अमुष्टिं हस्तवाम इति। स गुणैः प्रापमा
णमाह उपदिष्टो मे पंथा इति। एवमेतौ संकीर्णावुद्देशोपदेशौ। एवं तर्हि लोकार्याभावादत्रेत्संज्ञा न भविष्यति। ननु च लोप एवेत्का
र्ये स्यात्। अकार्ये त्वोपः। इह हि शब्दस्य द्व्यर्थ उपदेशः। कार्यार्थो भवत्युपदेशः श्रवणार्थो वा। कार्यं चेह नास्ति। कार्ये चासति
यदि श्रवणं न स्यादुपदेशोऽनर्थकः। इदमस्ति कार्यं अभ्रमुँ अद्रितः। अनन्तरलक्षणायां सामि संज्ञायामादितःश्वेती ट्प्रसज्ये
त। सिद्धं तूपदेशनेऽजनुनासिकवचनात्। सिद्धमेतत्। कथं। उपदेशने योऽजनुनासिकः स इत्संज्ञो भवतीति वक्तव्यं। किं पुनरूपदेश

नेवावक्ष्यदित्यर्थः। अनन्तरलक्षणायामिति। यदा अनेकान्ता अनुबन्धास्तदा अनन्तर इत्संज्ञकः कार्यस्य विशेषको भवतीति धातोरादित्वादिट्प्रतिषेध
प्रसंगः। उपदेशन इति। तेन शास्त्रे उच्चारितोऽनुनासिकः स इत्संज्ञक इत्यर्थः॥ ॥श्री॥ ॥

प्रतिषेधः२

परत्वादिति। परत्वेन बाधकत्वं लक्ष्यते। तेनानवकाशत्वात्ख्युट् प्राप्नोतीत्यर्थः। हलश्चेति। अयं ख्युटो बाधको घञ्। प्रायवचनादिति। हलश्चेत्यत्र संज्ञायां प्रा
ये इति चानुवर्तते। संज्ञया च प्रायग्रहणमभिसंबध्यते। प्रायेण संज्ञायां घञ् भवति क्वचिदसंज्ञायामपीत्यर्थः। संज्ञायामेवेति। प्रत्ययस्य विधेयत्वात्प्राधा
न्यात्प्रायग्रहणं प्रत्ययेनैव संबध्यते न तु गुणेन संज्ञयेत्यर्थः। उपाधिविशेषणयोश्च वा व्यस्तत्वा वा व्यस्तत्वात् विशेषः। तथा हि। दन्ति हरन्ति प्रत्ययेन
पशुः कर्त्ताभिधीयते इति पशुरूपाधिः। गार्गिकया श्लाघत इति श्लाघा तु नाभिधीयते इति विशेषणमुच्यते। इनङ् विभाषेति। प्रत्ययस्य विधे

यत्वादिति। सूत्रे तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तमिति संज्ञायां सर्वप्रसंगो विशेषादिति। नैष दोषः। उपदेश इति घञ्यं क
रणसाधनः। न सिध्यति। परत्वात्ख्युट् प्राप्नोति। न ब्रूमो कर्तरि च कारके संज्ञायामिति। किं तर्हि। हलश्चेति। तत्रापि संज्ञायामिति
वर्तते। नैषा संज्ञा। प्रायवचनादसंज्ञायामपि भविष्यति। प्रायवचनात्संज्ञायामेव स्याद्धा न वा। न ह्युपाधेरुपाधिर्भवति विशेष
णस्य वा विशेषणं। यदि नोपाधेरुपाधिर्भवति विशेषणस्य वा विशेषणं। कल्याण्यादीनामिनङ्। कुलटाया वा इनङ् विभाषा न प्रा
प्नोति। इनङ् वात्र प्रधानं विहितः। प्रकृतः प्रत्ययश्चानुवर्तते। इह तर्हि वाक्किनादीनां कुक् च। उत्तरा तादन्यतरस्यामिति कुक् विभा
षा न प्राप्नोति। अत्रापि कुगेव प्रधानं विहितः। प्रकृतः प्रत्ययश्चानुवर्तते। एवं न चेदमकृतं भवति नोपाधेरुपाधिर्विशेषणस्य

यतया प्राधान्यात्तादर्थ्येन प्रकृते गुणत्वात्तदादेशस्येनङोऽपि गुणत्वादुपाधित्वमित्यर्थः। इनङ् वात्रेति। अपूर्वोपदेशत्वात्तस्यैव प्राधान्यमित्यर्थः।
।ठक् स्त्रीभ्यो ढगित्येव सिद्धं। तदनुवादेनेनङ् विधीयते। कुगेवेति। उदीचां वृद्धादगोत्रादित्यनेन फिञ् विहितः। तदनुवादेन कुको विधानात्। न चेदमकृ
तमिति। आश्रितमेवेत्यर्थः। गुणप्रधानसन्निधौ यत्र प्रधानमर्थि विशेषणेन भवति तस्यैव विशेषणं न्याय्यं न तु गुणस्य॥ ॥ ॥

=नतु कृते विकृत अर्थो विकारस्तत्र पुरुषः कर्त्ता प्राप्नोति घमित्समानकर्तृकत्वात्क्त्वा न प्राप्नोतीत्यत आह एवं स्थिते इति॰ ॰=

एवं च कृत्वेति ॥ एवं स्थिते सत्यर्थः । तेन घञ्जेन्यायवशात्संज्ञायां प्रायेण तिष्ठति स एवात्र न प्राप्नोतीति समानकर्तृकत्वात् क्त्वाप्रत्यय उपपद्यते । एवं तर्हीति । बहु
लग्रहणाद् संज्ञायामपि घञ् भविष्यतीत्यर्थः ॥ ॥ हलं सम् ॥ ॥ अन्तेऽवसाने भवमंत्यं । सर्वो हि हलिति । सर्वस्य हलोऽवसानेन संबंधात् । अंत्यग्रहणात्वा
दिनिवृत्त्यर्थं स्यात् । सिद्धं त्विति । अवसितः परिच्छिन्ना ये समुदायाः धातुप्रत्ययत्वादिना धर्मेण तेषां योंऽत्य इत्यर्थः । अवयवास्तु समुदायतंत्रत्वान्नांतरीयको
पदेशत्वात् धातुत्वादिना न परिच्छिन्नाः । तत्र प्रकर्षगतिरिति । आदिनिवृत्त्यर्थत्वादंत्यशब्दस्य कथं प्रकर्षगतिः उच्यते । आदेरप्युच्चारणानंतरमवसानसंबंधा

एवं च कृत्वा घञ् प्राप्नोति । एवं तर्हि कृत्स्नसुरो बहुलमित्येवमत्र घञ् भविष्यति ॥ ॥ हलं सम् ॥ ॥ हलंत्ये सर्वप्रसंगः सर्वांत्य
त्वात् । हलंत्ये सर्वप्रसंगः सर्वस्य हल इत्संज्ञा प्राप्नोति । किं कारणं । सर्वांत्यत्वात् । सर्वो हि हल् तंतमवधिं प्रसंतो भवति । सिद्धं त्ववसि
तांत्यत्वात् । सिद्धमेतत् । कथं । अवसितांत्यत्वात् । अवसितांत्यो हलित्संज्ञो भवतीति वक्तव्यं । के पुनरवसिताः । धातुप्रातिपदिकप्रत्य
यनिपातागमादेशाः । सिध्यति । सूत्रं तर्हि भिद्यते । यथान्यासमेवास्तु । ननु चोक्तं हलंत्ये सर्वप्रसंगः सर्वांत्यत्वादिति । नैष दोषः ।
आहायं हलंत्यमिति हलंत्यं भवतीति सर्वस्य हल् तं तमवधिं प्रसंत्यो भवति । तत्र प्रकर्षगतिर्विज्ञास्यते । साधीयो योऽन्त्य इति । कश्च साधी
यः । योऽवसितांत्यः । अथवा सापेक्षोऽयं निर्देशः । न चान्यत्किंचिदपेक्ष्यमस्ति । तेनावसितानेवापेक्षिष्यामहे ॥ ॥

दंत्यत्वं तु निवार्यमिति नास्ति तन्निवृत्तिरिति सामर्थ्यात्प्रकर्ष आश्रीयते अवसितानां योंऽत्य इति । आदिमध्यानां चकाल्पनिकमंत्यत्वं । सर्वांत्यस्य तु निसमेवे
तितस्यैव युक्तं ग्रहणं । अथवेति । पूर्वं समुदायावयवसन्निधौ समुदायापेक्षमंत्यत्वमाश्रयितुं युक्तमिति परिहृतं । इदानीं तु समुदायापेक्षत्वादुपदेशस्यावयवानामंत्य
त्वान्तरपेक्षणं दूरोत्सारितमिति मत्वा परिह्रियते ॥ ॥ श्री ॥ ॥

ऌकारस्येति॥ इतरेतराश्रयं मन्यते। शषसर् हल् इत्यत्र ऌकारस्य सत्याम् इत्संज्ञायां रहहलिति प्रत्याहारः सति च प्रत्याहारे लणि सत्र ऌकारस्य हल्त्वात्तस्यैव श
षसर् हलि सत्रां तेनिर्दिष्टत्वादित्संज्ञेति प्रत्याहाराश्रया इत्संज्ञा न त्वाश्रयस्य प्रत्याहारः। ऌकारस्येति पूर्वं ऌकारस्य संज्ञा विधेया। तेन हलिति प्रत्याहार
उपपद्यते। तत्र हल् च ऌ चेति समाहारद्वंद्वं कृत्वा संयोगान्तस्य लोप इति लकारो लुप्यते। हल् चेति। हस्य ऌ इत्येकः षष्ठीतत्पुरुषः। द्वितीयः प्रत्याहारः। न
पुंसकमनपुंसकेनेति चैकशेषः। एकस्य पुल्लिंगत्वादपरस्य नपुंसकत्वात्। अथवेति। शषसर् हलि सत्र हलं समि सत्र च ऌकारस्यैकादेशो ऌपर

ऌकारस्यानुबंधाज्ञापितत्वाद्धल्ग्रहणप्रसिद्धिः। ऌकारस्यानुबंधत्वेन ज्ञापितत्वाद्धल्ग्रहणस्य प्रसिद्धिः। हलं समित्संज्ञं भव
तीत्युच्यते। ऌकारस्यैव तावदित्संज्ञा न प्राप्नोति। सिद्धं तु ऌकारनिर्देशात्। सिद्धमेतत्। कथं। ऌकारनिर्देशः कर्तव्यः। हलं समित्संज्ञं भव
ति ऌकारस्येति वक्तव्यं। एकशेषनिर्देशाद्वा। अथवा एकशेषनिर्देशोऽयं। हल् च हल् च हल् हलं समित्संज्ञं भवतीति। अथवा ऌ
कारस्यैवेदं गुणभूतस्य ग्रहणं। तच्चोपदेशेऽजनुनासिक इदिति संज्ञा भविष्यति। अथवा आचार्यप्रवृत्तिर्ज्ञापयति भवति ऌकारस्य
इत्संज्ञेति। यदयं णलं लितं करोति॥ ॥ ॥

त्वं च क्रियते। नन्वेवमपीतरेतराश्रयमेव। ऌकारस्य सत्याम् इत्संज्ञायां हलिति प्रत्याहारः। सति च प्रत्याहारे एऔजिति चकारस्येत्संज्ञा न स्यां सत्याम् अजिति प्र
त्याहारः। अजिति प्रत्याहारे सति ऌकारस्येत्संज्ञा। एवं तर्हि ऌदित इति ज्ञापकात् ऌकारस्येत्संज्ञाकार्यं भविष्यतीति नास्ति इतरेतराश्रयमिति भगवतो भाष्यकार
स्याभिप्रायः। अथवेति। णलो ऌकारः स्वरार्थः कृतः अस्यां चेत्संज्ञायां कुतः स्वरः। अवर्णार्थस्तु णलो न ऌकारः। हल्ङ्यादिसूत्रे हल्ग्रहणस्य ल्याब्भ्यसयो
तः। तत्र हि बिभेदेति णल्याद्वसर्थे हल्ग्रहणं कृतं। ऌकारस्यावर्णेऽपृक्तत्वाभावाल्लोपस्याप्राप्तिरिति किं हल्ग्रहणेन॥ ॥ ॥

प्रातिपदिकप्रतिषेध इति। यद्यामंजकारादिनिवृत्त्यर्थः प्रातिपदिकानामुपदेशः कर्त्तव्य इति पक्षस्तदा प्रतिषेधः। अन्यथा उपदेशाभावात्प्राप्त्यभावादनर्थकः प्रतिषे
धः स्यात्। कुंभकार इति। अपवादविषयपरिहारेण संज्ञायाः प्रवर्त्तनात्पूर्वं प्रातिपदिकसंज्ञेति प्रतिषेधमाशंक्य कृत्तद्धित इति प्रतिषेधः क्रियते। प्रत्ययग्रहणमिति।
उदश्वित्शकृदिति चैतावुभुसन्नौ। शकृदिति शकेरृतिन् इति यद्यपि व्युत्पाद्यते तथाप्युपदेशे तकारोऽसो न भवतीति संज्ञा न प्रवर्त्तते। राजानमसेति। नन्वभुसन्निपक्षे

प्रातिपदिकप्रतिषेधोऽकृत्तद्धिते। अकृत्तद्धितान्तस्य प्रातिपदिकस्य प्रतिषेधो वक्तव्यः। उदश्वित्शकृदिति। अकृत्तद्धितान्तस्येति किमर्थं कुंभ
कारो नगरकारः औपगवः कापटव इति। इदर्थाभावात्सिद्धं। इत्कार्याभावात्तत्र संज्ञा न भविष्यति। इदमस्ती त्कार्यं नित्स्वरितमिति स्वरित
त्वं यथा स्यात्। नैतदस्ति प्रत्ययग्रहणं तत्र चोदयिष्यति। इह तर्हि राजानं स्म। न्निनीसाद्युदात्तत्वं यथा स्यात्। न्निनीत्युच्यते न चात्राव
वर्गाभावान्न भविष्यति। इदं तर्हि स्वरू। उपोत्तमं रितीत्येष स्वरो यथा स्यात्। स्वरितकरणसामर्थ्यान्न भविष्यति। स्वङ्. स्वरौ स्वरि
ताविति इह तर्हि अंतरू। उत्तमशब्दस्त्रिप्रभृतिषु वर्त्तते न चात्र त्रिप्रभृतयः संति। इह तर्हि सनुतरू। उपोत्तमं रितीत्येष स्वरो यथा स्या
त्। अंतोदात्तनिपातनं करिष्यते। सनिपातनस्वरो रित्स्वरस्य बाधको भविष्यति॥ ॥ ॥

एवं नयोरखश्पमाद्युदात्तत्वमेषव्यं। तत्राद्युदात्तसाद्युदात्ते त्वकिंभ्यो जनं येन संज्ञा स्यात्। उच्यते। आमंत्रितनिघातप्रतिषेधार्थमाद्युदात्तत्वं स्यात्। नदि. संबुध्यो
रिति नलोपस्य प्रतिषेधो न संज्ञाया इति तत्रतिबद्धः स्वरः स्यात्। अपवर्गाभावादिति। नित्स्वरो नास्तीति भावः। यदा तु सौवर्यः सप्तम्यास्तदंत सप्तम्यस्तदापि नि
देशायं न तु नितं तदिति नास्ति स्वरः। अन्ते तु पक्षेऽपि यन्निति यदावाक्यार्थप्रत्यवचनं तदा स्वरो न सिध्यति। परत्वात्तु छंदसः औत्रभावः घंप्रत्ययस्तदा नित्त
्वात्स्वरसिद्धिः॥ ॥

तद्यथा गस्येति॥ प्रत्ययस्तु लुकि कृते परिशिष्टस्य कुण्डिनजादेशः तत्र प्रत्ययलक्षणेन तद्धितान्तत्वात्प्रातिपदिकत्वादित्संज्ञानिषेधः स्यात्। न चायं चकारस्तद्धि
तसंबन्धीयतोऽकृतद्धित इति निषेधः स्यात्॥ ॥न विभक्तौ तुस्माः॥ ॥इत्संज्ञापरित्राणार्थमिति। इत्संज्ञायाः परित्राणमिति साधने कृतेति पंचमी
तत्पुरुषः। शेषविवक्षायां वा षष्ठीसमासः। अनेनोकारेणानुमीयते येषां प्राग्दिशो विभक्तिरिति विभक्तिसंज्ञा तेषां न विभक्तावितीत्संज्ञा न निषिध्यत इति।

एतच्चात्र युक्तं यदित्कार्याभावादित्संज्ञा न स्यात्। यत्रेत्कार्यं भविष्यति तत्रेत्संज्ञा तद्यथा। आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिन
जिति॥ ॥न विभक्तौ तुस्माः॥ ॥विभक्तौ तवर्गप्रतिषेधोऽतद्धिते विभक्तौ तवर्गप्रतिषेधः अतद्धित इति वक्तव्यं। इह मा भूत्।
किमोत्। कुमेप्सनदीप्यसे। कार्द्धमासा इति। स तर्हि वक्तव्यः। न वक्तव्यः। आचार्यप्रवृत्तिर्ज्ञापयति न विभक्तौ तद्धिते प्रतिषेधो भव
तीति। यदयमिदम स्थमुरिति मकारस्येत्संज्ञापरित्राणार्थमुकारमनुबंधं करोति। यद्येतज्ज्ञाप्यत इदानीमित्यत्र प्रा
प्नोति। इत्कार्याभावादत्रेत्संज्ञा न भविष्यति। इदमस्तीत्कार्यमिदञ्चोऽत्सासर इत्यत्र चामंत्रसास्वरे यथा स्यात्। इश्भावे कृते नास्ति वि
शेषः। मिदञ्चोत्सास्वर इति वा प्रत्ययः पर इति वा। स एव तावदिश्भावो न प्राप्नोति। किं कारणं। प्राग्दिशः प्रत्ययेष्विष्यते। कः पु
नरहेतीश्भावं प्राग्दिशः प्रत्ययेषु वक्तुं किं तर्हि प्राग्दिशीयेष्विश्भावः॥ किंसर्वनामबहुभ्योऽद्व्यादिभ्यः प्रत्ययासक्तिः॥ ॥

अत्रेति। इदानीमित्यत्र। अर्थेष्विति। यथेष्टमवधिमत्कल्पनेसत्योऽवधिमत्त्वेनाश्रीयते। तत्रानुत्पन्न एव प्रत्यये इश्भावः ततः प्रत्ययः। यदि तु
पूर्वं प्रत्ययः स्यात्तदा मित्वादचोऽन्त्यात्परे इदानीमि कृते तन्न सध्यति तस्य तद्ग्रहणे न ग्रहणात्सर्वादेशः इश् इति सति दानीं विधानमनर्थकमेव स्यात्॥०॥

तरोप्पयमिति। तरोदा चेति चकारेण नुकर्षेण तान नुचेति। संप्रमंपां विभक्तावुसन्नायामतेळं तेदानीमिति भागः तद्धीति। प्राग्दिशोर्थे च्छितिपूर्वेमभिधानात् प्रम्यर्थवृत्तेः कालवाचिनो मित्वा न्मथ्येदानी माभाव्यमिति दानीमिस स्यासिद्धिरेवेत्यर्थः। यकारान्तरङ्गितः। यकारे सत्वमनुभवन्मकारस्यां सत्वं प्रति बध्नाति। यकारस्य चसंयोगान्तस्य लोप इति लोपः क्रियते। यद्येवं मकारएवोपदेशेऽस्ति ततः श्रूयते इति प्राप्नोत्येवमकारस्येत्संज्ञा। नैतदस्ति। पूर्वत्रासिद्धमिति मकारस्येत्संज्ञायां यल्लोपस्यासिद्धत्वादत्संत्वाभावात्॥ ॥चुटू॥ ॥लुप्तनिर्दिष्ट इति। पूर्वं निर्दिष्टः पश्चाल्लुप्यते इत्यर्थः। एजदन्तादेरकृतिग णत्वाद्धाप्य

एवं तर्हि तदोप्पयवक्तव्यः। तदस्त्विमिदचोसास्सरत्वेन सिध्यति। ननु चात्राप्यलेत्कृते नास्ति विशेषः। मिदचोसासरइति वा प्रत्ययः परइति वा। तद्विकत्वेन प्राप्नोति। किं कारणं। विभक्ताविसुच्यते। एवं तर्हि यकारान्तो दानीं करिष्यते। किं यकारो न श्रूयते। लुप्तनिर्दिष्टो यकारः॥ ॥चुटू॥ ॥चुंचुपचणपोश्च कारप्रतिषेधः। चुंचुपचणपोश्च कारस्य प्रतिषेधो वक्तव्यः। केशचुंचुः केशचणः। इदयोभावात्सिद्धं। इत्कार्याभावादत्रेत्संज्ञा न भविष्यति। इदमस्तीत्कार्यं। चित इत्युदात्तो भवतीति। अन्तोदात्तत्वं यथा स्यात्। पित्करणमिदानीं किमर्थं स्यात्। पित्करणं किमर्थमिति चेत्पर्यायार्थं। पित्करणं किमर्थमिति चेत्पर्यायार्थमेतत्स्यात्। एवं तर्हि यकारादी चुंचुपचणपौ। किं यकारो न श्रूयते। लुप्तनिर्दिष्टो यकारः। इरउपसंख्यानं। इरउपसंख्यानं कर्तव्यं। रुधिर्। अरुधत्। अरौत्सीत्॥ ॥

कारवचनाद्वा पूर्वकालस्य परनिपातः। अथ वा लुप्तो मिति प्रतिज्ञातो लुप्तनिर्दिष्टः। उपसंख्यानमिति। इरितो वेत्यत्रेरित इति समुदायानुकरणं। इरन्तुमभावः। नन्वेवं सति स्वरितेत इत्यात्मनेपदं न प्राप्नोति। नैष दोषः। स्वरितत्वं ज्ञानसामर्थ्यादवयवगतं स्वरितत्वं समुदाय आरोपयिष्यते॥ ॥

राम०
२५२

= मपपीति। कुस्तूलधान्यादेरपि कुंभीधान्यत्वावश्यंभावात्सार्थकं कुंभीधान्यपदेन कुंभ्यामेव धान्यं यस्येत्यर्थकेनान्ययोगव्यवच्छेदो बोध्यते। सम्यन्तो नैयकारान्यस्तद्बोधकत्वमुक्तं नेः। शब्दस्य च सामर्थ्याभावात्कतिवासामर्थ्ये इदेवेत्संज्ञा कारएवैकारो यस्येत्येव कारांतर्भावेण मम

अवयवग्रहणादिति॥ इराविंतो यस्य स इरिदित्येवमित्संज्ञकत्वेनावयवावेवाश्रीयेते न तु समुदाय इत्यर्थः। यदि पुनरिति। यस्य कुंभीस्थादन्यन्निहितं धान्यं ना
स्ति स कुंभीधान्यः। यद्यपि तु त्रिधा व स्यान्यायस्य निमित्तं नास्ति तथापि दोषे ऐवं तन्न्यायानाश्रयणमाह। नायमिति। इकार एवेदिति। इदिता धातुर्विशेष्यत
इति तदंतविधिः। नकारस्येति। ऋदित इद्धातोरिती लेर परत्वे च भिदिरिसादि निर्देशाः। अनंगस्य निपातनादित्वे। तत्र भिदृशादेः पूर्वेण्हकारस्येत्संज्ञा त
अवयवग्रहणात्सिद्धं। रेफस्यात्रहल्त्वं समिति भविष्यति। इकारस्योपदेशेऽजनुनासिक इदिति। अवयवग्रहणादिति चेदिदिद्धिषिप्रसं
गः। अवयवग्रहणाद्दिद्धिषिरपि प्राप्नोति। भेत्ताछेत्ता। इदितो नुम् धातोरिति नुम् प्राप्नोति। यदि पुनरयमिदिद्धिषिः कुंभीधान्यन्यायेन वि
ज्ञायेत। तद्यथा। कुंभीधान्यः श्रोत्रिय इत्युच्यते। यस्य कुंभ्यामेव धान्यं स कुंभीधान्यः। यस्य च पुनः कुंभ्यां चान्यत्र च धान्यं नासौ कुंभी
धान्यः। नायमिदिद्धिषिः कुंभीधान्यन्यायेन शक्यो विज्ञातुं। इह हि दोषः स्यात्। टुनदि। नंदथुरिति। एवं तर्हि नैवं विज्ञायते इकार इद्यस्य
सोयमिदित् तस्येदित इति। कथं तर्हि इकार एवेत् इरदित इदिदंतस्येति। अथवा ह्रस्वकारस्येवेदमित्वभूतस्य ग्रहणं। तस्य चोपदेशे जनु
नासिक इतीत्संज्ञा भविष्यति। अथवा आचार्यप्रवृत्तिर्ज्ञापयति। नैवंजातीयकानामिदिद्धिषिर्भवतीति। यदयमिरितः कांश्चिन्नुम
नुषक्तान्पठति। उंदिर् निशामने। स्कंदिर् गतिशोषणयोः। अथवा आचार्यप्रवृत्तिर्ज्ञापयति इर् शब्दस्येत्संज्ञा भवतीति। यदयमिरितो
तइत्वरपरत्वे। इरितो वेत्यत्रापि स्ह इरस्येति समासे कृते निपातनादित्वरपरत्वयोः कृतयोरिरित इति निर्देशः। नुमनुषक्तानिति। नुमा नकारोत्र स्थाने नकारयुक्तानित्य
र्थः। न च लोपाभावार्थो नकारोपदेश इति वक्तुं शक्यं। अनकारोपदेशेपीदित्वान्नलोपस्याप्रसंगः। तस्मान्नकारोपदेशे नेरितामिदित्कार्याभावो ज्ञाप्यते। न दृश इति कृतादेशानि
षेधेनापीरितामित्कार्याभावो ज्ञायते। अन्यथा दृशेरिदित्वान्नुमि सति इगुपधत्वाभावात्किरेव कस्य नास्तीति किं तन्निषेधेन। अंत इति। गोः पादांत इत्यतः। तेनांतेदि
तां धातूनां नुमागमो न तु मध्येदितां॥

तस्य लोपः ॥ ॥ तस्य ग्रहणमिति । अभावो लोपः स चाभावो षष्ठ्याधिकरेव प्रतीयते नान्यथेति प्रकरणादित्संज्ञस्यैव लोपो भविष्यतीति प्रश्नः । विभक्तिविपरिणाम इति ।

तस्य लोपः ॥ ॥ तस्यग्रहणं किमर्थं । इत्संज्ञकः प्रतिनिर्दिश्यते । नैतदस्ति प्रयोजनं । प्रकृतमिदिति वर्त्तते तेन प्रकृतं । उपदेशेऽजनुनासिक इति । तद्वै प्रथमानिर्दिष्टं । षष्ठीनिर्दिष्टेन चेहार्थः । अर्थाद्विभक्तिविपरिणामो भविष्यति । तद्यथा । उच्चानि देवदत्तस्य गृहाणि । आमन्त्रयस्वैनं देवदत्तमिति गम्यते । देवदत्तस्य गावो अश्वा हिरण्यं च । आढ्यो वैधवेयः । देवदत्त इति गम्यते । पुरस्तात्षष्ठीनिर्दिष्टं सदर्थाद्द्वितीयानिर्दिष्टं प्रथमानिर्दिष्टं च भवति । एवमिहापि पुरस्तात्प्रथमानिर्दिष्टं सदर्थात्षष्ठीनिर्दिष्टं भविष्यति । इदं तर्हि प्रयोजनं । ये अनेकाल इतस्तेषां लोपः सर्वादेशो यथा स्यात् । अथ क्रियमाणेऽपि वै तस्य ग्रहणे कथमिव लोपः सर्वादेशो लभ्यः । लभ्य इत्याह । कुतः । वचनप्रामाण्यात् । तस्य ग्रहणसामर्थ्यात् । इतो लोपे णल्क्त्वानिष्ठा सूपसंख्यानमित्प्रतिषेधात् । इतो लोपे णल्क्त्वानिष्ठासूपसंख्यानं कर्त्तव्यं । णल् । अहं पपच । क्त्वा । देवित्वा सेवित्वा । निष्ठा । शयितः शयितवान् । किं पुनः कारणं न सिध्यति । इत्प्रतिषेधात् । प्रतिषिध्यते तत्रेत्संज्ञा । णलुत्तमो णि-द्वा भवति । क्त्वा सेट् न किद्भवति । निष्ठा सेट् न किद्भवतीति ॥ ॥ ॥

सादृश्यात्तत्ताध्यवसायाद्विपरिणामव्यवहारः । वाक्यान्तरे तु योग्यविभक्त्यन्तं परमार्थतः शब्दान्तरमेव सन्निधीयते । तस्य ग्रहणसामर्थ्यादिति । अलोऽन्त्यस्येत्यस्य लो-पे प्रसक्ते तस्य ग्रहणेन समुदायस्य लोपः प्रतिपाद्यते ॥ ॥

यग्रहणप्रतिषेधादिति। नैतेषामित्संज्ञाप्रतिषिध्यते। किंतु तत्प्रतिबद्धं कार्यमित्यर्थः। निर्दिष्टलोपादेरिति। तस्येत्यनेनेत्संज्ञाशब्देन निर्दिष्टस्य परामर्शादसत्यामपीत्संज्ञायां लोपो भवतीत्यर्थः। तुस्मानामिति। यद्यसत्यामपीत्संज्ञायां लोपो भवति तदा तुस्मानामपि प्राप्नोति। ते हि हलंत्यमित्यत्र निर्दिष्टाः न वेति। इत्संज्ञाप्रतिषे

सिद्धं तु णलादीनां ग्रहणप्रतिषेधात्। सिद्धमेतत्। कथं। णलादीनां ग्रहणं निप्रतिषिध्यंते। णलुत्तमो वा णिद्ग्रहणे न गृह्यते। ल्यासेरान् क्ङित्ग्रहणे न गृह्यते। निष्ठा सेण्न क्ङित्ग्रहणे न गृह्यत इति। निर्दिष्टलोपाद्वा। निर्दिष्टलोपाद्वा सिद्धमेतत्। अथवा निर्दिष्टस्य यल्लोपः क्रियते तस्मात्सिद्धमेतत्। न त्रतुस्मानां प्रतिषेधः। न त्रतुस्मानां प्रतिषेधो वक्तव्यः। तस्मात्। तस्मिन्। यस्मात्। यस्मिन्। वृक्षाः। प्लक्षाः। अचिनवं। असुनवं। अकरवं। न वोच्चारणसामर्थ्यात्। न वा वक्तव्यः। किं कारणं। उच्चारणसामर्थ्यात् अत्र लोपो न भविष्यति। अनुबंधलोपे भावाभावयोर्विप्रतिषेधादप्रसिद्धिः। अनुबंधलोपे भावाभावयोर्विरोधादप्रसिद्धिः। न ज्ञायते केनाभिप्रायेण प्रसजति। केन निवृत्तिं करोतीति। सिद्धं त्वपवादन्यायेन। सिद्धमेतत्। कथं। अपवादन्यायेन। किं पुनरिह तथा यथोत्सर्गापवादौ। भावो हि कार्यार्थोऽनन्यार्थो लोपः। कार्यं करिष्यामीत्यनुबंध आसज्यते। कार्यादन्यन्माभूदिति लोपः॥ ॥

षेधादेषामित्कार्यं नास्ति। यदि चानेन लोपः स्यादुपदेशस्तेषामनर्थकः स्यात्। अनुबंधलोप इति। यथा कश्चिद्वक्ति घटोऽस्तीति पुनश्च वक्ति नास्तीति तथानुबंधानामुच्चारणात् भावानुज्ञानं लोपविधानाच्चाभावानुज्ञेति विरोधादप्रामाण्यप्रसंगः। सिद्धमिति। यथाऽपवादोऽन्यार्थो बाधते तथा कार्यचरितार्थ उच्चारणत्वात् भावं लोपोऽ

नन्यार्थो बाधते॥ ॥

एकांत इति। एकदेश अवयव इत्यर्थः। अनेकांतस्तूपलक्षणमेव केवलं। यथा गृहस्य काकः। तत्रोपलम्भस्य (मान॰) रूपद्वयदर्शनात् वृक्षे शाखाबलाकयोरि
वेति प्रश्नः। एकांतस्तत्रोपलब्धेरिति। ननु पदेवसे शाय निमित्ते स एव कथं निश्चय हेतुः। उच्यते। सामर्थ्यादवधारणमाश्रीयते तत्रैवोपलब्धे
रिति। अवयवस्तत्रैवोपलभ्यते। अनवयवस्तु तत्र चान्यत्र च। ननु वकारस्य वनवृणारक्षादिषूपलब्धिः। न चासावनवयवः। नैष दोषः।

अथ यस्यानुबंध आसज्यते किं स तस्यैकांतो भवत्याहोस्विदनेकांतः। एकांतस्तत्रोपलब्धेः। एकांत इत्याह। कुतः। तत्रोपलब्धेः।
तत्रस्थो ह्यसावुपलभ्यते। तद्यथा। वृक्षस्था शाखा वृक्षैकांता उपलभ्यते। तत्रासरूपसर्वादेशदाप्प्रतिषेधेषु पृथक्त्वनिर्दे
शोऽनाकारांतत्वात्। तत्रासरूपविधौ दोषो भवति। कर्मण्यण्। आतोऽनुपसर्गे कः इति। कविषयेऽणपि प्राप्नोति। सर्वादेशे
च दोषो भवति। दिव औत्। औत्सर्वादेशः प्राप्नोति। दाप्प्रतिषेधे पृथक्त्वनिर्देशः कर्तव्यः। अदाप् दैप् इति वक्त
व्यं। किं पुनः कारणं न सिध्यति। अनाकारांतत्वात्। ननु चात्वे कृते भविष्यति। न ह्यात्वं प्राप्नोति। किं कारणं। अनेज
॰न्तत्वात्॥ ॥

भिन्नसमुदायविषयं वर्णांतरमेव तदिति शाकुनिभाष्ये प्रतिपादितं। तत्रासरूपेति। अनाकारांतत्वादित्येतद्दाप्प्रतिषेध इत्यनेनैव सामर्थ्या
त्संबध्यते। कविषय इति। एकांतत्वे वैरूप्यात्समावेशाप्रसंगः। अनेकांतत्वे तु भावप्रकाराविति सारूप्यात्समावेशः। अनेजंतत्वादिति। यथा ढौक
तेः ककारस्यैकांतत्वादात्वं न भवत्येवं दैपोऽपि न प्राप्नोति। उपदेशग्रहणाच्चुलुम्पेपि पकारेण न प्राप्नोति॥ ॥०॥ ॥

अस्तु नहीति। कार्यलक्षणाय केवलमनुबन्ध उपात्तः न तु तस्यावयवः वृत्तिविशेष इति। बहुव्रीहिर्न सिध्यति। अनेकान्तत्वे कड इत्यस्येति संबन्धाभावात्। अ
नन्तर इति। यद्यप्यनन्तरादिषु बहुव्रीहिर्न भवति तथापीह वचनसामर्थ्याद्भवति। अवसितपाठादिति अवसितानां विच्छिन्नानां पाठः कर्तव्यः। ततः पू
र्वस्यैवासावनन्तरः न तु परस्य। कालव्यवधानात्। व्याख्यानत इति। एकान्तपक्षे एकोवयवो द्वयोर्न भवतीति संदेहे व्याख्यानाच्चिच्छ्रयः। अनेकान्तत्वे त्वानन्तर्ये सो

अस्त्वनन्तर्येनेकान्ताः। अनेकान्ते वृत्तिविशेषः। यदि अनेकान्तो वृत्तिविशेषो न सिध्यति किं तिणीनीति कार्याणि न सिध्यन्ति। किं हि सन्तस्येद्
वृत्तिर्येन लन्तं स्यात्। एवं तर्ह्यनन्तरः। अनन्तर इति चेत्पूर्वोत्तरयोरित्लन्तप्रसंगः। अनन्तर इति चेत्पूर्वोत्तरयोरित्लन्तं प्राप्नोति। वुञ्छ
ण्। सिद्धं तु अवसितपाठात्। सिद्धमेतत्। कथं। अवसितपाठः कर्तव्यः। वुञ्छण्। ण्यचावपरं कर्तव्यः। इतरथा ह्येकान्तेपि सं
देहः। अक्रियमाणे अवसितपाठे एकान्तेपि संदेहः स्यात्। तत्र न ज्ञायते किमयं पूर्वस्य भवत्याहोस्वित्परस्येति। संदेहमात्र
मेतद्भवति। सर्वसंदेहेषु चेदमुपतिष्ठते व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति पूर्वस्येति व्याख्यास्यामः। वृत्ता
द्वा। वृत्ताद्वा सिद्धमेतत्। वृद्धिमन्तमाशु हान्त्र दृष्ट्वा निर्दिशति अवसेयं अन्तोदात्तं दृष्ट्वा किदिति। युक्तं पुनर्यद्वृत्तनिमित्तको नामानुबं
धः स्यान्नानुबन्धनिमित्तकेन नाम वृत्तेन भवितव्यं॥ ॥ ॥

भयापेक्षस्य विरोधाभावाद्यवसितपाठ एव कर्तव्यः। वृत्ताद्वेति। वृत्तं प्रयोगः। तत्राचार्यो भवतु वृत्तज्ञः शिष्यास्तु कथं प्रतिपद्यन्ते। व्याख्यानाच्चेत्पूर्व
मेवैतदुक्तं वृत्ताद्वेत्यनेन किं तदेवोच्यते। नैष दोषः। पूर्वं हेतुरहितं व्याख्यानमुक्तं। वृत्ताद्वेत्यनेन तु हेतुरुच्यते। तस्मिन्प्रतिपन्ने साध्यं स्वयमेवावैति। भा
ष्यकारेण वा तदुक्तमिदं वार्त्तिककारेण॥ ॥ ॥

मेदः इति। यद्यप्यनेकान्तपक्षस्यापि ज्ञापकमेतद्व्याख्यातुं युज्यते तथापि हेत्वरहितत्वादिहानेकान्तपक्षो भाष्यकृता सक्तः। प्रदेशान्तरे त्वनेकान्तपक्षेणा
पि व्यवह्रियते सिद्धमनुबन्धस्यानेकान्तत्वादिति॥ ॥यथासंख्यं॥ ॥संख्यासंख्यानं गणनमुच्यते। अनुदेशशब्दस्य संबन्धिशब्दत्वाद् उद्देशापेक्षि

त्वं तन्निमित्तक एवानुबन्धः कृत्स्नो ह्याचार्योऽनुबन्धानासजति। उभयमिदमनुबन्धेषूक्तम्। एकान्ता अनेकान्ता इति। किमत्र न्याय्यम्।
अनेकान्ता इत्येव न्याय्यम्। कुत एतत्। अत्र हि हेतुर्व्यपदिष्टः यच्च नाम सहेतुकं तन्न्याय्यम्। ननु चोक्तम्। तत्रास्वरूपसर्वादेशदाप्प्रति
षेधेषु पृथक्त्वनिर्देशोऽनाकारान्तत्वादिति। अस्वरूपविधौ तावन्न दोषः। आचार्यप्रवृत्तिर्ज्ञापयति नानुबन्धकृतमसारूप्यं भ
वतीति। यदयं ददातिदधात्योर्विभाषां शास्ति। यदप्युक्तं सर्वादेश इति। तत्राप्याचार्यप्रवृत्तिर्ज्ञापयति नानुबन्धकृतम
नेकाल्त्वं भवतीति। यदयं शित्सर्वस्येत्याह। यदप्युक्तं दाप्प्रतिषेधे पृथक्त्वनिर्देशः कर्तव्य इति। न कर्तव्यः। आचार्य
प्रवृत्तिर्ज्ञापयति नानुबन्धकृतमनेजन्तत्वं भवतीति। यदयमुदीचां माङो व्यतिहार इति मेङः सानुबन्धकस्यात्वभूत
स्य ग्रहणं करोति॥ ॥यथासंख्यमनुदेशः समानाम्॥ ॥किमिहोदाहरणम्। इकोयणचि। दध्यत्र मध्वत्र। नैतदस्ति। स्था
ने ऽन्तरतम इत्येव सिद्धम्॥ ॥ ॥

त्वः। तेनायमर्थः। समानां समसंख्यानां मध्ये यथागणनमुद्देशिभिः सहानुदेशिनः संबध्यन्ते। इकोयणचीति इक्शब्देन चत्वारः स्थानिनः
प्रत्याय्यन्ते यण्शब्देनापि चत्वार आदेशा इत्यस्त्यन्योन्यसंख्यासाम्यं। पश्चात्तु यद्यपीकारादिभिर्बहूनां ग्रहणं संभवति तथापि प्रथमतोऽस्त्येव संख्यासाम्यं॥०॥

इदंतर्हीति। नात्र स्थानकृतमान्तर्यमस्ति नापि देशप्रवृत्तिकाले येन कृतान्तर्यसंप्रत्ययः प्रवर्तनानामादेशानां स्थानसंख्याभिधानात्। ननु चेति। निसानां शब्दानां प्र
योगादर्थकृतमान्तर्यमस्त्येवेति भावः। किमर्थमिति। पाठक्रमेणैव संबंधो भविष्यतीति भावः। संज्ञासमासनिर्देशादिति। परस्मैपदानां णल्तुसि सत्र संज्ञ

कुत आन्तर्यं। तालुस्थानस्य तालुस्थानः ओष्ठस्थानस्यौष्ठस्थानो भविष्यतीति। इदंतर्हि तस्थस्थमिपां तान्तंतामः इति। ननु चैतदपि
स्थानेन्तरतम इत्येव सिद्धं। कुत आन्तर्यं। एकार्थस्यैकार्थो द्व्यर्थस्य द्व्यर्थो बहूर्थस्य बहूर्थो भविष्यतीति। इदंतर्हि तूदी सल्तातुरव
र्मती कूचवारादु कु छ णए ठ न्यक इति। किमर्थमिदमुच्यते। संज्ञासमासनिर्देशाः क्रियन्ते। संज्ञया तावत्। परस्मैपदानां
णल्तुस्तुस्थल पुस णल्वमा इति। समासेः। तूदी सल्तातु[illegible]रवर्मती कूच वारादु कु णठ न्यक इति। संज्ञासमासनिर्देशादे
तस्मात्कारणात् सर्वप्रसंगः सर्वस्योद्देशस्य सर्वोनुदेशः प्राप्नोति। इष्यते च समसंख्यं यथा स्यादिति तच्चान्तरेण यत्नं न सिध्यती
ति तत्र यथासंख्यवचनं नियमार्थं एवमर्थमिदमुच्यते। किं पुनः कारणं संज्ञया च समासेषु निर्देशाः क्रियन्ते। संज्ञासमासनि
र्देशाः पृथग्विभक्तिसंस्सनुच्चारार्थः। संज्ञया च समासेषु निर्देशाः क्रियन्ते पृथग्विभक्तीः संज्ञिनस्तु मोच्चीचरमिति॥०॥

×संज्ञासमासनिर्देशात्सर्वप्रसंगोनुदेशस्तत्र यथासंख्यवचनं नियमार्थं ×५

यासेर्वे युगपत्प्रसाप्यंते इति नास्ति पाठक्रमाद्व्यवस्था। लोकेप्यजाविधनौ देवदत्तयज्ञदत्ताविति समासनिर्देशे नास्ति क्रमनियमः द्वंद्वेऽनेकावयवात्म
कः समुदाय एकैकेन शब्देन प्रसाप्यत इति कुतः क्रमनियमः स्यात्। किं पुनरिति। तिपो णल्तसोऽतुसि सादिकस्मान्न क्रियत इति प्रश्नः॥ ॥

=शब्दधर्मेणेति॰ वाच्यवाचकयोरभेदोपचारादिति भावः।२=शतृक्वसो रिति॰ तयोर्लादेशत्वादिति भावः।२=

विदोलटोवेति। एषद्धि॰ देशो क्रियमाणोसमसेाेमइसेवानंतर्यात्संबध्येते सर्थेः। अवहितानामपि स्वरितत्वादनुवृत्तावाश्रीयमाणायां प्रतिपत्तिगौरवप्रसंगः। किंपुनरिति। यद्यप्यर्थे शब्दस्य गुणभावादर्थत एव साम्यं न्याय्यं। तथापि शब्दधर्मेणाप्यर्थस्य व्यपदेशो दृश्यते। यथा भ्रमरशब्दस्य द्विरेफत्वाद्द्विरेफो भ्रमरः। तथा द्व्यक्षरं मां संद्व्यक्षरमस्थि। तस्माच्छब्दतोपि साम्यमत्राशंकितं। णलादय इति। परस्मैपदशब्देन प्रकृतानामेव नवानां ग्रहणं न तु शतृक्वसोरित्यर्थ तः साम्यमस्ति न तु श

मकरणेोचसर्वसंप्रसयार्थेः। मकरणेोचसर्वेषां संप्रसयोयथास्यात्। विदोलटोवेति। किंपुनः शब्दतः साम्ये संख्यातानुदेशोभवत्साहोस्वि दर्थतः। कश्चात्र विशेषः। संख्यासाम्यं शब्दतश्चेण्णलादयः परस्मैपदानां डारौरसः प्रथमस्यायवायावएचइत्स निर्देशः। आगमको निर्देशं अनिर्देशः। परस्मैपदानां णलतुसुस्थलथुसणल्वमा इति णलादयः बहवः परस्मैपदानामिस्तेकः शब्दः वैषम्यात्सं ख्यातानुदेशो न प्राप्नोति। डारौरसः प्रथमस्य। डारौरसो बहवः प्रथमस्येकः शब्दः। वैषम्यात्संख्यातानुदेशो न प्राप्नोति। ए चोऽयवायावः। अयवायावो बहवः एच इत्येकः शब्दः वैषम्यात्संख्यातानुदेशो न प्राप्नोति। अस्तु तर्ह्यर्थतः॥ अर्थतश्चेल्लल्लुटो नेन्यरीहणसिंधुतक्षशिलादिषु दोषः। अर्थतश्चेल्लल्लुटोर्नेयरीहणसिंधुतक्षशिलादिषु दोषो भवति॥ ॥

शब्दतः। डारौरस इति। यदा डारौरसः श्लेषेकशेषः क्रियते तदार्थतः संख्यासाम्यमस्ति। आगमक इति। संख्यासाम्यस्यानवबोधक इत्यर्थः। लल्लुटोरिति। लशब्दस्य लृ डूलटावर्थाविति साम्याभावः। यदा तु तुल्यरूपं सामान्यमर्थो लशब्दस्येति पक्षस्तदास्त्येव साम्यमिति दोषाभावः। नेयादिषु प्रत्ययेन विग्रहः समुदायः समासार्थ इ साश्रीयमाणो समुदायत्रयापेक्षया प्रत्ययत्रयस्य साम्यसद्भावाद्दोषः॥ ×श्च डारौरस×२ ॥७॥ ॥ ॥

आत्मनेपदेति। नन्वात्मनेपदसंज्ञानतङ् शब्दस्य किं तु तस्य सा पितानांनवानांनादीनामिति नास्य स्थैतः साम्यं। नैष दोषः। तङ् रूपापन्नास्तादय आत्मनेप

स्यतासी ल्लृलुटोः। स्यतासी द्वौ। ल्लृलुटौ २ स्य स्यत्रयोर्थोः वैषम्यात्संख्यातानुदेशो न प्राप्नोति। नंदिग्रहिपचादिभ्यो ल्युणिन्यचः। नंद्यादयो
बहवः। ल्युणिन्यचस्त्रयः। वैषम्यात्संख्यातानुदेशो न प्राप्नोति। आरीहणादयो बहवः वुञादयः सप्तदश। वैषम्यात्संख्यातानुदेशो न प्रा
प्नोति। सिंधुतक्षशिलादिभ्योण्ञौ। सिंधुतक्षशिलादयो बहवः। अणञौ द्वौ। वैषम्यात्संख्यातानुदेशो न प्राप्नोति। आत्मनेपद
विधिनिष्ठासार्वधातुकक्लिग्रहणेषु। आत्मनेपदविधिनिष्ठासार्वधातुकक्लिग्रहणेषु दोषो भवति। आत्मनेपदविधिस्तन सिध्य
ति। अनुदात्तङित आत्मनेपदं। अनुदात्तङितौ द्वौ। आत्मनेपदमिति सस्य द्वावर्थौ तत्र संख्यातानुदेशः प्राप्नोति। निष्ठा। रदाभ्यां निष्ठा
तो नः पूर्वस्य च दः इति रेफदकारौ द्वौ निष्ठेत्यस्य द्वावर्थौ तत्र संख्यातानुदेशः प्राप्नोति। सार्वधातुकक्लिग्रहणेषु च दोषो भवति। अस्मसोर
ल्लोपः। श्नमस्ती द्वौ सार्वधातुकमित्यस्य द्वावर्थौ। तत्र संख्यातानुदेशः प्राप्नोति। एङः पूर्वरूपत्वे प्रतिषेधः। एङः पूर्वरूपत्वे
प्रतिषेधो वक्तव्यः। एङः पदान्तादति। ङसिङसोश्च। ङसिङसौ द्वौ एङिति तस्य द्वावर्थौ तत्र संख्यातानुदेशः प्राप्नोति॥ ॥

दशाब्देन प्रसाप्यं तङ् इत्यस्ति साम्यं। सार्वधातुकक्लिग्रहणेष्विति। द्वौ गृह्येते येषु तानि क्लिग्रहणानि सार्वधातुकस्य क्लिग्रहणानीति समासः। सार्वधातुकम
पित्तेषु गृह्यते तङ्तिते न विशेष्यंते॥ ॥

भा०कै०प्र०
२५७
257

संवृतावर्ण इति। यद्यपि शास्त्रे ह्रस्वाकारस्य विवृतोपदेशः कृतस्तथापि लौकिकप्रयोगापेक्षयैतदुक्तं। क्ङितौ द्वाविति क्ङिच्छब्दस्यैकत्वेपि ककारङकारयोर्द्वित्वादस्ति यथासं
ख्यं साम्यं। उदिकूल इति। हृद्योर्यो रागं तु नाचेकारेण निर्देश इति चोद्यं। उदीति पंचम्याः स्थाने सप्तमी कृता। उदः परस्माभ्यां रुजिवहीभ्यां सेना भ्यामिति परिहारः। धातु

अस्तु तर्हि शब्दतः। ननु चोक्तं संख्यासाम्यं शब्दतश्चेत्सल्लादयः परस्मैपदानां णलौरसः प्रथमस्याथवायावेचस्तस्य निर्देश इति। नैष दोषः।
स्थानेन्तरतम इत्यनेन व्यवस्था भविष्यति। कुत आन्तर्यं। एकार्थस्यैकार्थो द्व्यर्थस्य द्व्यर्थः बह्वर्थस्य बह्वर्थः। संवृतावर्णस्य संवृतावर्णः। वि
वृतावर्णस्य विवृतावर्णः। अतिप्रसंगो गुणवृद्धिप्रतिषेधे क्ङिति। अतिप्रसंगो भवति गुणवृद्धिप्रतिषेधे क्ङिति। गुणवृद्धी द्वे क्ङितौ द्वौ।
तत्र संख्यातानुदेशः प्राप्नोति। नैष दोषः। गकारोप्यत्र निर्दिश्यते। तदुकारग्रहणं कर्तव्यं। न कर्तव्यं। क्रियते न्यास एव। क्ङकारेग
कारश्चर्त्वभूतो निर्दिश्यते गिति किति ङितीति। उदिकूले रुजिवहोः। उदिकूले द्वे। रुजिवही द्वौ। तत्र संख्यातानुदेशः प्राप्नोति। नैष दोषः।
नोदिरूपपदं किं तर्हि विशेषणं रुजिवहोः। रुस्त्वोर्भ्यां रुजिवहिभ्यां कूल उपपद इति। तच्छीलादिषु धातुत्रिग्रहणेषु। तच्छीलादिषु धातु
त्रिग्रहणेषु दोषो भवति। विदिभिदिच्छिदेः कुरच्। विदिभिदिच्छिदयस्त्रयः तच्छीलादयस्त्रयः। संख्यातानुदेशः प्राप्नोति। घञादिषु
द्विग्रहणेषु। घञादिषु द्विग्रहणेषु दोषो भवति। निरभ्योः पूल्वोः। निरभी द्वौ। पूल्वौ द्वौ तत्र संख्यातानुदेशः प्राप्नोति। नैष दोषः। इष्यते
चात्र संख्यातानुदेशः। निष्पावः अभिलाव इति। एवं तर्हि अकर्तरि च कारके भावे चेति द्वौ पूल्वौ तत्र संख्यातानुदेशः प्राप्नोति॥ ॥

त्रिग्रहणेष्विति। त्रीणि ग्रहणानि येषां ते त्रिग्रहणाः। धातवस्त्रिग्रहणा येषु तच्छीलादिषु इति पुनर्बहुव्रीहिः॥ ॥श्रीरामकृष्णौ जयतः॥ ॥छ॥

राम०
२५७

कर्त्तृकर्मणोरिति॥ भवतेरकर्मकत्वात्कर्त्तर्येवोपपदं। करोतेस्तूपपदद्वये खलिष्यते। अन्ये तु प्राप्त्यर्थस्य भवतेरुपपदद्वये प्रत्ययमिच्छंति। छंदो ब्राह्मणानीति। गो
बलीवर्दन्यायेन छंदःशब्देन मंत्राणां ग्रहणं। यथा जुष्टार्पिते छंदसीति ब्राह्मणानां ग्रहणं निःसंमंत्र इति मंत्रग्रहणात् छंदोग्रहणे नैव तु ब्राह्मणानां ग्रहणमिति

अवेत्यस्त्रोः॥ करणाधिकरणयोः। त्यस्त्रौ द्वौ करणाधिकरणे द्वे तत्र संख्यातानुदेशः प्राप्नोति। कर्त्तृकर्मणोश्च भूकृञोः। कर्त्तृकर्मणी द्वे भूकृञौ द्वौ
तत्र संख्यातानुदेशः प्राप्नोति। अनवक्लृप्त्यमर्षयोरकिंवृत्तेपि। अनवक्लृप्त्यमर्षौ द्वौ किंवृत्ताकिंवृत्ते द्वे तत्र संख्यातानुदेशः प्राप्नोति। कृभ्वोः
स्नात्वामुलौ। कृभ्वौ द्वौ स्नात्वामुलौ द्वौ तत्र संख्यातानुदेशः प्राप्नोति। अधीयानविदुषोश्छंदोब्राह्मणानि। छंदोब्राह्मणानीति द्वे अधीते
वेदेति च द्वौ तत्र संख्यातानुदेशः प्राप्नोति। शेपधेनोः पथिद्रुतयोः। शेपधेनोः प्राचां तद्रुच्छति पथिदूतयोः। शेपधेनौ द्वौ पथिदूतौ द्वौ तत्र संख्यातानु
देशः प्राप्नोति। तत्रभवस्तस्य व्याख्यानः ऋतुयज्ञेभ्यश्च। तत्रभवस्तस्य व्याख्यानौ ऋतुयज्ञौ द्वौ तत्र संख्यातानुदेशः प्राप्नोति। संघादिष्वभ्रम
तयः। संघादिष्वभ्रमतयः संख्यातानुदेशेन न सिध्यंति। नैष दोषः। घोषग्रहणमपि तत्र कर्त्तव्यं। वेशोयशआदेर्भगाद्यल्खौ। वेशोयशआ
दी द्वौ यल्खौ द्वौ तत्र संख्यातानुदेशः प्राप्नोति। ङसिङसोः ख्यसात्परस्य। ङसिङसौ द्वौ ख्यसौ द्वौ तत्र संख्यातानुदेशः प्राप्नोति। नवा समानयोग
वचनात्। नवा एष दोषः। किं कारणं। समानयोगवचनात्। समानयोगे संख्यातानुदेशं वक्ष्यामि। तस्य दोषो विदोलटो वा। तसैस्तसलक्ष
णस्य दोषः विदोलटो वेति संख्यातानुदेशो न प्राप्नोति। ध्माधेटोः नाडीमुष्ट्योश्च। ध्माधेटोः नाडीमुष्ट्योश्च संख्यातानुदेशो न प्राप्नोति॥ ब॥

द्वे ब्राह्मणविशेषप्रतिपत्त्यर्थं पुनर्ब्राह्मणग्रहणं कृतं। तेन याज्ञवल्क्यानि ब्राह्मणानीति तद्विषयता न भवति। नवेति। अनुदेश उच्चारणं। योगांतरेणु शब्दांतरस्यानुमा
नेन तूच्चारणमिति न्यायप्राप्त एवायमर्थः। विदोलटो वेति। अत्र तु यथासंख्यामनुमानाद्दोषः॥ ॥५॥ ॥

लब्र

युष्मदस्मदोश्चेति। बहुवचनस्य वस्नसाविसादिषु योगेषु अनुमीयमानत्वात् युष्मदस्मदोर्यथासंख्यं न प्राप्नोति। यस्मिन्पक्ष इति। शब्दतः साम्यमेकयोगेचे
त्येषपक्षः आश्रयितव्य इत्याहुः। दोषप्रतिविधानं तु कैश्चिदिदं तयाख्यायते कश्चिदनभिधानाभिधानाभ्यामिति कर्तव्यं। अपरे वेति। यत्र स्वरितत्वप्र
तिज्ञायते तत्रैव शब्दतोऽर्थतो वा साम्याश्रयणं नान्यत्र सत्यपि संख्यासाम्ये॥ ॥स्वरितेन॥ ॥स्वरितेनेतीत्थंभूतलक्षणे तृतीया। स्वरितेनाधि

खलगोरथादिनित्रकट्यचश्च। संख्यातानुदेशो न प्राप्नोति। गिंसिंख्यपकराभ्यां कन् अणौ च संख्यातानुदेशो न प्राप्नोति। युष्मद
स्मदोर्युष्मदादेशाः। युष्मदस्मदोर्युष्मदादेशाः संख्यातानुदेशान्न सिध्येति। तस्माद्यस्मिन्पक्षे त्वीयोर्लोपो दोषाः तमास्थाय प्रतिविधे
यं दोषेषु। अपर एवं वक्ष्यामि। यथासंख्यमनुदेशः समानां स्वरितेन। ततोऽधिकारः। अधिकारश्च भवति स्वरितेनेति। एवमपि
स्वरितं दृष्ट्वा संदेहः स्यात् न ज्ञायते किमयं सम संख्यार्थः आहोस्विदधिकारार्थ इति। सन्देहमात्रमेतद्भवति। सर्वसंदेहेषु चेद
मुपतिष्ठते व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति। समसंख्यार्थ इति व्याख्यास्यामः॥ ॥स्वरितेनाधिकारः॥ ॥किमर्थमिद
मुच्यते। अधिकारः प्रतियोगं तस्यानिर्देशार्थः। अधिकारः क्रियते प्रतियोगं तस्यानिर्देशार्थ इति। किमिदं प्रतियोगमिति। योगं योगं प्रतिप्रति
योगं। योगे योगे तस्य ग्रहणं मा कार्षमिति। किं गतमेतदियता सूत्रेण। गतमित्याह। कुतः। लोकतः। तद्यथा। लोकेऽधिकृतो सौ ग्रामे धिकृतो

कारेलक्ष्यत इत्यर्थः॥ स्वरितत्वं सूत्रस्यानां केवलमधिकारज्ञानार्थं प्रतिज्ञायते न तु प्रयोगसमवायि। अधिकारशब्दः भावसाधनः कर्मसाधनो वा। विनियोगः
लोकेऽधिकार उच्यते स एवेह गृह्यते। किमर्थमिति। आकांक्षादिवशात्प्रकृतस्य संबन्धो लोक इवेह भविष्यतीति प्रश्नः। किं गतमिति। किमयमर्थोऽधिकारशब्देन परिगृहीतो

॥यनेतिप्रश्नः॥ ॥श्री॥ ॥

शब्देनेति। नहि परिसंख्यारूपः शब्दस्य व्यापारोऽस्ति। न वेति। वचनरहितात् लोकव्यवहारादेतत्साध्योऽर्थः सिद्ध इत्यर्थः। यज्ञदत्तायेति। संप्रदानविभक्त्या सन्निहिता गौः कर्मका-
रकं ददातिक्रियापेक्ष्यते। अश्रुतकल्पनायाः श्रुतापेक्षणं स्याल्लाघवात्। घत्रो निवर्तकः स्यादिति। तत घाकोशे वेत्योर्थ इत्यादिषु नेतरत्र अनुवृत्तिः स्यात्। स्पष्टं घत्रः स्वरि-

ताद्ये न चाप्यधिकृतेनकोऽन्यो व्यापारः शक्यो वक्तुं अन्यदन्यो योगे योग उपस्थानात्। न वा निर्दिश्यमानाधिकृतत्वाद्यथा लोके। न वा एतत्प्र-
योजनमस्ति। किं कारणं। निर्दिश्यमानाधिकृतत्वात्। यथा लोके निर्दिश्यमानमधिकृतं गम्यते। तद्यथा। देवदत्ताय गौर्दीयतां यज्ञदत्ताय वि-
ष्णुमित्रायेति। गौरिति गम्यते। एवमिहापि प्रदर्शनविशेषस्य शोषघत्रस्य स्थिरे भावे घत्रिति गम्यते। अन्यनिर्देशस्तु निवर्तकस्तस्मात्परि-
भाषा। अन्यनिर्देशस्तु लोके निवर्तको भवति। तद्यथा देवदत्ताय गौर्दीयतां विष्णुमित्राय कंबल इति कंबलो गोर्निवर्तको भवति। एव-
महापि अभिविधौ भाव इनुण् घत्रो निवर्तकः स्यात्। तस्मात्परिभाषा कर्तव्या। अधिकारपरिमाणज्ञानं तु। अधिकारपरिमाणज्ञा-
नं तु भवति। न ज्ञायते कियन्तमवधिमधिकारोऽनुवर्तत इति। अधिकारपरिमाणज्ञानार्थं तु। अधिकारपरिमाणज्ञानार्थमेवं तर्हि अयं यो-
गो वक्तव्यः अधिकारपरिमाणं ज्ञास्यामीति। कथं पुनः स्वरितेनाधिकार इत्यनेनाधिकारपरिमाणं शक्यं विज्ञातुम्। एवं वक्ष्यामि। स्वरितेनाधिका-
र इति। स्वरितं दृष्ट्वाधिकारो न भवतीति। केनेदानीमधिकारो भविष्यति लौकिकोऽधिकारः॥ ॥७॥ ॥

तत्र प्रतिज्ञानादनुवृत्तिर्भवति न त्विह गुणो विपर्ययात्। अधिकारपरिमाणज्ञानं त्विति। यथा धातोरिति किं मास्तादेशेभ्यो ध्यायपरिसमाप्तेः। अङ्गाधिकारः
प्राग्भ्यात् सविकारेभ्यो यासप्तमपरिसमाप्तेरिति। स्वरितत्वदृष्टेति। प्रकृतस्याधिकारनिवृत्तये शब्दान्तरस्य स्वरितत्वं प्रतिज्ञायते। तेन विंशतिकात्तत्र इत्यत्र स्वरितत्वदर्शनाद्
ऽऽत्रिशत्वारिंशस्य निवृत्तिरनुमीयते॥ ॥ ॥

यावतिथ इति। द्वित्रिप्रभृतीन्निष्कादिसूत्र इकारोऽनुबन्धः कर्त्तव्यः। तेन द्वयोर्योगयोरनुवृत्तिर्भवति। एवमन्यत्रापि वेदितव्यं। अल्पीयांस इति। कथं पुनर्भिन्नजातीयापेक्षया प्रकर्षप्रत्ययः। परमतापेक्षया। अल्पे योगा इति चेन्मन्यसे तत्राल्पीयांसोऽलः। अथ बहवोऽल इति चेद्भूयांसो योगाः। भूयसीति। अङ्गस्य प्राग्भेरित्यादि वक्तव्यं। तत्र हीति।

नाधिकार इति चेदुक्तं। किमुक्तं। अन्यनिर्देशस्तु निवर्त्तकस्तस्मात्परिभाषेति। अधिकारार्थमेव तर्ह्ययं योगो वक्तव्यः। ननु चोक्तमधिकारपरिमाणाज्ञानं लिङ्गिति। यावतिथोऽलनुबन्धस्तावतो योगानिति वचनात्सिद्धं। यावतिथोऽलनुबन्धस्तेतावतो योगानधिकारोऽनुवर्त्तत इति वक्तव्यं। अथेदानीं यत्राल्पीयांसोऽलः भूयसश्च योगानधिकारोऽनुवर्त्तते कथं तत्र कर्त्तव्यं। भूयसि प्राग्वचनं। भूयसि प्राग्वचनं कर्त्तव्यं। प्रागमुत इति वक्तव्यं। तर्हि वक्तव्यं। न वक्तव्यं। संदेहमात्रमेतद्भवति। सर्वसंदेहेषु चेदमुपतिष्ठते व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणमिति। प्रागमुत इति व्याख्यास्यामः। यद्येवं नार्थोऽनेन। केनेदानीमधिकारो भविष्यति। लौकिकोऽधिकारः। ननु चोक्तं नाधिकार इति चेदुक्तं किमुक्तं अन्यनिर्देशस्तु निवर्त्तकस्तस्मात्परिभाषा। संदेहमात्रमेतद्भवति। सर्वसंदेहेषु चेदमुपतिष्ठते व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमित्युक्तं। इनुणघन्निति संदेहे घन्निति व्याख्यास्यामः। नतर्हीदानीमयं योगो वक्तव्यः। वक्तव्यश्च। किं प्रयोजनं। स्वरितेनाधिकाराधिगतिर्यथा विज्ञायेत। अधिकारगतिः अधिकं कार्यं अधिकः कारः। गोस्त्रियोरुपसर्जनस्येत्यत्र गोटाङ्ग्रहणं चोदितं तन्न कर्त्तव्यं भवति। स्त्रीग्रहणं स्वरयिष्यते स्वरितेनाधिकारगतिर्भविष्यतीति स्त्रियामित्येवं प्रकृत्य ये विहितास्तेषां ग्रहणं विज्ञास्यते। स्वरितेनाधिकारगतिर्भवतीति न

यावतिथोऽलिति भूयसि प्राग्वचनं चेत्सर्थः। घन्निति व्याख्यास्याम इति। ननु चेनुणञानन्तर्यात्संदेहाभावः। उच्यते। घञोऽनुवृत्तिसामर्थ्यं दृष्टं इनुणश्चानन्तर्येऽपि

॥ तिनिमित्तसञ्ज्ञावादस्ति संदेहः॥ ॥ ॥श्री॥ ॥

के॰

सांकाश्यकेभ्य इति। बुध्यासमीहितैः कृताः प्रकर्षोऽप्ययेण पाटलिपुत्रका विभज्यन्ते इति मुख्यापायाभावादपादानसंज्ञा न स्यात्। ध्रुवमपाये इत्यस्मिंस्तु स्वरितत्वे प्रति
ज्ञाते सति बुद्धिपरिकल्पितापायाश्रयेणापि भवति। कृत्स्न आधार इति। सर्वे अवयवा यत्र व्याप्ता इत्यर्थः। गंगायां गाव इति। गंगाशब्दोऽत्र नद्यामेव वर्तते ननु

अधिकं कार्यम्। अपादानमाचार्यः किंन्याय्यं मन्यते यत्र प्राप्य निवृत्तिः तेनेहैव स्यात् ग्रामादागच्छति नगरादागच्छति। सांकाश्यकेभ्यः पा
टलिपुत्रका अभिरूपतरा इत्यत्र न स्यात्। स्वरितेनाधिकं कार्यं भवतीत्यत्रापि सिद्धं भवति। तथाऽधिकरणमाचार्यः किंन्याय्यं मन्यते यत्र
कृत्स्न आधार आत्मा व्याप्तो भवति तेनेहैव स्यात् तिलेषु तैलं दध्नि सर्पिरिति। गंगायां गावः कूपे गर्गकुलमित्यत्र न स्यात्। स्वरितेनाधिकं
कार्यं भवतीत्यत्रापि सिद्धं भवति। अधिकं कार्यम्। अधिकः कारः। पूर्वविप्रतिषेधा न पठितव्या भवन्ति गुणवृद्ध्यौत्वतृज्वद्भावेभ्यो नुम्
पूर्वविप्रतिषिद्धं नुमचिरतृज्वद्भावेभ्यो नुडिति। नुम्नुटौ स्वरयिष्यते। तत्र स्वरितेनाधिकः कारो भवतीति नुम्नुटौ भविष्यतः। कथं
पुनरधिकः कार इत्यनेन पूर्वविप्रतिषेधाः शक्या न पठितुम्। लोकतः। तद्यथा। लोकेऽधिकमयं कारं करोतीत्युच्यते योऽयं दुर्बलः स
न्बलवद्भिः सह भारं वहति एवमिहाप्यधिकमयं कारं करोतीत्युच्यते योऽयं पूर्वः सन्परं बाधते। अधिकारगतिरर्थविशेषो याधिकं का
र्यम्। अथ योऽन्योऽधिकः कारः पूर्वविप्रतिषेधार्थः सः॥ ॥ इति श्रीमद्भगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये प्रथमे तृतीये

तत्समीपदेशे तस्य हि मुख्यमेवाधारत्वमित्यसंप्रयोजनमेतत्स्यात्। नद्यास्तु तत्सामीप्याद्गौणमाधारत्वमिति यत्नात्संसिद्धिः। पूर्वे इति। विप्रतिषेधे परं कार्यमिति व
चनात्सर्वो बाध्यः प्रतिज्ञानेन बाधकः संपद्यते तुल्यजातीयस्य बाधकः न तु नित्यत्वादियुक्तस्य॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे प्र॰ तृती
येऽप्रथममाह्निकं॥ ॥

स्वरितत्व॰

अनुदात्तङित आत्मनेपदम्॥ ॥ विकरणेभ्य इति। लादेशेषु कृतेषु नियमार्थत्वेनि सत्वाद्विकरणाः तेषां सार्वधातुकमपिदिति ङित्त्वातिदेशादात्मनेपदनियमो
नेन प्राप्नोति। ङकार इदिति। अन्यपदार्थापेक्षणाद्बहिरङ्गो बहुव्रीहिः। तत्पुरुषस्तु वर्त्तिपदार्थप्रधानत्वादन्तरङ्ग इति स एवाश्रीयते। केवलाच्च ङकारादि
त आत्मनेपदासंभवात्सामर्थ्यान्नं दंतविधेर्वा [illegible] ङित् दंत आश्रीयते। तेन ङिदन्तादात्मनेपदमित्यर्थः। अथवेति। तेनोपदेशे यो ङित् तस्मादात्मनेप

अनुदात्तङित आत्मनेपदम्॥ ॥ विकरणेभ्यः प्रतिषेधो वक्तव्यः। चिनुतः सुनुतः लुनीतः पुनीतः। ङित इत्यात्मनेपदं
प्राप्नोति। नैष दोषः। नैवं विज्ञायते ङकार इद्यस्य सोऽयं ङित् ङित इति। कथं तर्हि ङकार इत् ङित् ङित इति। अथवोपदेश इ
ति वर्त्तते। अथवा क्रमेतत्। सिद्धं तु पूर्वस्य कार्यातिदेशादिति। सर्वेषां च ङ् ङ्भ्यां प्राप्नोति। एवं तर्हि धातोरिति वर्त्तते। कथं प्रकृ
तं। भूवादयो धातव इति। न द्वै प्रथमानिर्दिष्टं पंचमीनिर्दिष्टेन चेहार्थः। अर्थाद्विभक्तिविपरिणामो भविष्यति। तद्यथा। उच्चा
नि देवदत्तस्य गृहाणि आमंत्रयस्वैनं देवदत्त इति गम्यते। देवदत्तस्य गावोऽश्वा हिरण्यं च आढ्यो वैधवेयः देवदत्त इति गम्य
ते। पुरस्तात्षष्ठीनिर्दिष्टं सदर्थात्प्रथमानिर्दिष्टं द्वितीयानिर्दिष्टं च भवति। एवमिहापि पुरस्तात्प्रथमानिर्दिष्टं सदर्थात्पंचमीनि
र्दिष्टं भवति। किमर्थं पुनरिदमुच्यते। आत्मनेपदवचनं नियमार्थम्॥ ॥

दं न लातिदेशिकङिल्लेभ्यः। एवं तर्हीति। अत्रापि पक्षे उच्चुकु टिषतीति प्रसंगनिवारणार्थं सिद्धं तु पूर्वस्य कार्यातिदेशादित्साश्रयणीयं। किमर्थमिति।
किं विहितानां लादेशानामनेन नियमः क्रियते अथवा [illegible] तया विधिरिति प्रश्नः॥ ॥७॥ ॥

नियमार्थ इति। एकवाक्यतायां भाविनी संज्ञा अयि(?)र्णी येति वाक्यमेदः एवाश्रीयते ते न नियमोयं संपद्यते। परत्वादिति। विकरणानामनवकाशः अपत्यादेशस्यान शादयः। नियमस्यावकाशः लिङ्‌लिङौ वार्द्धधातुकसंज्ञौस्य द्वैत इत्सादावुभयप्रसंगे परत्वाद्विकरणाः ते न व्यवधानाच्चियमाप्रसंगः। अनवकाश इति। सर्वत्र विकरणानां व्यवधायकत्वादिति भावः॥ यदि पुनरिति। आत्मनेपदपरस्मैपदाभ्यां लिंगाभ्यां इदं प्रकरणं लादेशविधावुपतिष्ठते। तत्र

नियमार्थोयमारंभः। किमुच्यते नियमार्थोयमिति न पुनर्विध्यर्थोपि स्यात्। लविधानाद्विहितं। लविधानाद्धात्मनेपदं परस्मैपदं च विहितं। अस्तिप्रयोजनमेतत्। किं तर्हीति। विकरणैस्तु व्यवहितत्वान्नियमो न प्राप्नोति। इदमिह संप्रधार्यं विकरणाः क्रियंतां नियम इति। किमत्र कर्तव्यं। परत्वाद्विकरणाः नित्याः खल्वपि विकरणाः कृतेपि नियमे प्राप्नुवंत्यकृतेपि प्राप्नुवंति। नित्यत्वाच्च परत्वाच्च विकरणेषु कृतेषु विकरणैर्व्यवहितत्वान्नियमो न प्राप्नोति। नैष दोषः। अनवकाशो नियमः। सावकाशः कोऽवकाशः। यएते लुग्विकरणाश्च श्लुविकरणाश्च लिङ्‌लिटौ च। यदि पुनरियं परिभाषा विज्ञायेत। किं कृतं भवति। कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्र द्रष्टव्यं। लस्यति वादयो भवंतीत्युपस्थितमिदं भवति अनुदात्तङित आत्मनेपदं शेषात्कर्तरि परस्मैपदमिति॥ [illegible] ॥ ॥ ॥

[illegible]

महावाक्येन विहितेषु लादेशेषु विकरणा इति दोषाभावः। स्यादिषु कथं ते हि लावस्थायामेव विधीयंत इति तैर्व्यवधानान्नियमो न प्राप्नोति। उच्यते। लमात्रापेक्षत्वादंतरंगत्वाल्लादेशेषु कृतेषु लकारविशेषापेक्षया बहिरंगाः स्यादयो भविष्यंति येन नाप्राप्तिन्यायेन शवादीन्बाधित्वा शबादिविधावनुवर्त्तेनाद्धा
१८ ॥०॥ ॥

[illegible]
=अंतरंगाहानं:१=

=परिभाषासंस्कृतोविधिरित्यर्थः:१२=

[illegible]

एवमपीति॥ एकवाक्यतापक्षे विहितात्तादेशानसंतियेन तेषां सतामात्मनेपदपरस्मैपदसंज्ञे स्यातां। ततश्चैतत्पारिभाषोपस्थाने सतिसंज्ञाश्रयं त्ला
देशविधानं त्लादेशविधानाश्रया च संज्ञेतिभावः। परस्मैपदानुक्रमणमिति। नन्वसति परस्मैपदानुक्रमणे परस्मैपदमनुदात्तङित इत्यः प्राप्नोति।

एवमपीतरेतराश्रयं भवति। का इतरेतराश्रयता। अभिनिर्वृत्तानां लस्य स्थाने तिबादीनामात्मनेपदपरस्मैपदसंज्ञया भवितव्यं सं
ज्ञया च तिबादयो भाव्यं तेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्पंते। परस्मैपदेषु जाव न्नेतरेतराश्रयं भ
वति। परस्मैपदानुक्रमणं न करिष्यते। अवश्यं कर्तव्यं। अनुपराभ्यां कृञ इत्येवमर्थं। ननु चैतदप्यात्मनेपदानुक्रमणमेव क
रिष्यते। स्वरितञितः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति कर्त्रर्थे नु पराभ्यां कृञो नेति। आत्मनेपदेषु चापि नेतरेतराश्र
यं भवति। कथं। भाविनी संज्ञा विज्ञास्यते सूत्रशाटकवत्। तद्यथा। कश्चित्कंचित्तंतुवायमाह अस्य सूत्रस्य शाटकं वयेति। सपश्यति
यदि शाटको न वातव्यः। अथ वातव्यो न शाटकः। शाटको वातव्यश्चेति विप्रतिषिद्धं। भाविनी खल्वस्य संज्ञाभिप्रेता स मन्ये वातव्योय
स्मिन्नुते शाटक इत्येतद्भवतीति। एवमिहापि स लस्य स्थाने कर्तव्यः यस्याभिनिर्वृत्तस्यात्मनेपदमित्येषा संज्ञा भविष्यति। अथवा पुन
॥ रस्तु नियमः॥ ननु चोक्तं विकरणेभ्यो वहितत्वान्नियमो न प्राप्नोति॥ ॥

नैष दोषः। आत्मनेपदसंबंधावगमे न तेषां परस्मैपदसंबंधबाधनाच्छेषादेव परस्मैपदमवस्थास्यते। अवश्यमिति। आत्मनेपदबाधनार्थमि
॥ सर्थः॥ ॥ ॥

ननु स्वरितञितः इत्यनेन कर्त्रगामिक्रियाफले आत्मनेपदविधानात् [illegible]

यद्वयमिति ॥ कृतनियमानामसंकरेण स्थितानां हि निमित्तभावोपपत्तिः । अभिनिर्वृत्तानीति । प्रागपि नियमात्तेषां संभवमात्रेण निमित्तत्वाविरोधान्न्याय
त्वे हीति । एतच्चुलिङ्-लिडर्थे स्यात् । चक्रमे चक्रामक्रम्यातेक्रंसीष्टेति । तस्माज्ज्ञापकादिकप्रदर्शितो भाष्यकृता । ज्ञापकं तु वृद्भ्यः स्यसनोरित्यत्र स्ये विकल्पविधा
नां किं पुनरिति । उभयनियमस्तावन्न संभवति । अनेकस्मिन्नर्थे वाक्यस्यैकस्य तात्पर्यायोगात् । तस्मादन्यतरनियमसंभवात्प्रश्नः ॥ ननु प्राधान्यात्प्रत्य

नैष दोषः । आचार्यप्रवृत्तिर्ज्ञापयति विकरणेभ्यो नियमो बलीयानिति । यदयं विकरणाद्विधावात्मनेपदपरस्मैपदान्याश्रय
ति । पुषादिद्युताद्य्लृदितः परस्मैपदेषु आत्मनेपदेष्वन्यतरस्यामिति । नैतदस्ति ज्ञापकं । अभिनिर्वृत्तानि हि लस्यस्थाने आ
त्मनेपदानि परस्मैपदानि च । यत्त्वयमनुपसर्गाद्वेति विभाषां शास्ति । किं पुनरयं प्रत्ययनियमः अनुदात्तङित एवात्मने
पदं भवति भावकर्मणोरेवात्मनेपदं भवतीति आहोस्वित्प्रकृत्यर्थनियमः । अनुदात्तङित आत्मनेपदमेव भावक
र्मणोरात्मनेपदमेवेति । कश्चात्र विशेषः । तत्र प्रत्ययनियमे शेषवचनं परस्मैपदस्यानिवृत्तत्वात् । तत्र प्रत्ययनियमे शेषग्रह
णं कर्तव्यं परस्मैपदनियमार्थं शेषात्कर्तरि परस्मैपदमिति । किं कारणं । परस्मैपदस्यानिवृत्तत्वात् । प्रत्ययानियताः प्रकृत्य
र्थावनियतौ तत्र परस्मैपदमपि प्राप्नोति तत्र शेषग्रहणं कर्तव्यं परस्मैपदनियमार्थं शेषादेव परस्मैपदं भवति नान्यतर
स्येति ॥ ० ॥

यानां तन्नियमो युक्तः । एवं तर्हि प्रधानोपरोधो मा भूदिति प्रकृत्यर्थनियमोऽपि संभवति । भावकर्मणोरेवेति । ननु पूर्वेण नियमाद्भावकर्मणोरिति सूत्रं वि
ध्यर्थं न्याय्यं न तु नियमार्थं । नैष दोषः । समस्तमात्मनेपदप्रकरणमेकं वाक्यमिति तदपेक्षयैतदुक्तं ॥ ॥ ॥

कथमिति॥ वा क्यष इति परस्मैपदे विकल्पिते आत्मनेपदस्यानुदात्तङित् आदिषु नियतत्वादप्राप्तत्वाल्लकारस्य श्रवणप्रसङ्गः। उच्यते चेति। लकारेति बादिभिर्नि-
वृत्तिरिति नियमः प्रवर्त्तते तत्र परस्मैपदस्य सिद्धत्वाद्वावचने न तस्मिन्विकल्प्यमाने वचनमनर्थकं स्यात् केवलायाः प्रकृतेरप्रयोगार्हत्वाच्छब्दान्तरेणार्थस्य प्रति-
पादयितुमशक्यत्वात्प्रयोगविकल्पायोगात्। तस्मादात्मनेपदस्यैव विकल्पेन विधीयते तव्यदादयो पीति। यद्यपि स्थानीयं चूर्णपि सादौकरणादौ

कथमात्मनेपदवचनं तस्मान्यत्र नियमात्। कथमात्मनेपदं वक्तव्यं। लोहितायति लोहितायते। किं पुनः कारणं न सिध्यतीति त-
स्मान्यत्र नियमात्। तथान्यत्र नियम्यते। उच्यते च न च प्राप्नोतीति तद्वचनाद्भविष्यति। अस्तु तर्हि प्रकृत्यर्थे नियमः॥ प्रकृत्यर्थे नियमे-
न्याभावः। प्रकृत्यर्थनियमे अन्येषां प्रत्ययानामभावः। अनुदात्तङित इति तत्र जादयो न प्राप्नुवन्ति। नैष दोषः। अनवकाशास्तृजादयः
। उच्यते च ते वचनाद्भविष्यन्ति। सावकाशास्तृजादयः। कोऽवकाशः। परस्मैपदिनोऽवकाशः। तत्रापि नियमान्न प्राप्नुवन्ति। त-
व्यदादयस्तु भावकर्मणोर्नियमान्न प्राप्नुवन्ति। तव्यदादयोप्यनवकाशाः। ते वचनाद्भविष्यन्ति। चिण्तर्हि भावकर्मणोर्नि-
यमान्न प्राप्नोति। चिण्वचनाद्भविष्यति। घञ्तर्हि भावकर्मणोर्नियमान्न प्राप्नोति। तत्रापि प्रकृते कर्मेयग्रहणमनुवर्त्तते। कर्मप्रकृ-
१८ तं। अपरा कर्मणीति चेति॥

न्यवकाशः तथापि तयोरेवेति चोदनया भावकर्मणोर्द्विधानं तदनवकाशं। चिण्तर्हीति। ननु भावकर्मणी सार्वधातुकस्यार्थे निचिणः तत्कथमप्राप्तिश्चोद्यते। सहा-
भिधानपक्षे चिणोपि भावकर्मणी अर्थो विसदोषः। घञ्तर्हीति। अकर्तरि विधीयमानो पादानादिषु घञ्सावकाशः॥ ॥ ॥

उपपदविशेषणमिति॥ सप्तमीस्थस्य सामान्यस्य कर्मणीत्यनेन विशेषस्य प्रतिपादना उपपदविशेषणमुच्यते। एवमभिधेयविशेषणे नेति व्याख्येयं। कर्त्तरि चेति। यदा कर्मवदित्ययं शास्त्रातिदेशः तदा कर्मकर्त्तरि परत्वात्परस्मैपदं प्राप्नोति। शुद्धौ तु कर्मकर्त्तरौ उभयोरवकाशौ। कार्यातिदेशे तु परत्वादात्मनेपदं सिध्यति॥

तद्धैतन्नोपपदविशेषणं। अभिधेयविशेषणे न चेहार्थः। न चान्यार्थं प्रकृतमन्यार्थं भवति। न खल्वप्यन्यत्प्रकृतमनुवर्त्तनादन्यद्भवति। न हि गोधा प्रसर्प्पन्ती सर्प्पणादहिर्भवति। यत्तावदुच्यते। नान्यार्थं प्रकृतमन्यार्थं भवतीति। अन्यार्थमपि प्रकृतमन्यार्थं भवति। तद्यथा। शाल्यर्थं कुल्याः प्रणीयन्ते ताभ्यः पानीयं पीयते उपस्पृश्यते शालयश्च भाव्यन्ते। यदप्युच्यते न खल्वप्यन्यत्प्रकृतमनुवर्त्तनादन्यद्भवति न हि गोधा प्रसर्प्पन्ती सर्प्पणादहिर्भवतीति। भवेद्द्रव्येष्वेतदेवं स्यात्। शब्दस्तु खलु येन येनाभिसंबध्यते तस्य तस्य विशेषको भवति। शेषवचनं च। शेषवचनं च कर्त्तव्यं। शेषात्कर्त्तरि परस्मैपदमिति। किं प्रयोजनं। शेषनियमार्थं। प्रकृतस्यार्थौ नियतौ प्रत्ययावनियतास्ते शेषेपि प्राप्नुवंति तत्र शेषग्रहणं कर्त्तव्यं। शेषात्कर्त्तरि परस्मैपदमेव नान्यदिति। कर्त्तरि चात्मनेपदविषये परस्मैपदप्रतिषेधार्थं द्वितीयं शेषग्रहणं कर्त्तव्यं। शेषाच्छेष इति वक्तव्यं। इह माभूत् भिद्यते कुसूलः स्वयमेवेति। कतरस्मिन्पक्षेऽयं दोषः। प्रकृतस्यार्थे नियमपक्षे प्रकृतस्यार्थे नियमे तावन्न दोषः। प्रकृतस्यार्थौ नियतौ प्रत्ययावनियिताः तत्र नार्थः कर्त्तृग्रहणेन॥०

प्रकृतस्यार्थौ नियताविति भावकर्मणोरात्मनेपदमेवेति नियमादितरेणापि कर्त्तृग्रहणं कर्त्तर्येव परस्मैपदं लभ्यत इति नार्थः कर्त्तृग्रहणेन॥ ——॥श्री॥०॥

=अस्मिन्पक्षे कर्त्तर्यात्मनेपदं मा भूत् [illegible] शेषात्परस्मैपदमेवेत्येतावतैव नियमेन [illegible]मितिभावः।१२=

भा० कै० प्र०
२६३
263

कर्तृग्रहणाच्चेति। परस्तादुपरिहरिष्यते। परस्मैपदमिति। सिद्धे परस्मैपदे पुनर्विधानमात्मनेपदनिवृत्त्यर्थं संपद्यत इत्यर्थः। नास्य किंचिदिति। पीडारूपं भावस्वभा

कर्तृग्रहणाच्चैष दोषः। प्रत्ययनियमे तर्ह्ययं दोषः। प्रत्यया नियताः प्रकृत्यर्था अनियतास्तत्र कर्तृग्रहणं कर्त्तव्यं भावकर्मणोर्नि
वृत्त्यर्थं। कर्तृग्रहणाच्चैष दोषः। प्रकृत्यर्थनियमे शेषग्रहणं शक्यमकर्तुं। कथं। प्रकृत्यर्था नियताः प्रत्ययास्त्वनियताः। ततो वक्ष्या
मि परस्मैपदं भवतीति। तन्नियमार्थं भविष्यति। यत्र परस्मैपदं चान्यच्च प्राप्नोति तत्र परस्मैपदमेव भवतीति। तत्र हि प्रत्ययनि
यमे द्वितीयः शेषग्रहणात्कर्त्तव्यः। न कर्त्तव्यः। योगविभागः करिष्यते। अनुदात्तङितः आत्मनेपदं भावकर्मणोः। ततः कर्त्तरि कर्
त्तरि चात्मनेपदं भवति भावकर्मणोः। ततः कर्मव्यतिहारे। कर्त्तरि एव। भावकर्मणोरिति निवृत्तं। यथैवं तर्हि कर्मणि कर्त्त
रि भवत्येवं भावेऽपि कर्त्तरि प्राप्नोति। एति जीवन्तमानन्दः। नास्य किंचिद्रुजतीति। द्वितीयो योगविभागः करिष्यते। अनुदा
त्तङितः आत्मनेपदं। ततः भावे। ततः कर्मणि। कर्मणि चात्मनेपदं भवति। ततः कर्त्तरि। कर्त्तरि चात्मनेपदं भवति कर्मणि
अनुवर्त्तते भाव इति निवृत्तं। ततः कर्मव्यतिहारे। कर्त्तरि एव। कर्मणीति निवृत्तं॥ ॥ श्री॥ ॥

वेवस्थित्यर्थः। यदि तर्हि कर्मणि कर्त्तर्यात्मनेपदं भवति हन्त्यमानोऽहं तील्वत्रा प्राप्नोति। नैष दोषः। प्रत्यासत्त्यैकधातुविषयं कर्मकर्तृत्वं विज्ञायते। यस्य
स्याश्रयं कर्तृत्वं कर्मशास्त्रातिदेशाच्चौपचारिकं कर्मत्वं तत्रैव भवति॥ ॥

अनुपराभ्यां कृञ इसेवमर्थमिति। एषहि योगो ऽयं विहितः। कर्त्रन्तरप्राप्त्याद्यात्मनेपदापवादत्वाच्च बलवानिति न शक्यते योगविभागेन बाधितुं। ननु चैतदपी
ति। प्राप्तिमात्रे योगविभागेन बाध्यते। ननु चेयमिति। पूर्वविप्रतिषेधेनेति भावः। शेषादित्यस्यावकाशः यातिवातीति। अनुपराभ्यामित्यस्यावकाशं अशेषः कर्त्र
भिप्रायफलविषयः अनुकरोतीति। कर्मकर्त्तर्युभयप्रसंगे पूर्वविप्रतिषेधेन शेषादिति प्राप्तिर्भवति। सापि योगविभागेन बाध्यते। नोत्सहते इति। शेषादिति

एवमपि शेषग्रहणं कर्त्तव्यं अनुपराभ्यां कृञ इसेवमर्थं। इह मा भूत्। अनुक्रियते स्वयमेव पराक्रियते स्वयमेव। न
नु चैतदपि योगविभागादेव सिद्धं। नेत्याह। अनन्तरा या प्राप्तिः सा योगविभागेन शक्या बाधितुं। कुत एतत्। अनन्तरस्य
विधिर्वा भवति प्रतिषेधो वेति। परा प्राप्तिरप्रतिषिद्धा तया प्राप्नोति। ननु चेयं प्राप्तिः परां प्राप्तिं बाधते। नोत्सहते प्रतिषि
द्धा सती बाधितुं। एवं तर्हि कर्त्तरि कर्मव्यतिहार इत्यत्र कर्तृग्रहणं प्रत्याख्यायते तत्र कृतमुत्तरत्रानुवर्तिष्यते। शेषात्क
र्त्तरि कर्त्तरीति। किमर्थमिदं कर्त्तरि कर्त्तरीति। कर्त्रैव यः कर्त्ता तत्र यथा स्यात्। कर्त्तो चान्यस्य यः कर्त्ता तत्र माभूदिति। तत अनुप

प्राप्तिर्योगविभागेनापवादविषयाद्विषयान्तरं नीता नोत्सहते परां प्राप्तिं बाधितुमित्यर्थः। ॐ एवं चेयं योगविभागप्राप्तिरविशेषादनुपराभ्यामित्येताम
पि प्राप्तिं बाधिष्यत इत्यर्थः॥ नोत्सहत इति। अपवादत्वादनुपराभ्यामित्येतया प्राप्त्या प्रतिषिद्धा नोत्सहते तामेव बाधितुमित्यर्थः॥ कर्त्रैव यः कर्त्तेति। यस्य
पदे शान्तरं नास्तीत्यर्थः। यद्येवमसिश्छिनत्तीति करणकर्त्तरि न प्राप्नोति। नैष दोषः। कर्त्रवस्थायां करणत्वाभावात्। भिद्यते कुसूलः स्वयमेवेत्यत्र तु स्वाश्र
यं कर्त्तृत्वमातिदेशिकं तु कर्मत्वमिति न भवति परस्मैपदं॥ ॥ ॥

=नन्वेवं सर्वक्रियाणामेव स्वेन करणत्वं प्रहरणं तद्दलत्वं व्यतीहाराभावे नानेन प्रहरणं स्यादत आह· परस्परस्येति· परस्परसंबंधिकरणमित्यर्थः। नन्वेवमप्येकक्रिया निरूपितकारकशक्त्यभावो नोपपादितः प्रहारणं भिन्नभिन्नत्वादत आह· अन्यैरिति·

भा०कै०प्र०
२६४
२६५

कर्त्तरि॥ ॥क्रियाव्यतिहार इति वक्तव्यमिति। असत्यस्मिन् लादकृत्रिमस्यैव साधनकर्मणो ग्रहणं प्राप्नोति। साधनकर्मणि च धातोर्हसस्संभवाद्धात्वर्थे स्यात द्विषयत्वं विज्ञायेत। देवदत्तस्य धान्यमिति। देवदत्तस्वामिकं धान्यं लवने स्वीकुर्वतीत्यर्थः। क्रियाणां साध्यैकस्वभावानां कथं व्यतिहार इति चेत्। योऽयं तावत्प्रारब्धे यं क्रियासाध्या तस्या इदं साधनमिति निर्ज्ञाते साध्यसाधनभावे योऽयमसौ सः सक्रियाव्यतिहारः। परस्परकरणमपि क्रियाव्यतिहारः। यथा संप्रहरन्ते राजान इति। अन्यैः

कर्त्तरि कर्मव्यतिहारे॥ ॥क्रियाव्यतिहार इति वक्तव्यं। कर्मव्यतिहार इत्युच्यमाने इहापि प्रसज्येत। देवदत्तस्य धान्यं व्यतिलुनन्तीति। इह च न स्यात्। व्यतिलुनते व्यतिपुनत इति। तत्तर्हि वक्तव्यं। न वक्तव्यं। क्रिया हि लोके कर्मेत्युपचरन्ति। कां क्रियां करिष्यसि किं कर्म करिष्यसीति। एवमपि कर्त्तव्यं। कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययो भवति। क्रियापि कृत्रिमं कर्म। न सिध्यति। कर्तुरीप्सिततमं कर्मेत्युच्यते। कथं च क्रिया नाम क्रियया ईप्सिततमा स्यात्। क्रियापि क्रियया ईप्सिततमा भवति। कया क्रियया। संपश्यति क्रियया प्रार्थयति क्रियया अध्यवस्यति क्रियया च। इह य एष मनुष्यः प्रेक्षापूर्वकारी भवति स बुद्ध्या तावत् कंचिदर्थं संपश्यति संदृष्टे प्रार्थना प्रार्थिते अध्यवसायः अध्यवसाये आरंभः आरंभे निर्वृत्तिः निर्वृत्तौ फलावाप्तिः। एवं क्रियापि कृत्रिमं कर्म। एवमप्युभयोः कृत्रिमयोरु-
भयगतिः प्रसज्येत। तस्मात् क्रियाव्यतिहार इति वक्तव्यं॥ ॥ ॥

कैव क्रिया संचारिणी वलक्ष्यते। क्रियामिति। लौकिकाश्चार्थो इहानूद्यते। कथं च क्रियेति। द्वयोरपि साध्यत्वात् परस्परसंबंधमलाभमस्याः क्रियापीति। भोक्तुमिच्छति भोक्तुं जानातीति दर्शनात्। कया क्रिययेति। क्रियान्तरवाचिप्रयोगाभावात् अस्याः संपश्यति क्रिययेति। संदर्शनादीनामव्यभिचारात् प्रतीयमानत्वात् प्रतीयमानक्रियापेक्षया च प्रविशन्ति पिण्डीमित्यादौ कर्मादिभावदर्शनात्॥ ॥ ॥

प्र०
२६४

=...ततः फलावाप्तिरित्यर्थः।

=...कंचिदर्थमिति· अर्थः फलरूपः। संपश्यतीति फलविषयसंकल्पो न दर्शनं· तत्फलोपायविषयो मिलापः प्रार्थना· तदुपायक्रिया ... विशेषणफलसाधनत्वनिश्चयो अध्यवसायः· तदभिलाषेण लिप्सया करणं तत्... इति

इह कर्त्तरीति॥ क्रियायाः साध्यत्वात्प्राधान्यात्क्रिययाप्युमिष्टतमत्वाच्चार्थे न क्रियाप्रवर्त्तनात्कर्मणोऽपि प्राधान्यात् उभयव्यतिहारे लब्धे कर्मग्रहणात् क्रियाव्यति

नवक्तव्यं॥ इह कर्त्तरि व्यतिहार इतीयता सिद्धं। सोयमेवं सिद्धे सति यत्कर्मग्रहणं करोति तस्यैतत्प्रयोजनं क्रियाव्यतिहारे यथा स्यादिति। अथ कर्त्तृग्रहणं किमर्थं। कर्मव्यतिहारादिषु कर्त्तृग्रहणं भावकर्मनिवृत्त्यर्थं। कर्मव्यतिहारादिषु कर्त्तृग्रहणं क्रियते भावकर्मणोरात्मनेपदं मा भूदिति। इतरथाहि तत्र प्रतिषेधे भावकर्मणोः प्रतिषेधः। अक्रियमाणे कर्त्तृग्रहणे भावकर्मणोरप्यात्मनेपदमनेन प्रसज्येत। तत्र को दोषः। तत्र प्रतिषेधे भावकर्मणोः प्रतिषेधः। तत्र प्रतिषेधे भावकर्मणोरप्यनेनात्मनेपदस्य प्रतिषेधः प्रसज्येत। व्यतिगम्यन्ते ग्रामाः व्यतिहन्यन्ते दस्यव इति। नवानन्तरस्य प्रतिषेधात्। नवा एष दोषः। किं कारणं। अनन्तरस्य प्रतिषेधात्। अनन्तरं यदात्मनेपदविधानं तस्य प्रतिषेधः। कुत एतत्। अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति। पूर्वा प्राप्तिरप्रतिषिद्धा तया भविष्यति। ननु चेयं प्राप्तिः पूर्वां प्राप्तिं बाधते। नोत्सहते प्रतिषिद्धा सती बाधितुं। उत्तरार्थं तर्हि कर्त्तृग्रहणं कर्त्तव्यं। न कर्त्तव्यं। क्रियते तत्रैव शेषात्कर्त्तरि परस्मैपदमिति। द्वितीयं कर्त्तृग्रहणं कर्त्तव्यं। किं प्रयोजनं। कर्त्तैव यः कर्त्ता तत्र यथा स्यात् कर्त्ता चान्यश्च यः कर्त्ता तत्र मा भूदिति॥ ॥ न गतिहिंसार्थेभ्यः॥ प्रतिषेधे हसादीनामुपसंख्यानं कर्त्तव्यं। व्यतिहसन्ति। व्यतिजल्पन्ति। व्यतिपठन्ति॥ ॥ ॥

हारोयं गम्यते क्रियायाः धातुवाच्यत्वादन्तरङ्गत्वात्। तत्र प्रतिषेध इति। कर्मव्यतिहारे न गतिहिंसार्थेभ्य इत्यनेन प्रतिषेध इत्यर्थः॥ ॥ न गतीति॥ हसादीनामिति। हसिप्रकाराणां शब्दक्रियाणामित्यर्थः॥ ॥ ॥

हरिवह्योरिति॥ हरतेर्हिंसार्थत्वाद्वहतेर्गत्यर्थत्वात्प्राप्तिः। ततः संप्रहरिष्यन्तौ द्रष्टाकर्णौ धनंजयाविति तत्र व्यतिहारो न विवक्षितः किं तर्हि योत्स्यमानाविति तावद्विवक्षितं।
देशान्तरप्रापणक्रिय इति। भारं वहतीत्यादौ देशान्तरप्राप्त्युपसर्जनं प्रापणमस्य वाच्यं। तत्र तु गतिर्नान्तरीयकत्वात्प्रतीयते न तु सौ धात्वर्थः। अस्यैवस्यायसिद्धार्थस्या
नुवादकमर्थग्रहणं। गर्गाणां तु प्रापणं कस्माद्धारकमिति वहेर्गत्यर्थत्वाभावः॥ ॥इतरेतरा॥ लौकिकशब्दव्यवहारेत्वाघवादितरेतरादिशब्दा उपसर्गाश्चकर्मव्यतिहारद्यो
तनाय प्रयुज्यन्ते॥ ॥विपराभ्यां जेः॥ विशब्द इति। पक्षिवाची तु यो विशब्दः तस्य नपुंसकत्वाभावात्सुप्सिविभक्त्या व्यवधानादेरनन्तरो जयतिर्न संभवति। बहु विजयति

हरिवह्योरप्रतिषेधः। संप्रहरन्ते राजानः। संविवहन्ते गर्गा इति। न वहिर्गत्यर्थः। देशान्तरप्रापणक्रियोत्र वहिः॥ ॥इतरेतरान्योन्योपपदा
च्च॥ परस्परोपपदाच्चेति वक्तव्यं। परस्परस्य व्यतिलुनन्ति। परस्परस्य व्यतिपुनन्ति॥ ॥विपराभ्यां जेः॥ उपसर्गग्रहणं कर्त्तव्यं। इह मा भूत्। परा
जयति सेनेति। तत्तर्हि वक्तव्यं। न वक्तव्यं। यद्यपि तावदयं पराशब्दो दृष्टापचार उपसर्गश्चानुपसर्गश्च। अयं खलु विशब्दोऽदृष्टापचार उप
सर्ग एव तस्यास्य कोन्यो द्वितीयः सहायो भवितुमर्हत उपसर्गादेव तद्यथा। अस्य गोर्द्वितीयेनार्थ इति गौरेवोपादीयते नाश्वो न गर्दभ इति॥०॥

वनमित्यत्र जहत्स्वार्थायां वृत्तौ विशेषणानर्थक्यादिह चार्थवतो ग्रहणादजहत्स्वार्थायामपि तदर्थस्योपसर्जनत्वादग्रहणं संबुध्यतां तत्तु वेदान्निरूपान्तरयुक्तत्वान्न युज्यते। एक
देशविकृतस्यानन्यत्वाद्विशब्द एवायमिति चेत्। विरिसत्यविभक्तिकं तत्स्यवेरिति विकारो न तु विशब्दस्येत्यदोषः। वीजयत इत्यत्र एकादेशस्य पूर्वं प्रत्यन्तवद्भावाद्विशब्दात्परो जयतिः
संभवत्येवेति चेत्। पूर्वस्य कार्ये कर्त्तव्येऽन्तवद्भावः। न चात्र शब्दस्य किंचित्कार्यमित्यदोषः। अस्य गोरिति। द्वितीयशब्दो लोके प्रयुज्यमानो यदपेक्षं द्वितीयत्वं तत्तुल्यजातीय एव सं
प्रत्ययं करोति। एवमिहापि विशब्दसाहचर्यात्पराशब्दोप्युपसर्ग एव गृह्यते। पक्षिवाचिनो विशब्दस्य संभवेऽपि द्वयोरपि दृष्टापचारत्वात्परस्परसाहचर्याद् उपसर्गग्रहणं व्याख्येयं॥०॥

=यपपिमर्दस्यामित्यादौ तु दृश्यतये पूर्वसंबंधिनिकार्ये नवज्ञावद्भावस्थाश्रयणात् तथापि पूर्वसंबंधित्वं विधेये व्यवहितमेवशाद्य मित्यपाद्यान्तरं ततो सिद्धिः। २= अर्द्ध धिकविकारस्यैकदेशविकृतत्वात्प्रकृतेराह पक्षिवाचिन इति। १=

आङो दो॥ ॥ अव्यसनक्रियस्येति। व्यसनं विभागः विकासनमित्यर्थः। केवलो विहरणशब्दः उपादीयमानः पादविहरणं गमयति। तास्यग्रहणं स्वाङ्गेकृतं। केवलो व्यसनशब्दो दुःखादिषु वर्त्तते इति वार्त्तिके क्रियाग्रहणं कृतं। आङो दो नास्य इति। आस्यसमवायिन्यां क्रियायां ददातिर्वर्त्तमान आस्यवृत्तिर्भवति। यथालोमविषयहर्षणवृत्तिर्हृषिर्लोमसु वर्त्तत इत्युच्यते। ददातेरेवास्यवृत्तिसंभवो नान्येषां दारूपाणां इति तेषामिह ग्रहणाभावः। यद्येवं स्वमुखं आदत्त इत्यत्रमुखविषयत्वाद्दादानस्य प्रतिषेधः प्राप्नोति। नैष दोषः। आस्यसमवेतैव या क्रिया तस्यां वृत्तौ ददातिरास्यवृत्तो भवति। ग्रहणं तु आस्यग्रहीतविषयं। आ नास्य इति च प

आङो दो नास्यविहरणे॥ ॥ आङो दोः व्यसनक्रियस्य। आङो दोः व्यसनक्रियस्येति वक्तव्यं। इहापि यथा स्यात्। विपादिकां व्याददाति कूलं व्याददातीति। तत्तर्हि वक्तव्यं। न वक्तव्यं। इहाङो दो नास्य इतीयता सिद्धं। सोयमेवं सिद्धे सति यद्विहरणग्रहणं करोति तस्यैतत्प्रयोजनं आस्यविहरणसमानक्रियादपि यथा स्यात्। यथाजातीयका चास्यविहरणक्रिया तथाजातीयका त्रापि। स्वाङ्गकर्मकाच्च। स्वाङ्गकर्मकाच्चेति वक्तव्यं। इह मा भूत्। व्याददते पिपीलिकाः पतङ्गस्य मुखमिति॥ ॥ क्रीडोनुसंपरिभ्यश्च॥ ॥ उपसर्गग्रहणं कर्त्तव्यं। इह मा भूत्। अनुक्रीडति माणवकमिति। समोऽकूजने। समः अकूजने इति वक्तव्यं। इह मा भूत् संक्रीडन्ति शकटानि। आगमेः क्षमायां। आगमेः क्षमायामुपसंख्यानं कर्त्तव्यं। माणवकं आगमयस्व तावत्॥ ॥ ॥

युदासः। आस्यानास्यसमुदाय व्यासस्य सदृशः इति विधिरेव तत्र भवति। सोयमिति। आस्यग्रहणं विहरणविशेषोपलक्षणार्थमित्यस्य स्यास्ये विहरणसङ्गावान्निषेधो मा भूत्। स्वाङ्गकर्मकादिति। स्वमङ्गं स्वाङ्गं ननु पारिभाषिकमद्रवं मूर्त्तिमत्स्वाङ्गमिति। तेन परकीयास्य विहरणे विधिरेव भवति॥ ॥ क्रीडोनु॥ ॥ अनुक्रीडतीति। तृतीयार्थे इत्यनुः कर्मप्रवचनीयसंज्ञः। माणवकेन सह क्रीडतीत्यर्थः। एतच्च समासाहचर्यात्लभ्यते। आगमय स्वेति। सहस्व कंचित्कालं मात्वरिष्ठा इत्यर्थः॥

=तेनमुखविपादिके व्याददन्त इत्येवप्रयोगः। १= स्वाङ्गरूपस्यास्यस्य कर्मणि विहरणादत्रात्मनेपदमित्यर्थः। २=

=ननु जिज्ञासायामित्यसंगतं ज्ञानेच्छाहितदर्थः। तस्यैव ज्ञानं शक्तो विषयः शक्तिः सन्नर्थं च्छायामिति चेन्न ज्ञानविशिष्टायाः शक्तेरिच्छाविषयतया ज्ञानस्यापि तत्त्वानपायात् इयांस्तु विशेषः इच्छासनर्थः शक्तिः प्रकृत्यर्थः तस्य ज्ञानविषयत्वमानेपदयोरमिति २= विशंक्षितासितुमित्याद्यर्थे

=प्रतिपत्ते कृतान् १=
=एवंशक्तिस्वभावात्=
=विषयत्वात्मनेपदमितिग्=
=लोपः किरतीतात्मनेपदं १=

शिक्षेरिति॥ केचिदाहुः शक्तिः सन्नन्तो गृह्यते इति विध्यर्थे मिदं। क्रियाविषयस्य शक्तिः प्रयुज्यते। भोक्तुं शक्नोति पाययितुं शक्नोतीति प्रयोगदर्शनात् आहु ह तु जिज्ञासाविषयः शक्तिर्गृह्यते। विद्यां जिज्ञासितुं घटत इत्यर्थः। आत्मनेपदेनैव जिज्ञासाया अवगमात् जिज्ञासितुमिति न प्रयुज्यते। अन्ये तु शिक्ष विद्योपादान इत्यस्य ग्रहणं नियमार्थं वर्णयन्ति। विधेरेव तु जायस्वास्सन्नन्तशक्तिग्रहणं न्याय्यं। किरतेरिति। विक्षेपार्थः किरतिः। हर्षादयस्तु विषयत्वेनोपात्ताः हर्षादिष्वेव अपाच्चतुष्पादिति सुड्विधीयते। हरतेरिति। गतं प्रकारः। पैतृकमिति। पितुरागतं प्रकारं सततं शीलयन्तीत्यर्थः। मातुरनुहरतीत्यत्र

शिक्षेर्जिज्ञासायां॥ शिक्षेर्जिज्ञासायामुपसंख्यानं कर्त्तव्यं। विद्यासु शिक्षते। धनुषि शिक्षते। किरते हर्षजीविकाकुलायकरणेषु। किरतेर्हर्षजीविकाकुलायकरणेषूपसंख्यानं कर्त्तव्यं। अपस्किरते वृषो हृष्टः अपस्किरते कुक्कुटो भक्षार्थी। अपस्किरते श्वाश्रयार्थी। हरतेर्गततताच्छील्ये। हरतेर्गततताच्छील्ये उपसंख्यानं कर्त्तव्यं। पैतृकमश्वा अनुहरंते। मातृकं गावोनुहरंते। आङि नुप्रच्छ्योः। आङि नुप्रच्छ्योरुपसंख्यानं कर्त्तव्यं। आनुते शृगालः। आपृच्छते गुरुमिति। आशिषि नाथः। आशिषि नाथ उपसंख्यानं कर्त्तव्यं। सर्पिषो नाथते मधुनो नाथते। शप उपलंभने। शप उपलंभन उपसंख्यानं कर्त्तव्यं। देवदत्ताय शपते। यज्ञदत्ताय शपते॥ ॥समवप्रविभ्यः स्थः॥ आङः स्थः प्रतिज्ञाने। आङः स्थः प्रतिज्ञान इति वक्तव्यं। अस्तिं सकार (मातिष्ठते। आगमो गुणवृद्धी आतिष्ठते विकारो गुणवृद्धी आतिष्ठते॥ ॥ ॥

सादृश्यमात्रे विवक्षिते न तु प्रकारता च्छील्यमित्यात्मनेपदं तद्धितार्थस्य च भाष्यकारेण न कृतं। आशिषि नाथ इति। आशिष्येव नाथ इति नियमार्थमिदं। सर्पिषो नाथते इति। सर्पिर्मे भूयादित्याशास्त इत्यर्थः॥ आनुत इति। उत्कण्ठापूर्वकं शब्दं करोतीत्यर्थः। शप उपलंभन इति। उपलंभनं प्रकाशनं। देवदत्ताय शपत इति। श्लाघ ह्नुङ् इति संप्रदानसंज्ञा। ज्ञीप्समानेति विवरणं। केचिदाहुः॥ यस्मा आख्यायते स संप्रदानं यदाख्यायते स इत्यस्य॥ ॥ ॥

=नस्य प्रकारस्याविच्छेदेन शीलं= =नतात्त्वील्यं १=

=णिजर्थकर्मणः तस्य कर्तृत्वं च कर्मणश्च यद्यपि बोधनेच्छाविषयतास्ति तथापि प्रधानभूतं णिजर्थकर्मैव ग्राह्यमित्याशयः। एवं च देवदत्ताय शपत इत्यस्य देवदत्तं स्वाशयं बोधयतीत्यर्थ इति १= अन्य इति प्रथमोपस्थितत्वात् सकर्मकैर्वा ग्राह्यमित्याशयः। देवदत्तं परस्मै बोधयतीति तु वाक्यार्थः। १=

उदोनूर्ध्वकर्मणि ॥ ॥ उदईहायामिति । ईहा विशिष्टा चेष्टा कायपरिस्पन्दात्मिका गृह्यते । उत्तिष्ठति सेनेति । उत्पद्यते जायते सेनेत्यर्थः ॥ ॥ उपान्मंत्र ॥ ॥ उपाद्देवपूजेति । उपमंत्रकरणार्थमिदं । आर्कमुपतिष्ठत इति । देवपूजां मत्वात्मनेपदं कृतं । चापलमेतत् न पूजनमिति न कृतमपरत्र । अपरत्राहेति । संगतकरणमुपश्ले

उदोनूर्ध्वकर्मणि ॥ ॥ उदईहायां । उदईहायामिति वक्तव्यं । इह मा भूत् । उत्तिष्ठति सेनेति ॥ ॥ उपान्मंत्रकरणे ॥ ॥ उपाद्देवपूजासंगतकरणयोः ॥ उपाद्देवपूजासंगतकरणयोरिति वक्तव्यं । आदित्यमुपतिष्ठते । चंद्रमसमुपतिष्ठते । संगतकरणे । रथिकानुपतिष्ठते । अश्वारोहानुपतिष्ठते । बहूनामप्यचित्तानामेको भवति चित्तवान् । पश्य वानरसैन्येस्मिन्यदर्कमुपतिष्ठते । मैवं मंस्थाः सचित्तोयमेषोपि हि यथा वयं । एतदप्यस्य कापेयं यदर्कमुपतिष्ठति । अपर आह । उपाद्देवपूजासंगतकरणमित्रकरणपथिष्विति वक्तव्यं । संगतकरणमुदाहृतं । मित्रकरणे । रथिकानुपतिष्ठते । अश्वारोहानुपतिष्ठते । पथिषु । अयं पंथाः स्रुघ्नमुपतिष्ठते । अयं पंथाः साकेतमुपतिष्ठते । वा लिप्सायां । वा लिप्सायामिति वक्तव्यं । भिक्षुको ब्राह्मणकुलमुपतिष्ठते । भिक्षुको ब्राह्मणकुलमुपतिष्ठति ॥ ॥ उद्विभ्यां तपः ॥ ॥ अकर्मकाद्विसेवा । उत्तपति सुवर्णं सुवर्णकारः ॥ स्वांगकर्मकाच्च । स्वांगकर्मकाच्चेति वक्तव्यं । ९ उत्तपते पाणी वितपते पाणी । उत्तपते पृष्ठं वितपते पृष्ठं ॥ ॥ ॥

पमात्रं मित्रकरणं त्वनुपश्लिष्टस्यापि मैत्रीसंबंधः । अयं पंथाः स्रुघ्नमुपतिष्ठत इति । स्रुघ्नं प्राप्नोतीत्यर्थः । भिक्षुक इति । लिप्सया हेतुभूतया ब्राह्मणकुलमुपगच्छतीत्यर्थः ॥ ॥ उद्विभ्यां ॥ ॥ भासने वर्त्तमानस्तपिरुद्विपूर्वोऽकर्मकः स्वांगमिहोत्तरत्र च पश्वे सत्त्ववत्स्वमंगं गृह्यत इतीह न भवति । देवदत्तो यज्ञदत्तस्य पाणि ९ मुत्तपतीति ॥ ०॥ ॥

=ननु पथि संगतकरणमस्तीति पृथक्पथग्रहणं व्यर्थमत आह । प्राप्नोतीति । प्राप्यप्रापकव्यापारदर्शकसंबंधो हि तत्र नचेतनत्वमित्यतः पथः स्रुघ्नस्य च बुद्धिपरिकल्पितप्राप्तिक्रियापेक्षकारकत्वं न वस्तुत इति भावः । र उत्तपति सुवर्णमित्यादि प्रयोगादकर्मकत्वं तत्र पेविशेषणं संभवतीम

अथेति। किमयं विधिरथ नियम इत्यभिप्राये णाप्रश्नः। उद्दिष्टमंतप आत्मनेपदमेव नयगादीति नियमो नेनक्रियत इत्याह। निष्टप्यत इति। विधिनियमसंभवे विधिर्बल वानिति मत्वाह। किंपुनरिति। विधिर्न संभवतीति मत्वाह। तपिरिति। भासते दीप्यत इत्यर्थे। कर्मकर्त्रर्थे। अकर्मकश्चेति। अनेकार्थत्वाद्धातूनां संतपत्यर्थेला दितिभावः। ततश्च तापने वर्तमानस्तपिः सकर्मकः। पुनः प्रयोजकव्यापाराविवक्षायां कर्तुः कर्मवद्भावात्सिद्धमात्मनेपदमिति पुनर्विधानं नियमार्थं संपद्यत इत्यत्रापा

अयोद्दिष्टमामिसत्त्र किं प्रत्युदाह्रियते। निष्टप्यते इति। किंपुनः कारणमात्मनेपदमेवोदाह्रियते न पुनः परस्मैपदं प्रत्युदाहार्यं स्यात्। तपिरयमकर्मकः॥ अकर्मकाश्चापि सोपसर्गाः सकर्मका भवंति। न चांतरेण कर्मकर्तारं सकर्मका अकर्मका भवंति। यदुच्यते न चांतरेण कर्मकर्तारं सकर्मका अकर्म का भवंतीति। अंतरेणापि कर्मकर्तारं सकर्मका अकर्मका भवंति। तद्यथा। नदीव हती सकर्मकः। भारं वहतीति सकर्मकः। तस्मान्निष्टपती ति प्रत्युदाहार्यं॥ ॥आङो यमहनः॥ अकर्मकादित्येव। आयच्छति रज्जुं कूपात्। आहंति वृषलं पादेन। स्वांगकर्मकाच्च। स्वांगकर्मकाच्चे ति वक्तव्यं। आयच्छते पाणी। आहते उदरमिति॥ ॥समो गम्यृच्छिभ्यां॥ ॥समो गमादिषु विदिप्रच्छिस्वरतीनामुपसंख्यानं। समो गमादि षु विदिप्रच्छिस्वरतीना मुपसंख्यानं कर्तव्यं। संविन्ते। संपृच्छते। संस्वरते। अर्तिश्रुदृशिभ्यश्च। अर्तिश्रुदृशिभ्यश्चेति वक्तव्यं। मा समृत। मा समृषातां। मा समृषत। अर्ति। श्रु। संशृणुते। दृशि। संपश्यते। उपसर्गादस्यत्यूह्योर्वावचनं। उपसर्गादस्यत्यूह्योर्वेति वक्तव्यं। निर स्यति। निरस्यते। समूहति। समूहते॥ ॥ ॥

त्मनेपदं भवत्येवाइत्यानीं विधिपक्षव्याख्याह। अंतरेणापीति। तदेवं ज्वलनवृत्तिस्तपिरकर्मकः। संतापने विलापने च सकर्मकः। अकर्मकत्वे स्तु यक्चिणोः प्रतिषेधे णिश्रि थिग्रंथीति वचनेन यक्चिणोः प्रतिषिद्धौ॥ ॥समः॥ ॥समो गम्यृच्छिभ्यामित्येतावदल्लमिति वार्त्तिकमारब्धं। उपसर्गादिति कर्मकादिति [अंता] नसंबध्यते॥ ॥

=तत्किं कर्मकर्तर्युन्नपत इत्यस्मादेवासिद्धः। नेष प्रकारांतरेणापि तत्त्वादन्ने दित्याह कर्मकर्तरीति। आत्मनेपदविधावकर्मकाधकृत्विणोः प्रतिषेधेनोपसर्गांतरसंबंधेन च यकृचिणोर्भवन एवेति बोध्यं। २= तदेवमिति। उपसर्गसंबंधेऽपीत्यर्थः। २=

= ननु ज्योतिषामुद्गमने इति भाष्ये किं कर्मणि षष्ठी उत कर्त्तरि। आद्ये पक्षे सूर्यः समाक्रामतीत्यत्रैव स्यात् न त्वाक्रमते सूर्य इत्यत्रापि इष्टापत्तिरिति चेत् ज्योतिरुद्गमने तथ्यावबोधनलाभ्ये समासानुपपत्तिः। आद्ये कर्मणि षष्ठ्यां सत्यां तत्र समासे कर्मणि चेति षष्ठीसमासनिषेधप्रसंगात्। अत आह उद्गमन इति। एवं कर्मणि षष्ठ्याः प्रसंग एव नास्ति। भाष्ये पि

आङः॥ ॥ ज्योतिषामिति। उद्गमने वर्त्तमानोऽकर्मकः क्रमिः। इह तु नभः समाक्रामतीति न भवत्यात्मनेपदं। अत्र हि क्रमिर्व्याप्तौ वर्त्तते न तूद्गमने॥ व्यक्त-
वाचां॥ ॥ सर्वे एवेति। ये वदस्वर्थस्य कर्त्तारः। वद व्यक्तायां वाचीति पाठादिति भावः। अथवेति। विनापि प्रकर्षेण त्साध्य भिकरणपदवदुद्धाश्रयणान्नानुष्ठाए

आङ उद्गमने॥ ॥ ज्योतिषामुद्गमने। ज्योतिरुद्गमने इति वक्तव्यं। इह मा भूत्। आक्रामति धूमो हर्म्यतलादिति॥ व्यक्तवाचां समुच्चा-
रणे॥ व्यक्तवाचामिति किमर्थं। वरतनु संप्रवदंति कुक्कुटाः। व्यक्तवाचामित्युच्यमानेप्यत्र प्राप्नोति। एतेपि हि व्यक्तवाचः। आत उत्तरमव्य-
क्तवाचः कुक्कुटे नोदिने उच्यते कुक्कुटो वदतीति। एवं तर्हि व्यक्तवाचामित्युच्यते। सर्वे एव हि व्यक्तवाच
स्तत्र प्रकर्षगति विज्ञास्यते। साधीयो ये व्यक्तवाच इति। के च साधीयः। येषां वाचि अकारादयो वर्णाः व्यज्यंते। एवं त्वाहुः कु-
क्कुटाः कुक्कुडिति। नैवं तत्र आहुः। अनुकरणमेतत्तेषां। अथवा नैवं विज्ञायते व्यक्ता वाग्येषां त इमे व्यक्तवाच इति। कथं तर्हि व्यक्ता वाचि
वर्णा येषां त इमे व्यक्तवाच इति॥ ॥ अवाद्ग्रः॥ अवाद्ग्रो गिरतेः। अवाद्ग्र इत्यत्र गिरतेरिति वक्तव्यं। गृणातेर्मा भूत्। तन्न हि वक्त-
व्यं। न वक्तव्यं। प्रयोगाभावात्। अवाद्ग्र इत्युच्यते। न चावपूर्वस्य गृणातेः प्रयोगोस्ति॥ × न चैतेषां वाच्यकारादयो वर्णा व्यज्यंते। एतेषामपि वा

व्यज्यंते। व्यक्ता वाचीति। वाचि अकारादयो वर्णा येषां व्यक्तास्तेषामित्यर्थः। शुकसारिकादीनां न सर्वे वर्णा विषयं सभावि के व्यक्तवाक्त्वे अपि तु पुरुषप्रयत्नवशेन
कतिपयवर्णविषयमिति तत्रात्मनेपदाभावः॥ ॥ अवाद्ग्रः॥ न चावपूर्वस्येति। नियतविषयत्वात्केषांचित्क्रियाविशेषणानां यथोर्यादयः छन्दस्येव विषया एवे-
ति भावः॥ ॥

समगाधातोस्तृतीयायोगासंभवात्तदर्थे नयोगे भाव्यमात्मनेपदेन। सचसर्वत्रचरसर्थे संभवतीत्यभिप्रायेणाह। तृतीयायुक्तादिति किमर्थमिति। सर्वत्रेति। केचित्सर्वक्रियापेक्ष
मेतदुक्तमिति मन्यन्ते। यथा असिनाछिनत्ति असिस्ते क्षेपणाछिनत्ति ते क्षणमात्मनाछिनत्तीति। यत्राकरणाभिधा[illegible]पि पदं न श्रूयते तत्रापि केनचित्करणेन भाव्यमेतत
एकस्मिन्नेवपदार्थस्य भेदविवक्षायां आत्मा करणं। अन्ये तु चरतिक्रियापेक्षमेवमुक्तमित्याहुः। नहि संचरणं करणेन विना संभवति। यत्रेति। तत्र छात्रे रंगाकरणम्

समस्तृतीयायुक्तात्॥ ॥तृतीयायुक्तादिति किमर्थं। उभौ लोकौ संचरसीमं चामुं च देवल। तृतीयायुक्तादित्युच्यमाने ऽत्र प्राप्नोति। अ
त्रापि तृतीयया योग इति। एवं तर्हि तृतीयायुक्तादित्युच्यते। सर्वत्र च तृतीयया योगः तत्र प्रकर्षगतिर्विज्ञास्यते। साधीयो यत्र तृती
यायोग इति। क्व च साधीयः। यत्र तृतीया श्रूयते॥ ॥दाणश्च सा चेच्चतुर्थ्यर्थे॥ ॥सा चेत्तृतीया चतुर्थ्यर्थे इत्युच्यते। कथं
नाम तृतीया चतुर्थ्यर्थे स्यात्। एवं तर्ह्यशिष्टव्यवहारे तृतीयानेन च विधीयते आत्मनेपदं च। दास्या संप्रयच्छते। वृषल्या संप्रयच्छते।
यः शिष्टव्यवहारः ब्राह्मणीभ्यः संप्रयच्छतीत्येव तत्र भवितव्यं। यद्येवं नार्थोऽनेन। केनेदानीं तृतीया भविष्यत्यात्मनेपदं च सह
युक्तेन तृतीया स्याद्व्यतिहारे तङो विधिः। सहयुक्ते ऽप्रधाने इत्येव तृतीया भविष्यति कर्तरि कर्मव्यतिहार इत्यात्मनेपदं॥ ॥

तीति। अन्यत्र तु करणस्यापीरकल्प्यत्वाद्बहिरंगा॥ ॥दाणश्च॥ ॥अशिष्टव्यवहार इति। अशिष्टानां संकीर्णाचाराणां यो व्यवहारस्तस्मिन्नित्यर्थः। तत्र चेच्छब्दं
चार्थे व्याचक्षाणा अनेनैवोभयं संगृहीतमित्याहुः। सहयुक्त इति। दास्यैवि श्रामणतयासह उपभुंक्ते इत्ययं वा क्यार्थः॥ ॥ ॥ ॥

उपाध्यमः॥ ॥स्वस्य स्वत्वेन स्थितस्य ग्रहणादिकं स्वकरणं गृह्यते इति मत्वा प्रश्नः। इहेति। अस्वमिति। अंतरंगत्वान्निष्पादनलक्षणे ञकृरोसयो गृह्यते। नान इ
ति। च्विविकल्पेन विधानादिति केचिदाहुः। प्रकृतेरविवक्षितत्वात्कार्यमात्रविवक्षायां नास्ति च्विरिसपरे॥ ॥ नानोर्ज्ञः॥ ॥ औषधस्येति। औषधेन प्रवर्त्तितुमिच्छती

उपाध्यमं स्वकरणे॥ ॥ इह कस्मान्न भवति। स्वं शाटकांतमुपयच्छतीति। अस्वं यदा स्वं करोति तदा भवितव्यं। यद्येवं स्वीकरण इति
प्राप्नोति। विचित्रास्तद्धितवृत्तयः नातस्तद्धितउत्पद्यते॥ ॥ नानोर्ज्ञः॥ अनोर्ज्ञः प्रतिषेधे सकर्मकवचनं। अनोर्ज्ञः प्रतिषेधे सकर्मक
ग्रहणं कर्त्तव्यं। इह मा भूत्। औषधस्यानुजिज्ञासते इति। न वा ऽकर्मकस्योत्तरेण विधानात्। न वा कर्त्तव्यं। किं कारणं। अकर्मकस्योत्त
रेण विधानात्। अकर्मकाज्ज्ञानातेरुत्तरेण योगेनात्मनेपदं विधीयते पूर्ववत्सन इति। प्रतिषेधः पूर्वस्य च। पूर्वस्य चायं प्रति
षेधः सच सकर्मकार्थ आरंभः। कथं पुनर्ज्ञायते पूर्वस्यायं प्रतिषेध इति। अनंतरस्य विधिर्वा भवति प्रतिषेधो वेति। कथं पु
नर्ज्ञायते सकर्मकार्थ आरंभ इति। अकर्मकाज्ज्ञानातेः सनन्तादात्मनेपदवचने प्रयोजनं नास्तीति कृत्वा सकर्मकार्थो विज्ञायते॥ ॥
शदेः शितः॥ ॥ शदेः शितः परस्मैपदाश्रयत्वादात्मनेपदाभावः। शदेः शितः परस्मैपदाश्रयत्वादात्मनेपदस्याभावः। शीयते
॥ शीयते॥ ॥ ॥

त्यर्थः। न वेति। पूर्वेण सकर्मकाज्ज्ञानातेः सन्नंतादात्मनेपदं विधीयते। अकर्मकात्तु परत्वात्पूर्ववत्सन इत्यनेन न॥ ॥ शदेः शितः॥ ॥ शदेरिति। शिद्विकरणो
मनेः पूर्वमात्मनेपदनिमित्ताभावाच्छेषत्वात्परस्मैपदे न प्राप्ते। तत्र कृते शित्वस्य येनानेन विहितं परस्मैपदं निवर्त्तयितुं शासं इत्यप्रतिपादकत्वलक्षणमप्रामाण्यमस्य

अत्र भावः। अथ प्र... सकर्मकाज्ज्ञानातेः कर्मकाच्चेत्सनेनात्मनेपदं विहितं तत्र सन्नंते [illegible] पूर्ववत्सन इत्यात्मनेपदस्यासिद्धत्वाज्ज्ञाश्रुस्मृदृशां सन इति पूर्वेण सकर्मके एवावतिष्ठते इति। २८

॥ तत्रस्य प्रामाण्यं॥ ॥ ॥

=नन्वेनस्तु किं महावाक्यस्यासमाप्तत्वात् शेषपदार्थानिर्देशेन शेषादिसमासाभावे यदीदमित्यादि कथमत आह यद्यपीति अयं भावः अनुदात्तङितः भावकर्मणोरित्येतद्वयं नियमार्थं शेषादिति च तत्र शेषादिति सूत्रे शेषश्च तदपेक्ष एव इतरस्य त्वागितु शेषादित्यत्र परस्मैपदबाधनेनाल=

किंच भो इति। सार्वधातुकसंज्ञा बुद्धेनेन ञितो विधानं न परस्मैपदसंज्ञाबुद्धेन नाखल्विति। सामर्थ्यादिति भावः। क पुनरिति। समस्तमेवात्मनेपदप्रकरणं महावाक्यं नियमार्थं।
तत्रानियमेनादेशो युक्तः तेषु किंचित् विकरणेन तेन नियमोऽयं प्रवर्तते। शदेः शित एव न तु शास्यतीत्यादौ विभाषाः। एवमपीति। यद्यपि तात्पर्यालोचने न प्रकरणस्य नि

=विकरणस्य परस्मैपदविधिर्नैषोपादानसामर्थ्यात्=

किंच भोः शदेः शितः परस्मैपदे विंसुच्यते न खलु परस्मैपदेष्विंसुच्यते परस्मैपदेषु तु विज्ञायते। कथं। अनुदात्तङित आत्मनेपदं भावकर्मणो
रात्मनेपदमिस्येतौ द्वौ योगावुक्त्वा शेषात्कर्त्तरि परस्मैपदमिसुच्यते एवं च न परस्मैपदे षूच्यते परस्मैपदेषु विज्ञायते। कः पुनरर्हत्येतौ यो
गावुक्त्वा शेषात्कर्त्तरि परस्मैपदं वक्तुं। किं तर्हि अविशेषेण सर्वमात्मनेपदप्रकरणमनुक्रम्य शेषात्कर्त्तरि परस्मैपदमिसुच्यते। एवम
पि परस्मैपदाश्रयो भवति। कथं। इदं तावदयं प्रष्टव्यः। यदीदं नोच्येत किमिह स्यादिति। परस्मैपदमित्याह। परस्मैपदमिति चे
त्परस्मैपदाश्रयोऽयं भवति। सिद्धं तु लुङादीनामात्मनेपदवचनात्। सिद्धमेतत्। कथं। शदेर्लुङादीनामात्मनेपदं भवतीति वक्तव्यं। सि
ध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं शदेः शितः परस्मैपदाश्रयत्वादात्मनेपदाभाव इति। नैष दोषः। शित इति नै
षा पंचमी। का तर्हि। संबंधषष्ठी। शितो यः शदिः कश्च शितः शदिः। प्रकृतिः। शदेः शित्प्रकृतेरिति। अपवाहायं शदेः शित इति। न च

१ शदिः शिदस्तीत्येवं विज्ञानसामर्थ्यात् शदेः शिद्विषयादिति॥ ॥ ॥

यमार्थत्वं तथाप्येकैकसूत्रार्थपर्यालोचनकाले लब्धान्तरव्यापारसंभवो द्विष्यर्थतासंभवश्चेत्याशङ्कानारंभे प्रोषपक्षे निपातारंभेत तदुद्धारानाल्लुङादीनामिति।
आदिशब्दः प्रकारे। येषु शिताभावे तेल्लङादयः। शित्प्रकृतेरिति। योगात यावच्छित्प्रकृतित्वमाश्रित्य प्रागेव शित उत्पत्तेरात्मनेपदं विधीयते। शिद्विषयादिति। शि

१ द्विषयत्वाच्छदिरेव शिच्छब्देनाभिधीयते॥ ॥

=ननु कर्त्रर्थस्य नियमार्थत्वे तदपेक्षया याचोवादिस्त्रमेवत्वेप[?]समाणे पूर्वोक्तरीत्या जातस्य परस्मैपदस्य निरसनोगमात्कृतस्त्रे विकरणेभ्यो नियमो बलीयानिति सत्यानाश्रयणेपि दोषस्सत आह प्रकरणमिति ॥१॥

अथवेति ॥ प्रकरणं नियमार्थं तत्र नियमात्पूर्वमात्मनेपद परस्मैपदास्य नियमेन प्रवृत्ताविति तैर्नतस्त्वारंभसामर्थ्यात्पूर्वं विकरणाः प्रवर्त्तन्ते पश्चाच्छितस्य वश दे
रात्मनेपदमिति नियमः ॥ न्यविशन्तेति । ननु विकरणेभ्यो नियमो बलीयानिति प्रागेव विकरणोत्पत्तेर्नियमेन भाव्यं तत्तो निसत्वात्पूर्वं विकरणाः तनोऽडागम इ

अथ वायद्यपि तावदेतदन्यत्र भवति विकरणेभ्यो नियमो बलीयानिति । इहैतन्नास्ति । विकरणे हि हाश्रीयते शित इति । उपसर्गे पूर्व
नियमे ः इन्व्यवाय उपसंख्यानं । उपसर्गात्पूर्वं नियमे ः इड्व्यवाय उपसंख्यानं कर्त्तव्यं । न्यविशतव्यक्रीणीत । किं पुनः कारणं न सिध्यति ।
अडाव्यवहितत्वात् । ननु चायमड्धातुभक्तो धातुग्रहणेन ग्रहीष्यते । न सिध्यति । अंगस्य ह्यडुच्यते विकरणांतं चांगं सो सो संघात
भक्तो न शक्यो धातुग्रहणेन ग्रहीतुं । एवं तर्हीदमिह संप्रधार्यं अट् क्रियतां विकरणा इति । किमत्र कर्त्तव्यं । परत्वादडागमः ॥ निसा
विकरणाः । कृते प्यट् प्राप्नुवंसकृते पि । अडपि नित्यः । कृते ष्वपि विकरणेषु प्राप्नोत्यकृतेष्वपि प्राप्नोति । अनित्यो ट् । अन्यस्य कृ
तेषु विकरणेषु प्राप्नोत्यन्यस्याकृतेषु । शब्दांतरस्य च प्राप्नुवन्विधिरनित्यो भवति । एवं तर्हीदमिह संप्रधार्यं । अट् क्रियतां लादेश इति ।
किमत्र कर्त्तव्यं । परत्वादडागमः । नित्यो लादेशः । कृते प्यटि प्राप्नोत्यकृतेपि प्राप्नोति । नित्यत्वाल्लादेशस्यात्मनेपद एवाडागमो भविष्यति ॥

=अनाश्रित इति कृते विविधेन व्यवधायक[?]सेवं[?]मनादरी[?]त्वाभिधायक[?]वर्ण[?]मित्यादिति भावः ॥१॥ नानित्या इति अयमभ्युपगमवादः नित्यत्वे सिद्धान्त[?]यिष्यते ॥२॥ माष्येलादेशशब्देन नियमोऽभिमतो न विकारादिविधिः तस्यान्तरंगत्वस्य वक्ष्यमाणत्वादात्मनेपद एवाडागमो भविष्य

तिकिं वार्त्तिकेनाप्युच्यते । एतदनाश्रित्यैतदुक्तं । शब्दांतरस्येति । विकरणास्तु शब्दांतरादपि प्राप्नुवंतो नानित्याः । कृतेप्यटीति । धातुभक्तत्वाददस्तद्ग्रहणेन ग्र
हणाद्व्यवधानाभावात् । अडागमस्तु नित्यः सहितत्वादेशेषु कृतेष्वपि विकरणेर्नित्यत्वात्प्रतिबध्यते । विकरणेषु कृतेषु शब्दांतरप्राप्त्याऽनित्यः ॥ ॥

मा०कै०प्र०
२७०
270

नित्यनिमित्तत्वादिति। कृतेपि ल्लादेशे स्यानिवद्भावात्तु ङ्डारिष्यपदेशो स्त्रीतिमद्भेना र्थे निमित्तग्रहणमुपात्तं। यद्यपि ल्लादेशे कृते विकरणे न नित्यत्वाद ड्
वाधते तथापि यस्य लक्षणांतरेण निमित्तं विहन्यते न तदनित्यं। तत्रो भयोर्नित्ययोः परत्वाद ड्प्राप्नोति। ननु भवतु परत्वाद डागमः तस्य तु धातुभक्तत्वा
द व्यवधायकत्वान्निघ्नसात्मनेपदं। नैवं सति। ननु स्थंतरं गत्वा ल्लादेशो पुकृतेषु नियमात्सर्वे नित्यत्वादि करणे पुकृतेषु अडागमो विकरणं न भक्तत्वाद्वा तो व्यव
धायक इति न्यादिभ्यः परे विभ्रारयोर्नित्यत्वान संभवती त्यात्मनेपदाप्रसंगः ल्लेवंभाव्यचो घं व्यवस्थापते। अंतरंगत्वंहीति। लकारमात्रापेक्षत्वात्। अडागमस्तु
नित्यत्वाल्ल्लादेशस्यात्मनेपदे ऽडागम इति चेदटो नित्यनिमित्तत्वादात्मनेपदाभावः। नित्यत्वाल्लादेशस्यात्मनेपदे ऽडागम इति
चेदेवमुच्यते अडपि नित्यनिमित्तः। कृतेपि ल्लादेशे प्राप्नोत्यकृतेपि प्राप्नोति। अटो नित्यनिमित्तत्वादात्मनेपदस्याभावः। तस्मादुपसं
ख्यानं। तस्मादुपसंख्यानं कर्तव्यं। अंतरंगत्वं हिल्लादेशः। नैतद्विवदामहे। तरंगो नांतरंग इति। अस्त्वयं नित्यश्चांतरंगश्च। तत्र
खलु ल्लादेशे त्रीणि कार्याणि युगपत्प्राप्नुवंति। विकरणं अडागमः नियम इति। तद्यदि सर्वे नो नियमो लभ्येत कृतं स्यात्। ननु
न लभ्यं। अथापि विकरणादृष्टि ति अट् लभ्येत। एवमपि कृतं स्यात्। तत्तु न लभ्यं। किं कारणं। आगात् सर्वे विकरणा एषितव्याः। ततः

नान्तीतियद्भवनाति

लकारविशेषापेक्षत्वाद्बहिरंगः। नैतदिति। न ल्लादेशे न सह संभवाणां किंतु नियमेन सहेति भावः। तत्तु न लभ्यमिति। ननु पूर्वमेव ज्ञापकाद्विकरणेभ्यो नियम
ऐन व्यवधायक इति। यद्येवं नित्य एव नियमः। नैतदस्ति। यत्र केवलो विकरणो व्यवधायकस्तत्र भवतु नित्यो नियमः। यथा निविश्यते निविशत इति। यत्र तु विकरणो कृतेऽ
डागमस्तत्राटो व्यवधायकत्वान्नियमो न प्राप्नोति। तरत इति। अत्र रूपं सर्वमिष्टमेव सिद्धं नित्यमुनसिध्यति॥ ×स्य बलीयस्त्वं प्रतिपादितं तत्किमुच्यते तत्तु न लभ्यमिति। उच्यते। अन्यथा तज्ज्ञा
पकं समर्थयितुं शक्यते। कृतोपि विकर ×

राम०
२७०

आदिकृन्तरिति॥ आंश्चे निरवधिरेकादेशः प्राप्नोति क्ङिच्छिभावश्च। तत्र वर्णमात्राश्रयत्वादेकादेशोऽन्तरङ्गः। नानाश्रयत्वाच्च वार्णादाङ्गं बलीय इति नास्ति। तत्रैवैकादेशे कृते तस्यादिवद्भावाद्दृच्छिभावः प्राप्नोति। तत्र क्ङिच्छदिति स्यान्न त्वाच्छेदिति। ननु चेति। बलवत्त्वात् साकार्यमिह शास्त्रे संभवतीति भावः। यतो वा इति। तर नर इत्यत्रानित्यमिति विकरणस्तु नित्य इति स एव प्रवर्तते। यत्त्विति। यथा तरतीति। अस्त्वत्रादिति। परत्वाद्दृच्छिनाभाव्ये। अभ्युपगम्य वादे न त्वेतदुच्यते। चक्रके स्थिते। व्यव

स्थया दृश्यामपन्यत्वाङ्गपूर्वमेषितव्यं उपाच्छेदिति सेवमर्थे। तत्र स्यादिकृते सादृकस्य क्ङिच्छिभावः प्राप्नोति। ननु च क्ङिच्छिभावे कृते शब्दान्तरस्याकृतत्वादिति कृत्वा पुनराद्भविष्यति। पुनः क्ङिच्छिभावः पुनरादिति च क्रमव्यवस्था प्राप्नोति। नैष दोषः। यत्ना व उच्यते। अङ्गात् पूर्वं विकरणमेषितव्याः तरत्तस्तरन्तीत्येवमर्थमिति। भवेत्सिद्धं यत्र विकरणानि स्यात्। आगम नित्यं तत्राङ्गात्पूर्वं विकरणाः स्युः। यत्र तु खलु भय नित्यं परत्वात्त्वाङ्गता वद्भवति। यदप्युच्यते। अद्गाद्भ्यामपन्यत्वाङ्गपूर्वमेषितव्यं उपाच्छेदिति सेवमर्थमिति। अस्त्वत्रात् आदि कृते सादकस्य क्ङिच्छिभावः। क्ङिच्छिभावे कृते शब्दान्तरस्याकृतत्वादिति कृत्वा पुनराद्भविष्यति। ननु चोक्तं पुनः क्ङिच्छिभावः पुनरादिति चक्रक्रमव्यवस्था प्राप्नोतीति। नैष दोषः। चक्रके स्थितेऽव्यवस्था। अथवा नेरिति नैषा पञ्चमी कान्त हि विशेषणषष्ठी नेर्यो विशिष्टः कृत्स्त्वने
र्विशिष्टः विशेषणः। व्यवहितस्यापि प्राप्ताने विशेषयितु॥ ॥ ॥

स्थाकारिणा शास्त्रेणाभाव्यमित्यव्यवस्था हेतुः पुनः प्रवृत्तिर्न भविष्यतीत्यर्थः। तदेवं स्थितमेतदन्तरङ्गत्वाद्द्वारेषु कृतेषु परत्वाद्दागमः। न चायं न्यायः शब्दान्तरस्य प्राप्नुवन्विधिरनित्यो भवति न तु शब्दान्तरादिति। यतो ऽङ्गागमस्यानित्यत्वं स्यात् विकरणस्य नित्यत्वं कृताकृतप्रसंगित्वात् तु द्वयोरपि नित्यत्वं। अङ्गतात्कृतसाश्रयणाद्वानास्ति शब्दान्तरप्राप्तिरत्र। नेर्यो विशिष्ट इति। व्यवहितस्याप्यर्थद्वारेण विशेष्यत्वात्संबन्धी भवतीत्यर्थः॥ ॥ ॥ ॥

=अनुवादः ... नेः परस्य विशपवमवात्मनेपदं न परस्मै साधुत्वेनयोः सामर्थ्याभावस्य ... नचनेः परस्याविशपवमवपरस्यैव साधुत्वमिति नियमार्थं ... =

भा० कै० प्र०
२७१
२७

अथ वेति। नेर्विश इत्यस्यायमर्थः। निशब्दात्परमात्मनेपदान्तं विशपवयं पदं साधु भवतीति सत्यप्युपसर्गागमे नेः परमनन्तरमेवेति दोषाभावः। विशिरपीति। विशिशब्देन विशपव यवः समुदाय उपचारादभिधीयते। पदविधिश्चेति। न्यायसाम्यार्थानुवादोऽयं न त्वेतन्नञ्कृते उपयुज्यते इत्याहुः॥ ॥पूर्ववत्सनः॥ ॥पूर्वशब्दः संबंधिशब्दत्वादवधि मपेक्षते तत्र कोऽत्रावधिरभिप्रेत इति पृच्छति। किमिदमिति। येभ्य इति। योगस्थेभ्यो धातुभ्यो विधानात् योगेभ्यो विहितमित्युच्यते। पक्षद्वयेऽपि तेन तुल्यमिति तृतीयान्ता द्वतिः। न च पंचम्यन्तात्। लक्षणाभावात्। तुल्यार्थैरिति विहिता तृतीया सर्वविभक्त्यर्थानन्तर्भावयतीति पंचम्यर्थस्यात्रग्रहणमुपपन्नमेव। यथा ब्राह्मणवद्वैश्या

अथवा निरपि पदं विशिरपि पदं। पदविधिश्च समर्थानां। व्यवहितेऽपि सामर्थ्यं भवति॥ ॥पूर्ववत्सनः॥ किमिदं पूर्वग्रहणं सन पेक्षं प्राक्सनो येभ्य आत्मनेपदमुक्तं तेभ्यः सन्नन्तेभ्योऽपि भवतीति। आहोस्वित् योगा पेक्षं। प्रागेतस्माद्योगाद्येभ्यो योगेभ्य आत्मनेपदमुक्तं तेभ्यः सन्नन्तेभ्योऽपि भवतीति। किं चातः। यदि सनपेक्षं निमित्तमविशेषितं भवति पूर्ववत्सनः न ज्ञायते किमन्ताद्भवितव्यमिति। अथ योगापेक्षमुत्तरत्र विधिर्न प्रकल्पेत बुभुक्षते उपयुयुक्षत इति। यथेच्छसि तथा स्तु। अस्तु तावत्सनपेक्षं ननु चोक्तं निमित्तमविशेषितं भवतीति। निमित्तं च विशेषितं। कथं। सनमेवात्र निमित्तत्वेनापेक्षिष्यामहे। पूर्ववत्सन आत्मनेपदं भवति। कुतः। सन इति। अथवा पुनरस्तु योगापेक्षं। ननु चोक्तमुत्तरत्र विधिर्न प्रकल्पेतेति॥ ॥

द्धीत इत्ययमर्थः। वैश्या पादानकस्याध्ययनस्य ब्राह्मणापादानमध्ययनमुपमानं तत्र च ब्राह्मणशब्दो वर्त्तते तेन ब्राह्मणेन तुल्यं वैश्यादधीत इति तृतीयान्ताद्वति रेवमिहापि पूर्ववदिति द्रष्टव्यं। किमन्तादिति। ततश्चाप्रतिपत्तिः स्यात्। यदि नामात्मनेपदनियमविधानसामर्थ्यादनेन सर्वधातुभ्य आत्मनेपदं भवतीत्येतद्वा भ्यते विषयविभागस्तु न ज्ञायेतेति भावः। सनमेवेति। प्रत्यासत्त्येति भावः॥ ×तिब्राह्मणादिव वैश्यादधीतइ× ॥ ॥ ॥

प्रम०
२७१

=ननु तेन तुल्यमिति ... क्रियायोन्यं प्रत्ययविधानाद् ब्राह्मणादिव वैश्यादधीत इत्यर्थप्रदर्शनं ... अध्ययनस्याध्ययनस्योपमानोपमेयभावो विवक्षित ... उपमेयभावो विवं=

उत्तरत्रापीति॥ उत्तरेषु वाक्येषु वाक्यभेदेन पूर्ववत्सनइत्येतत्संबध्यते। यो पाभ्यां पुजेरात्मनेपदं भवति। ततः पूर्ववत्सनइति। किमर्थमिति। विधिनिषेधोभयपक्ष

विधिप्रसङ्गः। कथं। उत्तरत्रापि पूर्ववत्सनइसे वानुवर्त्स्यते। किमर्थं पुनरिदमुच्यते पूर्ववत्सनइति॥ शदिम्रियसर्थे। शदिम्रियस

र्थो यमारंभः। शदिम्रियतिभ्यां सन्नन्ताभ्यामात्मनेपदं माभूत्। इतरथा हि ताभ्यां सन्नन्ताभ्यामात्मनेपदप्रतिषेधः। इतरथा हि अनुच्यमा

नेस्मिन् शदिम्रियतिभ्यामात्मनेपदस्य प्रतिषेधो वक्तव्यः स्यात्। शिशत्सति। मुमूर्षति। कथं पुनः पूर्ववत्सनइसनेन शदिम्रियतिभ्या

मात्मनेपदस्य प्रतिषेधः शक्यो विज्ञातुं। भवति निर्दिष्टो यं। कामचारश्च भवति निर्दिष्टो वाक्यशेषं समर्थयितुं। तद्यथा। उशीनरवन्मद्रेषु

युयवाः संतिन संतीति। मातृवदस्याः कलाः संतिन संतीति। एवमिहापि पूर्ववद्भवति न भवतीति। न भवतीत्येवं वाक्यशेषं समर्थ

यिष्यामहे। यथापूर्वं योर्योगयोः सन्नन्ताभ्यामात्मनेपदं न भवति। एवमिहापि शदिम्रियतिभ्यामात्मनेपदं न भवतीति। यदित

र्हि शदिम्रियसर्थो यमारंभः विधिर्नेप्रकल्पते आसिसिषते। शिशयिषते। अथ विध्यर्थः। शदिम्रियतिभ्यां सन्नन्ताभ्यामात्मने

पदं प्राप्नोति। यथेच्छसि तथास्तु। अस्तु तावत्प्रतिषेधार्थः। ननु चोक्तं विधिर्नेप्रकल्पते इति। विधिश्च प्रकल्पते। कथं। एतदेवज्ञापयति स

न्नन्तादात्मनेपदं भवतीति। यदयं शदिम्रियतिभ्यां सन्नन्ताभ्यामात्मनेपदप्रतिषेधं शास्ति॥ ॥

संभवात्प्रश्नः। यथापूर्वयोरिति। नानोर्ज्ञः प्रत्याङ्भ्यां श्रुवइत्येतयोः॥ इह च शदिम्रियतीअनुवर्त्तेते इतिभावः। य थेच्छसीति। निषेधपक्षेपि निषेधा

देव पूर्ववद्विधिरनुमीयते। विधिपक्षे शदिम्रियसोः सनोनेसनुरसोनविष्यति॥० ॥

एवं च कृत्वेति। द्वितीयसन्नग्रहणस्येहानुवृत्तेति भावः। न च शदिरेवेति। सामग्र्याः कारणत्वं न केवलस्य शदेः। सा चेह सामग्री नास्तीति सन्नः पूर्वस्य शदेः शितोऽभावात्। अ
प्याप्नोति। शिता विशेषणमाणत्वाच्छदेरेव प्राधान्यात्। यत्र तर्हीति। म्रियतेर्ङ्। त्वात्पूर्ववत्सन इति सन्नन्तात्प्राप्तो सेवेति भावः। अत्रापीति। म्रियतेर्लुङ्लिङोश्चेति

अथवा पुनरस्तु विषयार्थः। ननु चोक्तं शदिम्रियतिभ्यां सन्नन्ताभ्यामात्मनेपदं प्राप्नोतीति। नैष दोषः। प्रकृतं सन नेत्यनुवर्तिष्यते। क्व प्र
कृतं। ज्ञाश्रुस्मृदृशां सनः। नानोर्ज्ञः। सकर्मकात्सनो न भवति। प्रत्याङ्भ्यां श्रुवः। सनो न। शदेः शितः। सनो न। म्रियतेर्लुङ्लिङोश्च सनो
नेति। इहेदानीं पूर्ववत्सन इति सन इत्यनुवर्तनेनेति निवृत्तं। एवं च कृत्वा सोऽप्यदोषो भवति यदुक्तं निमित्तमविशेषितं भवतीति। नैव वा
पुनरत्र शदिम्रियतिभ्यामात्मनेपदं प्राप्नोति। किं कारणं। शदेः शित इत्युच्यते। न च शदिरेवात्मनेपदस्य निमित्तं। किं तर्हि शिद
पि निमित्तं। अथापि शदिरेव। शित्सरत्नु निमित्तं। न चायं सन्परः शित्परो भवति। यत्र तर्हि शिन्नाश्रीयते म्रि यतिरेव। लुङ्लिङ्पर
स्तु निमित्तं। न चायं सन्परः लुङ्लिङ्परो भवति। किं पुनः पूर्वस्य यदात्मनेपदं दृष्टं नेन तत्सन्नन्तस्यातिदिश्यते। एवं मन्वितुमर्हति।
पूर्वस्यात्मनेपददर्शनात्सन्नन्तादात्मनेपदभाव इति चेदुपादिष्टप्रसिद्धिः॥ × म्रियतेर्लुङ्लिङोश्चेति अत्रापि न म्रियतिरेवात्मनेपदस्य निमित्तं किं तर्हि लुङ्लिङावपि निमित्तं ×

नियमार्थमारब्धमिति भावः। किं पुनरिति। किमयं कार्यातिदेशः। यथा पूर्वस्यात्मनेपदं विधीयते तथा सन्नन्तादपीति। आहोस्विन्निमित्तातिदेशः। पूर्वस्य य
न्निमित्तं ङित्त्वादि तत्सन्नन्तस्यातिदिश्यते। निमित्ते चातिदिष्टे तत्प्रयुक्तत्वादेव कार्यं भवतीति प्रश्नः॥ ॥ ॥७॥

न ह्येतेभ्य इति ॥ नित्यसन्विषयत्वात् । कृञादिष्विति । अनुपराभ्यां कृञ इत्यनेन परस्मैपदमेव विधीयते न तु नियतत्वं निवर्त्यते । पूर्ववत्कार्ये त्वनिदिश्यमाने अनुदा

पूर्वस्यात्मनेपददर्शनात्सन्नन्तादात्मनेपदं भवतीति चेद् गुपादिष्वप्रसिद्धिः । गुपादीनां न प्राप्नोति । जुगुप्सते मीमांसत इति । न ह्येतेभ्यः प्रा
क्सन आत्मनेपदं नापि परस्मैपदं पश्यामः । सिद्धं तु पूर्वस्य लिङ्गातिदेशात् । सिद्धमेतत् । कथं । पूर्वस्य यदात्मनेपदलिङ्गं तत्सन्नन्तस्यातिदि
श्यते । कृञादिषु तु लिङ्गप्रतिषेधः । कृञादिषु तु लिङ्गस्य प्रतिषेधो वक्तव्यः । अनुचिकीर्षति पराचिकीर्षतीति । अस्तु तर्हि प्राक् सनो ये
भ्य आत्मनेपदं दृष्टं तेभ्यः सन्नन्तेभ्योऽपि भवतीति । ननु चोक्तं पूर्वस्यात्मनेपददर्शनात्सन्नन्तादात्मनेपदं भवतीति चेद् गुपादिष्वप्रसि
द्धिरिति । नैष दोषः । अनुबन्धकरणसामर्थ्याद्भविष्यति । अथवावयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति । तद्यथा । गोः स
क्थ्नि कर्णे वा कृतं लिङ्गं समुदायस्य विशेषकं भवति । यद्यवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति । जुगुप्सयति मीमांस
यतीत्यत्रापि प्राप्नोति । नैष दोषः । अवयवे कृतं लिङ्गं कस्य समुदायस्य विशेषकं भवति यं समुदायं योऽवयवो न व्यभिचरति । सनं च न व्यभिच
रति । णिचं च पुनर्व्यभिचरति । तद्यथा । गोः सक्थ्नि कर्णे वा कृतं लिङ्गं गोरेव विशेषकं भवति न गोमण्डलस्य ॥ ॥

प्राभावः । परस्मैपदेनात्मनेपदस्य बाधितत्वात् । पूर्वस्यात्मनेपदकार्यादर्शनात्सन्नन्तस्याप्रसंगात् । अनुबन्धेति । तत्सामर्थ्यात्सन्नन्तस्य व्यवधायकः । अथवेति । स
मुदाये लिङ्गासंगस्य उपायः अवयवे लिङ्गासंगः ॥ ॥

प्रत्ययग्रहणमिति॥ यद्येवमतिप्रसंगः पणायति पनायतीति। तत्र केचिदाहुः। पूर्ववत् णियकुत्सन इति प्रत्ययविशेषा एव निर्दिष्टव्याः। अन्ये त्वाहुः। ए

प्रत्ययग्रहणं णियगर्थं। प्रत्ययग्रहणं कर्त्तव्यं। पूर्ववत्प्रत्ययादिति वक्तव्यं। किं प्रयोजनं। णियगर्थं। णियगंतादपि यथा स्यादि
ति। आकुत्सयते। विकुत्सयते। हृणीयते महीयते इति। तत्र को दोषः। तत्र हेतुमण्णिचः प्रतिषेधः। तत्र हेतुमण्णिचः प्रतिषेधो
वक्तव्यः। आसयति शाययतीति। सूत्रं च भिद्यते। यथान्यासमेवास्तु। कथमाकुत्सयते विकुत्सयते हृणीयते महीयते इ
ति। अनुबन्धकरणसामर्थ्याद्भविष्यति। अथवा अवयवे कृतं लिंगं समुदायस्य विशेषकं भवति। तद्यथा। गोः सक्थ्नि कर्णे
वा कृतं लिंगं समुदायस्य विशेषकं भवति। यद्यवयवे कृतं लिंगं समुदायस्य विशेषकं भवति हृणीयति महीयति अत्रापि प्रा
प्नोति। अवयवे कृतं लिंगं कस्य समुदायस्य विशेषकं भवति यं समुदायं योऽवयवो न व्यभिचरति। यकं च न व्यभिचरति णिङं
तु व्यभिचरति तद्यथा। गोः सक्थ्नि कर्णे वा कृतं लिंगं गोरेव विशेषकं भवति न गोमण्डलस्य॥ ॥ आम्प्रत्ययवत्कृञो
ऽनुप्रयोगस्य। कृञ्ग्रहणं किमर्थं। ईहमा भूत्। ईहामास ईहामासतुः ईहामासुः। कथं चात्रानेरनुप्रयोगो भवति। प्रत्याहा
रग्रहणं हि तत्र विज्ञायते। कथं पुनर्विज्ञायते तत्र प्रत्याहारग्रहणमिति। इह कृञ्ग्रहणात्। इह कस्मात्प्रत्याहारग्रहणं न भवति।

वं पाठे मा भूद्वार्त्तिकं च न व्याख्यातं भवतीति हेतुमण्णिचः प्रतिषेध इत्यतिप्रसंगविषयोपलक्षणार्थं हेतुमण्णिज्ग्रहणं॥ ॥ आम्प्रत्यय॥ ॥ कृञ्ग्रहणमिति। कृञ एवानुप्रयोगो विहितो नान्यस्येति भावः॥ ॥ ॥

अथेह कस्मादिति॥ स्वरितञित इत्यनेनेति भावः। ननु संनिधानेऽनेनात्मनेपदं विधीयते यथा च यास्यादयः संनिधानेन वर्त्तन्ते तथा ब्रूञादयोऽपि तदर्थानुपातिनी च
करोतिरप्यत्र विषये संनिधानेन वर्त्तत इत्यात्मनेपदस्याप्रसंगः। नैष दोषः। संनिधान एवात्र विषये यदा ब्रूञादयो वर्त्तन्ते शब्दशक्तिस्वाभाव्यात्तदर्थाभिव्यक्तये यदा करोतिः
प्रयुज्यमानः संनिधानविषय इति मत्वा चोद्यमुपन्यस्तं। परिहृतं च पूर्ववद्ग्रहणानुवृत्त्या वाक्यभेदेन। तत्रैकेन वाक्येन विधिः क्रियते द्वितीयेन नियमः॥ ॥

अथेह कस्मान्न भवति। उदुम्भांचकार उदुब्जांचकार। ननु चाम्प्रत्ययवदित्युच्यते न चाम्प्रत्ययादात्मनेपदं पश्यामः। न ब्रूमोऽनेने
ति। किं तर्हि। स्वरितञितः कर्त्रभिप्राये क्रियाफल इत्यात्मनेपदं भवतीति। नैष दोषः। इदं नियमार्थं भविष्यति। आम्प्रत्ययवदे
वेति। यदि नियमार्थो विधिर्न प्रकल्पते। ईहां चक्रे ऊहां चक्रे इति। विधिश्च प्रक्लृप्तः कथं। पूर्ववदिति वर्त्तते। आम्प्रत्ययवत्पूर्वव
च्चेति॥ ॥प्रोपाभ्यां युजेरयज्ञपात्रेषु॥ स्वराद्युपसृष्टादिति वक्तव्यं। उद्युंक्ते। अनुयुंक्ते। अपर आह। स्वराद्यन्तोपसृष्टादिति
वक्तव्यं। प्रयुंक्ते। वियुंक्ते। नियुंक्ते॥ ॥समः क्ष्णुवः॥ ॥किमर्थं विदेशस्थस्य ग्रहणं क्रियते न समो गमादिष्वेवोच्येत। समः क्ष्णु
वः सकर्मकार्थं वचनं। सकर्मकार्थोऽयमारंभः। अकर्मकादिति तत्रानुवर्त्तते॥ ॥भुजोऽनवने॥ ॥अनवनकौटिल्ययोरिति
वक्तव्यं। इहापि यथा स्यात्। प्रभुजति वाससी। निभुजति जानुशिरसी इति। तत्तर्हि वक्तव्यं। न वक्तव्यं। यस्य भुजेरवनमनवनं चार्थस्तस्य
ग्रहणं न चास्य भुजेरवनमनवनं चार्थः॥ ॥

प्रोपाभ्यां॥ ॥स्वराद्यन्तोपसृष्टादिति। सम् निस् दुर् उद् इत्येतान्निरस्य सर्वे उपसर्गाः संगृहीताः॥ ॥भुजोऽनवने॥ ॥यस्य भुजेरिति। संसर्गे वृद्धिप्रयोगोऽपि हि विशे
षस्मृतिहेतुः। यथा द्रोग्ध्रीपर्यायो धेनुशब्द उपादीयमानः संसर्गिभिर्विशेषे व्यवस्थाप्यते। सवत्सा धेनुरानीयतां सकिशोरा सकरभा सबर्करेति। एवमवत्साश्र
किशोरा अकरभाऽबर्करेति विशिष्टैव धेनुः प्रतीयते। यस्मा येन दृष्टः संसर्गः सेवन दुहिताऽऽनीयते॥ ॥ ॥ ॥

णेरणौ॥ ॥एकस्मिन्वाक्ये कर्मान्तरनिवृत्तिरलभ्येति णेरिति वार्त्तिकारंभः। एकवाक्यतायां ह्ययमर्थः। णिजन्तादात्मनेपदं भवति अणिजन्तावस्थायां यत्कर्म णिजन्तावस्थायां यदि स कर्त्ता भवति साध्यान्तरन्म्येति। भवति च कर्मान्तरसद्भावेप्यणौ कर्म णौ कर्त्ता। भाष्यकारस्तु वाक्यभेदाश्रयेणैतमर्थं साधयति। णेरात्मनेपदं भवतीत्येकं वाक्यं। ततोऽणौ यत्कर्म णौ चेदिति द्वितीयं। अत्र वाक्ये यत्तदोर्नित्यसंबन्धाद्यच्छब्देन तच्छब्द आक्षिप्यते। धर्मान्तरस्य चानिर्दिष्टत्वात्कर्मत्वमेव सन्निधानात्प्रतिनिर्दिश्यते। अणौ यत्कर्म णौ चेत्तत्कर्मेति। प्रतिनिर्देशेन च कर्मान्तरव्यावृत्तिः क्रियते न तु णौ कर्मणोऽणौ कर्मत्वसद्भावः प्रतिपाद्यते। सकर्त्तेति वाक्यान्तरेण तस्य कर्त्तृत्वप्रतिपादनात् युगपदेकक्रियापेक्षया कर्मत्वकर्त्तृत्वविरोधादेकस्य। यथेष्टं वाक्यशेषपरिकल्पनादणौ यत्कर्म णौ चेत्तदेव कर्मेत्येवकाराध्याहारात्कर्मान्तरनिवृत्तिला

णेरणौ यत्कर्म णौ चेत्स कर्त्तानाध्याने॥ ॥णेरात्मनेपदविधाने ण्यन्तस्य कर्मणस्तत्रोपलब्धिः। णेरात्मनेपदविधाने ण्यन्तस्य यत्कर्म यदा ण्यन्ते तदेव कर्म भवति तदात्मनेपदं भवतीति वक्तव्यं। इतरथा हि सर्वप्रसंगः। इतरथा हि सर्वप्रसंगः स्यात्। इहापि प्रसज्येत। आरोहंति हस्तिनं हस्तिपकाः आरोहयमाणो हस्ती स्थलमारोहयति मनुष्यान्। तत्तर्हि वक्तव्यं। न वक्तव्यं। एवं वक्ष्यामि। णेरात्मनेपदं भवति। ततः अणौ यत्कर्म णौ चेत्। अण्यन्ते यत्कर्म णौ चेत् णौ यदि तदेव कर्म भवति। ततः सकर्त्ताकर्त्ता चेत्स भवति। एवि
ति॥०॥

भः। ततः सकर्त्तेति तृतीयं वाक्यं अणौ कर्मणो णौ कर्त्तृत्वप्रतिपादनपराण्येवमेषां वाक्यानामेकवाक्यत्वे महावाक्यलक्ष्यसंस्कारकं संपद्यते। ॥यद्येवमिति। यथा लुनाति केदारं देवदत्तः लूयते केदारः स्वयमेवेति केदारः कर्मकर्त्ता तथा ण्यन्तेपि भवति लावयते केदारः स्वयमेवेति। कथमिति चेत्। उच्यते लुनातिस्तावद्द्विधाभवनोपसर्जने द्विधाभावने वर्त्तते। लुनाति केदारं देवदत्तः। द्विधाभवंतं भावयतीत्यर्थः। यदा तु केदारस्य सौकर्यातिशयविवक्षायां देवदत्तस्य व्यापारो न विवक्ष्यते तदा द्विधाभवनमात्रे लुनातिर्वर्त्तते अनेकार्थत्वाद्धातूनां॥ ॥श्रीः॥

=इयं भावेति कीदृक्पञ्चमीपर्यन्तत्वमितिः । तदुक्तं अवस्थां पञ्चमीमाकुर्वन्तेषां कर्मकर्तरीति पञ्चमीत्वं तत्रिस्यं यद्वितीयकक्षायां फलसमानाधिकरणो व्यापारोऽर्थः ततो णिचि तृतीयकक्ष्या ततो णिजर्थव्यापारस्यैव प्रकृत्यर्थस्य फलसमानाधिकरणव्यापारस्य च ला

भिन्नाएवं धातवो भिन्नार्थाः सारूप्यात्तु तत्त्वाध्यवसायः । तत्र द्विधाभवेनेन केदारस्य कर्तुः कर्मवत्कर्मणा तुल्यक्रिय इति कर्मकार्याण्यतिदिश्यन्ते । तेन लूयन्ते केदाराः स्वयमेवेत्यादयः प्रयोगा उपपद्यन्ते । अत्रापि स्वयमिति सस्य यदा आत्मने सर्थः तदा आत्मापेक्षया कर्मत्वमस्त्येवेति लूयन्ते केदारा इत्येतावद् उदाहार्यं । दृत्रिकाराणां तु स्वयमिति वचनं कर्त्रन्तरस्य तु दासप्रविज्ञेयं । अथवा स्वयमित्यनेन करणत्वमात्मनः प्रतिपाद्यते न तु कर्तृत्वं । ततो यदा द्विधाभवनवृत्ते लुनाते देवदत्तादि प्रयोजकव्यापारेण जुसद्यते तदा य एवार्थो लुनाति केदारं देवदत्त इति स एवार्थो लावयति केदारं देवदत्त इति । पुनः केदारस्य सौकर्यातिशयविवक्षायामविवक्षिते देवदत्तस्य व्यापारे द्विधाभवनमात्रवृत्तिर्लावयतिः संपद्यते । तत्र स्य य एवार्थो लूयन्ते केदाराः स्वयमेवेति स एव लावयन्ते केदाराः स्वयमेवेति । न च प्रयोज्यप्रयोजकभावनिवृत्तौ णिचो निवृत्तिः । उपाय निवृत्ता वृप्येया नि

यद्येवं कर्मकर्त्तायं भवतीति तत्र कर्मकर्तृत्वात् सिद्धं कर्मकर्तृत्वात् सिद्धमिति चेद् यक्चिणोर्निवृत्त्यर्थं वचनं । कर्मकर्तृत्वात् सिद्धमिति चेत् यक्चिणोर्निवृत्त्यर्थमिदं वक्तव्यं कर्मोपदिष्टौ यक्चिणौ माभूतामिति । न वा यक्चिणोः प्रतिषेधात् । न वा एष दोषः । किं कारणं । यक्चिणोः प्रतिषेधात् । प्रतिषिध्येते अत्र यक्चिणौ । यक्चिणोः प्रतिषेधे हेतुमण्णिश्रिब्रूञामुपसंख्यानमिति ॥ ॥

वर्त्तनात् । सिद्धशब्दव्युत्पत्तये हि प्रकृतिप्रत्ययकल्पना आश्रीयते । अर्थस्योपादानं सा गाश्चक्रियते । लौकिके तु व्यवहारे सौकर्यमात्रविवक्षायां लावयन्ते केदारा इति प्रयुज्यते । एवं तावन्निवृत्तप्रेषणा ण्यन्ताः प्राकृते ण्यर्थे णिजुच्यते इत्येतत् सक्षाश्रयेण कर्मकर्त्ता व्याख्यातः ॥ ॥ अपरः कल्पः ॥ लुनाति केदारं देवदत्तः । लुनन्तं देवदत्तं सौकर्यातिशयात् केदारः प्रयुङ्क्ते इति केदारव्यापारे णिजुत्पद्यते लावयति केदारो देवदत्तमिति । पुनः प्रयोज्यप्रयोजकभावाविवक्षायां लावयते केदारः स्वयमेवेति प्रयुज्यते । तत्र पूर्वप्रक्रियाश्रयणे कर्मवत्कर्मणा तुल्यक्रिय इति सिद्धमात्मनेपदं । न थाहि । लावयति केदारं देवदत्त इत्यत्र यस्मिंल्लावयतौ धातौ यादृशी कर्मावस्थायां केदारस्य द्विधाभवनलक्षणा क्रिया तस्मिन्नेव धातौ तादृशी कर्त्रवस्थायामिति सिद्धं लावयन्ते केदाराः स्व

=लावयति केदारो देवदत्तेनेति [illegible] कर्मणो [illegible] कर्तृत्वात् [illegible] कर्मणा [illegible] प्रयोजकः [illegible] कर्त्तुर्व्यापारे णिच् [illegible] वर्तमानं [illegible]
=मानं [illegible] कर्मकर्तुर्णिजन्तस्य [illegible] कर्म [illegible] मनुष्यकर्तृकस्य [illegible] कर्म [illegible]

भा॰कै॰प्र॰
२७५
२७५

एतस्मिन्नारब्धे संभवतीति प्रदर्शितानन्तु तस्यां कर्मवद्भावः प्राप्नोति। लावयतौ केदारस्य कर्मत्वाभावात्कर्मणा समानधातौ तुल्यक्रियत्वाभावात्। यद्वि णौ
निवृत्तस्यर्थमिति। अणौ यत्कर्म णौ चेत्स कर्ता ततो णेरात्मनेपदमेव नान्यदिति नियमार्थमेतदित्यर्थः। उदपुपुच्छत पुच्छमिति। कथं पुनरत्राणौ कर्म विद्यते या
वता पुच्छशब्देन व्यवचनः अत्राहुः। अस्मिन्विषये पुच्छशब्दः पुच्छकर्मिकायां उदसनक्रियायां वर्त्तते। तस्मात्तत्वार्थे णिङ् प्रत्ययः। ततो पदाभ्यामा
णं पुच्छं संस्कारवशाद्धर्ममिव भ्रमणक्रियायां भूतायां स्वातन्त्र्येण विवक्ष्यते तदा उदपुपुच्छते सा तदा पदमेव णिङ्. नान्यथा स्यात् इत्येवमर्थमिदं

यस्तर्हि न हेतुमण्णिच् तदर्थमिदं वक्तव्यं। तस्य कर्मोपदिष्टौ य चि णौ मा भूतामिति। उदपुपुच्छत पुच्छं स्वयमेव। अत्रापि यथा मा
रद्वाजीयाः पठन्ति तथा भवितव्यं प्रतिषेधेन। यक्चिणोः प्रतिषेधे णिश्रिग्रन्थिब्रूञात्मनेपदाकर्मकाणामुपसंख्यानमिति।
स चावश्यं प्रतिषेध आश्रयितव्यः। इतरथा हि यत्र नियमस्ततोऽन्यत्र प्रतिषेधः। अनुच्यमाने ह्येतस्मिन्यत्र नियमस्ततोऽन्य
त्रेतेन यक्चिणोः प्रतिषेधो वक्तव्यः स्यात्। गणयति गणं गोपालकः। गणयति गणः स्वयमेव। आत्मनेपदस्य च। आत्मनेपद
स्य च प्रतिषेधो वक्तव्यः। गणयति गणः स्वयमेव॥ ॥ ॥

सूत्रं संपद्यते। गणयति गण इति। गणो णावेव कर्मणावेव कर्तेत्यस्य नियमस्याव्यापारात् श्रिग्रन्थियंथीति वक्तव्य एव प्रतिषेधः। तस्यैव चव्यापक
त्वान्नार्थोऽनेन सूत्रेणेत्यर्थः। कथं पुनरत्र कर्मवद्भावप्राप्तिः यावता कर्मस्थभावकानां कर्मस्थक्रियाणां च कर्मवद्भावो विधीयते गणनं च संख्यानि
तक्रुः परिच्छेदो ज्ञानविशेषः कर्त्तरि वर्त्तते। नैष दोषः। भागशो व्यवस्थापने णिग् णिर्वर्त्तते। भागशो वतिष्ठमानं गणं गोपालको व्यवस्थापयति। तत्रानुकू
लत्वाद्गुणस्यैव कर्त्तृत्वविवक्षायामस्ति कर्मस्थभावकत्वात्कर्मवद्भावः॥ ॥ ॥

राम॰
२७५

आत्मनेपदप्रतिषेधार्थमिति॥ अणौ कर्मणो णौ कर्तृत्वे आत्मनेपदं यथा स्यात् । णौ तु कर्मणो णौ कर्तृत्वे मा भूदित्येवमर्थमित्यर्थः । न चैतस्मादिङ्गिनिरसत्वा-
न्सिचः केवलानां चुरादीनां प्रयोगाभावाद् अणौ कर्मणोऽसंभवादेरिति हेतुमणि चोऽग्रहणं प्रतिषेधोऽप्यणाविति तस्यैव प्रसासस्सान्प्याप्य इस हेतुमत्सोगणस्य कर्म-
त्वे हेतुमत्सौ कर्तृत्वमिति सूत्रस्यायं विषयो भवत्येवेति कथमत्राने नात्मनेपदं निवार्येतेत्यर्थः । इदं तु हीति । न चानिर्दिष्टविषयः प्रतिषेधः शक्यते विधा-
तुमिति सर्वमेव सूत्रं क्रियते । वनगुल्मस्येति । कर्मोपलक्षणमेतत् । अत्र हि वनगुल्मस्य शेषत्वेन विवक्षितत्वात्कर्मत्वाभावः । तस्मात्स्मरति वनगुल्ममिति

आत्मनेपदप्रतिषेधार्थं तु । आत्मनेपदप्रतिषेधार्थमिदं वक्तव्यं । गणयति गणः स्वयमेव । इष्यत एवात्मनेपदं । किमिष्यत एव प्रा-
होस्वित्प्राप्नोत्यपि । इष्यते च प्राप्नोति च कथं । अणाविति कस्येदं ग्रहणं यस्मात्सः प्राक्कर्म वा कर्त्ता वा विद्यते । न चैतस्मात्सः प्राक्कर्म क-
र्त्ता वा । इदं तर्हि प्रयोजनं । अनाध्यान इति वक्ष्यामीति । इह माभूत् । स्मरति वनगुल्मस्य कोकिलः । स्मरयत्येनं वनगुल्मः स्वय-
मेवेति । एतदपि नास्ति प्रयोजनं । कर्मोपदिष्टा विधयः कर्मस्थभावकानां कर्मस्थक्रियाणां वा भवंति । कर्तृस्थभावकश्चायं । एवं तर्हि
सिद्धे यदनाध्यान इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः भवत्येवं जातीयकानामात्मनेपदमिति॥ ॥ ॥

प्रदर्शनीयं । स्मरयत्येनमिति । एतदप्युपलक्षणं । अपत्त्येनमिति कर्मणः सद्भावात्कर्मवदकर्मकाणामिति वचनात्कर्मवद्भावप्राप्तिर्नास्ति । नाप्यने
नात्मनेपदस्य । कर्मान्तरसद्भावात् । तस्मात्स्मरयति वनगुल्मः स्वयमेवेति प्रदर्शनीयं । भवत्येवं जातीयकानामिति । येषामण्यन्तानां यत्कर्म तेषां ण्यन्तानां
यदा सकर्तृता तदा कर्तृस्थभावक्रियत्वेऽप्यात्मनेपदं भवतीत्यर्थः । एवं च ब्रुवता भाष्यकारेण सूत्रमेतद्व्यर्थमित्युक्तं भवति । तेनारोहयते हस्ती स्तावदावनेनै
वात्मनेपदं सिद्धं भवति । तथाहि । दृग्गतिविशेषवचन इति॥ ॥ ॥

=कर्त्तृगतैवेति॰ कर्त्तृगतापीत्यर्थः। न कर्मगता॰ न कर्मगतैवेत्यर्थः।४= विशेषोऽध्यवसानमिति॰ हस्तिनमारोहतीत्यादौ कर्त्तृक्रियाकृतस्यान्यस्य भयनलक्षणस्य विशेषस्य कर्मणि सत्त्वे पि कर्मक्रियाकृतस्योर्ध्वदेशसंयोगस्य कर्मणि विशेषाध्यवसानादेतदुक्तं॰ अथवा क्रियाकृतो विशेषोऽध्यवसान

भा०कै०प्र० २७६ २७८

यद्विलुपरं छंदसीत्यत्र भाष्यकारो वक्ष्यति। एवं च कर्त्तृस्थक्रियत्वान्नास्यात्र कर्मवद्भावः। एवं चारुह्यते हस्ती स्वयमेवेति ये कर्मवद्भावं प्रदर्शयंति तेन्यायं भाष्यं च बाधमाना अवधीरणीयाः। तथा हि विशेषदर्शने यत्र क्रिया तत्र व्यवस्थिता। क्रिया व्यवस्था तस्यैषां शास्त्रे देव प्रकल्पितेति। विशेषदर्शनेन शास्त्रार्थानुसारेण वातात्स्यं कथ्यते क्रियायाः। एतच्चुकारणाद्युयमारोहणस्य कर्तृस्थतां प्रतिपादयति न कर्मस्थतां। तथा हि। हस्तिनमारोहति हस्तिमारोहति पर्वतमारोहतीत्यादौ कर्मभेदेपि नारोहणरूपभेदः प्रतीयते। न चैतेषु प्रयोगेषु क्रियाकृतः कर्मणि कश्चिद्विशेषो दृश्यते। धातुनाच कर्त्तृगतैव क्रिया प्रतिपाद्यते न कर्मगता। केवलं कर्मणः कारकत्वाद्रव्यस्य क्रियया भाव्यमिति क्रियानुमीयते। सर्वाणि हि कारकाणि स्वं स्वं व्यापारमनुतिष्ठंति प्रधानक्रियां संपादयंति। वक्तुर्वक्तव्यस्या

किमेतत्स्यज्ञापनेप्रयोजनं। पश्यंति प्रसारणा जानं। रज्यते प्रसारणजा। अत्रात्मनेपदं सिद्धं भवति। आत्मनः कर्मत्वे प्रतिषेधः। आत्मनः कर्मत्वे प्रतिषेधो वक्तव्यः। हंत्यात्मानं। घातयत्यात्मा इति। स तर्हि वक्तव्यः। न वा एवं तेऽन्यस्य कर्त्तृत्वात्। न वा वक्तव्यः। किं कारणं। एवं तेऽन्यस्य कर्त्तृत्वात्। अन्यद्द्रा एवं ते कर्म अन्यो एवं तस्य कर्त्ता। कथं। द्वावात्मानौ। अंतरात्मा शरीरात्मा च। अंतरात्मा तत्कर्म करोति येन शरीरात्मा सुखदुःखे अनुभवति। शरीरात्मा तत्कर्म करोति येनांतरात्मा सुखदुःखे अनुभवतीति॥०॥

यमर्थः किंचित्तु प्रकृतोपयोगादुक्तमिति प्रकृतमनुसरामः। रज्यते प्रसारणजेति। ननु कर्मान्तरसद्भावादत्रात्मनेपदे न न प्राप्यं उच्यते। अस्मादेवोदाहरणाद्भाष्यकारस्यायमभिप्राय ऊह्यते। एवं तावत्स्थायां ये कर्त्तृकर्मणी तद्व्यतिरिक्तकर्मांतरसद्भावे आत्मनेप[illegible]दं न भवति यथास्थलमारोहयति मनुष्यानिति। इह त्वेवं तावस्थायां कर्त्तृणां प्रसारणजा कर्मत्वमिति प्रवृत्तेवात्मनेपदं। एवं च स्मरयत्येनं वनगुल्मः स्वयमेवेति कोकिलस्य कर्मत्वे पि प्रत्युदाहरणं युज्यते। आत्मनः कर्मत्व इति। यदेकमेव वस्तु बुध्या विभज्य कर्मत्वेन कर्तृत्वेन च विवक्ष्यते तदा प्रतिषेध इत्यर्थः। न वेति। वस्तुत एवात्र भेदोन त्वेकस्यैव कर्मत्वं कर्तृत्वं चेत्यर्थः। अंतरात्मेति। सांख्यपक्षे तः करणमंतरात्मा तस्यैव कर्तृत्वं समवायुत्पत्तुरूपस्याकर्तृत्वात्। नैयायिकानां तु मनः पुरुषस्य कर्तृत्वात्स एवांतरात्मा विवक्षितः शरीरात्मा सुखदुःख इति। शरीरस्याचेतनत्वात्सुखदुःखे तुभ्यं शरीरसंबध्यत इति व्याख्येयं॥

=येनकर्मणीति॰ अत्रयथाव्याख्यानं तथाग्रन्यापि केनचिदेव वदन्तेनोक्तं॥ भाष्यमानत्वामायमसेउक्तं॥४=

राम० २७६

स्वरितञितः॥ इदमात्मनेपदं संविधाने इत्येभ्यो धातुभ्यो भवतीति केचिद्व्याचक्षते। पचते पाचयतीत्यर्थः। यजते याजयतीत्यर्थः। अनेकार्थत्वाद्धातूनां प्रकृति
रेव यदा संविधाने वर्तते तदा तस्य द्योतकमात्मनेपदं संभवतीति। यदा तु प्रकृत्या नाभिहितं संविधानं तदा तदभिधानाय णिजुत्पद्यते पाचयतीति। यदा णिच
श्चेति एवं तदात्मनेपदं भवति तदा द्वितीये संविधाने एवं तस्य वृत्तिः परिकल्पनीया। यथा राजा पाचयते इति। कर्त्रभिप्राये क्रियाफल इत्यनेन संविधानलक्षणाए
व क्रियाविशेष उपलक्ष्यते कीदृशी स्व वपते धत्ते चिनुत इति च शिष्टप्रयोगेषु एष र्थो वगम्यते। स्वरितञित एव संविधाने शब्दशक्तिस्वाभाव्याद्वर्तते नान्ये
धातव इति स्वरितञिद्ग्रहणं भाष्ये प्रत्याख्यातं। अन्ये त्वाहुः॥ स्वार्थे यः क्रियामारभते तत्रात्मनेपदं परार्थारम्भे तु परस्मैपदं। सा च स्वार्थपरार्थता विवक्षानिमि

स्वरितञितः कर्त्रभिप्राये क्रियाफले॥ स्वरितञित इति किमर्थं। याति वाति द्राति प्साति। स्वरितञित इति शक्यमकर्तुं। कस्मान्न भवति।
याति वाति द्राति प्सातीति। कर्त्रभिप्राय इत्युच्यते। सर्वेषां च कर्त्रभिप्रायं क्रियाफलमस्ति। त एवं विज्ञास्यामः। येषां कर्त्रभिप्रायमकर्त्रभि
प्रायं च क्रियाफलमस्ति तेभ्य आत्मनेपदं भवतीति। न चैतेषां कर्त्रभिप्रायं चाकर्त्रभिप्रायं च क्रियाफलमस्ति॥ ॥ ॥

त्त्वा लौकिके प्रयोगे स्वरितञिद्विषये स्वत्रापि पक्षे स्वरितञिद्ग्रहणस्य प्रत्याख्यानं। एवं पचिमिर्देलैः कृपतीति विभाषोपपदेन प्रतीयमान इति पक्षे आत्मनेपदाभावः स्वा
मिदासौ पचत इति क्रियामात्रविवक्षायां परस्मैपदं। परत्र तु स्वामिगतो धर्मो दासस्यारोप्यते तदा स्वामिदासौ पचेते इति आत्मनेपदं संभवत्येव। सर्वेषां चेति। सर्वत्र सं
विधानस्य सत्त्वात् सर्वत्र च स्वार्थानुष्ठानसंभवादिति भावः। येषामिति। संभवे व्यभिचारे च सति प्रकारान्तरस्य व्यवच्छेदेन विशिष्टप्रकारे कार्यविधानाय विशेषनिर्देशः
क्रियते इति भावः। न चैतेषामिति। यातादयः संविधाने वर्तितुं न शक्नुवन्तीत्यर्थः। अथ वा स्वामिभृत्यमात्रवृत्तयो यातादयः नैषां स्वार्थता विशिष्टक्रियावाचित्वसंभवः॥

=एवमिति। पंचभिर्हलैरिति उपपदगम्यत्वात्तस्येति भावः। ५=

तथाजातीयका इति॥ प्रकारमात्रे थालं विधाय प्रकारवति जातीयर् विहितः। आपयेति। कर्त्तारमेति प्राप्नोतीति कर्त्रायमिति सिध्यस्यैव विक्षितोऽर्थ इति प्रश्नः। यमेवेति॥
केचिदाहुः। वर्त्तमानकालविवक्षास्यादिति तदयुक्तं। कालसामान्येऽपि विधानात्। तस्मादयमर्थः। द्विविधं यागादिफलं। दृष्टं अन्नपुत्रवृष्टिशत्रुवधादिकं। अदृष्टं स्वर्गादि।
तत्र पूर्वं प्रत्यासन्नमवश्यंभावीति प्रधानं। इतरत्तु विधुरप्रत्ययोपनिपातसंभवे व्यभिचारसंभवाद्विप्रकृष्टत्वाच्चाप्रधानमिति तस्येह ग्रहणं न स्यात्। अभिप्रायग्रहणा

तथाजातीयकाः खल्वाचार्येण स्वरितञितः पठिताः येउभयवंतः येषां कर्त्रभिप्रायमकर्त्रभिप्रायंच क्रियाफलमस्ति। अथाभि
प्रायग्रहणं किमर्थं। स्वरितञितः कर्त्रीये क्रियाफल इतीयत्युच्यमाने यमेव संप्रखेति क्रियाफलं तत्रैव स्यात् लूनः लुनीते पूनः पुनीते। इ
ह न स्यात् यजते वपते। अभिप्रायग्रहणे पुनः क्रियमाणे न दोषो भवति। अभिप्रायेणाभिमुख्येन प्रारब्धे कर्मणि तेन यंचाभिप्रैति यंचाभिप्रैष्य
ति यंचाभिप्रागात्तत्र सर्वत्राभिमुख्ये सिद्धं भवति। कर्त्रभिप्राये क्रियाफले इति किमर्थं। पचंति भक्तकराः। कुर्वंति कर्मकराः यजंति याज
काः। कर्त्रभिप्राये क्रियाफल इत्युच्यमानेपि प्राप्नोति। अत्रापि क्रिया कर्त्तारमभिप्रैति। याजका यजंति गाल प्स्यामह इति। कर्म
१ करणः कुर्वंति पादिकमहर्लप्स्यामह इति॥ ॥ ॥

त्तु तस्यापि ग्रहणं आभिमुख्यं फलस्य यदा कर्त्ता बुध्याध्यवस्यति क्रियारंभे तदा आत्मनेपदमिति सयमर्थोऽभिप्रायग्रहणेन सति लभ्यते। वपत इति। केशश्मश्रुवपन
इस त्रैवास्य स्नेफलेस्यात्। धान्यवपन इस त्र तु विप्रकृष्टेन स्यादित्यर्थः। यंचाभिप्रागादिति। अयष्टे स्यादौ। एतत्तु कालनिर्देशप्रसंगेनोक्तं नचात्र प्राप्तेर्निमित्तमस्ति। पादि
१ कमिति पादोऽभ्यतिरस्येसत्यार्थे समासे निष्कादिभ्य इति ठक्॥ ॥ ॥

न चान्तरेणेति॥ नहि स्वर्गादिफलं यागमन्तरेण भवतीति उद्देशेनैव यागप्रवर्तनात्। याजका इति। प्रतिग्रहेणापीति भावः। तथा च हरिणोक्तं। यस्मार्थे सम्प्रसिध्यर्थे
मारभ्यन्ते पश्चादयः। तत्प्रधाने फले तेषां न लाभादि प्रयोजनमिति॥ ॥शेषात्कर्तरि॥ ॥भिद्यते कुसूल इति॥ कुसूलस्य कर्मशास्त्रातिदेशेपि स्वाश्रयं क
र्तृत्वमनिवृत्तमिति परत्वात्परस्मैपदं प्राप्नोति। सत्यं मन्यते न तु शेषशब्देन कर्तरि विशेष्यमाणे कर्मकर्तुः कर्मवद्भावेन कर्मशास्त्रातिदेशादात्मनेपद

एवं तर्हि कर्त्रभिप्राय इत्युच्यते सर्वत्र च कर्तारं क्रियाफलमभिप्रैतीति तत्र प्रकर्षगतिर्विज्ञास्यते। साधीयो यत्र कर्तारं क्रियाफल
मभिप्रैति। न चान्तरेण यजिं यजिफलं वर्षं वा वर्षफलं लभन्ते। याजकाः पुनरन्तरेणापि यजिं गा लभन्ते भृतकाश्च पादिकमि
ति॥ ॥शेषात्कर्तरि परस्मैपदं॥ ॥शेषवचनं पञ्चम्याश्चेदर्थे प्रतिषेधः। शेषवचनं पञ्चम्याश्चेदर्थे प्रतिषेधो वक्तव्यः
।भिद्यते कुसूलः स्वयमेव। छिद्यते रज्जुः स्वयमेवेति। सप्तम्याश्चेत्प्रकृतेः। सप्तम्याश्चेत्प्रकृतेः प्रतिषेधो वक्तव्यः। आस्ते शेते च्य
वते प्लवते। सिद्धं तूभयनिर्देशात्। सिद्धमेतत्। कथं। उभयनिर्देशः कर्तव्यः। शेषाच्छेष इति वक्तव्यं। कर्तृग्रहणमिदानीं किमर्थं स्या
॥त्। कर्तृग्रहणमनुपराभ्यामर्थं। अनुपराभ्यामर्थमेतत्स्यात्। अनुक्रियते स्वयमेवेति॥ ॥

विधावुपयोगादशेषत्वात्परस्मैपदाभावः। सप्तम्याश्चेदिति। प्रत्ययनियमे प्रकृतीनामनियमादुदात्तङित इत्युपरस्मैपदमपि प्राप्नोति। अनुक्रियत इति।
अनुपराभ्यां कृञ इत्येतदशेषार्थमारब्धं। गन्धनादिषु कर्त्रभिप्राये क्रियाफले च परस्मैपदार्थं। तत्रासतीह कर्तृग्रहणे कर्मकर्तर्यपि परस्मैपदप्रसङ्गः। सति
तु कर्तृग्रहणे उत्तरत्र शेषग्रहणस्यैवानुवृत्तेः स संशेषे कर्तरि परस्मैपदविधानात्कर्मकर्तरि न भवति॥ ॥
कर्तृग्रहणस्य

अनुपराभ्यां कृञः॥ ॥तत्रात्मनेपदप्रतिषेध इति। अयमभिप्रायः। अशेषत्वात्पूर्वेण नियमादप्राप्तं परस्मैपदमनेन प्रतिप्रसूयत इति अनुपराभ्यां
योगे करोतेर्मौलेन विधिवाक्येन आत्मनेपदपरस्मैपदप्रसंगः विधीयत इति। नियमापाकरणद्वारेण प्रतिप्रसूयत इत्यर्थः। नवेति। द्युद्भ्यो लुङि।

सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं शेषवचनं पंचम्याश्चेदर्थे प्रतिषेध इति। नैष दोषः। कर्त्तरि कर्म
व्यतिहारे इत्यत्र कर्तृग्रहणं प्रसाख्यायते तत्प्रकृतमुत्तरत्रानुवर्तिष्यते। शेषात्कर्त्तरि कर्त्तरीति। कर्त्तैव यः कर्त्ता तत्र यथा
स्यात् कर्त्ता चान्यश्च यः कर्त्ता तत्र माभूदिति॥ ॥अनुपराभ्यां कृञः॥ ॥किमर्थमिदमुच्यते। परस्मैपदप्रतिषेधात्कृञा
दिषु विधानं। परस्मैपदप्रतिषेधात्कृञादिषु परस्मैपदं विधीयते। प्रतिषिध्यते तत्र परस्मैपदं स्वरितञितः कर्त्रभिप्राये
क्रियाफले आत्मनेपदं भवतीति। अस्ति प्रयोजनमेतत्। किं तर्हीति। तत्रात्मनेपदप्रतिषेधः प्रतिषिद्धत्वात्। तत्रात्मने
पदस्य प्रतिषेधो वक्तव्यः। किं कारणं। अप्रतिषिद्धत्वात्। न ह्यात्मनेपदं प्रतिषिध्यते किं तर्हि परस्मैपदमनेन विधीयते। न
वा द्युतादिभ्यो वावचनात्। न वा एष दोषः। किं कारणं। द्युतादिभ्यो वावचनात्। पदयं द्युतादिभ्यो वावचनं करोति तज्ज्ञापयत्या
चार्यः न परस्मैपदविषये आत्मनेपदं भवतीति॥ ॥ ॥

सत्त्वांतरेणापि वावचनानुवृत्तिं परस्मैपदं प्रसवाउभयस्मिन्सिद्धे स्वरितत्वेन वावचनानुवृत्तिलिंगं परस्मैपदप्रसवे आत्मनेपदाभावस्य॥ ॥

आत्मनेपदनियमेवेति॥ साक्षादात्मनेपदनिषेधे क्रियमाणे मूलविधेः प्रतिप्रसवाशंका न भवति। यथैव तर्हीति। आत्मनेपदापवादः परस्मैपदं विधीय
ते ननु प्रतिप्रसवद्वारेण नियमः प्रतिपाद्यते इति भावः॥ ॥बुध युध नश जनेङ् प्रुद्रुस्रुभ्यो णेः॥ ॥सकर्मकार्थमिति। अकर्मका अपि धातवः सो

आत्मनेपदनियमे वा प्रतिषेधः। आत्मनेपदनियमे वा प्रतिषेधो वक्तव्यः। स्वरितञितः कर्त्रभिप्राये क्रियाफले आत्मने
पदं भवति अनुपराभ्यां कृञो नेति। सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं तत्रात्मनेपदप्रतिषेधो ऽप्रति
षिद्धत्वादिति। परिहृतमेतत्। नवा द्युतादिभ्यो वा वचनादिति। अथवा इदं तावदयं प्रष्टव्यः स्वरितञितः कर्त्रभिप्राये क्रियाफले
आत्मनेपदं भवतीति परस्मैपदं कस्मान्न भवति। आत्मनेपदेन बाध्यते। यथैव तर्ह्यात्मनेपदेन परस्मैपदं बाध्यत एवं पर
स्मैपदेनाप्यात्मनेपदं बाधिष्यते॥ ॥बुध युध नश जनेङ् प्रुद्रुस्रुभ्यो णेः॥ ॥बुधादिषु येकर्मकास्ते
ऽषां ग्रहणं सकर्मकार्थं अचित्तवत्कर्तृकार्थं वा॥ ॥ ॥

पसर्गादनुपसर्गाद्वा अर्थान्तरवृत्तित्वे सति सकर्मका भवंति। अंतर्भावितण्यर्थो वा प्रयोज्यकर्मणा। अचित्तवत्कर्तृकार्थं वेति। वाशब्दश्चार्थे। तेनाकर्मकाणा
मचित्तवत्कर्तृकार्थं ग्रहणं। चित्तवत्कर्तृकाणां तु सकर्मकार्थमित्यर्थः॥ ॥श्री॥ ॥श्री॥ ॥

अणावकर्मकाच्चित्तवत्कर्तृकात्॥ ॥अणाविति णिमात्रस्य पर्युदासः चुरादिण्यन्तेभ्यो ऽकर्मकश्चित्तवत्कर्तृकश्च तस्माद्धेतुमण्ण्यन्तात् प्राप्तं परस्मैपदं मिस्स
णोऽइति वार्त्तिकमारब्धं। चुरादिणिचो ण्यन्तादिति। चुरादिण्यन्ताद्द्वितीयहेतुमण्ण्यन्तादित्यर्थः। अकर्मकग्रहणमिति। अणाविसस्य यद्यपि प्रयोजनमस्ति

अणावकर्मकाच्चित्तवत्कर्तृकात्॥ ॥अणावकर्मकादिति चुरादिणिचो ण्यन्तात्परस्मैपदवचनं। अणावकर्मकादिति चुरादि
णिचो ण्यन्तात्परस्मैपदं वक्तव्यं। इहापि यथा स्यात्। चेतयमानं प्रयोजयति चेतयति। यदि तर्ह्यत्रापीष्यते अणिग्रहणमिदानीं
किमर्थं स्यात्। अकर्मकग्रहणमण्यन्तविशेषणं यथा विज्ञायेत। अपाक्रियमाणे अणिग्रहणे अकर्मकग्रहणं कस्य वि
शेषणं स्यात्। णेरिति वर्त्तते। णेरित्यस्य विशेषणं। तत्र को दोषः। इहैव यथा स्यात् चेतयमानं प्रयोजयति चेतयति। इह न स्या
त्। आसयति। शाययतीति। सिद्धं तु तस्मिन् णाविति वचनात्। सिद्धमेतत्। कथं। अतस्मिन् णौ यं अकर्मकस्तत्रेति वक्त
व्यं॥ ॥

आरोहयमाणं प्रयुङ्क्ते आरोहयते इत्यत्रानेन माभूत् परस्मैपदं तथापि प्रयोजनान्तरमप्यस्तीति भाष्यकारो दर्शयति। सिद्धं त्वतस्मिन्निति तच्छब्देन
हेतुमणिज्निर्दिश्यते तस्यैव परस्य अत्र उपादानात् बुधादिसूत्रस्यैव संभवात्। तेनायमर्थः। अहेतुमण्ण्यन्तो यो ऽकर्मकश्चित्तवत्कर्तृकश्च तस्माद्धेतुमण्ण्यन्तात्
परस्मैपदं भवति। तेन चेतयतीत्यत्रापि सिध्यति॥ ॥

यस्मात्सेरिति॥ एतच्चाणेरणा विसत्रोक्तं तदेव पुनः प्रक्लृप्तो प्रयोगाङ्गाप्यकारेणास्मारितं॥ ॥ नपादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः॥ ॥
समीचीइति। प्रथमाद्विवचनेवाछन्दसीति पूर्वसवर्णदीर्घः॥ ॥लुटिचक्लृपः॥ ॥स्वरितत्वादनुवृत्तस्याचशब्दस्य निपातसार्थस्य सिद्धत्वाङ्गाप्यकारः

सिध्यति। सूत्रं तर्हि मिद्यते। यथान्यासमेवास्तु। ननु चोक्तमणावकर्मकादिति चुरादिणिचो ग्रहणं तान्परस्मैपदवचनमिति। नैष दोषः। अणावि
तिकस्येदं ग्रहणं यस्मात्सेः प्राक्कर्मकर्त्ता वा विद्यते। न चैतस्मात्सेः प्राक्कर्मकर्त्ता वा विद्यते॥ ॥नपादम्याङ्यमाङ्यसपरिमुह
रुचिनृतिवदवसः॥ पादिषु धेट उपसंख्यानं कर्त्रभिप्राये शिशुमेकं समीची॥ ॥लुटिचक्लृपः॥ ॥किमर्थश्चका
रः॥ स्यसनोरिति तदनुकृष्यते। यदि तर्हि नान्तरेण चकारमनुवृत्तिर्भवति। द्युद्भ्यो लुङीत्यत्रापि चकारः कर्त्तव्यः विभाषे [illegible]
[illegible] स्यनुकर्षणार्थः। अथेदानीमन्तरेण
पि चकारमनुवृत्तिर्भवति इहापि नार्थश्चकारेण। एवं सर्वे चकाराः प्रत्याख्यायन्ते॥ ॥इति श्रीमद्भगवत्पतंजलिविरचिते व्याक
रणमहाभाष्ये प्रथमाध्यायस्य तृतीये पादे द्वितीयमाह्निकं॥०॥ पादश्च समाप्तः॥ ॥

सर्वानेव चकारान्प्रत्याचष्टे॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे प्रथमस्याध्यायस्य तृतीये पादे द्वितीयमाह्निकम्॥ ॥पाद
श्च तृतीयः समाप्तः॥ ॥शुभं॥०॥ संवत् १८२९ ॥ ॥

आकडारादेका संज्ञा। किमर्थमिति। आकडारात् परा निरवकाशा च संज्ञेष्यते। तदन्तरेणापि सूत्रं विप्रतिषेधे परमिति वचनात् परा भविष्यति न पूर्वा। निरवकाशापि सावकाशां विशेषविहितत्वादेव बाधिता भविष्यति। कौण्डिन्यदधिदानमिव तक्रदानमिति प्रश्नः। अन्यत्रेति। विप्रतिषेधे परं कार्यमुच्यते। न च संज्ञानां विरोधः। युगपत्सन्निवेशसंभवात्। न च बाध्यबाधकभावः। भिन्नफलत्वाद्विरोधाभावाच्च। दधितक्रयोरभिन्नफलमोदनसेकरूपं तितयोर्बाध्यबाधकभावः

आकडारादेका संज्ञा॥ ॥किमर्थमिदमुच्यते। अन्यत्र संज्ञासमावेशान्नियमार्थं वचनम्। अन्यत्र संज्ञासमावेशो भवति। क्वान्यत्र। लोके व्याकरणे च। लोके तावत्। इन्द्रः शक्रः पुरुहूतः पुरंदरः। कन्दुः कोष्ठः कुसूल इति। एकस्य द्रव्यस्य बह्व्यः संज्ञा भवन्ति। व्याकरणेपि कर्तव्यं हर्तव्यमित्यत्र प्रत्ययकृत्कृत्यसंज्ञानां समावेशो भवति। पाञ्चालः वैदेहः वैदर्भ इति प्रत्ययतद्धिततद्राजसंज्ञानां समावेशो भवति। अन्यत्र संज्ञासमावेशात् तस्मात् कारणात् आकडारादपि संज्ञानां समावेशः प्राप्नोति। इष्यते चैकैव संज्ञा स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीति नियमार्थं वचनम्। एवमर्थमिदमुच्यते। अस्ति प्रयोजनमेतत्। किं तर्हीति॥

अष्टाश्रिर्यूपो भवति वाजपेयस्य चतुरश्र इत्यष्टाश्रित्वचतुरश्रित्वयोस्तु विरोधात्। इन्द्रः शक्र इति। यद्यप्यत्र फलभेदो नास्ति तथापि समावेशोस्तीति प्रतिपादनायोदाहरणोपन्यासः। कर्तव्यमिति। प्रत्ययसंज्ञायाः प्रयोजनं धातोरङ्गसंज्ञा कृत्संज्ञायाः प्रयोजनं प्रातिपदिकत्वं। कृत्यसंज्ञायास्तयोरेतिक

१९र्मणिविधानं॥ ॥श्री॥ ॥श्री॥ ॥

उभयथेति॥ तत्र गुणदोषविचारः कर्त्तव्य इत्यर्थः। तत्रैका संज्ञेत्यस्मिन्पाठे क्वचित्संज्ञासमावेशार्थो यत्नः कर्त्तव्यः। परं कार्यमित्यस्मिंस्तु पाठे समावेशः सिध्य
ति। अत्र हि पाठे अयमर्थः। आकडारात्संज्ञारूपं कार्यं परं भवतीति। संज्ञाप्रकरणात्संज्ञैवात्र सूत्रे कार्यशब्देन विवक्षिता। तत्र यस्याः संज्ञायाः परत्वं सा पूर्वया

कथं त्वेतत्सूत्रं पठितव्यं किमाकडारादेका संज्ञेति आहोस्विदाकडारात्परं कार्यमिति। कुतः पुनरयं संदेहः। उभयथा ह्याचा
र्येण शिष्याः सूत्रं प्रतिपादिताः केचिदाकडारादेका संज्ञेति। केचिदाकडारात्परं कार्यमिति। कश्चात्र विशेषः। तत्रैकसंज्ञाधि
कारे तद्वचनं। तत्रैकसंज्ञाधिकारे तद्वक्तव्यं। किं। एका संज्ञा भवतीति। ननु च यस्यापि परं कार्यं तेनापि ग्रहणं कर्त्तव्यं। परार्थं म
म भविष्यति विप्रतिषेधं चेति। ममाप्येकग्रहणं परार्थं भविष्यति। सरूपाणामेकशेष एकविभक्ताविति। संज्ञाधिकार
श्चायं। तत्र किमन्यच्छक्यं विज्ञातुमन्यदतः संज्ञायाः॥ तत्रैतावद्वाच्यं॥ ॥ श्री॥ ॥

बाधः प्राप्नोति सा परानेन भाव्य ते इति विध्यर्थं सूत्रं भवति न नियमार्थम्। एतदेव च परसंज्ञाविधानं ज्ञापकमत्र प्रकरणे संज्ञानां बाध्यबाधकभावस्य।
तेन परयानवकाशया सावकाशा पूर्वा बाध्यते द्वयोश्च सावकाशयोर्विप्रतिषेधे परया पूर्वा बाध्यत इत्येतदत्र वस्तुतत्त्वं॥ ॥ ॥७॥

=निरवकाशत्वेनेत्यर्थः। र=

आकडारादेकेति। संज्ञाप्रकरणादेकेति स्त्रीलिंगनिर्देशः संज्ञाशब्दानुच्चारणेऽपि न विरुद्धः। अस्माच्च सूत्रात्परं सरूपाणामेकशेष एकविभक्ताविति प्रकरणं कर्त्तव्यं तत्रैकेत्य
स्य पाठः स्वरितत्वादनुवृत्तौ लिंगविपरिणामेन संबंधे सत्येकग्रहणं पुनर्न कर्त्तव्यं भवतीत्यर्थः। सार्पिष्क इति। असत्यामंगसंज्ञायामंगस्योच्यमाना वृद्धिर्न स्यात्। अंगसंज्ञा
च कर्त्तव्यमित्यादि सुसावकाशाय च पूर्वस्य भपदसंज्ञे न स्तः। ननु तद्धितेष्वचामादेः किति चेत्यंगस्य वृद्धिविधानसामर्थ्यात्समावेशो भविष्यति। नैतदस्ति। वचनादनंगस्या

आकडारादेका। किमेका। संज्ञा भवतीति। अंगसंज्ञया भपदसंज्ञयोरसमावेशः। अंगसंज्ञया भपदसंज्ञयोः समावेशो न प्राप्नोति। सा
र्पिष्कः। बार्हिष्कः। याजुष्कः। धानुष्कः। बाभ्रव्यः। मांडव्य इति। अनवकाशे भपदसंज्ञे अंगसंज्ञां बाधेयातां। परवचने हि नियमानु
पपत्तेरुभयसंज्ञाभावः। यस्य पुनः परं कार्यत्वं नियमानुपपत्तेस्तस्योभयोः संज्ञयोर्भावः सिद्धः। कथं पूर्वे तस्य भपदसंज्ञे परा
अंगसंज्ञा। कथं। एवं सवक्ष्यति। यस्मात्प्रत्ययविधिस्तदादि। सुप्तिङंतं पदं। नः क्ये। सिति च। स्वादिष्वसर्वनामस्थाने। यचि भं।
तसांते प्रत्ययेंगमिति। तत्रारंभसामर्थ्याच्च भपदसंज्ञे परं कार्यत्वाच्चांगसंज्ञा भविष्यति॥ ॥ ॥

पि वृद्धिः स्यात्। ततश्च देवदत्तो गार्ग्य इत्यत्रापि यञि परतो देवदत्तादेः समुदायस्यापि वृद्धिः प्रसज्येत। यथा डित्सभस्याप्यनुबंधकरणसामर्थ्यात्कुमुद्वानित्यादौ
टिलोपः। परं कार्यत्वमिति। परं कार्य … मित्येतदेकदेशस्यानुकरणं परं कार्यमित्यस्यानुकार्येण। अर्थवत्त्वात्प्रातिपदिकत्वात्तद्धितोत्पत्तिः॥ ॥

=परंसंज्ञं न भसंज्ञां विवक्षार्थं श्रयणे तु पयम्नुवृत्तिसामर्थ्यादेकासंज्ञेति नियमबाधेन समावेशः ... बाधप्रसंगो ... बाधो नैकसंज्ञानियमस्तत्रोपजीव्यविरोधोऽनुवृत्तिवैफल्यं चेति भावः ॥२॥

अनुवृत्तिः क्रियते इति। ततस्तत्पूर्वेकत्वं लभ्यते। अंगं भवद्भसंज्ञमिति सर्थेः। अत्रोत्तरमाह। पर्यायः प्रसज्येतेति। एकासंज्ञेति वचनादंगसंज्ञया निरवकाशबाधे प्राप्ते पर्याया
र्थानुवृत्तिः स्यात्। एवं नियमो न बाधितो भवति अनुवृत्तिश्च सफला भवति। ननु न परत्वं तेसत्र स्वतन्त्रे भाष्यकारेणोक्तं वेतस्वानिसस्य सिद्धये यथैवान्यानि पदकार्याण्यु
पलब्धवेते रुत्वं जश्त्वं च एवमिदमप्युपलभ्यते भसंज्ञानामेति तत्र च पदे सङ्कुसंज्ञे भवतीति विज्ञायते। भसंज्ञायां पदसंज्ञानुवृत्तावपि भसंज्ञया पदसंज्ञाया बा
धः परकार्यनिवृत्तये ऽभ्युपगंतव्यः। इहत्वंगसंज्ञानुवृत्तौ पर्याय उक्त इति विरोधः। नैष दोषः। अंगसंज्ञानुवृत्तेः प्रयोजनांतराभावात् पर्याय इहोक्तः। पदसंज्ञा

ननु च यस्यापेक्षसंज्ञाधिकारस्तस्यापि अंगसंज्ञापूर्विके भपदसंज्ञे। कथं। अनुवृत्तिः क्रियते। पर्यायः प्रसज्येत। एकासंज्ञेति वचनान्न
स्त्रियो गपद्येन संभवः। कर्मधारयत्वे तत्पुरुषग्रहणं। कर्मधारयत्वे तत्पुरुषग्रहणं कर्तव्यं। ननु पुरुषः समानाधिकरणः कर्मधारय इति।
एकसंज्ञाधिकार इति चोदितं। अक्रियमाणे हि तत्पुरुषग्रहणे ह्यनवकाशा कर्मधारयसंज्ञा तत्पुरुषसंज्ञां बाधेत॥ ॥

=नच कर्णांतरसंभवात् ... समावेशोऽस्तु तथा च नोपजीव्यविरोधः ... बाधप्रसंगात् ... लौकिकोपजीव्यत्वबाधापेक्षया ... ॥३॥

नुवृत्ते स्तु भसंज्ञायां प्रयोजनं पदकार्यत्वं भसंज्ञाया यथा स्यादिति ततश्च नपदांतेति स्थानिवत्त्वनिषेधादकारलोपस्य तसौ मत्वर्थे इति भसंज्ञायां सत्यां प
दत्वप्रयुक्तरुत्वाभावे वेतस्वानिति सिध्यति। कथमिति चेत्। उच्यते। भसंज्ञाविधौ पदमिति वर्तते। तत्रानुवृत्तिसामर्थ्यात् पूर्वे पदसंज्ञा प्रवर्तते। तेन पदकार्ये
भसंज्ञा भवति। नान्यथा। एतावदेव चानुवृत्तेः प्रयोजनं ततः प्रवृत्तया भसंज्ञया पदसंज्ञा बाध्यते एकासंज्ञेति नियमात्। कर्मधारयत्व इति। एकसंज्ञावादिनं
प्रत्युच्यते त्वया कर्मधारयसंज्ञायामेकसंज्ञाधि॥ ॥ ॥

कारेऽन्यत्र वा क्रियमाणायां तत्पुरुषग्रहणं कर्त्तव्यं। एकसंज्ञाधिकारे संज्ञासमावेशार्थे। प्रदेशांतरे तु समासांतरस्य कर्मधारयसंज्ञाया निरसार्थे। मयाल्पस्मि
न्नेव प्रकरणे कर्मधारयसंज्ञा क्रियते समावेशश्च सिध्यतीति तत्पुरुषग्रहणं न कर्त्तव्यं भवतीति लाघवं भवति। तत्स्थाने इति। यद्येवं समानाधिकरणस्य कथं
तत्पुरुषसंज्ञा सिध्यति। उच्यते। पाठक्रमादर्थक्रमो बलीयानिति पूर्वं तत्पुरुष इति कर्त्तव्यं। ततो द्वितीया श्रितेति। तत्पुरुष इत्यत्र च पूर्वकालैकसादिसू

परवचने हि नियमानुपपत्तेरुभयसंज्ञाभावः। यस्य पुनः परं कार्यत्वं नियमानुपपत्तेस्तस्योभयोः संज्ञयोर्भावः सिद्धः। कथं। पू
र्वोत्तरस्य कर्मधारयसंज्ञा परा तत्पुरुषसंज्ञा। कथं। एवं सवक्ष्यति। पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन कर्मधा
रय इति एवं सर्वकर्मधारयप्रकरणमनुक्रम्य तत्स्थाने श्रितादिस्तत्पुरुषः इति। तत्रारंभसामर्थ्याच्च कर्मधारयसंज्ञा परं कार्यत्वा
च्च तत्पुरुषसंज्ञा भविष्यति। ननु च यस्यापि एकसंज्ञाधिकारस्तस्यापि तत्पुरुषसंज्ञा पूर्विका कर्मधारयसंज्ञा। कथं। अनुवृत्तिः
क्रियते। पर्यायः प्रसज्येत। एका संज्ञेति वचनान्नास्ति यौगपद्येन संभवः॥ ॥ ॥ ॥

ज्ञाप्य पुनर्वसेत्तत्पुरुषसंज्ञा विधीयते। ननु च यस्यापीति। अधिकरणानां तत्पुरुषसंज्ञां विधाय समानाधिकरणस्य तत्पुरुषसंज्ञानुवृत्त्या नत्पूर्विका
कर्मधारयसंज्ञा विधायिष्यते इत्यर्थः। समावेशस्य च कारकगतीति पुंवद्भावसमासांतौ प्रयोजनं॥ ॥ ॥ ॥

द्विगुग्रहणमिति। द्विगोः संबंधिनश्चशब्दस्य ग्रहणं कर्तव्यमित्यर्थः। नन्वेकसंज्ञापक्षे द्विगुश्चेति सर्वमेव सूत्रं कर्तव्यं तत्र किं चशब्द एवचोद्यते। तत्रा
ह। द्विगुश्चेति सूत्रे द्वयोरपि पक्षयोर्नेकर्तव्यो। एकसंज्ञापक्षे तु संख्यापूर्वो द्विगुश्चेति चशब्दः समावेशार्थः कर्तव्यः नपक्षांतर [illegible] इत्येतद्वार्त्ति

तत्पुरुषत्वे द्विगुचग्रहणं। तत्पुरुषत्वे द्विगुचग्रहणं कर्तव्यं। तत्पुरुषः द्विगुश्चेति चकारः कर्तव्यः। अक्रियमाणे हि च
कारग्रहणेऽनवकाशाद्द्विगुसंज्ञा तत्पुरुषसंज्ञां बाधेत। परत्वं च नेह नियमानुपपत्तेरुभयसंज्ञाभावः। यस्य पुनः
परं कार्यत्वं नियमानुपपन्ने तस्योभयोः संज्ञयोर्भावः सिद्धः। कथं। पूर्वा तस्य द्विगुसंज्ञा परा तत्पुरुषसंज्ञा। कथं। एवं
स वक्ष्यति। तद्धितार्थोत्तरपदसमाहारे च संख्यापूर्वो द्विगुरिति। एवं सर्वं द्विगुप्रकरणमनुक्रम्य तस्यांते श्रितादि
स्तत्पुरुषः इति। तत्रारंभसामर्थ्याद्द्विगुसंज्ञा परं कार्यत्वाच्च तत्पुरुषसंज्ञा भविष्यति न तु च यस्याप्येकसंज्ञाधिकार
स्तस्यापि तत्पुरुषसंज्ञा पूर्विका द्विगुसंज्ञा। कथं। अनुवर्त्तिः क्रियते पर्यायः प्रसज्येत। एकासंज्ञेति वचनान्नास्ति योग

तत्पुरुषः॥१०॥

ककारस्य विवृद्धिस्तिंता माध्यमप्येवं व्याख्यायते तत्पुरुषः द्विगुश्चेति चकारः कर्तव्य इति। तद्धितार्थे सन्नेनपः संख्यापूर्वः समासस्तत्पुरुषो द्विगुश्च भवतीति सं
ज्ञाद्वयं लभत इति यावत्। एतदर्थं चकारः कर्तव्य इति। अयमेवार्थः परस्तात्प्रकटीभविष्यति। तस्मात इत्यादि भाष्यं एवं वक्रमपि पर्यायेण व्याख्येयं॥१०॥

गतिसंज्ञामिति॥ ऊर्यादिषु सावकाशमिति भावः। प्रादीनां या गतिसंज्ञेति। गतिश्चेत्यत्र समुच्चयार्थे चकारे समावेशः सिध्यति। गतिरित्यत्र योगे प्रादी

गतिरिवः कर्मे हेतुमत्समुच्चयग्रहणं॥ गतिदिवः कर्मे हेतुमत्समुच्चयग्रहणं कर्तव्यं। उपसर्गाः क्रियायोगे गतिश्चेति च
कारः कर्तव्यः। अक्रियमाणे हि चकारे अनवकाशा उपसर्गसंज्ञा गतिसंज्ञां बाधेत। परवचने हि नियमानुपपत्ते
रुभयसंज्ञाभावः। यस्य पुनः परं कार्यत्वं नियमानुपपत्तेस्तस्योभयोः संज्ञयोर्भावः सिद्धः। कथं। पूर्वोक्तस्योपसर्ग
संज्ञा परा गतिसंज्ञा। तत्रारंभसामर्थ्याच्चोपसर्गसंज्ञा परं कार्यत्वाच्च गतिसंज्ञा भविष्यति। ननु च यस्याप्येकसंज्ञाधि
कारस्तस्याप्युपसर्गसंज्ञा पूर्विका गतिसंज्ञा कथं। अनुवृत्तिः क्रियते। पर्यायः प्रसज्येत। एकासंज्ञेति वचनान्नास्ति
यौगपद्येन संभवः। गतिसंज्ञा ह्यनवकाशा वचनाद्भविष्यति। सावकाशा गतिसंज्ञा। कोऽवकाशः। ऊर्यादीन्यवकाशः।
प्रादीनां या गतिसंज्ञा सानवकाशा गति॥ ॥

नाम नुवृत्सा गतिसंज्ञा विधीयते। तत्र वचनसामर्थ्यात्पर्याये लब्धे सति उपसर्गसंज्ञानुवृत्तिः समावेशार्थो भविष्यतीत्यर्थः। समावेशस्य च प्रयो
तमभिषिञ्चमित्यत्र गतिस्वरो णत्वषत्वे च प्रयोजनं॥ ॥ ॥

दिवः कर्म चेति। समावेशस्य च प्रयोजनम् अक्षैर्देवयते देवदत्तो यज्ञदत्तेनेति प्रयोज्यकर्तुर्गतिबुद्धीति नियमात्कर्मसंज्ञानिवृत्तिः अणावकर्मकादिति परस्मैपदाभा
वश्चाप्यद्येवम् अक्षान्दीव्यतीति द्वितीया न प्राप्नोति। तृतीया च परत्वाद्बाधितत्वात्। विभक्तिद्वयं चेष्यते। कर्मसंज्ञा च सावकाशा अकर्मकप्रदेशव्यावृत्त्यर्थत्वात्।
करणसंज्ञापि देवनाक्षा इति ल्युडर्थौ। अत्राहुः। कार्यकालं संज्ञापरिभाषमिति पक्षो ह्याश्रीयते। तेन कर्मणि द्वितीये सन्नकार्ये यत्कर्मसंज्ञाया उपस्था

दिवः कर्म साधकतमं करणं दिवः कर्म च। चकारः कर्तव्यः। अक्रियमाणे हि चकारे अनवकाशा कर्मसंज्ञा करणसंज्ञां बाधेत। परवचने हि नियमा
नुपपत्तेरुभयसंज्ञाभावः। यस्य पुनः परं कार्यत्वं नियमानुपपत्तेस्तस्योभयो(संज्ञयो)र्भावः सिद्धः। कथं। पूर्वा न सा कर्मसंज्ञा परा करणसंज्ञा। क
थं। एवं स वक्ष्यति। दिवः साधकतमं कर्म ततः करणं। करणसंज्ञं च भवति साधकतमं। दिव इति निवृत्तं। तत्रारंभसामर्थ्याच्च कर्मसंज्ञापरं
कार्यत्वाच्च करणसंज्ञा भविष्यति। ननु च यस्याप्येकसंज्ञाधिकारस्तस्यापि करणसंज्ञा पूर्विका कर्मसंज्ञा। कथं। अनुवृत्तिः क्रियते। पर्यायः
प्रसज्येत। एका संज्ञेति वचनान्नास्ति योगपद्येन संभवः। दिवः कर्म। हेतुमत्। स्वतंत्रः कर्ता। तत्प्रयोजको हेतुश्च। चकारः कर्तव्यः। अ
क्रियमाणे हि चकारे अनवकाशा हेतुसंज्ञा कर्तृसंज्ञां बाधेत॥ ॥ ॥ ॥

नैतदनवकाशमिति द्वितीया भविष्यति। अक्षाणां देवितेत्यादौ तु प्रयोगे षष्ठ्या द्वितीयापवादत्वाद्बाध्येतेत्तृतीया तु परत्वात्। हेतुमदिति। हेतुसंज्ञायस्मिन् सू
त्रे विद्यते तत् हेतुमत् तत्र च यद्ग्रहणं कर्तव्यं। समावेशस्य च प्रयोजनं कारयतीति हेतुमण्णिच्कर्तरि लकारः॥ ॥श्री॥ ॥ ॥

गुरुलघुसंज्ञे इति॥ यदा घिनदीसंज्ञे वर्णमात्रस्य क्रियेते तदायं दोषः। यदा तु तदंतस्य तदाभिन्नविषयत्वात्सिद्धः समावेशः। तस्य तु प्रयोजनं वात्सीबंधुरित्यत्र नदीबंधुनीति पूर्वपदांतोदात्तत्वं नदीसंज्ञानिबंधनं भवति। वात्सीबंधो इति गुणो ऽनंतर इति ह्रस्वो गुरुसंज्ञानिबंधनः। घिलघुसंज्ञासमावेशस्य च प्र

परवचने हि नियमानुपपत्तेरुभयसंज्ञाभावः। यस्य पुनः परं कार्यत्वं नियमानुपपत्तेस्तस्योभयोः संज्ञयोर्भावः सिद्धः। कथं। पूर्वा तस्य हेतुसंज्ञा परा कर्तृसंज्ञा। कथं। एवं स वक्ष्यति। स्वतंत्रः प्रयोजको हेतुरिति। ततः कर्त्ता। कर्तृसंज्ञश्च भवति स्वतंत्रः प्रयोजक इति निवृत्तं। तत्रारंभसामर्थ्याच्च हेतुसंज्ञा परं कार्यत्वाच्च कर्तृसंज्ञा भविष्यति। ननु च यस्याप्येकसंज्ञाधिकारस्तस्यापि कर्तृसंज्ञापूर्विका हेतुसंज्ञा। कथं। अनुवृत्तिः क्रियते। पर्यायः प्रसज्येत। एकासंज्ञेति वचनान्नास्ति योगपद्येन संभवः। गुरुलघुसंज्ञे नदीघिसंज्ञे। गुरुलघुसंज्ञे नदीघिसंज्ञे वा धेयातां। गार्गीबंधुः वात्सीबंधुः। वैन्नं विनिपप परवचने हि नियमानुपपत्तेरुभयसंज्ञाभावः। यस्य पुनः परं कार्यत्वं नियमानुपपत्तेस्तस्योभयोः संज्ञयोर्भावः सिद्धः। कथं। पूर्वे तस्य नदीघिसंज्ञे परे गुरुलघुसंज्ञे। तत्रारंभसामर्थ्याच्च नदीघिसंज्ञे परं कार्यत्वाच्च गुरुलघुसंज्ञे भविष्यतः॥ ॥ ॥ ॥

योजनं विभक्त्या च विनशाविति घिलक्षणः पूर्वनिपातः। विन्नोर्भावो वै न्नमिति इगंताच्च लघुपूर्वादित्यण्। द्वंद्वमनोज्ञादित्वाद्वुञ्। प्राप्ते नदमावश्च्विं सः। विनण्वा च ष्टेर् इतिणि। चिटि लोपे च कृते विविन पो तिस्य पित्लघुपूर्वादिस्य पादेशः॥ ॥ ॥

=चिंतावीजं तु रनिघच्कपरार्थप्रधानमनोज्ञाद्यासान्चर्याद्विं समासिकस्य चेति भगवद्वाक्यं संज्ञापवाद एकशेषप्रसंगो प्रसिद्धत्वाच्च द्वंद्वमनोज्ञादिप्रश्नेस्यच संप्रष्टे नोभयपदार्थप्रधाने तदेतत्स्योगस्यैव ग्रहणा द्विनशाब्दो ऽसमाहारं पक्षेद्वन्नो प्रसंगाद्विणवैन्न सिद्धिः। भावोपनीतदेवस्य च पिंतु

विनशोर्भावपद्विक्षयपदस्य त्रैपदपरसंगो ऽसमाहारद्वंद्वविनगयोरिति ज्ञापकमिदं

नदीघिसंज्ञापूर्विके इति॥ ननु विशेषविषये नदीघिसंज्ञे गुरुलघुसंज्ञे तु सामान्यविषये तेन कथं नदीघिसंज्ञापूर्विके युज्येते। एवं मन्यते। वाक्यभेदेन संबंधः करिष्यते। ह्रस्वम
क्षरं लघुसंज्ञं भवति। ततो घि। घिसंज्ञं च लघुसंज्ञमिति। एवं दीर्घं गुरुसंज्ञं। ततो नदी। नदीसंज्ञं च गुरुसंज्ञमिति। पर्याय इति। नदीघिसंज्ञाभ्यां गुरुलघुसंज्ञयोर्नित्ये बा
धे प्राप्ते नयोरनुवृत्तिः पर्यायार्थैव स्यादित्यर्थः। परस्मैपदसंज्ञामिति। ततश्च क्रामती स्यादेदीर्घत्वं न स्यात्। मातर्येव तु स्यात्। ननु च क्षिचिर्वृद्धिरिति ज्ञापकात्समावेशो भविष्य

ननु च यस्याप्येकसंज्ञाधिकारस्तस्यापि नदीघिसंज्ञापूर्विके गुरुलघुसंज्ञे। कथं। अनुवृत्तिः क्रियते। पर्यायः प्रसज्येत। एका संज्ञेति वचनान्नास्ति
यौगपद्येन संभवः। परस्मैपदसंज्ञा पुरुषसंज्ञा। परस्मैपदसंज्ञा पुरुषसंज्ञां बाधेत। परवचने हि नियमानुपपत्ते रुभयसंज्ञाभावः। यस्य पुनः परं
कार्यत्वं नियमानुपपत्तेस्तस्योभयोः संज्ञयोर्भावः सिद्धः। कथं। पूर्वोत्तस्य पुरुषसंज्ञा परा परस्मैपदसंज्ञा। कथं। एवं सवक्ष्यति। तिङः स्त्रीणि त्रीणि
प्रथममध्यमोत्तमा इति। एवं सर्वे पुरुषनियममनुक्रम्य तस्यां ते लः परस्मैपदमिति। तत्रारंभसामर्थ्याच्च पुरुषसंज्ञा परं कार्यत्वाच्च परस्मैपदसंज्ञा
भविष्यति। ननु च यस्याप्येकसंज्ञाधिकारस्तस्यापि परस्मैपदसंज्ञापूर्विका पुरुषसंज्ञा। कथं। अनुवृत्तिः क्रियते। पर्यायः प्रसज्येत। एका संज्ञेति वच
नान्नास्ति यौगपद्येन संभवः। परस्मैपदसंज्ञाप्यनवकाशा वचनाद्भविष्यति। सावकाशा परस्मैपदसंज्ञा। कोऽवकाशः। शतृक्वसू अवकाशः॥०॥

ति। नैतदस्ति। अस्माद्वचनादस्मिन्कार्ये पर्यायः स्यान्न समावेशः। ततश्च प्राक्षिकी वृद्धिः स्यात्। परस्मैपदसंज्ञापीति। ततश्च पर्याये लब्धे अनुवृत्तिः समावेशार्थो भवि
ष्यतीति भावः॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥

क्ङिति च इति भसंज्ञायां सत्यामोर्गुणः स्यात् । पदसंज्ञा त्ववग्रहार्था स्यात् । गतिबुध्यादीनामिति । एकसंज्ञाधिकारेण सादिसूत्रे कर्मसंज्ञायां नियमार्थं तथा हि । प्रयोज्यः स्वव्यापारे स्वतन्त्रः प्रयोजकव्यापारेण चाप्यते इति संज्ञाद्वयप्रसंगे एकसंज्ञाधिकारादन्यतरया भाव्यं । तत्र प्रसत्यार्थे प्राधान्यात्तत्प्रयुक्तया कर्मसंज्ञया भवितव्यं । गुणप्रधानसन्निधौ प्रधानस्य प्रयोजकत्वे संभवति एष गुणस्तद्विरुद्धं स्वकार्यं न प्रयुंजते । तत्र सिद्धायां प्रयोज्यस्य कर्मसंज्ञायां गत्यर्थादीनामेवाण्यन्तानां कर्त्ता णौ कर्मसंज्ञो भवति नान्येषामिति नियमः क्रियते । तेन पाचयत्योदनं देवदत्तो यज्ञदत्तेनेति कर्मसंज्ञा न भवति । प्रधानप्रयुक्तकर्मसंज्ञाभावे च गुणक्रियानि

परवचने सितिपदं भं । परवचने सिति पदं भसंज्ञमपि प्राप्नोति । अयं तेयो नि क्ङिति यः । प्रजोविन्नामकृत्लियां । आरंभसामर्थ्याच्च पदसंज्ञा परं कार्यत्वाच्च भसंज्ञा प्राप्नोति । गतिबुध्यादीनामण्यन्तानां कर्म कर्तृसंज्ञं । गतिबुध्यादीनामण्यन्तानां कर्म कर्तृसंज्ञमपि प्राप्नोति । आरंभसामर्थ्याच्च कर्मसंज्ञा परं कार्यत्वाच्च कर्तृसंज्ञा प्राप्नोति । नैष दोषः । आचार्यप्रवृत्तिर्ज्ञापयति न कर्मसंज्ञायां कर्तृसंज्ञा भवतीति । यदयं हृक्रोरन्यतरस्यामित्यन्यतरस्यां ग्रहणं करोति । शेषवचनं च घिसंज्ञानिवृत्त्यर्थं । शेषवचनं च क्रियते । शेषो घ्यसखि । किं प्रयोजनं । घिसंज्ञानिवृत्त्यर्थं नदीसंज्ञायां घिसंज्ञा मा भूदिति । शकट्यै पद्धत्यै बुध्यै धेन्वै । इतरथा हि परं कार्यत्वाच्च घि॰ संज्ञारंभसामर्थ्याच्च ङिति ह्रस्वश्चेति नदीसंज्ञा ॥ ० ॥

मित्ता कर्तृसंज्ञा प्रवर्त्तते । यदा तु परं कार्यमिति पाठस्तदा विरोधात्सर्वत्र संज्ञाद्वय प्रसंगे गत्यादीनामेवेति नियमेनाण्यन्तधातौ तरप्रयोज्यात् कर्मसंज्ञा व्यावर्त्यते । गत्यर्थादिप्रयोज्यस्य तु संज्ञाद्वयप्रसंग इत्यर्थः । परमिति । यदि तु गत्यर्थादिप्रयोज्यस्य संज्ञाद्वयं प्राप्नोति तत्रैव सूत्रे हृक्रोरन्यतरस्यामिति नाकरिष्यत् अन्यतरस्यां ग्रहणमित्यर्थः । शकट्यै इति । शकटिशब्दान्ङे प्रत्यये कृते परत्वान्नदीसंज्ञानिमित्ते आटि कृते तत्र वृद्धिः । ङिति घेर्ङितीति गुणः प्राप्नोति ॥ ॥

=तत्रघिगुणेननदीत्वनिमित्तविनाशात्परत्वात्पूर्वमभिधानदीत्वप्रवृत्तेऽपरत्वाद्गुणेनबाधाबाधकत्वेनवानदीत्वेनतत्कार्यापेक्षयाघिसंज्ञाकार्यस्यांतरंगसंज्ञानिमित्तत्वादंतरंगत्वात्गुणेकृतेकार्यकार्यपक्षेपुनरागतोनदीकार्यकर्त्तव्यासंज्ञानप्राप्नोतीतिभावः ॥ १ ॥

नवासंभवादिति ॥ अयं भावः । यद्यत्र घिसंज्ञा प्रवर्त्तेत तर्हि तदन्तरंगत्वात्पूर्वमेव तस्याः प्रवृत्तिः स्यात् । नदीसंज्ञा तु ङिति ह्रस्वापेक्षा बहिरंगा । तत्र घिलक्षणे गुणे कृते ह्रस्वा
भावाद् ङित्वविशिष्टत्वाच्च स्त्र्याख्यानिबन्धनाभावान्नदीसंज्ञा नैव प्रवर्त्तेतेति नदीसंज्ञाविधानं ह्रस्वस्यानर्थकमेव स्यात् । तस्मान्नदीसंज्ञाविधानसामर्थ्याद् अत्र घिसंज्ञा न
भवतीत्यर्थः । नद्याश्रयत्वादिति । यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्यत इति भावः । उन्मत्तगंगमिति । अ

नवासंभवात् ॥ न वाक्यार्थे । नदीसंज्ञायां घिसंज्ञा कस्मान्न भवति । असंभवात् । कोऽसावसंभवः । ह्रस्वलक्षणा हि नदीसंज्ञा घिसंज्ञायां च
गुणः । ह्रस्वलक्षणा हि नदीसंज्ञा घिसंज्ञायां च गुणेन भवितव्यं । तत्र वचनप्रामाण्यान्नदीसंज्ञायां घिसंज्ञाभावः । न त्र वचनप्रामाण्या
न्नदीसंज्ञायां घिसंज्ञा न भविष्यति । किं कारणं । आश्रयाभावात् । आश्रयाभावान्नदीसंज्ञायां घिसंज्ञानिवृत्तिरिति चेद्यणादेशा
भावः । आश्रयाभावान्नदीसंज्ञायां घिसंज्ञानिवृत्तिरिति चेदेवमुच्यते यणादेशोऽपि न प्राप्नोति । नैष दोषः । नद्याश्रयत्वाद्यणा
देशस्य ह्रस्वस्य नदीसंज्ञाभावः । नद्याश्रयो यणादेशः । यदा नदीसंज्ञया घिसंज्ञा बाधिता ततः उत्तरकालं यणादेशेन भवितव्यं । न
द्याश्रयत्वाद्यणादेशस्य ह्रस्वस्य नदीसंज्ञा भविष्यति । बहुव्रीह्यर्थं तु । बहुव्रीहिप्रतिषेधार्थं तु शेषग्रहणं कर्त्तव्यं । शेषो बहुव्रीहिरिति । किं
प्रयोजनं । प्रयोजनमव्ययीभावोपमानद्विगुकृल्लोपेषु । अव्ययीभावे । उन्मत्तगंगं लोहितगंगं उपमाने । शस्त्रीश्यामा । कुमुदश्येनी ॥

न बहुव्रीहिसंज्ञायां सत्यां शेषे पदप्रकृतिस्वरः प्राप्तिकश्च कप्समासान्तः प्राप्नोति । शस्त्रीश्यामेति । यदा श्यामाशब्दः शस्त्र्यामेव वर्त्तते उपमेयं तु समासवाच्यं
तदान्यपदार्थवृत्तित्वाद्बहुव्रीहिसंज्ञाप्रसंगात्तन्निबन्धनः प्राप्तिकः कप्प्रसंगः । सरस्तु तत्पुरुषेण तुल्यार्थेति विधीयते तत्र नास्ति विशेषः ॥ ॥

=कास्समासांतरविर्भावादिनासेनेनन नसंज्ञायामितिनिषेधस्तुनन्नवोवादित्वस्तुवर्त्तानु [illegible] समासांतादित्यर्थकस्यतस्यप्रयोजनाभावात्संज्ञानुपत्तिबहुव्रीहेः संज्ञायांकप्रसर्पात्प्राप्नोति साप्राप्यात्शेषादित्यस्मान्नबहुव्रीहौ तु स्वरएवदोषप्रसंगः ॥ २ ॥

=विशेष्यरूपः। १= तद्धितार्थोत्तरपदसमाहारेषु संख्यापूर्वसाधनत्वेसमाहारार्थस्यसंख्या। १=राजगवीसादिश्रुत्यतत्पुरुषेत्वसमानोपादानत्वात्सिद्धे ध्वचाध्वित्वंविधुरः प्रभुनस्त्वावविभातिगवस्त्यसमस्पर्वपक्षकतिस्वनति [illegible]

पंचगव मिति। यदा समाहारे भावरूपो वाच्यः तदान्यपदार्थस्य द्रव्यस्य समाह्रियमाणार्थत्वेनतु तरभावः। बहुव्रीहिसंज्ञायां ससांतत्त्रिबंधनस्वरप्रसंगः कप्स्त्व शेषत्वात्प्रसंगाभावः। नन्वत्र टचश्चित्करणाद्बहुव्रीहिस्वरेणभविष्यति। एवंतर्ह्युदाहरणद्विगियं। इदंत्वत्रोदाहरणं पंचपात्रमिति। निष्ठोशांविरिति। को तस्यान्यपदार्थस्य समासवाच्यत्वे बहुव्रीहिसंज्ञायां तत्त्रिबंधनो नदीलक्षणः कप्प्रसंगः। यदातुपूर्वपदमेवक्रांताद्यर्थेवृत्तितदान्यपदार्थाभावः। क्रियमाणे

द्विगु पंचगवं दशगवं। लुक्लोपे। निष्कौशांबिः निर्वाराणसिः। तत्र शेषवचनाद्दोषः संख्यासमानाधिकरणनञ्समासेषु बहुव्रीहि प्रतिषेधः। तत्र शेषवचनाद्दोषो भवति। संख्यासमानाधिकरणनञ्समासेषु बहुव्रीहेः प्रतिषेधः प्राप्नोति। संख्या। द्वीरावतीको देशः त्रीरावतीको देशः। समानाधिकरण। वीरपुरुषको ग्रामः। नञ्समासे। अब्राह्मणको देशः। अवृषलको देशः। लुक्लोपे च शेषव चनात्प्रादिभिर्न बहुव्रीहिः। लुक्लोपे च शेषवचनात्प्रादिभिर्बहुव्रीहिर्न प्राप्नोति प्रपतितपर्णः प्रपर्णकः। प्रपतितपला शः प्रपलाशक इति। अथैकसंज्ञाधिकारे कथं सिध्यति। एकसंज्ञाधिकारे विप्रतिषेधाद्बहुव्रीहिः। एकसंज्ञाधिकारे विप्र तिषेधाद्बहुव्रीहिर्भविष्यति॥ ॥

विशेषग्रहणेदोषांतरप्रसंगमाह। तत्रेति। एकसंज्ञावादीतुशेषग्रहणं नकुरुते। तेन वक्ष्यमाणाभिरव्ययीभावादिसंज्ञाभिर्बहुव्रीहिसंज्ञाभावस्यसिद्धत्वा त्। द्वीरावतीकादिषु तु परत्वाद्बहुव्रीहिर्भविष्यति। द्वीरावतीकइति। नदीभिश्चेत्यव्ययीभावः प्राप्नोति। तस्यत्ववकाशः पंचनदमिति यदा समाह्रियमाणोर्थोवा च्यः। प्रपतितपर्णः प्रपर्णक इति। प्रपर्णक इत्युदाहरणं। लुक्लोपप्रदर्शनार्थंतु प्रपतितपर्ण इत्युक्तं। यथानिष्कौशांबिरितितत्पुरुषसंज्ञाभवति एवंप्रप र्णक इत्यत्रापि स्यादित्यर्थः॥ ॥

=ननु निष्कोशांबिरिति प्रथमा निरर्थस्य क्तार्थत्वाभावेपि निरर्थविशेषणत्वात्तामर्था [illegible] त्वा मासरवंश... किंसमासार्थविशेष...

तत्पुरुषोत्रेति॥ परिगणनं मन्दधियां हितायेत्याह। इतरो विशेषमनतिपद्याह। तत्पुरुष इतीति। सिद्धं त्विति। क्तार्थो यत्र समासार्थस्तत्र तत्पुरुषसंज्ञा। प्रपर्णक इत्यत्र तु क्तार्थः पर्णो वि-
शेषणं समासार्थस्त्वन्य एवेति बहुव्रीहिर्भवति। कानि पुनरिति। अस्मिन्प्रकरणे पठितानां संज्ञानां या सा समावेशो नेष्यते ताः प्रयोजनं। प्रकरणान्तरविहिता अप्यनिष्टसमा-
णसमावेशा उपसंख्यानत्वेन प्रयोजनानि भवन्तीति प्रथमपूर्वकं दर्शयितुमाह। ह्रस्वसंज्ञामिति। ऊकालोज्झ्रस्वसंज्ञः इत्युक्तं। उकारश्चाणत्वाद्द्विमात्रत्रिमात्रयोरप्यह्रक
इति तयोरपि ह्रस्वसंज्ञा प्राप्ता दीर्घप्लुतसंज्ञाभ्यां बाध्यते। स च बाधस्तत्रैव सूत्रे विस्तरेण प्रतिपादितः। तिङ्सार्वधातुकमिति। लिङ्लिटोश्च सार्वधातुकसंज्ञायां सत्यां

एकसंज्ञाधिकारे विप्रतिषेधाद्बहुव्रीहिरिति चेत्क्तार्थे प्रतिषेधः। एकसंज्ञाधिकारे विप्रतिषेधाद्बहुव्रीहिरिति चेत्क्तार्थे प्रतिषेधो वक्तव्यः। निष्को-
शाम्बिः। निर्वाराणसिः। तत्पुरुषोत्र बाधको भविष्यति। तत्पुरुष इति चेदन्यत्र क्तार्थात्प्रतिषेधः। तत्पुरुष इति चेदन्यत्र क्तार्थात्प्रतिषेधो वक्तव्यः। प्र-
पतितपर्णः प्रपर्णकः। प्रपतितपलाशः प्रपलाशक इति। सिद्धं तु प्रादीनां क्तार्थे तत्पुरुषवचनात्। सिद्धमेतत्। कथं। प्रादीनां क्तार्थे तत्पुरुषो भवती-
ति वक्तव्यं। कानि पुनरस्य योगस्य प्रयोजनानि। प्रयोजनं ह्रस्वसंज्ञा दीर्घप्लुतौ। ह्रस्वसंज्ञां दीर्घप्लुतसंज्ञे बाधेते। तिङ्सार्वधातुके लिङ्लिटोरार्धधा-
तुके। तिङ्सार्वधातुकसंज्ञां लिङ्लिटोरार्धधातुकसंज्ञा बाधते। अपसंप्रवृद्धयुवा। अपसंप्रवृद्धयुवसंज्ञा बाधते॥ ॥ ॥

तन्निबन्धनाः शब्दाः प्राप्नुवन्ति। आर्धधातुकसंज्ञा तु तन्निबन्धने रागघञौ। इदं स्त्वमप्यत्र इति लिङ्गमार्धधातुकसंज्ञार्थं शेषस्यापि सार्वधातुकसंज्ञार्थस्यादिसंज्ञाप-
कमसमावेशस्य। अपसंप्रवृद्धमिति। अत्र समावेशे सति शाल्वके पैलस्य च पुनः छात्रा इति विवक्षिते गोत्रे लुगचीति फक्फिञोर्लुक्प्रसज्येत फक्फिञोरन्यतरस्यामित्य-
यं तु लुग्विकल्प्यात्रानन्तर्यायूनि लुग्विषये तमेव लुकं बाधते न तु पैलादिभ्यश्चेत्येतमपि॥ ॥श्री॥ ॥ ॥

=अञेति शाल्वकोर्गोत्रापत्यं बाह्लादीन्यञ्च शाल्वकादेशश्च। ततो यूनि फञिञोश्चेति फक्पैलादिभ्यश्चेति लुक्। पीलाशब्दात्सीलायावेत्यण्। ततो युवत्यणो छत्र इति फिञन्तस्य पूर्वेण लुक्। न च गोत्रे लुगचीत्यनेनालुकापि यूनि लुगिति परो लुग्भविष्यतीति वाच्यं...

=अपाये ति॰ धनुर्निर्गतशरकरणकवेधे धनुषः साक्षात्करणत्वासंभवादवश्यं निर्गमनपूर्वकवेधे विध्यतिं वर्त्तयित्वा तद्धनुष्क निर्गमनस्यावधित्वेनैव निर्वर्त्तकं धनुर्वेधे परंपरया करणमित्यवश्यं वाच्यमिति भावः ।८=

घिन्नदीत्यादिशक्तौ इत्यत्र घिलक्षणगुणाभावः । लघ्विति । अनन्तक्ष दिसादौ सन्त्वज्ञाका भावः । धनुषा विध्यतीति । अपाय विवक्षया विना धनुषोप्य

घिन्नदी ॥ घिसंज्ञां नदीसंज्ञा बाधते । लघुगुरू । लघुसंज्ञां गुरुसंज्ञा बाधते । पदंभं । पदसंज्ञां भसंज्ञा बाधते । अपादानमुत्तराणि । अपादानसंज्ञामुत्तराणि कारकाणि बाधंते । यथा । धनुषा विध्यति कंसपात्र्यां भुङ्क्ते गां दोग्धि धनुर्विध्यति । धनुषा विध्यतीत्यपाययुक्तत्वाद्ध्रुवमपायेऽपादानमित्यपादानसंज्ञा प्राप्नोति साधकतमं करणमिति च करणसंज्ञा । करणसंज्ञा सा परा भवति । कंसपात्र्यां भुंक्ते इत्यत्रापाययुक्तत्वाद्ध्रुवमपायेऽपादानमित्यपादानसंज्ञा प्राप्नोति । आधारोधिकरणमिति चाधिकरणसंज्ञा । अधिकरणसंज्ञा सा परा भवति । गां दोग्धीत्यत्रापाययुक्तत्वाच्चापादानसंज्ञा(प्राप्नोति) कर्तुरीप्सिततमं कर्मेति कर्मसंज्ञा । कर्मसंज्ञा परा सा भवति । धनुर्विध्यतीत्यत्रापाययुक्तत्वाच्चापादानसंज्ञा प्राप्नोति । स्वतंत्रः कर्त्तेति कर्त्तृसंज्ञा । कर्त्तृसंज्ञा सा परा भवति । क्रुधद्रुहोरुपसृष्टयोः कर्मसंप्रदानं । क्रुधद्रुहोरुपसृष्टयोः कर्मसंज्ञा संप्रदानसंज्ञां बाधते । करणं पराणि । करणसंज्ञां पराणि कारकाणि बाधंते । यथा । धनुर्विध्यति । असिश्छिनत्तीति । अधिकरणं कर्म । अधिकरणसंज्ञां कर्मसंज्ञा बाधते । यथा । गेहं प्रविशतीति । अधिकरणं कर्त्ता । अधिकरणसंज्ञां कर्त्तृसंज्ञा बाधते । यथा । स्थाली पचतीति । अभ्युपसृष्टं कर्म अभ्युपसृष्टं कर्माधिकरणसंज्ञां बाधते ॥ ॥श्री॥ ॥

धेः साधकतमत्वाभावात् संज्ञाद्वयप्रसंगे परत्वात्करणसंज्ञा भवति ॥ ॥श्री राम जी सहाए॥ ॥श्री॥ ॥०॥ ॥

गत्युपसर्गसंज्ञे इति॥ तेन सुसिक्तमित्यादौ षत्वं न भवति सूपमानात्क्त इति गतिसंज्ञकस्तु श्रूयते॥ श्च यमंनोराज्ञत्वं च। पूर्वे पदमस्ति स्वर एव तु भवति परस्मैपदसंज्ञामिति। तेना च्योष्टाङ्कमत इत्यादौ वृद्धिदीर्घो घ भावः। समाससंज्ञा श्चेति। तेन लोहितगङ्गमित्यव्ययीभाव एव द्वीपवतीकर इति बुद्धिर्हिरेव भवति। गुणवचनं चेति। एकविषयता चकारकरणाच्च गुणवचनप्रातिपदिकसंज्ञयोः समावेशो भवति। उत्तरास्तु च संज्ञास्तु प्रातिपदिकमित्यनुवर्तनात्ताभिः प्रातिपदिकसंज्ञा समाविशति। गुणवचनसंज्ञा तु ताभिर्बाध्यते तस्या श्च

गत्युपसर्गसंज्ञे कर्मप्रवचनीयसंज्ञा। गत्युपसर्गसंज्ञे कर्मप्रवचनीयसंज्ञा बाधते। परस्मैपदमात्मनेपदं परस्मैपदसंज्ञामात्मनेपदसंज्ञा बाधते। समाससंज्ञा श्च। समाससंज्ञा श्च या याप्यनवकाशाश्च ताः ताः पूर्वाः सावकाशाश्च बाधंते। अर्थवत्प्रातिपदिकं। अर्थवत्प्रातिपदिकसंज्ञं भवति। गुणवचनं च। गुणवचनसंज्ञं च भवत्यर्थवत्। समासकृत्तद्धिताव्ययसर्वनामा सर्वलिंगा जातिः। समासः। समाससंज्ञा वक्तव्या। कृत्। कृत्संज्ञा च वक्तव्या। तद्धितः। तद्धितसंज्ञा च वक्तव्या। अव्यय। अव्ययसंज्ञा च वक्तव्या। सर्वनाम। सर्वनामसंज्ञा च वक्तव्या। असर्वलिङ्गा जातिरिति। एतच्च वक्तव्यं। संख्या। संख्यासंज्ञा च वक्तव्या। डु च। डुसंज्ञा च वक्तव्या। का पुनर्डुसंज्ञा। षट्संज्ञा। एकद्रव्योपनिवेशिनीसंज्ञा। एकद्रव्योपनिवेशिनी संज्ञा इत्येतच्च वक्तव्यं। किमर्थमिदमुच्यते। यथान्यास एव भूयिष्ठाः संज्ञाः क्रियंते। संति चैवात्र काश्चिदपूर्वा अपि। एतेनानुपूर्व्येण सन्निविष्टानां बाधनं यथा स्यात्। गुणवच

यन्निर्विधिः प्रयोजनं। बाह्यणादिग्रहणं तु समासादिसंज्ञाविषयार्थं प्राग्ज्ञातादिलक्षणप्रसयबाधनार्थं युवाद्यणसमावेशार्थं च। असर्वलिंगा जातिरिति। लिंगानां च न सर्वभागिनि लक्षणलक्षिता जातिमाश्रयति। चित्रगुलंकारकत्वमौपगवत्वं उच्चैस्त्वं सर्वलिंगोत्वं पंचत्वं डित्थत्वमिति गुणवचनसंज्ञायाः समासादिसंज्ञाभिर्बाधनात्त्वत्वं भवति। ऐकपद्यराजपौरुष्यमित्यादौ तु ब्राह्मणादित्वात्त्वत्॥ ॥ वङ्गं ॥ ॥

सर्वेषां ॥

विप्रतिषेधे परं कार्यं ॥ ॥ आचार्यवचनानां प्रामाण्याद्युगपन्माद्यलौकिकार्थस्य विरोधवाचिनो विप्रतिषेधशब्दस्येह ग्रहणं न संभवतीति मत्वा पृच्छति । विप्रतिषेध इति कोयं शब्द इति । इतरस्तु लौकिकार्थे वृत्तिरेवोपात्तो न त्वयं सामान्योर्थः परिभाषित इति मत्वाह । विप्रतिपूर्वादिति । कर्मव्यतिहार इति । सिधेर्विशेषणं व्यतिहार इति शिष्टक्रियावचनात्से धतेर्भावे घञ्त्रिलर्थेः । इतरेतरप्रतिषेधो न्योन्यप्रतिषेध इति । स एवार्थः पर्यायाभ्यां प्रदर्श्यते । यद्वा पर्यायप्रतिपत्तौ शब्दद्वयेन प्रदर्श्यते ।

विप्रतिषेधे परं कार्यं ॥ विप्रतिषेध इति कोयं शब्दः । विप्रतिपूर्वात्सिधेः कर्मव्यतिहारे घञ् । इतरेतरप्रतिषेधो विप्रतिषेधः । अन्योन्यप्रतिषेधो विप्रतिषेधः । कः पुनर्विप्रतिषेधः । द्वौ प्रसंगावन्यार्थावेकस्मिन्स विप्रतिषेधः । द्वौ प्रसंगौ यदान्यार्थौ भवतः एकस्मिंश्च युगपत्प्राप्नुतः स विप्रतिषेधः । तद्यथा द्वौ पुनरन्यार्थौ किं चैकस्मिन्युगपत्प्राप्नुतः । वृक्षाभ्यां वृक्षेभिरिति अन्यार्थौ वृक्षेभ्य इत्यत्र युगपत्प्राप्नुतः । किं च स्यात् । एकस्मिन्युगपत्संभवात्पूर्वपरप्राप्तेरुभयप्रसंगः । एकस्मिन्युगपत्संभवात्पूर्वस्याश्च परस्याश्च प्राप्तेरुभयप्रसंगः । इदं विप्रतिषिद्धं यदुच्यते एकस्मिन्युगपत्संभवात्पूर्वपरप्राप्तेरुभयप्रसंग इति । कथं ह्येकस्मिंश्च युगपत्संभवः स्यात्पूर्वस्याश्च परस्याश्च प्राप्तेरुभयप्रसंगश्च स्यात् । नैतद्विप्रतिषिद्धं यदुच्यते एकस्मिन्युगपत्संभवादिति । कार्ययोर्युगपत्संभवः शास्त्रयोरुभयप्रसंगः । तजादिभिस्तुल्यं । तजादिभिस्तुल्यं पर्यायः प्राप्नोति । तद्यथा तजादयः पर्यायेण भवंति ॥ ॥ ॥

ते । विरोधं पूर्वोक्तेन न्यायेनासंभावयन्पुनः पृच्छति । कः पुनरिति । द्वौ प्रसंगाविति । सर्वस्याचार्यवचनस्य प्रामाण्येपि लब्धावकाशयोर्वचनयोरेकस्मिन्विषये विरुद्धकार्यद्वयसमर्पणाद्वस्त्वेव विरोधः प्रसज्येतेति प्रसंगौ विधी । अन्यार्थाविति । अन्यत्र सावकाशौ । स विप्रतिषेध इति । युगपद्यासौ प्राप्तिः सा विरोधनिमित्तत्वाद्भेदोपचाराद्विप्रतिषेधशब्देनोक्ता । किं च स्यादिति । यदीदं नारभ्येतेति भावः । इतरो व्यक्तिपदार्थाश्रयेण पर्यायमाह । एकस्मिन्निति ॥ ॥ श्री ॥ ॥

अनवयवप्रसंगादिति॥ सर्वेषामनुद्देशेन शास्त्रस्य प्रवृत्तेर्नादिरित्यर्थः। प्रतिपदविधेश्चेति। अनेनोत्सर्गापवादवैधर्म्यं दर्शयति। न ह्युत्सर्गः प्रतिपदं विधीयते। तत्र प
र्यायप्रसंगे नियमार्थमिदं परमेव भवति न पूर्वमिति। एतत्सूत्रारंभाच्च पूर्वस्य लक्षणस्य तत्रानारंभोनुमीयते। तदुच्यते सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति। उ
दाहृणी जातिपक्षाश्रयेण ह। अप्रतिपत्तिर्वेति। अत्र पक्षे विध्यर्थमिदं। परं भवतीति। तस्मिन्कृते यदि पूर्वस्य प्राप्तिर्निमित्तमस्ति तत्र सकृदपि प्रवर्तते। तदुच्यते पुनः प्र

किंपुनः कारणं तजादयः पर्यायेण भवंति। अनवयवप्रसंगात्। प्रतिपदविधेश्च। अनवयवेन प्रसज्यंते प्रतिपदं च विधीयंते। अप्र
तिपत्तिर्वोभयोस्तुल्यबलत्वात्। अप्रतिपत्तिर्वा पुनरुभयोः शास्त्रयोः स्यात्। किं कारणं। तुल्यबलत्वात्। तुल्यबले ह्युभे शास्त्रे। तद्य
था। द्वयोस्तुल्यबलयोरेकः प्रेष्यो भवति। स तयोः पर्यायेण कार्यं करोति। यदा तु तमुभौ युगपत्प्रेषयतो नानादिक्षु च कार्ये भवत
स्तदा यद्यसावविरोधार्थी भवति उभयोर्न करोति। किं पुनः कारणमुभयोर्न करोति। यौगपद्यासंभवात्। नास्ति यौगपद्येन सं
भवः। तत्राप्रतिपत्त्यर्थं वचनं। तत्र प्रतिपत्त्यर्थमिदं वक्तव्यं। तव्यदादीनां तु लभ्य सिद्धिः। तव्यदादीनां तु कार्यस्याप्रसिद्धिः। न हि किंचि
त्तव्यदादिषु नियमकारि शास्त्रमारभ्यते येन तव्यदादयः स्युः। यश्च भवता हेतुर्व्यपदिष्टः अप्रतिपत्तिर्वोभयोस्तुल्यबलत्वादिति तुल्यः
स तव्यदादिषु। नैष दोषः। अनवकाशास्तव्यदादयः। उच्यंते च ते वचनाद्भविष्यंति। यश्च भवता हेतुर्व्यपदिष्टः तजादिभिस्तुल्यं प
र्यायः प्राप्नोतीति तुल्यः स तव्यदादिषु। एतावदिह सूत्रे विप्रतिषेधे परमिति। पठिष्यति त्वाचार्यः सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधि
तमेवेति। पुनश्च पठिष्यति पुनःप्रसङ्ग विज्ञानात्सिद्धमिति॥

संगविज्ञानात्सिद्धमिति। तव्यदादीनां तु कार्यस्येति परत्वादेः साधुत्वस्य वेत्यर्थः एकवा
क्योपात्तत्वादनवकाशत्वाच्च नास्त्येषां परत्वेन व्यवस्था। तजादिभिरिति। आदिशब्दस्य प्रकारार्थत्वात्तजादिभ्यस्तव्यदादयो न भिन्ना इत्यर्थः॥ ॥

सकृद्गताविति। यथा कुरुतात्त्वमिति हेर्लुङ्क्च प्राप्नोति तातङ्चेति। परत्वात्तातङ्। तस्य स्थानिवद्भावाल्लुङ् न प्रवर्त्तते। द्वारमिति। अप्रतिपत्त्यपनयनेन परशास्त्रप्र

किंपुनरियता सूत्रेणोभयं लभ्यं। लभ्यमित्याह। कथं। इह भवता द्वौ हेतू व्यपदिष्टौ। तजादिभिस्तुल्यं पर्यायः प्राप्नोतीति। अप्रतिपत्तिर्वोभयोस्तुल्यबल
त्वादिति च। तद्यदा तावदेष हेतुस्तजादिभिस्तुल्यं पर्यायः प्राप्नोतीति। तदा विप्रतिषेधे परमित्यनेन किं क्रियते। नियमः। विप्रतिषेधे परमेव भवतीति।
तदेतदुपपन्नं भवति। सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति। यदा त्वेष हेतुरप्रतिपत्तिरुभयोस्तुल्यबलत्वादिति। तदा विप्रतिषेधे परमित्य
नेन किं क्रियते। द्वारं। विप्रतिषेधे परं तावद्भवति। तस्मिन्कृते यदि पूर्वमपि प्राप्नोति तदपि भवति। तदेतदुपपन्नं भवति। पुनःप्रसंगविज्ञानात्सि
द्धमिति। विप्रतिषेधे परमित्युत्सर्गाधिकारे पूर्वमिति वक्तव्यं। किं कृतं भवति पूर्वविप्रतिषेधा न पठितव्या भवन्ति। गुणवृद्ध्यौत्वतृज्वद्भावेभ्यो नुम्
पूर्वविप्रतिषिद्धं। नुमचिरतृज्वद्भावेभ्यो नुडिति। कथं ये परविप्रतिषेधाः। इकोऽत्वाभ्यां गुणवृद्धी भवतो विप्रतिषेधेनेति। सूत्रं च भिद्यते। यथान्या
समेवास्तु। कथं ये पूर्वविप्रतिषेधाः। विप्रतिषेधे परमित्येव सिद्धं। कथं। परशब्दोयं बह्वर्थः। अस्त्येव व्यवस्थायां वर्त्तते। तद्यथा। पूर्वः पर इति। अस्त्य
न्यार्थे वर्त्तते। परपुत्रः परभार्या। अन्यपुत्रोऽन्यभार्येति गम्यते। अस्ति प्राधान्ये वर्त्तते। तद्यथा। परमियं ब्राह्मण्यस्मिन्कुटुम्बे। प्रधानमिति गम्यते। अस्ती
ष्टवाची परशब्दः। तद्यथा। परं धाम गतः। इष्टं धाम गत इति गम्यते। तद्य इष्टवाची परशब्दस्तस्येदं ग्रहणं विप्रतिषेधे परं यदिष्टं तद्भवतीति॥ ॥

वृत्तेर्द्वारमुपायः क्रियत इति यावत्। पुनःप्रसंगविज्ञानादिति। ईजतुरिति परत्वात्संप्रसारणे कृते द्विर्वचनं भवति। लक्ष्यानुरोधेन च प्रत्याहृतिपदार्थाश्रयणादनयोः
परिभाषयोर्विषयविभागोऽवसेयः। तद्य इष्टवाचीति। इष्टानिष्टविभागश्च व्याख्यानाद्बोध्यः॥ ॥

अंतरंगंचेति। अंतर्मध्येंगानि निमित्तानि यस्य तदंतरंगमित्युच्यते। एवं बहिरंगानि यस्य तद्बहिरंगं। एतच्च न्याय सिद्धमेवानूदितं। कार्यमित्यत्रोर्हेतुः कारणं हि कार्येतुल्यबलं चकारणाहेमित्रि निसानिसो त्सर्गोपवादांतरंगबहिरंगेष्वत्स्य सूत्रस्या व्यापारः। स्योन इति। सिवेर्बाहुलकान्नप्रत्यये कृते ऽपवादत्वाद्गुलोपेबाधित्वा गुणः पूर्वमंतरंगत्वाद्गुणो भवति। तत्र कृते तरंगत्वाद्गुणगुणो बाध्यते। बहिरंगस्यापूर्णोयणादेशे कृते ऽसिद्धत्वं न भवति। नाजानंतर्य इति वचनात्। द्यौकामिरिति। न नु कृते यणादेशात् द्विर्भावेसतोवृध्याभाव्यमिति नास्ति युगपद्यणदृध्योः प्राप्तिः। एवं तर्हि कृते तद्भूहाः पाणिनीया इति दिवुकामइति स्थिते अत्र यण्वृध्योर्युगपत्प्रसंगः। अथवा द्यौकामिरिति पदं यदा विभज्या न्वाख्यायते दिवुकामइति तदा दिवउदित्युले कृते यणवृद्धी प्राप्नुतः। दुद्यूषतीति। दिवेः सन्। सनीवंतर्द्धेति

अंतरंगंचाअंतरंगंच बलीयो भवतीति वक्तव्यं। किं प्रयोजनं। प्रयोजनं यणेकादेशे लोत्वात् निगुणवृद्धिद्विर्वचनाल्लोपस्वरेभ्यः। गुणाद्य णादेशः। स्योनः स्योना। गुणश्च प्राप्नोति यणादेशश्च। परत्वाद्गुणः स्यात्। यणादेशो भवत्यंतरंगतः। वृद्धेर्यणादेशः। द्यौकामिः स्योकामिः। वृद्धिश्च प्राप्नोति यणादेशश्च। परत्वाद्वृद्धिः स्यात्। यणादेशो भवत्यंतरंगतः। द्विर्वचनाद्यणादेशः॥ दुद्यूषति। सुस्यूषति। द्विर्वचनंच प्राप्नोति यणादेशश्च। नित्यत्वाद्द्विर्वचनं स्यात्। यणादेशो भवत्यंतरंगतः। अल्लोपस्य च यणादेशस्य चनास्ति संप्रधारणा॥०॥

पक्षे इडभावः। हलंताच्चेति किं त्वं। ऊठादेशः। तत्र यणश्च प्राप्नोति द्विर्वचनंच। नित्यत्वाद्द्विर्वचनं स्यात्। एतद्वाक्यं दूषयंति द्विः प्रयोगो द्विर्वचनं षाष्ठिकं व्यवस्थापितं। तत्र शब्दांतर प्राप्त्या द्विर्वचनमनित्यं यणत्वनित्य इतिवदंतः। अल्लोपस्येति। ननुगौरीवधत्वनेत्यत्रास्ति संप्रधारणा। गौरीवधनुच्छन् आ इति स्थिते यदि पूर्वं यणादेशः तन्नेन संयोगाद्यमंतादित्यल्लोपनिषेधाद्रूपं सिध्यति। अथ तु परत्वादल्लोपः स्यात्तलोपएन स्यात्। एवं तर्हि नित्यत्वात्पूर्वमत्र यणभवतीति मन्यते। कृते ऽप्यल्लोपे तस्य स्थानिवत्वाद्यणः प्राप्त्या नित्यत्वं। यणि कृते नास्यल्लोपः प्रतिषेधादिति तत्रानित्यत्वं॥ ॥ ॥

=स्थाने द्विर्वचनपक्षे यणो विशब्दांतरप्राप्त्या नित्यत्वं स्यादिति भावः।३=द्विर्वचने ऽचीत्यजनकः कृते यणः प्राप्त्याभावेपि पूर्वपदं ~~...~~ तदप्राप्त्या अनित्यतेतिवृत्तगवतो ऽभिप्रायः।४=

मा०कौ०प्र०
२८०
२९७

द्यौकामिरिति। दिउकाम इति स्थिते यणं च प्राप्नोति स्विस्त्यादिर्निखमिति स्वरश्च। तत्र यदि पूर्वस्वरः स्यात्तदा दात्तस्वरितयोर्यण इत्यौकारः स्वरितः स्यात्। उदात्तश्चेष्यते। द्युकाम इति पूर्वपदप्रकृतिस्वरोपि यणान्तरंगत्वाद्बाध्यते। तथैव दिव उदित्सुत्वेन । कार्श्वेय इति। कदुश्रद्धात्संज्ञायामिति सूत्रि। कृते ढी। ष्योढक्यत्र चेति ढक्। एषादे शो ढेलोपः। कद्रुन्द इति लोपप्रतिषेधादोर्गुण इति गुणं श्च प्राप्नोति सेकादेशश्च। नन्वकृते एकारे शोपः प्रसत्यइति निषेधात्प्राप्तिपदिकत्वाभावान्तद्धितएव न स्यात्।

स्वरयणादेशः। द्यौकामिः सौकामिः। स्वरश्च प्राप्नोति यणादेशश्च। परत्वात्स्वरः स्याद्यणादेशो भवत्संतरंगतः। गुणादेकादेशः। कार्द्रवेयो मंत्रमपश्यत्। गुणश्च प्राप्नोति सेकादेशश्च। परत्वाद्गुणः स्यात्। एकादेशो भवत्संतरंगतः। वृद्धेरेकादेशः। वैक्षमाणिः सौत्थितिः। वृद्धिश्च प्राप्नोति सेकादेशश्च। परत्वाद्वृद्धिः स्यादेकादेशो भवत्संतरंगतः। द्विर्वचनादेकादेशः। ज्ञाया ओदनः ज्ञौदनः। ज्ञौदनमिच्छतीति ज्ञौदनीयति। ज्ञौदनीयतेः सन्। जुज्ञौदनीयिषति। द्विर्वचनं च प्राप्नोति सेकादेशश्च। नित्यत्वाद्द्विर्वचनं स्यादेकादेशो भवत्संतरंगतः। अल्लोपादेकादेशः। प्रुना प्रुने। अल्लोपश्च प्राप्नोति सेकादेशश्च। परत्वादल्लोपः स्यादेकादेशो भवत्संतरंगतः। नैतदस्ति प्रयोजनं। नास्त्यत्र विशेषः। अल्लोपेन वा निवृत्तौ सत्यां पूर्वत्वेन वा। अयमस्ति विशेषः। अल्लोपेन निवृत्तौ सत्यामुदात्तनि

। ८ वृत्तिस्वरः प्रसज्येत॥ ॥ ॥ ॥

वृत्ते त्वेकादेशे तस्यांतवद्भावात्प्रातिपदिकत्वात्तद्धितोत्पत्तिरित्यानुपूर्व्यासिद्धत्वात्प्रयोजनमेतदित्याहुः। अत्रोच्यते। कृते प्येकादेशे नोढ्या लोपरिति ढेलोपः। कद्र्वादिति निषेधाच्च ढ्याप्कार्येविष्यतितद्धितइत्सदोषः। प्रुनेति। ननु प्रुशुवेति ते प्रसारणे कृते तस्यासिद्धत्वान्न संयोगाद्धमंतादिति निषेधादल्लोपः प्रसनास्ति प्राप्तिः। एवं तर्हि प्राग्भादित्यसिद्धत्वमाश्रित्येतदुक्तं प्रयोजनं। प्रसाख्यानवाद्याह। नैतदस्तीति। प्रयोजनवाद्याह। अयमस्तीति॥ ॥ ॥

राम०
२८०

=यघमित्रं यद्यपमा प्रत्याख्यानवादिन इवयत्र न ह्यीमादिग्रंथस्तथापि पुनः पश्येत्युदाहरणेन गोष्वन्निस्यस्याप्रसक्तेरुदात्तनिवृत्तिस्वरेनिष्प्रत्यूह इति प्रयोजनवादिन एवायंग्रंथ इत्याहुः एवेति नीकादिस्यानिकस्यलक्षणविशेषानादरे लक्षणस्य निषेध इ

=नगोश्वन्निसत्रत्तनीयादिर्दिनक्ति भितिविधिरनुवृत्तिरिति नामः एवंतर्हि भिवक्ष्यमाणपक्षे विभक्तिरिस्वेवानुवर्ततेनन्तीयादिरिस पिपुनरितित्र प्रपक्षे च विभक्तिरिस्वपिनानुवर्तते इति विवेचनः॥

प्रत्याख्यानवाद्याह। नात्रेति। प्रयोजनवाद्याह। नैष इति। एवं वाह। यत्रतर्हीति। यत्र पुनरिसयर्थः। पुनः पश्येति। अत्र हि नगोश्वन् इति प्रतिषेधाभावाद‍ल्लोपे सत्युदात्त निवृत्तिस्वरप्रसंगः। तस्मात्सूत्रमेकादेश एष्टव्यः। प्रत्याख्यानवाद्याह। एवं तर्हीति। प्रयोजनवाद्याह। यत्र तर्हीति। बहुमुनीति। बहो नञ्वदुत्तरपदभूम्नी सं तो दात्तः तस्मान्ङीपि कृते ऽल्लोपे क्रियमाणे उदात्तनिवृत्तिस्वरः स्यात्। प्रत्याख्यानवाद्याह। यदि पुनरिति। प्रयोजनवाद्याह। नैवं शक्यमिति। कुमारशब्दः सावयवर्णो त इति ङीपउदात्तस्वरो न स्यात्। प्रत्याख्यानवाद्याह। एवं तर्हीति। मुनी सत्र ङीपउदात्तनिवृत्तिस्वरस्य सिद्धत्वाल्लिङ्ङीषु विधानेने सर्थः। तदेवमल्लोप

नात्रोदात्तनिवृत्तिस्वरः प्राप्नोति। किं कारणं। नगोश्वन्साववर्णा इति प्रतिषेधात्। नैष उदात्तनिवृत्तिस्वरस्य प्रतिषेधः। कस्य तर्हि। तृतीयादि स्वरस्य। यत्र तर्हि तृतीयादिस्वरो नास्ति। पुनः पश्येति। एवं तर्हि नत्वा लक्षणिकस्य प्रतिषेधं शिष्मः। किं तर्हि येन केन चित्स्वरस्य विभक्ति स्वरस्य प्रतिषेधः। यत्र तर्हि विभक्तिर्नास्ति बहुमुनीति। यदि पुनरयमुदात्तनिवृत्तिस्वरस्यापि प्रतिषेधो विज्ञायेत। नैवं शक्यं। इहापि प्र सज्येत कुमारीति। एवं तर्हि आचार्यप्रवृत्तिर्ज्ञापयति नोदात्तनिवृत्तिस्वरः शुन्यवतरतीति। यदयं श्वन् शब्दं गौरादिषु पठति। कोनोदात्ता र्थे यत्नं करोति। सिद्धं हि स्यान्ङीषैव। स्वरः एकादेशः। सोऽस्थितिः वैक्षमाणिः। स्वरस्य प्राप्नोत्येकादेशस्य। परत्वात्स्वरः स एकादेशो भवतु स

देकादेशस्य स्वरार्थत्वं दूषितं। प्रयोजनांतरं तु स्येव। यद्यत्राल्लोपो भवति तदा ऽनउपधालोपिन इति ङीपि सति बहुमुनीति भवति। यदा त्वेकादेशेनाल्लोपो बाध्य ते तदोपधालोपित्वाभावान्ङीबभावाद्बहुमुच्येति। गौरादिलक्षणो ङीष् नास्ति। अनुपसर्जनादिस धिकारात्। भाष्ये तु बहुमुनीम प्रत्याख्यानवादिमते नोपन्यस्तं। तत्सपक्षे क्रि त्वङीपा भाव्यमिति। न्यायमूलत्वेचेदं मतं रंगबलीय इति। न च न्याय त्रे स्योकेन चिद्धाधो स्तीति बहुमुच्येत्येव भाव्यमिति न्यायविदस्त्वाहुः। सोऽस्थितिरिति। सुउस्थित इ इति स्थिते यद्यत्र पूर्वमुकारस्योदात्तत्वं स्यात्तदा स्वरितोवानुदात्ते पदादाविति पक्षे स्वरितत्वं प्रसज्येत। पूर्वत्वेकादेशे कृते नित्यमाद्युदात्तमेत द्भवति॥ ॥

भा०कै०प०
२५१
२७।

गुणस्येति। परत्वाद्गुणेन भाव्यं। स्तेर्णिरिति। विभज्यान्वाख्याने स्तृ न इ इति स्थिते। नरंगत्वादित्वं नतो वृद्धिः। स्तर इति। स्तेर्णिरिति यदि पूर्वं स्तरः ततः इत्वं न याप्यां तरतम्मादु
रान्तत्वं सिध्यति। न वेति। इदानीमित्याद्गुणः प्राप्नोति कुमारी ईहते इत्यादौ यणादेश इत्युक्तं सवर्णदीर्घत्वेन विध्यंतरबाधं नैतदिति। एकनिमित्तप्राप्तविध्यंतरबाधने
न सावकाशः सवर्णदीर्घो तरंगं बाधितुं न शक्नोतीति भावः। निरवकाशेन तु विध्यंतरेण सावकाशोंतरंगोपि विधिर्बाध्यते यथा गोत्रे लुगचीत्यलुकालुक्। न वा परत्वादिति।

गुणस्य चेल्लोत्वयोश्च नास्ति संप्रधारणा। वृद्धेरित्लोत्वे। स्तेर्णिः पोर्निः। वृद्धिश्च प्राप्नोति ल्लोत्वे च। परत्वाद्वृद्धिः स्यादित्लोत्वे भवतोंतरंगतः। द्विर्वच
नादित्लोत्वे। आतेस्तीर्यते। आपोपूर्यते। द्विर्वचनं च प्राप्नोति ल्लोत्वे च। नित्यत्वाद्द्विर्वचनं स्यादित्लोत्वे भवतोंतरंगतः। अभ्यासस्य चेल्लोत्वयोश्च ना
स्ति संप्रधारणा। स्वरे नास्ति विशेषः। इणद्विः शीणमादुणः सवर्णदीर्घत्वात्। इणद्विः शीणमादुणः सवर्णदीर्घत्वान्प्रयोजनं। अयजइ
इ अवयइंद्र। वृक्ष इंद्र वृक्षेन्द्र। तर इंद्र यइंद्र। आद्गुणश्च प्राप्नोति सवर्णदीर्घत्वं च। परत्वात्सवर्णदीर्घत्वं स्यात्। आद्गुणो भवत्यंतरंगतः।
न वा सवर्णदीर्घत्वस्यानवकाशत्वात्। न वा एतदंतरंगेणापि सिध्यति। किं कारणं। सवर्णदीर्घत्वस्यानवकाशत्वात्। अनवकाशं सवर्णदी
र्घत्वमाद्गुणं बाधेत। नैतदंतरंगेस्ति। अनवकाशं परमिति। इहापि स्योनः स्योनेति शकंधूकं। न वा परत्वाद्गुणस्येति। उऊपोरेकादेश ईत्वलो
पाभ्यां। ऊऊपोरेकादेश ईत्वलोपाभ्यां भवत्यंतरंगतः प्रयोजनं। ईत्वादेकादेशः। खट्वीयति मालीयति। ईत्वं च प्राप्नोत्येकादेशश्च। परत्वादीत्वं
(१ स्यादेकादेशो भवत्यंतरंगतः॥ ॥ ॥

यथालक्ष्यपरत्वेन व्यवस्था अपि त्वंतरंगत्वेन तथा आद्गुणेपि समानकल्पो दीर्घेण बाध्यते न त्वंतरंग इति भावः। खट्वीयतीति। खट्व आय इति स्थिते यदि
पूर्वमीत्वं स्यात् ततः आद्गुणः प्रसज्येत। नन्वाकारसहिते ईत्वे यस्येति लोपो भविष्यति। नैतदस्ति। पूर्वविधौ विधितील्लस्य स्थानिवद्भावात्॥ ॥ ॥

एम०
२६१

नलोपे त्वाभ्यामिति। ऊङः ईत्वासंभवादयं क्रमः। युक्तश्चाश्रयितुमिति भावः। यद्यप्यजाद्यंतमिति ईत्वशास्त्रस्य पूर्वं निपातोन्याय्यः तथापि लक्षणे प्रायेणासौ नाद्रि
यते। चौ दृतीति। पूर्वमाकारलोपे सति तत्स्थानिवत्वादसिद्धत्वाच्चाकारलोपाभावाद्दीर्घ इति गुणस्य प्रसंगः॥ म्लानीयमिति। विभज्यान्वाख्याने म्लै अनीय इति
स्थिते नैमित्तिकत्वादात्वमंतरंगं भवति। म्लाछत्रमिति। म्लाम्ला इति क्विबंते। अत्रापि तथा विभज्यान्वाख्याने म्लै छत्र इति स्थिते यदि पूर्वं उत्त्वं स्यात्तदैजंतत्वाभा

लोपादेकादेशः। कामंडलेयः भाद्रबाहेयः। लोपश्चाप्राप्तोसेकादेशश्चापरत्वाल्लोपः स्यादेकादेशो भवसंतरंगतः। अथ किमर्थमीत्वलो
पाभ्यामित्युच्यते नत्लोपेत्वाभ्यामिति वोच्येत। संख्यानात्तदेशोमाभूदिति। आपोप्येकादेशो लोपे प्रयोजयति। चौ दृः बालाक्रिः। अपत्व
नपुंसकोपसर्जनह्रस्वत्वानि च यथायोगमेकादेशात्तु विधिभ्यो भवंति संतरंगतः। वेन्नं। वानीयं। शो। शानीयं। म्लै। म्लानीयं। म्ला। म्लानी
यं। म्लाछत्रं। म्लाछत्रं। आत्वं च प्राप्तोसेते च विधयः। परत्वादेते विधयः स्युः। आत्वं भवसंतरंगतः। नपुंसकोपसर्जनह्रस्वत्वं च प्रयो
जनं। अतियेत्रं। अतिन्वत्रं। अतिरिछत्रं। अतिनुछत्रं। आरा शस्त्रीदं। धानाशष्कुलीदं। निःकौशांबीदं। निर्वाराणसीदं। निष्को
शांबिछत्रं। निर्वाराणसिछत्रं। नपुंसकोपसर्जनह्रस्वत्वं चप्राप्तोसेते विधयश्चापरत्वादेते विधयः स्युः। नपुंसकोपसर्जन
नह्रस्वत्वं भवसंतरंगतः। तुग्पणेकादेशगुणावद्धौत्वदीर्घत्वेत्वमुमेत्वरीविधिभ्यः। यणेकादेशगुणावद्धौत्वदीर्घत्वेत्वमुमेत्व
वाद्यत्वं न स्यात् यथा ठौकितेति। उपदेशग्रहणानपेक्षया चैतदुदाहरणं। अतिर्य ˘रीविधिभ्यः तुग् भवसंतरंगतः॥ ॥
त्रेति। अतिरैत्र इति स्थिते आयादेशे सत्यनजंतत्वाद्ध्रस्वो न स्यात्। आराशस्त्रीदमिति। आराशस्त्री इदमिति स्थिते यद्यत्र पूर्वमेकादेशः स्यात्तदातस्यां
˘तवद्भावाद्ध्रस्वे कृते रूपं न सिध्येत्॥ ॥७॥ ॥

अग्निचिदत्रेति। परसमुदायस्य विभज्यान्वाख्याने अग्निचित् अत्र इति स्थिते यदि पूर्वं यणा स्यात्तदा तु ङ् स्यात्। नपुंसकं चात्राग्निचिदिति द्रष्टव्यं। पुंसि विभक्त्या व्यवधानात्। सुकृद् दुःकृतावित्ति। कथं पुनरत्रानङ् प्राप्नोति। यावता विद्यायोनिसंबंधवाचिनामृदन्तानां ह्येतद्विहितमिति चिंत्यमेतत्। धियतीति। धिधारणे इति

यणादेशात्। अग्निचिदत्र। सोमसुदत्र। एकादेशात्। अग्निचिदिदं सोमसुदिदं। गुणात्। अग्निचिते सोमसुते। वृद्धेः। प्रऋच्छकः मार्च्छकः॥ औत्वात्। अग्निचिति सोमसुति। दीर्घत्वात्। जगद्भ्यां जनगद्भ्यां। ईत्वात्। जगसति जनगसति। मुमः। अग्निचिन्मन्यः सोमसुन्मन्यः। एत्वात्। जगद्भ्यः जनगद्भ्यः। रीविधेः। सुकृत्स्यति पापकृत्स्यति। अनङानङ्भ्यां चेति वक्तव्यं। सुकृत्। सुकृद्दुःकृतौ। तुक् च प्राप्नोत्येते विधयश्च। परत्वादेते विधयः स्युः तुग्भवत्यंतरंगतः। इयङादेशो गुणात्। इयङादेशो गुणाद्भवत्यंतरंगतः। प्रयोजनं धियतीरियति। इयङादेशः प्राप्नोति गुणश्च। परत्वाद्गुणः। इयङादेशो भवत्यंतरंगतः। उवङादेशश्चेति वक्तव्यं। प्राडुद्ववत्। प्रासुसुवत्। श्वेः संप्रसारणात्पूर्वत्वं यणादेशात्। श्वेः संप्रसारणात्पूर्वत्वं यणादेशात् भवत्यंतरंगतः। प्रयोजनं शुशुवतुः शुशुवुः पूर्वत्वं च प्राप्नोति यणादेशश्च। परत्वाद्यणादेशः स्यात्पूर्वत्वं भवत्यंतरंगतः। ऊङ् आकारलोपात्। ऊङ् आकारलोपात्पूर्वत्वं भवत्यंतरंगतः। प्रयोजनं जुहुवतुः जुहुवुः। पूर्वत्वं च प्राप्नोत्याकारलोपश्च परत्वादाकारलोपः स्यात्पूर्वत्वं भवत्यंतरंगतः। स्वरो लोपात्। स्वरो लोपाद्भवत्यंतरंगतः। प्रयोजनं औपगवी सौदामनी। स्वरश्च प्राप्नोति लोपश्च परत्वाल्लोपः स्यात्स्वरो भवत्यंतरंगतः॥ ॥ ॥

पिशेः कृतेति बाध्ययो गुणः प्राप्नोति। विकरणाश्रय इयङ् भवत्यंतरंगत्वात्। यणादेशश्चेति। एरनेकाच इति यण्। जुहुवतुरिति। ह्वा अनुसा ह्वः संप्रसारणं अभ्यस्तस्य चेति संप्रसारणे कृते यद्याकारस्य लोपः स्यात्तदास्यानिवत्वात् सिद्धत्वाच्चोवङ् न स्यात्। औपगवीति। उपगोरियमित्यणि ङीपि च कृते यदि प्रसयोद्युदात्तत्वासिद्धत्वु ह्युदात्तत्वात्पूर्वं लोपः स्यात्तदोदात्तनिवृत्तिस्वर ईकारस्य न स्यात्॥ ॥

= उपगोरियमिति अनंतरं पस्य मिति शेषः। गोत्रा तिङुजा तिलाने। भेव स्यादि तिनस्वरः प्रयोजनं स्यात्‌ २ =

=नत्वेनिःर्पाप्य पि सन्निधिष्टत्वादिदं सिद्धं नभाष्यं तनंरंगत्वादपीष्टसिद्धिरिति भावः।२=

अग्निरिंद्र इति। यद्यपि प्रत्ययरहिताया: प्रकृते: प्रयोगो नास्ति तथापि वाक्यस्य विभज्यान्वाख्याने क्रियमाणेऽयं विचार: क्रियते। यद्यपि प्रत्ययस्य निसत्व त्तथाप्यंतरंगेणैव सिद्धत्वान्न तदाश्रितं। पचतत्रेति। यद्यत्र पूर्वं यणा स्यात् तदा न ल्विधाविति स्थानिवत्वनिषेधा उत्वं न स्यात्। पूर्वशालाप्रिय इति। पूर्वा शालाप्रिया अस्येति त्रिपदे बहुव्रीहौ कृते तद्धितार्थेति द्वयो: पदयो: तत्पुरुष:। तत्र त्रिपदाश्रयबहुव्रीहिनिमित्त: पूर्वपदप्रकृतिस्वरो बहिरंगत्वान्न प्रवर्त्तते। तेन तत्पुरुषसमासाश्रयं शाला

प्रत्ययविधिरेकादेशात्। प्रत्ययविधिरेकादेशाद्भवत्यंतरंगत:। प्रयोजनं अग्निरिंद्र: वायुरुदकं। प्रत्ययविधिश्च प्राप्नोत्येकादेशश्च। परत्वादेकादेश: स्यात् प्रत्ययविधिर्भवत्यंतरंगत:। यणादेशाच्च। यणादेशाच्चेति वक्तव्यं। अग्निरत्र वायुरत्र लादेशो वर्णविधे:। लादेशो वर्णविधेर्भवत्यंतरंगत:। प्रयोजनं पचतत्र पठतत्र। लादेशश्च प्राप्नोति यणादेशश्च। परत्वाद्यणादेश: स्यात् लादेशो भवत्यंतरंगत:। तत्पुरुषांतोदात्तत्वं पूर्वपदप्रकृतिस्वरात्। तत्पुरुषांतोदात्तत्वं पूर्वपदप्रकृतिस्वराद्भवत्यंतरंगत:। प्रयोजनं पूर्वशालाप्रिय: अपरशालाप्रिय:। तत्पुरुषांतोदात्तत्वं च प्राप्नोति पूर्वपदप्रकृतिस्वरत्वं च। परत्वात्पूर्वपदप्रकृतिस्वरत्वं स्यात् तत्पुरुषांतोदात्तत्वं भवत्यंतरंगत:। एतान्येतस्या: परिभाषाया: प्रयोजनानि यदर्थमेषा परिभाषा कर्त्तव्या। यदि संति प्रयोजनानीत्येषा क्रियते। ननु चेयं कर्त्तव्या असिद्धं बहिरंगलक्षणमंतरंगलक्षण इति। किं प्रयोजनं। पचावेदं पचामेदं। बहिरंगलक्षणगुणस्यांतरंगलक्षणमेत्वं माभूदिति। उभेत हि कर्त्तव्ये। नेत्याह। अनयैव सिद्धं। इहापि स्योन: स्योनेति असिद्धत्वाद्बहिरंगलक्षणस्य गुणस्यांतरंगलक्षणो यणादेशो भविष्यति॥ ॥ ॥

शब्दस्यांतोदात्तत्वं भवति। पूर्वशब्द: स्वांगशिटामदंतानामित्याद्युदात्त:। पचावेदमिति। अंतरंगबलीयस्त्वे नैतत्सिध्यति। बहिरंगे कृते आद्गुणे एत ऐ इति प्राप्नोति। अनयैवेति। इयं हि व्यापिका। पूर्वोक्तप्रयोजननिष्पादनात्। शास्त्रासिद्धत्वाश्रयणाद्बहिरंगलक्षणं नतावत्प्रवर्त्तते। अंतरंगलक्षणोत्प्रवृत्तेर्यत्र निमित्तसद्भावस्तत्र बहिरंगलक्षणप्रवृत्ति:॥ ॥

नाजानन्तर्य इति। अचो ऽनानन्तर्यमाश्रित्य यत्र कार्यं विधीयते तत्रैषा परिभाषा नोपतिष्ठते। पदद्वयमिति। कोसिचद्धी सेति बहिरंगस्यैकादेशस्यासिद्धत्वात्सत्वं न प्रविष्यति तत्कृतत्वप्रवर्त्तिष्यते इति
किमसिद्धवचनेन। पदद्वयमिति। दिवश्वाह ऊस् इति स्थिते वाहः संप्रसारणमेव कर्त्तव्यं। तत्र कृते पूर्वैकादेशे च राख्या अयेगुणो वृद्धिरेचीति वृद्धौ सिद्धं दिवौह इति। अनकारान्ते चोपपदे वाहे ण्व
न्द्विः शिरीविर्न दृश्यते। प्रयोगदर्शने वा सस्त्रहतेः क्विपि प्रयोगो भविष्यति किमूठादेशविधानेनेति परिभाषाया ज्ञापकः ऊठ् विधिः। तस्यां हि सत्यां बहिरंगस्य संप्रसारणस्यासिद्धत्वा

यघसिद्धं बहिरंगलक्षणमन्तरंगलक्षणे इत्युच्यते अक्षद्यूः हिरण्यद्यूः असिद्धत्वाद्बहिरंगलक्षणस्योठोऽन्तरंगलक्षणो यणादेशो न प्राप्नोति। नैष दोषः।
असिद्धं बहिरंगलक्षणम् अन्तरंगलक्षणे इत्युक्त्वा ततो वक्ष्यामि नाजानन्तर्ये बहिष्ट्वप्रकॢप्तिरिति। सा तर्ह्येषा परिभाषा कर्त्तव्या। न कर्त्तव्या। आचार्यप्रवृत्ति
र्ज्ञापयति भवत्येषा परिभाषेति। यदयं षत्वतुकोरसिद्ध इत्याह। इयं तर्हि परिभाषा कर्त्तव्या। असिद्धं बहिरंगलक्षणमन्तरंगलक्षणे इति। एषा च न कर्त्तव्या
आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति। यदयं वाह ऊठ् इति ऊठं शास्ति। तस्य दोषः पूर्वपदोत्तरपदयोर्वृद्धिस्वरावेकादेशात्। तस्यैतस्य लक्ष
णस्य दोषः पूर्वोत्तरपदयोर्वृद्धिस्वरावेकादेशादन्तरंगतोऽभिनिर्वृत्तान्न प्राप्नुतः। पूर्वैषुकामशमः अपरैषुकामशमः गुडोदके तिलोदकं। उदके केवले इ
ति पूर्वोत्तरपदयोर्व्यपवर्गाभावान्न स्यात्। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति पूर्वोत्तरपदयोस्तावत्कार्यं भवति नैकादेश इति। यदयं नेन्द्रस्य परस्ये
ति प्रतिषेधं शास्ति। कथं कृत्वा ज्ञापकं। इन्द्रे द्व्यचौ। तत्रैकोऽयस्येति लोपेनापह्रियते परएकादेशेन ततो न चक्र इन्द्रः संपन्नः तत्र कः प्रसंगो वृद्धेः प
श्यति त्वाचार्यः पूर्वपदोत्तरपदयोस्तावत्कार्यं भवति नैकादेश इति ततो नेन्द्रस्य परस्येति प्रतिषेधं शास्ति॥ ॥ ॥

दन्तरंगे गुणो न स्यादित्यद्द्रिविधीयते। पूर्वैषुकामशम इति। पूर्व इषुकामशमी अ इति स्थिते यद्यन्तरंगत्वाद्गुणः स्यात्तदा पूर्वोत्तरपदयोर्व्यपवर्गाभावादुभयत आश्रयणेऽन्ता
दिवद्भावनिषेधाच्च दिशोऽमद्राणां प्राचां ग्रामनगराणामित्युत्तरपदवृद्धिर्न स्यात्। उत्तरपदवृद्धौ सर्वं चेति च शब्दादिकृश्वश्चेति तद्ये वषर्वे पदान्तोदात्तत्वं न स्यात्। सावकाशं चैतदुभ
यं पूर्वकास्यैमृत्तिक इति। गुडोदकमिति। उदके केवले इति पूर्वपदान्तोदात्तत्वं न स्यात्। उदश्वित् उदकमित्यादावेतत्स्यात्॥ ॥ ॥

=परिभाषायां अंजेदोषा सङ्गिभाषानकार्येनियस्यगतंतस्यमतेतामादायदोषोऽभावनमयुक्तमितीदं चिंताबीजं॰२=

प्रसंगेनव्याकरणांतरेलक्षणांविचारयितुमाह। यणादेशादिति। लोपो भविष्यतीति। ननु बहिरंगत्वादियुवोरसिद्धत्वाल्लोपेन प्राप्नोतीत्यत्राह। समुदायस्यासिद्धत्वेनावयवस्येति। समुदायस्यासिद्धत्वे सामर्थ्यात्तदवयवस्याप्यसिद्धत्वमितिचिंत्यमेतत्। पचेयुरिति। पचयाञ्चया उस्‌इति स्थितेयद्यंतरंगत्वात्पररूपं क्रियेततदाप्यपवर्गाभावादिपादेशोनस्यात्। एकादेशस्यांतवत्त्वाद्भविष्यतीतिचेत्। एवमपिरूपंनसिध्येत्। याभिसस्येति। सलोपापवादइयादेशः। अकृतेसलोपेनास्तिपररूपप्रसं

यणादेशादियुवो। यणादेशादियुवो अंतरंगतोभिनिर्वृत्तात्प्राप्नुतः। वैय्याकरणाः सौवश्वः इति। लक्षणं भवति। य्वोर्वृद्धिप्रसंगे इयुवोर्भवत इति। नैषदोषः। अनवकाशाविय्युवौ। अचीत्युच्यते। किंपुनःकारणमचीत्युच्यते। इहमाभूत्। ऐतिकायनः औपगव इति। स्नामत्रेयुणो लोपो व्योर्वलीति लोपो भविष्यति। यत्र तर्हि लोपोनास्ति। श्रेयमेधः श्रेयंगव इति। उसि पररूपात्प्राग्‌उसि पररूपाद्यांतरंगतोभिनिर्वृत्तादियादेशो न प्राप्नोति। पचेयुः यजेयुः। नैषदोषः॥ नैवं विज्ञायतेयाइसे तस्य इय् भवतीति। कथं तर्हि याभिसितस्य इय् भवतीति। लुक्‌लोप यणयवायावावेकादेशेभ्यः। लोपयणयवायावावेकादेशेभ्यः लुक्‌बलीयानितिवक्तव्यं। लोपात्। गोमान्प्रियोयस्य गोमत्प्रियः। गोमानिवाचरति गोमत्यते यवमत्यते। यणादेशात्। ग्रामण्यः कुलं ग्रामणिकुलं। सेनान्यः कुलं सेनानिकुलं। अयवायावेकादेशेभ्यः। गावेहितं गोहितं। रायःकुलं रैकुलं। नावःकुलं नौकुलं। वृक्णाद्यंहृत्कमयं। लुक्प्राप्नोसेतेविधयश्चपरत्वादेतेविधयःस्युः। लुग्बलीयानितिवक्तव्यं॥ लुक् यथास्यात्॥ ॥इतिश्रीमद्भगवत्पतंजलिविरचितेव्याकरणमहाभाष्येप्रथमस्याध्यायचतुर्थेपादेप्रथममाह्निकं॥ ॥ ॥

गः गोमत्प्रिय इति। यद्यत्रलोपःस्यात्तदाप्रत्ययलक्षणेन नुमादिस्यात्। ग्रामणिकुलमिति। यणादिषुकृतेषुलुक्यसतिरूपंनसिध्येत्। वृकादिति। एवमेकादेशेकृतेतस्यादिवद्भावाल्लुक्यसतिरूपंनसिध्येत्। अंतरंगानपिविधीन्बहिरंगोलुग्बाधतइत्यस्यप्रत्ययोत्तरपदयोश्चेत्यत्रज्ञापितत्वात्सिद्धं॥ ॥इत्युपाध्यायजैय्यटपुत्रकैयटकृतेमहाभाष्यप्रदीपेप्रथमस्याध्यायस्यचतुर्थेपादेप्रथममाह्निकं॥०॥

=ननु ह्रस्वलक्षणेति बिन्दुः। अमात्रे इति मदंगोत्वैपर्यं चन्त्रासमार्दीतिद्विवचनस्येत्यत आह। स्त्र्याख्यविलादः॥१= स्वरः कृतिप्रत्ययादिततात्॥२= अन्यएवेति। अर्थभेदाच्छब्दभेद इति भावः॥३=

यूस्त्र्याख्यौ नदी॥ यू इति किमर्थमिति। स्त्र्याख्यं नदी सेनावदेवास्तु। ज्ञापकाद्रूपो न भविष्यतीति प्रश्नः। एष स्वर इति। पूर्वपदप्रकृतिस्वरं बाधित्वा पूर्वपदान्तोदात्तत्व
मित्यर्थः। इष्यते च पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वं। खट्वाशब्दस्य नित्स्वरेणाद्युदात्तत्वात्। मातुरिति। मातृशब्दः संबंधिवचनः स्त्रीविषय एवेति नाख्याग्रह
णेन निवर्त्यते। परिच्छेत्तृवाचीत्वन्य एव मातृशब्दः। न घृतश्चेति। ञ्यग्रहणमस्त्यर्थं स्यात् बहुपितृक इत्यज्ञापकमकारान्तानां नदीसंज्ञाभावस्य। किं पुनरिति।
ननु समानधर्मोनुपपत्त्या संदेहाभावात्तस्मात्तु उपपत्तिः। न हि दीर्घनिर्देशे यू इति निर्देशोपपत्तिः। एवं तर्हि युक्तायुक्तत्वनिरूपणाय प्रश्नः। उत्तरत्रेति। ह्रस्व

यूस्त्र्याख्यौ नदी॥ यू इति किमर्थं। खट्वामाला। किं च स्यात्। खट्वाबंधुः मालाबंधुः नदीबंधुनीत्येष स्वरः प्रसज्येत। इह च बहुखट्
वूक इति। न घृतश्चेति नित्यः कप्प्रसज्येत। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति नाबो नदीसंज्ञा भवतीति। यदयं ङेराम्नद्याम्नीभ्य इ
ति पृथगाब्ग्रहणं करोति। इह तर्हि मात्रे मातुरित्याण्नद्या इत्याट् प्रसज्येत। किं पुनरिदं दीर्घयोर्ग्रहणमाहोस्विद्ध्रस्वयोः। किं चातः। य
दि दीर्घयोर्ग्रहणं यू इति निर्देशो नोपपद्यते। दीर्घाद्धि पूर्वसवर्णदीर्घः प्रतिषिध्यते। उत्तरत्र च संज्ञिविशेषणं न प्रकल्पेत यू ह्रस्वा
विति। यदि ह्रस्वयोः ह्रस्वोऽप्य ह्रस्वौ न यू यू ह्रस्वौ चेति विप्रतिषिद्धं। अथ ह्रस्वयोः हे शकटे। अत्रापि प्रसज्येत। नैष दोषः॥ ॥

निर्देशे ह्रस्व इत्येकत्वस्याविवक्षितत्वाद्यू ह्रस्वाविति विशेषणविशेष्यभावोपपत्तिः। अस्ति तु विशेषणे मात्रे मातुरित्यत्रापि प्रसंगः। अथ ह्रस्वयोरि
ति। दीर्घयोरप्यणः सवर्णान् गृह्णातीति सिध्यति। ननु चोकालत इत्यत्रोत्कं अणुदित्सवर्णस्येत्यत्राशब्दसंज्ञाग्रहणमनुवर्त्तते। न तश्च सवर्णग्रहणे न नभावः।
नैष दोषः। नेयङुवङ्स्थानावस्त्रीति प्रतिषेधात्सवर्णग्रहणं भविष्यतीति। न हि ह्रस्व इयङुवङ्स्थानः। स्त्र्याख्यौ इति। अस्त्रीत्ययमपि निषेधः पर्युदासः। सवर्ण
ग्रहणस्य ज्ञापकः॥ ॥

=ननु ह्रस्वनिर्देशे यिपूह्रस्वइति भिन्नवचनकत्वात् सामानाधिकरण्यानुपपत्तिरत आह। अविवक्षितत्वादिति। ननु वेदाः प्रमाणमित्यादौ पर्योनेकवचननिष्ठस्य बुद्धिपरिकल्पितैकत्वस्य प्रमाणत्वसहचारिणो विवक्षितत्वादुपपत्तिर्यथा। इकारोकारौ भगोनिष्ठैकत्वस्य ह्रस्वत्वसामानाधिकरण्याभावादिति भावः॥३=

=भाष्यभावेपिसर्वथा। कि नु भवेदितिङी विशक्ट्याशब्दस्यसाधुत्वंबोध्यं। ३=अस्तिनेरडइतिःएवंचोभाभ्यामप्यवयवंवचनंकार्यमित्याशयकभाष्येनेकदेशयुक्तिरितिभावः। २=अस्मिन्पक्षेहेशाकटीतिङीषिभाविष्यति। ४=

अवश्यमनेति॥ तत्र दीर्घग्रहणपक्षे शकटिशब्दस्याप्राप्तपक्षे नदीसंज्ञा विधेया। ह्रस्वपक्षे तु नित्यप्राप्तपक्षे बाध्येतेति नास्ति विशेषः। अथ तु बह्वादिषु शकटिशब्दो विभाषा ङी-
षर्थः पठ्यते तदा दीर्घनिर्देशपक्षे पाक्षिके ङीषि हे शकटि इति भवति शकटिशब्दस्य हे शकटे इति ह्रस्वनिर्देशे तु ङीषि सत्यपि हे शकटी ति प्राप्नोतीत्यस्ति भेदः। एष स्वर इति। १

अवश्यमत्र विभाषा नदीसंज्ञैषितव्या। उभयं ह्रीष्यते। हे शकटि हे शकटे इति च। इह तर्हि शकटिबंधुरिति नदीबन्धुनीत्येष स्वरः प्राप्नोति। इह च बहुश
कटिरिति नद्यृतश्चेति कप्प्रसज्येत। नैष दोषः। ङितिह्रस्वश्चेत्ययं नियमार्थो भविष्यति। ङिति य्वौ ह्रस्वौ नदीसंज्ञौ भवतः नान्यत्रेति। कैमर्थ्यान्नियमो
भवति विधेयं नास्तीति कृत्वा। इह चास्ति विधेयं। किं। नित्या नदीसंज्ञा प्राप्ता सा विभाषा विधेया। तत्रापूर्वो विधिरस्तु नियमो वास्त्विति। अपू
र्वे एव विधिर्भविष्यति न नियमः। अथायं नित्यो योगः स्यात् प्रकल्प्येत नियमः। बाढं प्रकल्प्येत। नित्यस्तर्हि भविष्यति। तत्कथं। योगविभागः करि
ष्यते इदमस्ति यूस्त्र्याख्यौ नदी। नेयङुवङ्स्थानावस्त्री। वामि। ततः ङिति। ङिति चेयङुवङ्स्थानौ यूवा अस्त्री नदीसंज्ञौ न भवतः। ततो ह्रस्वौ।
ह्रस्वौ च यू स्त्र्याख्यौ ङिति नदीसंज्ञौ भवतः। इयङुवङ्स्थानौ वा नेति निवृत्तं॥ ॥ ॥

वेपदांतो दान्तत्वात्पूर्वपदप्रकृतिस्वरेण तु शकटिशब्देन योप्यचः पर्याये णाउदात्ता भवंति। शकटिशकट्योरक्षरमक्षरं पर्यायेणेति वचनात्। इह चेति। शेषाद्विभा
षेति विभाषा कब्विष्यते नित्यस्तु प्राप्नोति। कैमर्थ्यादिति। कोर्थोस्येति किमर्थं तस्य भावः कैमर्थ्यं। प्रश्नविषयविशेषसंबंधो भावप्रत्ययेनोच्यते। यत्र तत्राध्यस्यार्थस्यासति
१ इत्वा किमर्थमिति प्रश्नस्तस्यैव नियमार्थत्वं न तु प्रयोजने सतीत्यर्थः॥ ॥ ॥

यद्येवं शकटय इति। निरुपया नदीसंज्ञया घिसंज्ञाया बाधितत्वात्। ततो घीति। एकविषयत्वाच्च घिनदीसंज्ञयोरेकसंज्ञाधिकाराच्च पर्यायेण प्रवृत्तौ शकट्यै शकटये इति च सिध्यति। अविशेषेणेति। ह्रस्वयोर्दीर्घयोश्चेत्यर्थः। बाध्यत्वादुत्सर्गसामान्यादुत्सर्ग इत्युक्तं। परत्वात्तु पुन्नपुंसकयोः कृतार्था घिसंज्ञा

यद्येवं शकटये अत्रगुणो न प्राप्नोति। द्वितीयो योगविभागः करिष्यते। शेषग्रहणं न करिष्यते। कथं। इदमस्ति। यूस्त्र्याख्यौ नदी। नेयङुवङ्स्थानावस्त्री। वामि। ततः ङिति। ङिति चेयङुवङ्स्थानौ यू वा अस्त्री नदीसंज्ञौ न भवतः। ततः ह्रस्वौ। ह्रस्वौ च यू स्त्र्याख्यौ ङिति नदीसंज्ञौ भवतः। इयङुवङ्स्थानौ वा नेति निवृत्तं। ततो घि। घिसंज्ञौ भवतः स्त्र्याख्यौ यू ह्रस्वौ ङिति। ततोऽसखि। सखिवर्जितौ च यू ह्रस्वौ घिसंज्ञौ भवतः। स्त्र्याख्यौ ङितीति च निवृत्तं। यदि तर्हि शेषग्रहणं न क्रियते नार्थ एकेनापि योगविभागेन। अविशेषेण नदीसंज्ञोत्सर्गः। तस्याः ह्रस्वयोर्घिसंज्ञा बाधिका। तस्यां नित्यं प्राप्तायां ङिति विभाषा आरभ्यते। अथवा पुनरस्तु दीर्घयोः। ननु चोक्तं निर्देशो नोपपद्यते इति। दीर्घाज्जसि प्रतिषिध्यत इति। वा छन्दसीत्येवं भविष्यति। छन्दसी सुवनते। न चेदं छन्दः। छन्दोवत्सूत्राणि भवन्तीति। यदप्युच्यते। उत्तरत्र विशेषणं न प्रकल्पेत यू ह्रस्वाविति। यदि यू न ह्रस्वौ अथ ह्रस्वौ न यू यू ह्रस्वाविति च विप्रतिषिद्धमिति। नैतद्विप्रतिषिद्धं। आहायं यू ह्रस्वाविति। यदि यू न ह्रस्वौ अथ ह्रस्वौ न यू तत एवं विज्ञास्यामः। य्वोर्यौ ह्रस्वाविति को चय्वो

नदीसंज्ञाया बाधिका। तस्यामिति। ङिति तु शकटि बंधुर्बंधु शकटिरिसातैर्घिसंज्ञया नदीसंज्ञाया बाधितत्वाद्वैरूप्यं भाषाभाग्यः छन्दोवदिति। नादर्थ्योत्सूत्रे श्रुपिछंदः शब्दो वर्त्तेत इति छंदो विषयं कार्यं सूत्रेष्वपि प्रवर्त्तते। गोण्मुख्यन्यायमछंदः शब्दे शेषुनिर्देशान्यथानुपपत्त्या नाश्रीयते॥ ॥१॥ ॥

=शेषाभावश्रुति। नेश कटीतितत्रौ विभविष्यती तिभाष्यकं॰ २॰

=संधानोक्ति आख्यानमाख्या आतश्चोपसर्ग इत्यङ्। स्त्रीआख्यायौ स्त्र्याख्याविति एवं तु शब्दसंस्कारसंभवे ऽभिमतार्थलाभः॥ ५८=
योः

अथेति॥ यथार्थोऽभिमेतस्तथा न शब्दसंस्कारो लभ्यत इति प्रश्नः। अनुपसर्गे हीति। यस्मादातश्चोपसर्ग इति कः स परत्वात् कर्मण्यणित्यणा बाध्यते न तर्हीति। शिष्टप्रयोगादस्मिन्विषये कप्रत्ययस्य साधुत्वमेष्टव्यमिति भावः। छन्दोवत्कवय इति। तेन छान्दसत्वाद्भविष्यति। नन्वेषेति। असाधव एवैवमादयः न तु तत्त्वमाणमायाता साधुत्वमवस्था। आख्यायेत इति। घञर्थे कविधानमिति कप्रत्ययः। साधनं कृतेति सप्तमीसमासः। कृत् स्त्रिया इति। न हि तयोरीकारोकारौ स्त्रियां विहि

अथ स्त्र्याख्याविति कोऽयं शब्दः। स्त्रियमाचक्षाते स्त्र्याख्यौ। यद्येवं स्त्र्याख्यायाविति प्राप्नोति। अनुपसर्गे हि को विधीयते। न तर्हीदानीमिदं भवति।
यस्मिन्दश सहस्राणि पुत्रे जाते गवान्ददौ। ब्राह्मणेभ्यः प्रियाख्येभ्यः सोऽयमुञ्छेन जीवति। छन्दोवत्कवयः कुर्वन्ति। नन्वेषा इष्टिः। एवं तर्हि कर्म
साधनो भविष्यति। स्त्रियामाख्यायेते स्त्र्याख्यौ। यदि कर्मसाधनः कृत् स्त्रिया धातुस्त्रियाश्च न सिध्यति। तन्त्रीलक्ष्म्यै श्रियै भ्रुवै। एवं तर्हि बहु
व्रीहिर्भविष्यति। स्त्रिया आख्या अनयोः स्त्र्याख्यौ। एवमपि कृत्स्त्रिया धातुस्त्रियाश्च न सिध्यति। तन्त्रीलक्ष्म्यै श्रियै भ्रुवै। एवं तर्हि क्विब्भवि
ष्यति। अथवा पुनरस्तु क एव। स्त्रियमाचक्षाते स्त्र्याख्याविति। ननु चोक्तं स्त्र्याख्यायाविति प्राप्नोति अनुपसर्गे हि को विधीयत इति। मूलवि
भुजादिपाठात्को भविष्यति। एवं च कृत्वा सोऽप्यदोषो भवति। यदुक्तं। यस्मिन्दश सहस्राणि पुत्रे जाते गवान्ददौ। ब्राह्मणेभ्यः प्रियाख्येभ्यः
सोऽयमुञ्छेन जीवतीति। अप्याख्याग्रहणं किमर्थम्॥ ॥

तोयथा इष्टाविति भावः। एवं तर्हीति। आख्यानमाख्या। आतश्चोपसर्ग इत्यङ्। स्त्रिया आख्यानमनयोरिति बहुव्रीहिः। अत्र पक्षे सूत्रे गौणप्रत्ययः समासश्च सिध्यतीति भावः। स्त्रियां स्त्रीविषये आख्या प्रतिपादनमित्यर्थः। एवम
पीति। न हि तस्याः स्त्रियां विधानमित्यर्थः। एवं तर्हीति। असरूपत्वाद्रणपक्षे विजनबाध्यते समुदायधर्मस्यावयव आरोपात् कृत्स्त्रिया अप्यत्र पक्षे संज्ञा सिध्यति। आ
ख्याग्रहणमिति। क्विप्पक्षे आख्याशब्द एवायं। कप्रत्ययपक्षे तु प्रवृत्तिनिमित्तनिर्देशः स्त्रियामित्येव सूत्रार्थे वर्तित्वे लभ्यत इति प्रश्नः॥ ॥ ॥

=वर्णयोर्नदीसंज्ञेति पक्षे ६६.=२

स्त्रीविषयार्थमिति॥ आख्याग्रहणसामर्थ्यान्नियमः आश्रीयते। स्त्रियमेवाचक्षाणेन तुल्यिङ्गं तरयुक्तमपीत्यर्थः। ग्रामण्ये इति। ग्रामणीशब्दः क्रियाशब्दत्वात्त्रिलिंगत्वात्स्त्रीविषयो न भवतीति स्त्रियामपि वर्तमानो नदीसंज्ञो न भवति। यद्येवमिष्टप्रनिषेध नीनामुभयलिंगानां पट्वादीनां च गुणवचनत्वात्सर्वलिंगानां स्त्रीविषयत्वाभावात्स्त्रियां वृत्तौ ङि-तिह्रस्वश्चेत्यस्यैवं विधो नियमो न आश्रीयते। केवलस्य स्त्रीशब्दस्यावर्जनात् इत्यदोषः। प्रथमलिंगग्रहणमिति। यः शब्दः प्रथमं स्त्रीत्वविशिष्टार्थमाह पश्चात्तु प्रकारान्तरेणार्थान्तरे लिंगान्तरयुक्तं तस्य तदानीं अपि स्त्र्याख्यत्वादप्राप्ता नदीसंज्ञा नेन वचनेन विधीयते। किंबिति। कुमारीमिच्छत्यात्मनः कुमारीयति। ततः क्विरि

नदीसंज्ञायामाख्याग्रहणं स्त्रीविषयार्थं। नदीसंज्ञायामाख्याग्रहणं क्रियते स्त्रीविषयार्थं। स्त्रीविषयावेव यौ नित्यं तयोरेव नदीसंज्ञा यथा स्यात्। इह मा भूत्। ग्रामण्ये सेनान्ये स्त्रियै इति। प्रथमलिंगग्रहणं च। प्रथमलिंगग्रहणं च कर्तव्यं। प्रथमलिंगे यौ स्त्र्याख्यौ इति वक्तव्यं। किं प्रयोजनं। प्रयोजनं क्विब्लुप्समासाः। क्विप्। कुमार्यै ब्राह्मणाय। लुप्। खरकुट्यै ब्राह्मणाय। समासः। अतितन्त्र्यै ब्राह्मणाय। अतिलक्ष्म्यै ब्राह्मणाय। तत्तर्हि वक्तव्यं। न वक्तव्यं। अवयवस्त्रीविषयत्वात्सिद्धं। अवयवो ऽत्र स्त्रीविषयः। तदाश्रया नदीसंज्ञा भविष्यति। अवयवस्त्रीविषयत्वात्सिद्धमिति चेदियुङ्वुङ्स्थानप्रतिषेधेयङ्स्थानप्रतिषेधप्रसंगो ऽयवस्थेयुङ्वुङ्स्थानत्वात्॥ ॥ ॥ ॥

क्विप्। अथवा कुमारीवाचरतीत्याचारे क्विपं विधाय कर्तरि क्विब्विधेयः। खरकुट्यै इति। खरकुटीवेति वार्थे संज्ञायामिति कनो लुम्मनुष्ये इति लुप्। यद्यप्यत्र युक्तवद्भावात्स्त्रीत्वमस्ति तथापि स्वाश्रयस्य पुंस्त्वस्यानिवर्तनान्नायं स्त्रियामेव वर्तते किं तर्हि पुंस्यपीत्याख्याग्रहणान्नियमादप्राप्ता नदीसंज्ञा विधीयते। अतितन्त्र्यै इति। तन्त्रीमतिक्रान्त इति तत्पुरुषः। अवयवस्त्रीविषयत्वादिति। अन्तरंगत्वात्पूर्वमेव स्त्र्याख्यत्वात्प्रवृत्ता नदीसंज्ञा पश्चादुपजायमाने लिंगान्तरयोगे बहिरंगेन निवर्तत इति भावः॥ ॥ ॥

=नचवरस्कुटीःमवेत्सारोनतापनिः अतिदिश्यमानधर्मविशस्त्याम्प्रकार्यप्रवृत्तेनिरिसिद्धं स्त्रियामिति सूत्रे भाष्ये यथा प्रकृतिवदिति सूत्रे योनत्वमनुक्तकार्याभावोप्यतिदिश्यत इति तस्मादिसच भाष्यकैयटयोः स्पष्टं अत्रापि पक्षे स्त्र्याश्रयलिंगनिर्दिष्टेनानामाप्रसक्तादयः॥२=

आध्यै इति॥ आध्यायतीति ध्यायतेः संप्रसारणं क्विप् इति क्विप् संप्रसारणं च। अत्रावयवो धीशब्द इयङ्स्थानः। समुदायस्तु त्वनेकाच इति यणा बाधितत्वादियङ्स्थानत्वाभावः। नन्वाधी प्रधी शब्दौ क्रिया शब्दत्वात्त्रिलिंगत्वात्स्त्रीविषयौ न भवतः। यथैव ग्रामणी सेनानी शब्दाविति नदीसंज्ञया न भाव्यमिति पूर्वोपर व्याघात दर्शनाच्चिन्त्यमेतत्। सिद्धे त्विति। अचि श्नुधात्वित्यनेन अंगस्येयङुवङ् विधानात्सामर्थ्यात्क्षिप्रमंगं। तेन यस्यांगस्येयङुवङौ निर्दिष्टौ तेन तस्य नदीसंज्ञा निषेधः।

अवयवस्त्रीविषयत्वासिद्धमिति चेदियङुवङ्स्थानप्रतिषेधप्रसंगे यरास्थानयोरपि ध्वोः प्रतिषेधः प्रसज्येत। आध्यै ब्राह्मण्यै। किं कारणं। अवयवस्य इयङ्स्थानत्वात्। अवयवोऽत्र इयङ्स्थानः। सिद्धं त्वंगरूपग्रहणात् यस्यांगस्येयुवौ तत्प्रतिषेधात्। सिद्धमेतत्। कथं। अंगरूपं गृह्यते यस्यांगस्य इयुवौ भवतस्तस्येदं ग्रहणं। न चैतत्स्यांगस्य इयुवौ भवतः। ह्रस्वे युवस्थानप्रवृत्तौ च स्त्रीवचने। ह्रस्वौ च इयुवस्थानौ च प्रवृत्तौ च आकृच प्रवृत्तेः स्त्रीवचनावेव नदीसंज्ञौ भवत इति वक्तव्यं। शकट्यै अतिशकट्यै ब्राह्मण्यै। क्रमा भूत्। शकटये अतिशकटये ब्राह्मणाय। धेन्वै अतिधेन्वै ब्राह्मण्यै। क्रमा भूत्। धेनवे अतिधेनवे ब्राह्मणाय। श्रियै अतिश्रियै ब्राह्मण्यै। क्रमा भूत्। श्रिये अतिश्रिये ब्राह्मणाय। भ्रुवै अतिभ्रुवै ब्राह्मण्यै। क्रमा भूत्। भ्रुवे अतिभ्रुवे ब्राह्मणाय॥ ॥ ॥

आध्यै इत्यत्रावयवस्यांगत्वं नास्ति। अंगस्य च एरनेकाच इति यणा विधानात् इयङुवङ्स्थानतानास्तीति निषेधाभावः। एतदर्थमेव स्थानग्रहणं कृतं। इयङुवङोर्यदा स्थितिस्तदा प्रतिषेधो यथा स्यात् यदा त्वपवादेन बाधस्तदा मा भूत्। ह्रस्वे ति। अवयवस्त्रीविषयत्वासिद्धमित्यस्यापवादः। ह्रस्वे यङुवङ्स्थानानां प्रवृत्तिरपर्यन्तरसंक्रान्तिः तस्यां सत्यां स्त्रीवचने एव संज्ञा भवति न लिंगान्तरवचने च शब्दाद प्रवृत्तौ चेति ज्ञेयं। एतदेव भाष्यवृत्तेरिति भाष्ये स्पष्टीकृतं॥ ॥ ॥

=नहिभाष्यहृतेनेति॰अयंभावः॥क्रियानिसंगस्यैवविशेषणं॰आवसाईदूरोरविविशेषणेक्रममाणाभावः॥स्पष्टंचेदंहरदत्तग्रंथे॰अतिरैये॰अतियवक्रियेब्राह्मणैयेइत्यादौनदीत्वाभावस्तुनफलं॰तेषामनभिधानात्नदीसंज्ञाभिधायनेर्देति॰१=नियमार्थइति॰निपातानामनेकार्थत्वात्अत्रईस्येवार्थता

माध्यकै॰प्र॰
२९७
297

अपरआहेति॥ च शब्दो ऽत्र न पठ्यत इति पूर्वस्माद्विशेषः॥ न हि प्राकृप्रवृत्तेः किंचिदनिष्टमापद्यते यदर्थः समुच्चयः क्रियते। पठ्यमानोपि च शब्दः स्त्रीवचनशब्देन संबध्यते स च निय माऽर्थः॥ क्वचिद्भाष्ये पठ्यते अस्त्रीवचनावेव नदीसंज्ञौ भवत इति वक्तव्यं। शकद्यौ अतिशकद्यौ ब्राह्मण्यै। क्रमा भूत्। शकटये अतिशकट्ये ब्राह्मण्यै इत्यादि। एष तप पाठः॥उप

अपर आह। ह्रस्वौ च इयुवस्थानौ च प्रवृत्तौ स्त्रीवचनावेव नदीसंज्ञौ भवत इति वक्तव्यं। किं प्रयोजनं। शकद्यौ अतिशकद्यौ ब्राह्मण्यै क्रमा भूत्। शकटये अतिशकटये ब्राह्मणाय। धेन्वै। अतिधेन्वै ब्राह्मण्यै। क्रमा भूत्। धेनवे अतिधेनवे ब्राह्मणाय। श्रियै अतिश्रियै ब्राह्मण्यै। क्रमा भूत्। श्रियेअतिश्रियेब्राह्मणाय। भ्रुवै अतिभ्रुवै ब्राह्मण्यै क्रमा भूत्। भ्रुवे अति भ्रुवे ब्राह्मणाय। किमर्थं पुनरिदमुच्यते। प्रथमलिंगग्रहणं चोदितं। तद्दुष्टं विजानीयात्सर्वमेतद्विकल्प्यत इति। तदाचार्यः सुहृद्भूत्वान्वाचष्टे ह्रस्वौ चेयुवस्थानौ च प्राक्‌च प्रवृत्तेः स्त्रीवचनावेवेति॥ ॥षष्ठी युक्तश्छन्दसि वा॥ ॥योगविभागः कर्तव्यः। षष्ठीयुक्तश्छन्दसि। षष्ठीयुक्तः पतिशब्दश्छन्दसि घिसंज्ञो भवति। ततो वा। वा छन्दसि सर्वे विधयो भवन्ति। सुपां व्यत्ययः। तिङां व्यत्ययः। वर्णव्यत्ययः। लिंगव्यत्ययः। कालव्यत्ययः। पुरुषव्यत्ययः। आत्मनेपदव्यत्ययः। परस्मैपदव्यत्ययः। सुपां। युक्ता माता सीद् धुरि दक्षिणायाः। दक्षिणायामिति प्राप्ते। तिङां व्यत्ययः। चषालं ये अश्वयूपाय तक्षति। तक्षन्तीति प्राप्ते॥ ॥

=षंदसिकाप्यजनिष्यसंयोकुलमिसतेसर्पः॥२=

संहारस्यान्यथाभिधानात्॥ ॥षष्ठीयुक्तः॥ ॥योगविभाग इति। तेन परिभाषा संपद्यते। यावदिह शास्त्रे कार्यं तच्छन्दसि वा भवति। तत्रानयैव सिद्धत्वात् बहुलं छन्दसीत्यादि न वक्तव्यं। एतदर्थं च व्यत्ययो बहुलमित्यत्र योगविभागो न व्याख्येयः॥ उभयत्र विभाषा चेयं विज्ञेया। सुपामिति। कर्मणि द्वितीयेत्यादेर्नियमस्य विकल्पनाद्दनि ॥यमोपि छन्दसि भवतीति सुपां व्यत्ययसिद्धिः॥ ॥ ॥

=प्रथमलिंगग्रहणंचोदितंतद्दुष्टमिति=सर्पः॥दुष्टमित्यस्यानिष्टविषयमपीत्यर्थः॥तिन्यविवरणं॰नमः॰एवंहिकेचिन्नोक्तभाष्यपाठस्यापपाठत्वंनस्यात्॥अतिशकट्येब्राह्मण्यैइत्यत्रअपानिष्टविषयत्वंप्रवृत्त्यादिनाबलं॰शंकात्॥तस्मात्क्रियानिसंयोगेनसंबंधीगीकारस्तिषयोयंग्रं

एम॰
२९७

कालप्रत्यय इति॥ कालविहितप्रत्ययप्रत्यय इत्यर्थः॥ ॥ यस्मात्प्रत्ययविधिः॥ ॥ यस्मादिति व्यपदेशायेति। संज्ञिन इति शेषः। सति हि यस्मादित्यस्मिंस्तदादीत्यनेन सं
ज्ञी निर्दिश्येत। तु शब्दस्तेनान्यथा। परं त्वत्र षष्ठ्यर्थस्य निर्देशेन तदिति परामर्शाभावात्तदादीत्यस्य संबद्धमेव स्यात्। स्त्रीयतीति। स्त्रीशब्दात्स्त्रीशब्दस्य तज्ज्ञोपस्य च विधिः स्त्रीयंग संज्ञा
स्यादुपसंज्ञा चेति संज्ञाद्वयनिमित्तो यस्येति लोपः प्रसज्येत। ई श इदमादेश प्रत्ययस्येति लोप स्यादिति वदन्नाभादिसिद्धत्वं नास्ति। प्राग्भादसिद्धत्वमिति केचिदभ्यु

वर्णो प्रत्ययः। त्रिष्टुभौ जः स्तुभितमुग्रवीरं। स्तुहितमिति प्राप्ते। लिंगप्रत्ययः मघोस्त प्राइवासते। मघोर्गृह्णातीति मघुन इति प्राप्ते। कालप्रत्य
यः। म्चो त्र्यग्नी नाधास्यमानेन। म्चः सोमेन यक्ष्यमाणेन। म्च त्र्याधानात् म्चो यक्ष्येति प्राप्ते। पुरुषप्रत्ययः। त्र्यधा सर्वी रैर्देशभिर्वियूयाः। वियूयादि
ति प्राप्ते। त्र्यात्मनेपदप्रत्ययः। ब्रह्मचारिणमिच्छते। इच्छतीति प्राप्ते। परस्मैपदप्रत्ययः। प्रतीपमन्य ऊर्मिर्युध्यति। त्र्यन्नीपमन्य ऊर्मिर्युध्यति।
युध्यत इति प्राप्ते॥ ॥ यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेंगं॥ ॥ यस्मादिति व्यपदेशाय। त्र्यथ प्रत्ययग्रहणं किमर्थं। यस्माद्विधिस्तदादि
प्रत्ययेंगमित्युच्यमाने स्त्री इयती [ङीप] स्त्रीयतीत्यत्रापि प्रसज्येत। प्रत्ययग्रहणे पुनः क्रियमाणे न दोषो भवति। त्र्यथ विधिग्रहणं किमर्थं। यस्मात्प्र
त्ययस्तदादि प्रत्ययेंगमितीयत्युच्यमाने दधि त्र्यधुना मधु त्र्यधुनात्र्यत्रापि प्रसज्येत। विधिग्रहणे पुनः क्रियमाणे न दोषो भवति॥ ॥

पंगमात्। पदांतरनिरपेक्ष पदसंस्कारपक्षे स्यानिबद्धावो नास्ति। नानादिष्टादचः पूर्वः स्त्रीशब्द [illegible] इति। त्र्यथेति। यस्मात्प्रत्यय इत्यत्र विधीयत इ
त्यध्याहृतिरिष्यत इति प्रश्नः। दधि त्र्यधुनेति। त्र्यसति विधिग्रहणे परशब्दस्याप्यध्याहारः स्यात्। इदमोर्यदा त्र्यधुना प्रत्ययो निपात्यते इदमादेशस्य चेशो यस्येति
लोपस्तदेदं प्रत्युदाहरणं। यदा त्विदमोऽशभावः धुनाच प्रत्ययः। तदा स्त्रीयतीत्येतदेव प्रत्युदाहरणं॥ ॥ ॥

=द्वितीयप्रत्ययस्येति लोपस्यस्त्रीशब्दोपरक्तत्वात्समानाश्रयत्वाभावाच्च एवमियङापत्तिरपि दोषः॥ इयङपवादं न विधौ निषेधाद्वा. ३=

ननु क्रियमाणेऽपि विधिग्रहणेऽङ्गसंज्ञा प्राप्नोति। अस्ति हि दधिशब्दात्तु प्रत्ययविधिः अधुना प्रत्ययस्वरूपः। ततश्चाङ्गसंज्ञायामसंज्ञायां च सत्यां यस्येति लोपः प्राप्नोतीत्य
हा तदेतदिति। प्रत्यासत्तिन्यायाश्रयणाद्यस्माद्घः प्रत्ययो विहितस्तस्मिन्नेव प्रत्यये परतस्तदादेर्ङ्गमित्यर्थः। करिष्याव इति। विकरणान्तस्याङ्गसंज्ञायां सत्यां तन्निबन्धनमतो
दीर्घो यञीति दीर्घत्वं भवति। अन्यथा पापाव इत्यादावेव स्यात्। पपुषा तो येङ्. लुगन्तस्य वस्तिलोपो व्योर्वलीति यल्लोपे दीर्घत्वे च रूपं। कुण्डानीति। यदा तु म्प्रादिस्तदा
न्नसुपि चेति दीर्घत्वं सिध्यति। दधीनीत्यादौ नुम् अनकारान्तत्वान्न सिध्यति। पूर्वोत्तपक्षे सामानीत्यादिवत्सिध्यति। यदा त्वमकृत्पक्षस्तदेदं प्रयोजनमादिग्रह
णस्य। पूर्वोत्तपक्षस्तु स्थापित इत्यप्रयोजनमेतत्। मित्त्वदोरिति। मित्त्वदोः कृतयोरित्यर्थः। भाष्यकारस्तु वस्तुतोऽर्थं व्याचष्टे। मिलतइति। भिनत्तीति। रूपोदाहरण

तदेतत्प्रत्ययग्रहणे न विधिग्रहणे न च समुदितेन क्रियते सन्नियोगः। यस्माद्घः प्रत्ययो विधीयते तदादितस्मिन्नङ्गसंज्ञं भवतीति। अथ तदादिग्र
हणं किमर्थं। अङ्गसंज्ञायां तदादिग्रहणं स्यादित्युमर्थं। अङ्गसंज्ञायां तदादिग्रहणं क्रियते स्याद्यर्थं नुमर्थं च। स्याद्यर्थं तावत्। करिष्यावः करि
ष्यामः। नुमर्थं। कुण्डानि वनानि। मित्त्वदोरुपसंख्यानं। मिलतः सुद्युतश्चोपसंख्यानं कर्तव्यं। मिलतः। भिनत्ति छिनत्ति। अभिनत्। अच्छिन
त्। सुद्युतः। [illegible] संचस्करतुः संचस्करुः। किं पुनः कारणं न सिध्यति। इहतस्य वाग्रहणं तदादेर्वा। न चेदं तन्नापि तदादि॥ ॥

मेतत्। कार्योदाहरणं च अभिनदिति। निसत्वात् अभिकृते अङ्गसंज्ञायां असत्यां अडागमो न स्यात् इत्यङ्गसंज्ञोपसंख्यायते। संचस्करतुरिति। द्विर्वचने कृते [illegible]ऽड
भ्यासस्य वा ये पीति सुट् चानङ्गत्वादतः संयोगादेरिति गुणो न स्यात्। यदा तु पूर्वं धातुरुपसर्गेण युज्यत इत्येष पक्षस्तदान्तरङ्गत्वात् सुटि कृते तत्कृत्स्नस्य तद्ग्रहणेन
ग्रहणात् स्कृशब्दादेव प्रत्ययविधिरित्यङ्गसंज्ञा सिध्यत्येव स्कृशब्दस्य द्विर्वचने कृते शर्पूर्वाः खय इति खयः शेषे संचस्करतुरिति सिध्यति। किं तु सं[illegible] स्कृ श्रीष्ट संस्क्रि
यत इति इङ् गुणनिवृत्तये कार्यं सूर्वग्रहणेनाभक्तत्वं सुटो ज्ञापितमिति सर्वमपि प्रत्ययोत्पत्तेः सुटि कृते नास्ति स्तु द्व्यहि तस्याङ्गसंज्ञेति गुणो न स्यादित्युपसंख्यानं। तस्य वेति व्य
ऽपदेशिवद्भावादिति भावः॥ ॥

= भार्यादिलादावयवः किं तेनेन मध्यमे भे शिन इत्यमः। श्रु =

त्यादिरिति॥ भिदस्यादिर्भकारः सन्त्यादिर्भिन्नदिस्यसेति भवत्यंगसंज्ञा। एवं करोतेर्द्विवचने कृते च स्कृ शब्दे स्थिते यस्मात्कृशब्दात्प्रत्ययविधिस्तस्यादिश्चकारः स एव
दिश्च स्कृ शब्दस्य। उष्ट्रमुख इति। यथा गतार्थत्वान्मुख शब्द निवृत्तिस्तथा पूर्वं प्रतिपादितं। इहापि प्रतिलक्ष्मलक्षणभेदात्तद्व्यवधानेच्छायां वृत्तेन इति तद्व्य

सिद्धं तु तदाद्यादिवचनात्। सिद्धमेतत्। कथं। तदाद्याद्यंगसंज्ञं भवतीति वक्तव्यं। किमिदं तदाद्यादीति। तस्यादिस्तदादिः तदादिरादिर्यस्य तदि
दं तदाद्यादीति। सत्तर्हि तथा निर्देशः कर्तव्यः। न कर्तव्यः। उत्तरपदलोपोऽत्र द्रष्टव्यः। तद्यथा। उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः खरमुखः। ए
वं तदाद्यादि तदादीति। तदेकदेशविज्ञानाद्वा सिद्धं। तदेकदेशविज्ञानाद्वा सिद्धमेतत्। तदेकदेशभूतं तद्ग्रहणेन गृह्यते। तद्यथा। गंगाय
मुने देवदत्तेति। अनेका नदी गंगां यमुनां प्रविष्टा गंगायमुनाग्रहणेन गृह्यते। तथा। देवदत्तास्थो गर्भो देवदत्ताग्रहणेन गृह्यते। वि
षम उपन्यासः। इह केचिच्छब्दा अकृतपरिमाणानामर्थानां वाचका भवंति। येऽनेते संख्याशब्दाः परिमाणशब्दाश्च। पंच सप्तेति। त एकेना
प्यपाये न भवंति। द्रोणः खारी आढकमिति। नैवाधिके भवंति न च न्यूने। केचिद्यावदेव तद्भवति तावदेवाहुः। यथैते जातिशब्दा गुणशब्दाश्च तैलं घृतमिति। खा
र्यामपि भवति द्रोणेपि। मुल्को नीलः कृष्ण इति हिमवत्यपि भवति वटकणिकामात्रेपि द्रव्ये। अंगसंज्ञा चाप्यकृतपरिमाणानां क्रियते सा केनाधिकस्य स्या
त्। एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति तदेकदेशभूतं तद्ग्रहणेन गृह्यत इति। यदयं नेदमदसोरकोरिति सककारयोः प्रतिषेधं शास्ति। कथं कृत्वा ज्ञापकं। इदमदसोः
कार्यमुच्यमानं कः प्रसंगो यत्सककारयोः स्यात्। पश्यति त्वाचार्यः तदेकदेशभूतं तद्ग्रहणेन गृह्यत इति ततः सककारयोः प्रतिषेधं शास्ति॥ ॥

दि
वात्वान्विसत्सुदेः कृतयोरंगसंज्ञा सिध्यति। एकेनाप्यपाय इति। अपाये तस्य रूपस्यापगमे। एकेन करणेन एकाभावेनेत्यर्थः। यथा वर्षकृतं दुर्भिक्षं इति वर्षमभवत्करणं संपद्यते। अं
गसंज्ञा चापीति। यस्मात्प्रत्ययविधिस्तदादीति विशिष्टरूपपरिग्रहात्। तदेकदेशभूतमिति। तन्मध्यपतितत्वात्तदेकदेशत्वावसायः॥ ॥ ॥

स्वार्थमिति। असति द्वितीये प्रत्ययग्रहणे प्रत्ययविधानमात्रप्रतिबद्धांगसंज्ञाश्रीशब्दस्य प्राप्नोति। ततश्चतुर्थीविधानात्। ततश्चांगाश्रय इयङ् स्यात्। पुनः प्रत्ययग्रहणे तु यस्माद्यः प्रत्ययो विहितः स एवायं यदि परो भवति तदांगसंज्ञा भवति। पश्चात्र प्रत्ययो विहितः नासौ परः लुप्तत्वात्। न च प्रत्ययलक्षणं भवति। न लुमतांगस्येति निषेधादियङादेशकार्यस्यांगत्वात्तस्मिन्कर्त्तव्ये निषेधप्रवर्त्तनात्। परिमाणार्थं चेति। अन्यथा देवदत्त ओदनमपाक्षीदिति देवदत्तशब्दात्तु प्रत्ययविधिरिति तदादेः संघातस्यांगसंज्ञायां सत्यां देवदत्तशब्दात्पूर्वोऽडागमः स्यात्। प्रत्ययग्रहणे तु सति यस्माद्यः प्रत्ययो विहितस्तस्मिन्नेव परतस्तदाद्यंगमिति विज्ञा

अथ द्वितीयं प्रत्ययग्रहणं किमर्थं। प्रत्ययग्रहणं पदादावप्रसंगार्थं। प्रत्ययग्रहणं क्रियते। पदादावंगसंज्ञा मा भूदिति। किं च स्यात्। स्वार्थे श्र्यर्थे भ्र्वर्थे। अंगस्येतीयङुवङौ स्यातां। परिमाणार्थं च। परिमाणार्थं च द्वितीयप्रत्ययग्रहणं क्रियते। यस्मात्प्रत्ययविधिस्तदाद्यंगमितीयत्युच्यमाने दाशतयस्याप्यंगसंज्ञा प्रसज्येत। तत्र हि कर्त्तव्यं। न कर्त्तव्यं। केनेदानीमंगकार्यं भविष्यति। प्रत्यय इति प्रकृत्यांगकार्यमध्येष्यते। यदि प्रत्यय इति प्रकृत्यांगकार्यमधीयेत प्राकरोत् उपेहिष्ट उपसर्गात्पूर्वावडाटौ प्राप्नुतः। सिद्धं तु प्रत्ययग्रहणे यस्मात्स तदादि तदंतविज्ञानात्। सिद्धमेतत्। कथं। प्रत्ययग्रहणे यस्मात्प्रत्ययो विहितस्तदादेस्तदंतस्य च ग्रहणं भवतीत्येषा परिभाषा कर्त्तव्या॥०॥

यमानेऽभवत्सतिप्रसंगदोषः। दाशतयस्येति। दश अवयवा येषां ते दशतये। तेषु भवो दाशतयः। एतच्चानियमप्रतिपादनार्थं न तत्र दशसंख्या विवक्षिता अवयवान्विचार्य सूत्रमाक्षेप्तुं प्रश्नं करोति। तत्र हीति। सूत्रमित्यर्थः। प्रत्यय इति प्रकृत्येति। तेन ब्राह्मणमिस्सा क्रिमिणां पश्येत्यादावैस्दीर्घाद्यभावः। प्राकरोदिति। लङि परतः पूर्वस्यानियतावधेरडागमो विधीयमान उपसर्गादेः स्यात्। सिद्धं त्विति। यत्र पूर्वं कार्यित्वेनाश्रीयते तत्र तदादेः कार्यं भवति। यत्र तु प्रत्ययान्तः संघात आश्रीयते तत्र तदादेः प्रत्ययान्तस्य ग्रहणं भवतीत्यर्थः॥ ॥श्री॥ ॥श्री॥ ॥

प्रत्ययग्रहणं वेति। प्रत्ययो गृह्यते यस्मिन्सूत्रे तत्। अङ्गसंज्ञासूत्रमित्यर्थः। अवश्यमिति। क्रियमाणेस्मिन्सूत्रे परिभाषावश्यं कर्त्तव्येति यापित्वात्परिभाषैवाश्रयणीया न तु
सूत्रमित्यर्थः। संघातस्येति। तत्र श्वसुलुक्प्राप्नोति। महान्तं पुत्रमिति। समुदायस्यान्ते सुपः श्रवणात्सुबन्तत्वात्। सत्यां तु परिभाषायां समुदायस्यासुबन्तत्वात्। अवयवस्य
सापेक्षत्वादसामर्थ्यान्न भवति प्रत्ययः। ऋद्धस्येति। सुप्सु पेति विवक्षितायामपि संख्यायां समुदायस्य सुबन्तत्वात्समासप्रसंगः। परिभाषायां तु सत्यां समुदायस्या

कः पुनरत्र विशेषः एषा परिभाषा क्रियेत प्रत्ययग्रहणं वा। अवश्यमेषा परिभाषा कर्त्तव्या। बहून्येतस्याः परिभाषायाः प्रयोजनानि।
प्रयोजनं धातुप्रातिपदिकप्रत्ययसमासतद्धितविधिस्वराः। धातु। देवदत्तश्चिकीर्षति। संघातस्य धातुसंज्ञा प्राप्नोति। प्रातिपदिक।
देवदत्तो गार्ग्यः। संघातस्य प्रातिपदिकसंज्ञा प्राप्नोति। प्रत्यय। महान्तं पुत्रमिच्छति। संघातात्प्रत्ययोत्पत्तिः प्राप्नोति। समास। ऋद्धस्य राज्ञः
पुरुषः। संघातस्य समाससंज्ञा प्राप्नोति। तद्धितविधि। देवदत्तो गार्ग्यायणः। संघातात्तद्धितोत्पत्तिः प्राप्नोति। स्वर। देवदत्तो गार्ग्यः। सं
घातं ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वं प्राप्नोति। प्रत्ययग्रहणे यस्मात्स विहितस्तदादेर्ग्रहणं भवतीति न दोषो भवति। सा तर्ह्येषा परिभाषा कर्त्तव्या
। न कर्त्तव्या। एवं वक्ष्यामि यस्मात्प्रत्ययविधिस्तदादि प्रत्यये गृह्यमाणे गृह्यते। ततः अङ्गं। अङ्गसंज्ञं च भवति यस्मात्प्रत्ययविधिस्तदादिप्रत्य

स्यर

ये॥०॥

सुबन्तत्वात्सुबन्तसमुदायस्य च संख्याविवक्षायां समासप्रसंगात्। अवयवस्य च सापेक्षत्वात्समासाभावः। संघातात्तद्धितोत्पत्तिरिति। तत्र वृद्धिस्व
रौ स्यातां पूर्वस्य च सुपो लुक्॥ एवं वक्ष्यामीति। योगविभागोत्र क्रियते। यस्मात्प्रत्ययविधिस्तदादि प्रत्यय इत्येकं सूत्रं। अत्र सोपस्कारत्वात्तत्राणां गृह्यमाणे
गृह्यत इति वाक्यशेषः समर्प्यते। प्रत्यये गृह्यमाणे यस्मात्प्रत्ययविधिस्तदादि गृह्यत इत्यर्थः॥ ॥ ॥श्री॥ ॥

=अर्थमित्यादौ देवदत्तः प्रत्ययस्य ... कार्यस्यानध्ययनात् ... विवास्मिन्निति ... अङ्गस्येति ... भाष्यकैयटयोः।१=

=न च द्वितीयस्योपयोगाभावादिदमयुक्तं कृत्वा ... निर्वाहाय द्वितीययोगोप्यावश्यक इति भावः।२=

=समासान्तरभासत्वात्.३= कृतिलिसेतस्मात्क्रियांते पक्षे ऽण्न भवति गतिकारकसमवधाने विशिष्टादेव भवति तदसवधाने त्वपि स्याद्वा केवलादिति क्रुद्ग्रहणपरिभाषायाः स्योपाध्याये स्वतुर्थे भिधास्समामत्वात्.१=

सांकूटिनमिति। अणिनुण इतिय दिकूटिन्निसे तस्मात्क्रियेत तदा तस्यैव वा दिवृद्धिः स्यात्। दूरादागत इति। आगम्यते स्मे ति कर्मणि क्तः। तत्र गतिस्वरेणाद्युदात्त आगतश्रु
ब्दः। ततो दूरशब्दस्य स्तोकान्तिके तिसमासः। पे च म्यां स्तोकादिभ्य इस लुक्। अत्र समासान्तोदात्तत्वे प्राप्ते तद पवादकृत्स्वरेणाद्युदात्ते आगत शब्दे प्राप्ते सगतेरपि कान्तत्वात्स्थानां
तरप्राप्तत्वाद्गतिस्वरस्य बाधकस्यापि बाधकत्वात् थाथघञ्क्तेति सिद्धमन्तोदात्तत्वं। यदयमिति। अनन्तरस्य ग्रहणस्य प्रयोजनमभ्युद्धृतमित्राभिशब्दस्य व्यवहितस्य प्रकृतिस्व

यदि प्रसय यग्रहणे य स्मात्स तदा देर्येग्रहणं भवतीसुच्यते। अवतप्ते न कुल स्थितं तत एतत् उदके विशीर्णं तत एततः। सगतिकेन सन कुलेनच
समासो न प्राप्नोति। एवं तर्हि प्रसय यग्रहणेप स्मात्सतदा देर्येग्रहणं भवती सुल्का ततो वक्ष्यामि कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवतीसेषा परिभा
षाकर्तव्या। कान्येतस्याः परिभाषायाः प्रयोजनानि। प्रयोजनं समासतद्धितविधिस्वराः। समासः। अवतप्ते न कुल स्थितं तत एततः। उदके विशी
र्णं तत एततः। सगतिकेन सन कुलेनच समासः सिद्धो भवति। समासः। तद्धित। सांकूटिने। व्यावक्रोशी। संघातान्तद्धितोत्पत्तिः सिद्धा भवति। त
द्धितविधि। स्वर। दूरात् आगतः दूरादागतः इति। अन्तथाथघञ्क्ताजबित्रकाणामित्येषः स्वरः सिद्धो भवति। कृद्ग्रहणे गतिकारकपूर्वस्या
पि ग्रहणं भवतीति। सातर्ह्येषा परिभाषा कर्तव्या। न कर्तव्या। आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति। यदयं गतिरनन्तर इत्यनन्तरग्रह

१ णं करोति॥ ॥ ॥

णमाप्नुदिति। यदि चैषा परिभाषा न स्यात्ततत उद्धृत शब्दस्य अक्रान्तत्वात्क्तान्त उत्तरपदे ऽनन्तरे परतो गतिस्वरो विधीयमानो नैव प्राप्नोति किमनन्तरग्रहणेन। ततत्
क्रियमाणमस्याः परिभाषायाः सञ्ज्ञापकं ज्ञापयतीत्यर्थः॥ ॥श्री॥ ॥श्री॥ ॥

=पुंवद्भावं बाधित्वेति। स्त्रियाः पुंवदिति पुंवद्भावं बाधित्वेत्यर्थः। ...कीलादिदृष्टिश्च समन्तनप्राप्तिः। उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तविधिप्रतिषेधान्नवन्तं भाषितपुंस्कं... एतेन कुमारीगौरितरे इति प्राप्नोति। तिर्यगर्थे पुंवद्भावप्राप्तिरुपपन्ना... ॥

सुप्तिङन्तं पदम्॥ ॥ अन्तग्रहणमिति। असत्यन्तग्रहणे सुप्तिङामेव पदसंज्ञा स्यात्। ततश्चाग्निश्चित्सादौ सा स्यात्, दाघोरिति घत्वनिषेधप्रसंग इत्येतदर्थं यदन्तग्रहणं क्रियते तन्न कर्तव्यम्। प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणमिति परिभाषया तदन्तविधेर्लब्धत्वादित्यभिप्रायः। कुमारीगौरितरे इति। तरबन्तस्य घसंज्ञायां सत्यां तत्रोत्तरपदे परतो ह्रस्वत्वं कुमारीशब्दस्य परत्वात् पुंभावं बाधित्वा स्यात्। तरपि तु परतो गौरीशब्दस्य न स्यात्। ततः कुमारिगौरितरे इति प्राप्नोति। कुमारगौरितरे इति चेष्यते। भाष्ये तु समासप्रदर्शनपरं वाक्यमुपात्तम्। सनाद्यन्ता धातव इति। अन्यथा सनादीनामेव केवलानां धातुसंज्ञा स्यात्। ततश्च चिकीर्षीदित्यादौ सन एव धातुत्वात्सयोः सन्तौ तदादेरेवाङ्गत्वात्ततः प्रवृत्तौ न स्यात्। कृत्तद्धितसमासाश्चेत्यन्तग्रहणे केवलयोः कृत्तद्धितयोः प्रातिपदिकसंज्ञा स्यात्। ततश्च भिदृ छिदृ इति द्वित्वं तस्य न स्यात्। अर्थवत्सूत्रेणानुमवति। अधातुरिति निषेधात्। नापि प्रत्ययलक्षणेन प्राप्नोति। प्रत्ययनि

सुप्तिङन्तं पदम्॥ अन्तग्रहणं किमर्थम्। न सुप्तिङ् पदमित्येवोच्येत। केनेदानीं तदन्तानां भविष्यति। तदन्तविधिना। अत उत्तरं पठति। पदसंज्ञायामन्तग्रहणमन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधार्थम्। पदसंज्ञायामन्तग्रहणं क्रियते ज्ञापकार्थम्। किं ज्ञाप्यम्। एतज्ज्ञापयत्याचार्यः अन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्न भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। तरप्तमपौ घः। तरप्तमबन्तस्य घसंज्ञा न भवति। किं च स्यात्। कुमारीगौरितरा। घादिषु नद्या ह्रस्वो भवतीति ह्रस्वत्वं प्रसज्येत। यद्येतज्ज्ञाप्यते। सनाद्यन्ता धातव इत्यन्तग्रहणं कर्तव्यम्। कृत्तद्धितसमासाश्च। अन्तग्रहणं कर्तव्यम्। इदं तर्हीयं ज्ञापकार्थम्। द्वेतावत्क्रियेते न्यास एवायं यदप्युच्यते। कृत्तद्धितसमासाश्चेत्यन्तग्रहणं कर्तव्यमिति। न कर्तव्यम्। अर्थवदिति वर्तते। कृत्तद्धितान्तं चैवार्थवत्। न केवलाः कृतस्तद्धिता वा॥०॥

मित्त्वमप्रत्ययकार्यं विधीयते तत्प्रत्ययलोपे भवति न तु प्रत्ययस्य प्रत्ययकार्यं तदपि। न ह्यसत् कार्यित्वेन वक्तुं शक्यते नापि शक्यमाश्रयितुम्। केवलस्य च तद्धितस्य प्रातिपदिकसंज्ञायां सत्यामौपगव इत्यत्रापि सुब्लुक् प्रातिपदिकेनान्तर्गतत्वात् सुब्लुक् स्यात्। तदन्तविधौ तु दोषाभावात्। न केवला इति। ननु यद्यर्थवत्त्वाल्लौकिकमाश्रीयते सा पदस्यैव न तु कृत्तद्धितान्तस्यापि। पदस्यैव लोके प्रयोगार्हत्वात्। अन्वयव्यतिरेकगम्यात्वर्थवत्त्वात् केवलानामपि कृत्तद्धितानामस्तीति किमुच्यते न केवला इति। एवं तर्हि अर्थवद्ग्रहणानुवृत्तिसामर्थ्याल्लौकिकार्थप्रत्यासत्तेरभिव्यक्ततरो योऽर्थः प्रत्ययान्तेषु लक्ष्यते स आश्रीयत इत्यदोषः॥ ॥

नः क्ये॥ ॥किमर्थमिति॥ लुप्तेपि सुपि प्रत्ययलक्षणेन सिद्धा पदसंज्ञेति प्रश्नः। नांतमेवेति। क्यस्य एव नांतमिति विपरीतनियमो न भवति। नहि संबुध्योरिति न लोपनिषेधाज्ज्ञापकात्। वाच्यतीति। न च नकारस्य चात्मा। अः। गो समानाक्षरनांतादिति वचनात्। एकीयमतेन तदिसदोषः। तन्मते तु क्यङ्क्यषोरनांतव्याव र्तत्वस्पष्टतीसादौ॥ ॥ स्वादिष्वसर्वनामस्थाने॥ ॥राजेति। प्रत्ययलक्षणेन सर्वनामस्थानपरत्वात्। नाप्रतिषेधादिति। प्रसज्यप्रतिषेधः प्रतिषेधशब्दे नोक्तः। अप्राप्तेर्वेति। प्रसज्यप्रतिषेधाश्रयणेपि न दोष इत्यर्थः। ननु चेयमिति। परत्वादिति भावः। स्वादिष्विति प्राप्तिं प्रतिषेधो बाधते। तत्र यथा देवदत्तस्य हंतरि हतेपि न पुनः प्रादुर्भावः एवं पदसंज्ञानस्या

नः क्ये॥ ॥किमर्थमिदमुच्यते। न खल्वंतं पदमिसेव सिद्धं। नियमार्थोयमारंभः। नांतमेव क्ये पदसंज्ञं भवति नान्यत्। क्व मा भूत्। वाच्यति स्रुच्यति॥

॥स्वादिष्वसर्वनामस्थाने॥ असर्वनामस्थान इत्युच्यते तत्रेते राजानक्षा। असर्वनामस्थान इति प्रतिषेधः प्रसज्येत। नाप्रतिषेधात्। नायं प्रसज्यप्रतिषेधः सर्वनामस्थाने नेति किं तर्हि पर्युदासोयं यदन्यत्सर्वनामस्थानादिति सर्वनामस्थाने व्यापारः। यदि केनचित्प्राप्नोति तेन भविष्यति पूर्वेण च प्राप्नोति। अप्राप्तेर्वा। अथवा अनंतरा या प्राप्तिः सा प्रतिषिध्यते। कुत एतत्। अनंतरस्य विधिर्वा भवति प्रतिषेधो वेति। पूर्वा प्राप्तिरप्रतिषिद्धा तया भविष्यति। ननु चेयं प्राप्तिः पूर्वां प्राप्तिं बाधते। नोत्सहते प्रतिषिद्धा सती बाधितुं। अथवा योगविभागः करिष्यते। स्वादिषु पूर्वं पदसंज्ञं भवति। ततः सर्वनामस्थाने। यचि॥ पूर्वं पदसंज्ञं भवति। ततः भं। भसंज्ञं च यजादावसर्वनामस्थान इति॥ ॥ ॥

तानोत्सहत इति। स्वादिष्विति प्राप्तिः किंप्रत्वेस्याः प्राप्तेर्वाधिकास्त्वयनिषेधस्य बाध्येति। तत्र प्राप्तौ बाधो न युज्यते इत्स प्राप्यनुमानं बाध इत्सपवाद्विषयपरिहारेण उत्सर्गस्य प्रवर्तनात्स्वादिष्विति प्राप्तिस्तत्रासती कथं बाधकत्वमासादयेत्। यथा रक्षाविसत्र नादिचीति प्रतिषेधारंभात्तद्विषये पूर्वसवर्णदीर्घस्याभावाद्वृद्धिं प्रति बाधकत्वाभावात् वृद्धिः प्रवर्तते तत्रथेह खल्वंत परमिति पदसंज्ञे सत्यर्थ। सर्वनामस्थाने। यचीति। सर्वनामस्थाने इत्सत्र नञ् श्रुतो पचीसन्नेन संबध्यते। यकारादि सर्वनामस्थानं नास्तीति यग्रहणमुत्तरार्थं। तेनाजादौ सर्वनामस्थाने पदसंज्ञा निषिध्यते न तु हलादौ इति राजत्वत्रापि भवति। भसंज्ञं चेति। भसंज्ञाविधौ सर्वनामस्थाने नैव नञ् संबध्यते॥ ॥

गौरिति॥ अत्र सुपादिष्विति पदसंज्ञायां ससजुषो रुरिति रुत्वे सति तस्य लोपः। एवं परत्र। वाक्यपदयोरिति॥ वाक्यस्य चात्र विसर्जनीयं सोन त्वौकारः। भुवद्दृश्यद्दति गत सो मत्वर्थ इति भसंज्ञा प्राप्नोतीति पदसंज्ञा विधिः॥ ॥ यचि भं॥ षडिक इति। षडंगुलिश बृहत्स्वरूपायां बहुचो मनुष्यनाम्न इति ठचि कृते ठाजादावूर्ध्वं द्वितीयादचः इति लोपे यस्येति चेत्यकारलोपे च कृते तुल्यावधिकया भसंज्ञया भस्य पदलक्षणे न प्राप्नोत्या स्वादिष्वसर्वनामस्थाने इति पदसंज्ञायाः बाधनात्त्र्त्वं न स्यादिति वचनं। सिद्धमचइति। चौ अल्लोपस्येति लर्थः॥ तत्र भसंज्ञायां विधीयमानायां अकार लोपस्य स्थानिवत्त्वाद्दकारान्तमेतदकारान्तमिति भिन्नावधि विषयत्वाद्द पदसंज्ञयो बाध्यबाधकभावाभावः। न पदान्ते ति स्थानिवत्

यदिति हिंसावपि पदं भवति एचः प्लुतविकारे पदान्तग्रहणं चोदितं। इह मा भूत् भद्रं करोषि गौरिति। तस्मिन् क्रियमाणेऽपि प्राप्नोति। वाक्यपदयोरंत्यस्येत्येवं तत्। भुवद्वद्भ्यो धारयद्भ्यः पदसंज्ञा। एतयोः पदसंज्ञा वक्तव्या। भुवद्वद्भ्यः धारयद्भ्यः॥ ॥ यचि भं॥ भसंज्ञाया मुत्तरपदलोपे षषः प्रतिषेधः। भसंज्ञायामुत्तरपदलोपे षषः प्रतिषेधो वक्तव्यः अनुकंपितः षडंगुलिः षडिकः। सिद्धमचः स्थानिवत्त्वात्। सिद्धमेतत्। कथं। अचः स्थानिवद्भावाद्द संज्ञा न भविष्यति। इहापि तर्हि प्राप्नोति। वागाशीर्दत्तः वाचिक इति। वक्ष्यत्येतत्। षष्ठ्यजादिवचनात्सिद्धमिति। नभो ऽङ्गिरोमनुषां वत्युपसंख्यानं। नभोऽङ्गिरोमनुषां वत्युपसंख्यानं कर्तव्यं। नभस्वत्। अंगिरस्वत्। मनुष्वत्॥ ×सिद्धमेकाक्षरपूर्वपदानामुत्तरपद ×लोपवचनादिति। इहापि तर्हि प्राप्नोति षडंगुलि

निषेधोऽत्र न भवति। यत्र पदान्ते विधीयते तत्रासौ निषेधः यथा कौस्तः कानिसंती ति। अत्र हि वकारे यकारश्चपदान्ते विधेयः इह तु पूर्वमेव जश्त्वं प्रवर्तनं त्विदानीं विधेयं। सिद्धमिति। उत्तरपदलोपस्य हल्जादेशत्वात्त्रासिस्थानिवत्त्वमिति तुल्यावधिकया भसंज्ञया पदसंज्ञा बाध्यते। मनुष्वदिति। ससजुषो रुरिति रुत्वे स्यात् न तु षत्वं अपदान्तस्येति वचनात्॥ ॥श्री॥ ॥श्री॥ ॥

मा० कौ० प्र०
३०२
302

वृषण्वसुरिति। पदत्वे सति पदांतत्वेऽपि निषेधात्सत्वं न स्यात् नलोपश्च प्रसज्येत। भत्वे सत्यल्लोपो न इत्यकारलोपो न भवति। अंगसंज्ञाया अभावात्। अंगस्येति च तत्राधिकारात्। उपसंख्यानेनतानिष्ठे द्वे विषयाणीत्याहुः॥ ॥ तसौ मत्वर्थे॥ ॥ अर्थग्रहणमिति। स्वादिष्विति वर्जनेऽतत्रैवं संबंधः क्रियते। मतौ यः स्वादिर्वर्जितस्तदर्थ इति। शब्देऽपि च बहुलसंभवात्तदर्थ-
वृत्तिर्विज्ञास्यते इति प्रश्नः॥ इहैव स्यादिति। मतौ स्वादाविति सामानाधिकरण्येन मुख्यकल्पनया संबंधे संभवति अर्थग्रहणं न लभ्यत इति भावः। पयस्वानिति। मत्वर्थीयप्रकरणेऽ-
न्यतरस्यां ग्रहणानुवर्तनात् विनिना मतुप् न बाध्यते। न हि मतुब्विधिः उपलक्षणस्यान्योपलक्षणे चरितार्थत्वात्स्वतः कार्यप्रतिनिमित्तत्वावगमाभावात्। मतुबपीति। अ-

वृषण्वस्वश्वयोश्च॥ वृषण् इत्येतत्स्यवस्वश्वयोर्भसंज्ञं वक्तव्या। वृषण्वसुः वृषणश्वस्य यच्छिरः। वृषणश्वस्य मेने॥ ॥ तसौ मत्वर्थे॥ ॥
अर्थग्रहणं किमर्थं। न तसौ मता विशेष्येत। तसौ मता विनीय सुच्यमाने इहैव स्यात् पयस्वान् यशस्वान्। इह न स्यात्। पयस्वीय शस्वी। अर्थग्रहणे पुनः क्रियमाणे मतुपि च सिद्धं भवति यश्चान्यस्तेन समानार्थस्तस्मिंश्च। यद्यर्थग्रहणं क्रियते। पयस्वान्। अत्र न प्राप्नोति। किं कारणं। न हि मतुप् मत्वर्थे वर्तते। मतुबपि मतुबर्थे वर्तते। तद्यथा। देवदत्तशालायां ब्राह्मणा आनीयंतामित्युक्ते यदि देवदत्तोऽपि ब्राह्मणो भवति सोऽप्यानी-
यते॥ ॥ ॥

स्यास्मिन्निति मतुपो ऽर्थः। स च विन्नादीनामिव मतुपोऽपीति भावः। तद्यथेति। अयमत्रार्थः। यत्र रूपांतरेणोपलक्षणत्वं रूपांतरेण च कार्ययोगः प्रतिपाद्यते तत्रोपलक्षणस्या-
प्युपलक्ष्यरूपसद्भावे सति कार्ययोगो भवति। तद्यथा। देवदत्तशालायां ब्राह्मणा आनीयंतामित्युक्ते सति ब्राह्मणे देवदत्तस्याप्यानयनं भवति। कार्यनिमित्तरूपांतराभावे तु न भव-
त्युपलक्षणस्य कार्ययोगः। यथा देवदत्तशाला भिद्यतामिति॥ ॥ श्री॥ ॥ ॥

राम०
३०२

= प्रकृतेऽपि मतुत्वेनोपलक्षणानां मत्वर्थत्वेन कार्ययोगः। इदं तेऽदेवदत्तत्वेनोपलक्षणानां ब्राह्मणत्वेन कार्ययोगः। २ = रूपांतराभावेऽपीति। उपलक्ष्यतावच्छेदकरूपस्योपलक्षणेऽभावेऽपीत्यर्थः। यथा शालात्वं न देवदत्त इति भावः। २ =

अयस्मयादीनि॥ आनंतर्याद् संज्ञा द्वयेनैव निपातनं प्राप्नमित्याह। उभयसंज्ञान्यपीति॥ ऋकृतेति। पदत्वात् कुत्वं भत्वात् जश्त्वं न भवति। जश्त्वविधानार्थं पदसंज्ञा बाधनाय भसंज्ञाप्रवर्त्तनात् तत्र चैव बाधनकार्याभावः॥ ॥बहुषु बहुवचनं॥ केषु बहुष्विति। जातिवादी प्रत्यवतिष्ठते। जातेः प्रातिपदिकार्थत्वे तस्या एकत्वाद् बहुत्वा संभवात् तस्य द्व्याश्रितद्रव्यगतं बहुत्वमाश्रयणीयं। तत्र वृक्षादेः सावयव बहुत्वसद्भावात्स्याद् बहुवचनं इति भावः। अत्रोत्तरं। अर्थेष्विति। अस्याप्ययं भावः। द्रव्यं पदार्थः तत्राभिधेयगतमेव बहुत्वमाश्रीयते वृक्षशब्दस्य चावयवी वाच्यः न त्ववयवाः। आकृतिपक्षेपि यस्यास्सत्वातदाधारद्रव्यगतं बहुत्वमाश्रीयते न त्ववयवगतं। तदाद्रव्यास्तित्वपक्षावयवयव्यभेदविवक्षायां बहुत्वमाकृत्याधारगतमेव बहुवचनवाच्यमित्यदोषः। इतरोऽग्रहीताभिप्राय आह। यद्येवमिति। अर्थशब्दोभ

अयस्मयादीनि छन्दसि॥ उभयसंज्ञान्यपीति वक्तव्यं। सत्सु ष्टुभा स ऋक्वता गणेन॥ ॥बहुषु बहुवचनं॥ बहुषु बहुवचनं मित्युच्यते। केषु बहुषु। अर्थेषु। यद्येवं वृक्षः प्लक्षः। अत्रापि प्राप्नोति। बहवस्तेर्थाः मूलं स्कन्धः फलं पलाशमिति। एवं तर्हि एकवचनं द्विवचनं बहुवचनमितिशब्दसंज्ञा एताः। येष्वर्थेषु स्वादयो विधीयन्ते षु बहुषु। केषु च स्वादयो विधीयन्ते। कर्मादिषु॥ ॥

वृत्तावस्तुपर्यायः प्रयुक्तः। मूलादीनि च बहूनि वस्तूनि इति मन्यते। एवं तर्हीति। अयमर्थः। नेदं सातंत्र्येण विधायकं किं तर्हि विहितानामनेन नियमः क्रियते। बहुवचनादिभिर्निर्दिष्टैः शब्दसंज्ञाभिः सुप्तिङोः प्रत्यायन्ते। तेषां च शास्त्रांतरेण स्थिते विधाने इदमारभ्यमाणं नियमाय भवति। न त्विदमेव विशिष्टार्थानुवादेन सुप्तिङो विधायकमित्येतच्छब्दसंज्ञा एता इत्यनेन प्रदर्श्यते। येष्वर्थेष्विति। क्वचित्तु पाठः एवं तर्हि येष्वर्थेष्विति। एकवचनमित्यादि तु भाष्यं नास्त्येव। अयमर्थः। पंचकः प्रातिपदिकार्थः। तथा हि। दधि पश्येत्यादौ विभक्तिश्रवणमंतरेणापि पंचार्थाः प्रतीयन्ते स्वार्थादयः। विभक्तयस्तु क्वचिद् द्योतकत्वेनापेक्ष्यन्ते। तत्रानिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवंतीति संख्यायां कर्मादिषु च सिद्धा एव स्वादयः। अनेन तु नियम्यन्ते। तत्र कर्मादिशक्त्यैकार्थसमवेत एव बहु(बहुत्वे) बहुवचनं भवति

= नेदमिति- अवयवबहुत्वाश्रयेण बहुवचने प्रसंजिते एकवचनादीनां शब्दसंज्ञात्वकथनमसंगतं(नियमि) न इदमुच्यते- विहितानामिति- न च सुप्तिङ्ध्येकवाक्यतया विधायकमेवेदं- अन्योन्याश्रयपरिहाराय भाविसंज्ञाविज्ञानाश्रयणप्रसंगात्।५= निष्पन्ने इति- निष्पन्नशब्द
= अवयवैकत्वइति- नियमस्त्वयं नैकत्वादिषु प्राप्तास्त्वद्विषय एव- कर्मादिषु नैकत्वादिषु च तेषां प्राप्तिरिति [illegible] इत्यर्थः- तत्र कर्मादिष्विति- अयं भावः। संख्याकारकयोर्द्वयोरपि प्रकृत्यर्थत्वे कारकशक्त्याक्षिप्ताभावे कारकस्यैव संख्यायाः

=स्तरोऽत्र तामिप्राय स्विकं प्रातिपदिकार्थः संख्या=येऽकतममिति एवं च संख्याविभक्त्यर्थ इति पक्षेऽनभिहित इति सूत्रं कर्तव्यमिति सूचितमन्यथा कर्मण्युक्तेऽपि तज्जत संख्याबोधनाय विभक्तिः स्यात्स्या अनुक्तत्वादिति॥=
संख्या कारकेऽविभक्त्यर्थ इत्युक्तमनेनेति मतान्तरमुपपादयति न चाहुरिति सरवसमाधत्ते एकत्वादिष्वपीति॥=

नवैकर्मोदय इति॥ अनभिहित इति सूत्रारंभसामर्थ्याल्लकर्मोदीनां नैव विभक्तिवाच्यत्वमिति मन्यते॥ तेषां हि विभक्त्यर्थत्वे तिङ्कृत्तद्धितसमासैस्तेषूक्तेषु गतार्थत्वाद्द्वितीयादीनां प्रसंग एव नास्ति किमनभिहिताधिकारेण॥ एकत्वादिष्वपीति॥ वाक्यैकवाक्यत्वे सति महावाक्यं संपद्यते॥ कर्मण्यनभिहिते यदेकत्वं तत्रैकवचनमित्याशिसततही ति॥ बहुत्वे इत्येवमि
=नचाहुरिति अयंभावः पंचकप्रातिपदिकार्थपक्षे कचिद्विभक्तिर्द्योतकत्वेनापेक्षिता तत्रापि कारकसंख्ययोरुभयोरेकत्वसंख्यामात्रमिति विकल्प्याद्यपक्षेऽनभिहिताधिकारवैयर्थ्यप्रसंगादुत्तरपक्षः स्वीकर्तव्यः एवं समानम्

नवैकर्मोदयो विभक्त्यर्था॥ केतर्हि॥ एकत्वादयः॥ एकत्वादिष्वपि वै विभक्त्यर्थे वत्स्येव कर्मोदयो निमित्तत्वेनोपादेयाः॥ कर्मण एकत्वे कर्मणो द्वित्वे कर्मणो बहुत्वे इति॥ सत हि तथा निर्देशः कर्तव्यः॥ न ह्यन्तरेण भावप्रत्ययं गुणप्रधानो भवति निर्देशः॥ इह च द्व्येकयोर्द्विवचनैकवचने इति परत्वादेकवचनं प्राप्नोति॥ बहुषु बहुवचनमिति ष योगः परः करिष्यते॥ सूत्रविपर्यासः कृतो भवति॥ इह च बहुषु दनो बहुः स्यादिति परत्वा द्बहुवचनं प्राप्नोति॥ नैष दोषः॥ यत्राप्युच्यते नह्यन्तरेण भावप्रत्ययं गुणप्रधानो भवति निर्देश इति॥ तन्न॥ अन्तरेणापि भावप्रत्ययं गुण प्रधानो भवति निर्देशः॥ कथं॥ इह कदाचिद्गुणो गुणि विशेषको भवति॥ तद्यथा पटः शुक्ल इति॥ कदाचिच्च गुणिना गुणो व्यपदि
श्यते पटस्य शुक्ल इति॥ ॥ श्री॥ ॥ ॥

सर्थः॥ एकेमन्यन्त इति॥ प्रातिपदिकार्थ एकत्वमत्रास्ति बहुत्वं च षेकयोरिस त्रच विशेषानुपादानाद्यावत्कश्चिद्देक प्रत्ययार्थः तस्य ग्रहणे नमा व्यं॥ तत्र परत्वादे कवचनप्रसंगः॥ इह चेति॥ इह यदि षेकयोरिति योगासरो यं योगः क्रियते तदा विशेषाभावाद्बहुत्वरूपस्यापि बहुत्वस्य ग्रहणे सति परत्वाद्बहुवचनप्रसंगः॥ गुणि
विशेषक इति॥ अत एव वचनाद निसर्गः षष्ठीसमासप्रतिषेधः॥ शेषषष्ठ्या वा समासः॥ ॥

सामानाधिकरण्यमिति। मतुब्लोपादभेदोपचाराद्वा। तदानान्तरेणेति। गुणवाचिनः शुक्लशब्दाद्भावप्रत्यये कृते गुणः प्रतीयते नान्यथेत्यर्थः। द्रव्ये षष्ठीति। षष्ठीग्रहणं व्यतिरेकविभक्तेरुपलक्षणार्थं। गुणिनो ह्याधारत्वविवक्षायां सप्तम्यपि भवति। यथैवेह कर्मणि या संख्येति। कथमिति। बहुत्वस्यैक

तद्यदा नावृद्गुणो गुणिविशेषको भवति पटः शुक्ल इति तदा सामानाधिकरण्यं गुणगुणिनोः। तदानान्तरेण भावप्रत्ययं गुणप्रधानो भवति निर्देशः। यदा तु गुणिना गुणो व्यपदिश्यते पटस्य शुक्ल इति। स प्रधानस्तदा गुणो भवति। तदा द्रव्ये षष्ठी। तदान्तरेण भावप्रत्ययं गुणप्रधानो भवति निर्देशः। न चेह वयमेकत्वादिभिः कर्मादीन्विशेषयिष्यामः। किन्तर्हि कर्मादिभिरेकत्वादीन्विशेषयिष्यामः। कथं। एकस्मिन्नेकवचनं। कस्मिन्नेकस्य। कर्मणः। द्वयोर्द्विवचनं। कयोर्द्वयोः। कर्मणोः। बहुषु बहुवचनं। केषां बहुषु। कर्मणामिति। कथं बहुषु बहुवचनमिति। एतदेव ज्ञापयत्याचार्यः नानाधिकरणवाची यो बहुशब्दस्तस्येदं ग्रहणं न वैपुल्यवाचिन इति। किमेतस्य ज्ञापने प्रयोजनं। य उक्तं बहुरोदनो बहुः सूप इति परत्वाद्बहुवचनं प्राप्नोतीति न स दोषो भवति। यदप्युच्यते। इत्येके मन्यन्ते तदेके मन्यन्ते इति परत्वाद्बहुवचनं प्राप्नोतीति॥ ॥

त्वाद्बहुवदिति भाष्यमिति प्रश्नः। एतदेवेति। आश्रयगतं बहुत्वं बहुत्वे गुणेऽध्यारोप्य निर्देशः कृतः। तस्यैतत्प्रयोजनं भिन्नवस्त्वाधारस्य बहुत्वस्य संख्यारूपस्य ग्रहणं यथा स्यात्। एकाश्रयवर्तिनो वैपुल्यरूपस्य माभूदिति॥ ॥श्री॥ ॥७॥ ॥

= संख्यार्थकत्वं ब्रुक्ताचित्रुक्तम प्रसिद्धमित्याशयः॥२॥ स्यादिति । येकानामिति स्यात् इदं द्वेवेति सर्वनामत्वनिषेधात् । एतेन येकेषामिति स्यादिति द्वितीयचरणेनव्यविवरणो क्तिः प्रत्युक्ता॥२॥

एकशेषोयमिति॥ द्व्येकयोरित्यत्र संख्यापदेन द्विशब्देन साहचर्यादेकशब्दस्यापि संख्यावाचिनो ग्रहणं॥ द्विलैकयोरप्य द्व्येकशब्दो वर्त्तते इति द्व्येकयोरिति द्विवचनेन निर्देशः।
अन्यथा बहुवचनं स्यात्। प्रसिद्धा च संख्ये याथें लमेकादीनामष्टादशानां नामुच्यते। किमर्थमिति। लौकिकादेव प्रयोगाद्बहुलादिषु बहुवचनादीनामय व
स्याभविष्यतीति प्रश्नः। सुपि इति। सुपि इ. विधानवाक्ये संख्याविशेषानिर्देशात् विशेषानुपादानेन तेषां विधानमित्यर्थः। यद्यपीति। शास्त्रे नुपा

नैष दोषः। एकशेषोयं बह्वर्थः। अस्त्येव संख्यावाची। तद्यथा। एको द्वौ बहव इति। अस्ति सहायवाची। तद्यथा। एकाग्नयः। एकहलानि।
एकाकिभिः क्षुद्रकैर्जितमिति। अस्त्यन्यार्थे वर्त्तते। तद्यथा। सधमादो द्युम्न एकास्ताः। अन्या इत्यर्थः। तद्योऽन्यार्थे वर्त्तते तस्यैष प्रयो
गः। किमर्थं पुनरिदमुच्यते। सुपि इ. अविशेषेण विधानाद्दृष्टविप्रयोगाच्च नियमार्थं वचनं। सुपः अविशेषेण प्रातिपदिकमात्राद्वि
धीयन्ते तिङ. अविशेषेण धातुमात्राद्विधीयन्ते तत्रैतत्स्याद्यद्यप्यविशेषेण विधीयन्ते नैव विप्रयोगो लक्ष्यत इति। दृष्टविप्रयोगाच्च। दृश्य
ते खल्वपि विप्रयोगः। तद्यथा। अक्षीणि मे दर्शनीयानि पादा मे सुकुमारा इति। सुपि उ. अविशेषविधानाद्दृष्टविप्रयोगाच्च व्यतिक
रं प्राप्नोति। इष्यते चाव्यतिकरः स्यादिति तच्चान्तरेण यत्नं न सिध्यतीति नियमार्थं वचनं। एवमर्थमिदमुच्यते॥ ॥ ॥

त्तोऽप्यर्थः प्रयोगादेव अवस्थाप्यत इत्यर्थः। सुपस्तावत्स्वार्थे विधीयमानाः स्वार्थे द्रव्यलिंगसंख्याकर्मादिलक्षणः पंचकः प्रातिपदिकार्थ इति दर्शने संख्या
यां सिद्धाः। संख्याविशेषावगतिस्तु लोकात्सिद्धा। तिङोपि कर्त्तृकर्मणोर्विधीयमानाः संख्यायुक्तयोरेव तयोर्वाचका भविष्यंति। स्वभावतः संख्याविशेषः प्रयोगदर्शना
देवगम्यत इति भावः। अक्षीणीति। द्वित्वेपि लोके बहुवचनं दृश्यत इत्यर्थः। विरुद्धः प्रयोगो विप्रयोगः॥ ॥ ॥

तत्र प्रत्ययनियम इति॥ प्रत्यया विशिष्टायां संख्यायां नियता इति निःसंख्येभ्योऽव्ययेभ्यस्तेषामनुत्पादात् तद्दर्शनाभावात्तन्निबंधनत्वाद्यभावप्रसंगः॥ अर्थे नियम
इति। अर्था नियताः इति तेषु वचनान्तराभावः। प्रत्ययास्त्वनियतत्वादव्ययेभ्योऽपि सिध्यंतीत्यर्थः। सुपामिति। कर्मणि द्वितीयेत्यादेः प्रकरणस्य बहुषु बहुवचनमि
त्यादेश्च स्वादिसूत्रेण सहैकवाक्यता। तिङर्थे लिहत स्याङ्गदेन स्त्वद्वयसुपां त्वं। तत्रैकस्मिन्कर्मणीत्येवं गुणगुणिनोः सामानाधिकरण्येन संबंधे सति संख्याकृ

अथैतस्मिन्नियमार्थे सति किं पुनरयं प्रत्ययनियमः एकस्मिन्नेवैकवचनं द्वयोरेव द्विवचनं बहुष्वेव बहुवचनमिति। आहोस्विदर्थनिय
मः। एकस्मिन्नेकवचनमेव द्वयोर्द्विवचनमेव बहुषु बहुवचनमेवेति। कश्चात्र विशेषः। तत्र प्रत्ययनियमेऽव्ययानां पदसंज्ञाभावोऽसु
बंतत्वात्। तत्र प्रत्ययनियमेऽव्ययानां पदसंज्ञा न प्राप्नोति। उच्चैः नीचैरिति। किं कारणं। असुबंतत्वात्। अर्थनियमे सिद्धं। अर्थे नि
यमे सिद्धं भवति। अस्त्वर्थे नियमः। अथवा पुनरस्तु प्रत्ययनियमः। ननु चोक्तं तत्र प्रत्ययनियमेऽव्ययानां पदसंज्ञाभावोऽसुबं
तत्वादिति। नैष दोषः। सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङां। सुपां संख्या चैवार्थः कर्मादयश्च। तथा तिङां। प्रसिद्धो निय
मस्तत्र प्रसिद्धस्तत्र नियमः। नियमः प्रकृतेषु वा। अथवा प्रकृतानर्थानपेक्ष्य नियमः। के च प्रकृताः। एकत्वादयः। एकस्मिन्ने
वैकवचनं न द्वयोर्न बहुषु। द्वयोरेव द्विवचनं नैकस्मिन्न बहुषु। बहुष्वेव बहुवचनं न द्वयोर्नैकस्मिन्निति। अथवा आचार्यप्र
वृत्तिर्ज्ञापयति उत्पद्यंतेऽव्ययेभ्यः स्वादय इति। यदयमव्ययादाप्सुप इत्यव्ययाल्लुकं शास्ति॥ ॥ इति श्री द्वितीयमाह्निकं॥ ॥

मोदयश्च सुपामर्था भवंतीति। प्रसिद्धो नियम इति। अर्थे नियम इत्यर्थः। नियमः प्रकृतेषु वेति। तुल्यजातीयस्य नियमेन व्यावृत्तिः क्रियत इत्यव्ययेभ्यः स्वादी
नामव्यावृत्तिः। अथवेति। भवतु प्रत्ययानां सामान्येन नियमस्तथापि ज्ञापकादव्ययेभ्यः स्वादिसिद्धिरित्यर्थः॥ ॥ इत्युपाध्यायजैय्यटपुत्रकैयटकृते म
हाभाष्यप्रदीपे प्रथमस्याध्यायस्य चतुर्थे पादे द्वितीयमाह्निकं॥ ॥श्री॥ ॥७॥ ॥ ॥

=घोतकत्वादर्थः। अन्यथा वाक्यमाणं नियमार्थत्वं न प्रकल्पेत तेषां घोतकत्वेनुपयेषां नियमार्थत्वं तथा भाष्यात्तं भागुपाध्याये॥३=

= विशेषानिर्देशात्तार्थ्यादधिकारत्वेनावस्थितेनतदसंभवभावः सप्तमीति ॥१॥ = अथेति कारकशब्दस्य क्रियायामित्यर्थो विषयसप्तमी चेयमिति भावः ॥१॥

भा०कै०प्र०
३०५
305

कारके॥ किमिदमिति। सप्तमीनिर्देशात्तावत्संज्ञात्वेनाधिकारः संज्ञायामाख्यमानत्वात्प्रथमानिर्देशस्याप्यत्वात्। अथ विशेषणत्वेनाधिकारः तदा कारकादन्त
श्रुतयोरित्यादावपादानादिसंज्ञाविकल्पस्यापि कारकसंग्रहणं प्राप्नोति। षड्विधस्यैव चेष्यते। तद्धि मिरिक्तं च कारकमस्ति प्रधानस्य स्मृणोतीति प्रश्नः। संज्ञानिर्देश इ
ति। सुपां सुपो भवन्तीति प्रथमायाः स्थाने सप्तमी कृतेति भावः। किं वक्तव्यमिति। सप्तमीनिर्देशादयुक्तः संज्ञापक्ष इति भावः। नहीति। सुब्व्यत्यय उक्तः। न चायमि
ति। शास्त्रे लोके च प्रसिद्धमाचाहृत विभक्त्यनुपपत्त्या व्यमानविभक्तेः प्रथमायाः स्थाने सप्तमी कृतेति भावः। संज्ञिनो निर्देश इति। यद्यपि वक्ष्यमाणध्रु

कारके॥ किमिदं कारक इति। संज्ञानिर्देशः। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते। इह हि व्याकरणे ये वा एते लोके प्रतीतप
दार्थकाः शब्दास्तैर्निर्देशाः क्रियन्ते। या वा एताः कृत्रिमाष्टिघुभसंज्ञाः। न चायं लोके ध्रुवादीनां प्रतीतपदार्थकः शब्दः। न खल्वपि
कृत्रिमा संज्ञा अन्यत्राविधानात्। संज्ञाधिकारश्चायं। तत्र किमन्यच्छक्यं विज्ञातुमन्यदतः संज्ञायाः। कारक इति संज्ञानिर्देशश्चेत्सं
ज्ञिनो निर्देशः। कारक इति संज्ञानिर्देशश्चेत्संज्ञिनोऽपि निर्देशः कर्तव्यः। साधकं निर्वर्तकं कारकसंज्ञं भवतीति वक्तव्यं॥ ०॥

= ध्रुवमपायमित्यादयः ॥१॥

वादयः संज्ञिनो लभ्यन्ते तथापि विशिष्टः संज्ञी निर्दिष्टव्यः। यत्क्रियायाः साधकं ध्रुवादि तत्कारकसंज्ञं अपादानसंज्ञं च भवतीति। ननु संज्ञापक्षे कारकसंज्ञाया अ
पादानादिसंज्ञाभिः समावेशो न प्राप्नोति। एकसंज्ञाधिकारात्। नैष दोषः। ध्रुवमपाय इति योगविभागेन कारकसंज्ञा क्रियते। ततः अपादानमित्यत्र कारकग्रहणमनुव
र्तते ध्रुवमपाय इति च। तेन कारकं सदपादानसंज्ञमित्येवं समावेशः सिध्यतीति तदन्तरेणाप्यनुवृत्तिं वचनसामर्थ्यात् योयं सिद्धे समावेशार्थानुवृत्तिर्विज्ञायते। ए
वं संप्रदानादिसंज्ञास्वपि समावेशो व्याख्येयः। समावेशस्य च प्रयोजनं स्तंबेरम इत्यादावधिकरणत्वात्सप्तमी। कारकत्वात्कृदंतस्योत्तरपदस्य प्रकृतिस्वरः॥ ०॥

राम०
३०५

= नन्वकारकमपि निमित्तसंज्ञाकरणबलाद् ... ध्रुवमपायेपादानमित्यत्र कारकसंज्ञा ... योगविभागेन क्रियाजनकत्वे ... कारकसंज्ञा ... अपादानादिसंज्ञा ...

ग्रामस्य समीपादितिः यथा यो वृक्षशाखायाः पतति वृक्षादप्यसौ पतति। एवं यो ग्रामसमीपादागच्छति ग्रामादप्यसावागच्छति। ततश्चापाये ग्रामस्य ध्रुवता भवति। आगमने तु निर्वे
र्न्नेकत्वाभावः। समीपविशेषणेनोपात्तत्वात्। नात्र ग्राम इति। समीपविशेषणेनोपादानादेव ग्रामस्यापाययोगो नास्ति। स हि संश्लेषपूर्वकः। संश्लेषश्च सन्नसन्ना बुध्या
कल्प्यते। स च समीपस्यैव विवक्षितो न ग्रामस्येत्यर्थः। ग्रामात्समीपादिति चोक्ते वस्त्वन्तरापेक्षं ग्रामस्यैव सामीप्यं प्रतीयते न तु ग्रामापेक्षमन्यस्य सामीप्यं। संचक्ष्येति।

इतरथा ह्यनिष्टप्रसंगो ग्रामस्य समीपादागच्छतीति अकारकस्य। इतरथा ह्यनिष्टं प्रसज्येत। अकारकस्याप्यपादानसंज्ञा प्रसज्येत। क्व। ग्राम
स्य समीपादागच्छतीति। नैष दोषः। नात्र ग्रामोऽपाययुक्तः। किं तर्हि समीपं। यदा च ग्रामोऽपाययुक्तो भवति तदाऽपादानसंज्ञा। तद्यथा। ग्रामादा
गच्छतीति। कर्मसंज्ञाप्रसंगोऽकथितस्य ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति। कर्मसंज्ञा च प्राप्नोत्यकथितस्य। क्व। ब्राह्मणस्य पुत्रं पन्थानं पृच्छती
ति। नैष दोषः। अयमकथितशब्दोऽस्त्येवासंकीर्तिते वर्तते। तद्यथा। कश्चित्कंचित्संचक्ष्याह। असावत्राकथितः। असंकीर्तित इति गम्यते।
अस्त्यप्राधान्ये वर्तते। तद्यथा। अकथितोऽसौ ग्रामे अकथितोऽसौ नगरे इत्युच्यते यो यत्राप्रधानो भवति। तद्यदा यदप्राधान्येऽकथितशब्दो
वर्त्तते तदैष दोषः। कर्मसंज्ञाप्रसंगो ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति। अपादानं च वृक्षस्य पर्णं पततीति। अपादानसंज्ञा च प्राप्नोति। क्व। वृक्षस्य प
कथितस्य
र्णं पतति कुड्यस्य पिंडः पततीति॥०॥

वर्जयित्वेत्यर्थः। वर्जने प्रतिषेध इति ख्यात्रादेशाभावः। वर्जनं च प्रसक्तस्य सजातीयस्यैव कर्मसंज्ञा भवति न तु ब्राह्मणस्य पुत्रं प्रति विशेषणत्वेनोपात्तस्यात इदे
ति। अप्राधान्यस्य प्रसंगनिरपेक्षत्वात् ब्राह्मणोऽपि पुत्रवद्भावात्। पन्था हीप्सिततमत्वात्प्रधानं न पुत्रो नापि ब्राह्मणः। वृक्षस्य पर्णमिति। ग्रामस्य समीपादित्यत्रापाययु
क्तोऽर्थान्तरसद्भावान्नास्ति ग्रामस्यापाययोगः। इह त्वर्थान्तरस्यानिर्देशाद्वृक्षस्यैवापाययुक्तत्वमिति भावः॥ ×भवतीनिकारकस्यैव×२ " "

=वर्जितापादानादिसंज्ञाकं कृत्वेत्यर्थः। २=

=यत्र विभागजनकं संयोगजनकव्यापारे प्रतीयमाने तत्रापायो भवति प्रकृते च संयोगानुकूलव्यापार एव प्रतीयते न तु विभागोपी तिभावः॥२=प्रवेति प्रायो विभाग एतन्नातः केकस्वाकुरस्येति भाव विरोधः॥२=

नवाः पायस्येति। पर्णविशेषणत्वेनैव वृक्षस्य विवक्षितत्वात्। तथाहि। वृक्षमजहत्स्वपि पर्णेशाखास्थेष्वपि मिंस्पृशति वृक्षस्य पर्णं पतती तिप्रयोगो भवति। सन्निधावधौगतिरपायो भवतिनान्य थागतिविशेषत्वादपायस्य। नज्ञायत इति। शाखेनासंपर्णात्संबंधिविशेषस्येतिभावः। प्रत्ता सत्तानुवृक्षस्य संबंधित्वेन प्रतीयते। कर्मसंज्ञाप्रसंगइति। अप्रधानवाच्यकथितशब्दाश्रय एव इतिभावः। अन्वर्थसंज्ञेति। महत्याः संज्ञायाः करणादनुमीयते नूनं विशिष्टा ध्रुवादयः संज्ञित्वेन निर्दिष्टाः। यद्विशेषदर्शनान्तरनुरूपा ते वासंज्ञा क्रियते। करोतीतिकारकमिति। साध्य

नवाः पायस्याविवक्षितत्वात्। नवा एषदोषः। किंकारणं। अपायस्याः विवक्षितत्वात्। नात्रापायो विवक्षितः। किंतर्हि संबंधः। यदा चापायो विवक्षितो भवतितदाः पादानसंज्ञा। तद्यथा। वृक्षात्पर्णं पततीति। संबंधस्तु तदा न विवक्षितो भवति। नज्ञायते केकस्य वाकुररस्येति। अयेतर्हि दोषः। कर्मसंज्ञाप्रसंगश्चाकथितस्य ब्राह्मणस्य पुत्रं पंथानं पृच्छतीति। नैषदोषः। कारक इति महती संज्ञा क्रियते। संज्ञा च नाम यतो नलघीयः। कुत एतत्। लघ्वर्थं हि संज्ञाकरणं तत्र महत्याः संज्ञायाः करण एतत्प्रयोजनं अन्वर्थसंज्ञायथाविज्ञायेत करोतीति कारकमिति। अन्वर्थमिति चेदकर्तरिकर्तृशब्दानुपपत्तिः। अन्वर्थमिति चेदकर्तरिकर्तृशब्दो नोपपद्यते करणं कारकं अधिकरणं कारकमिति। सिद्धं तु प्रतिकारकं क्रियाभेदात्पचादीनां करणाधिकरणयोः कर्तृभावः। सिद्धः करणाधिकरणयोः कर्तृभावः। कुतः। प्रतिकारकं क्रियाभेदात्। पचादीनां हि प्रतिकारकं क्रियाभिद्यते। किमिदं प्रतिकारकमिति। कारकं कारकं प्रति

=कारकोतीतिकारकमिति निर्वचनेकरोतीत्यस्मिन्क्रियापदे कर्तृत्वं कर्त्तृत्वं नः आत्मनाश्रयादीनां प्रसंगात् किं तु क्रियामात्राश्रयत्वं ... प्रतिकारकं॥ ... ॥ ... ॥

त्वेन क्रियैव शब्दात्प्रतीयत इति क्रियानिर्वर्त्तकस्य कारकसंज्ञाः पादानादिसंज्ञा च प्रवर्त्तते। अन्वर्थमिति चेदिति। करोतीति कारकमिति यथाश्रीयते तदास्वतंत्रस्यैव कर्तृसंज्ञावत्कारकसंज्ञापि प्राप्नोति न तु करणादीनां कर्तृपरतंत्राणां। कर्तृशब्द इति। कर्तृवाची कारकशब्द इत्यर्थः। सिद्धं त्विति। स्वव्यापारे सर्वेषां स्वातंत्र्यात्तदनुष्ठानद्वारेण प्रधानक्रियायामुपयोगात्कर्तृसन्निधावपि स्वव्यापारस्यानिवर्त्तनात्परतंत्र्यावस्थायामप्यनिवृत्तं कारकत्वमित्यर्थः॥ ॥ ॥ ॥

=समूहस्य क्रियार्थत्वात्तद्वाच्यसमूहरूपारोपः करणादिव्यापारेष्वर्थः। २=

संभवनक्रियामिति। यद्ग्रहणक्रियामित्यर्थः। धारणक्रियामिति। स्थिरत्वादाक्रियासमाप्तेस्तन्दुलानां धारणमित्यर्थः। एधाः पक्ष्यन्तीति। भविष्यन्निर्देशः कर्तृगतसंभा
वनापेक्षः। कर्त्रा हि संभावितक्रियाः नियुज्यन्ते। नियुक्ताश्च व्याप्रियन्ते न तु प्रागेव। न त्वत्र भविष्यन्निर्देशस्तन्त्रं। अनेकार्थत्वाद्धातूनां तादर्थ्याद्वा तद्रूपासंगात्करण

कोसौ प्रतिकारकं क्रियाभेदः पचादीनां। अधिश्रयणोदकासेचनतण्डुलावपनैधोपकर्षणक्रियाः प्रधानस्य कर्तुः पाकः। अधिश्रयणोदकासेच
नतण्डुलावपनैधोपकर्षणादिक्रियाः कुर्वन्नेव देवदत्तः पचतीत्युच्यते। तत्र तदा पचिर्वर्तते। एष प्रधानकर्तुः पाकः। एतत्प्रधानकर्तुः कर्तृत्वं
। द्रोणं पचत्याढकं पचतीति संभवनक्रियाधारणक्रिया चाधिकरणस्य पाकः। द्रोणं पचत्याढकं पचतीति संभवनक्रियां धारणक्रियां च कु
र्वती स्थाली पचतीत्युच्यते। तत्र तदा पचिर्वर्तते। एषोऽधिकरणस्य पाकः। एतदधिकरणस्य कर्तृत्वं। एधाः पक्ष्यन्त्यासाविक्लित्तेर्ज्वलिष्यन्तीति ज्व
लनक्रिया करणस्य पाकः। एधाः पक्ष्यन्त्यासाविक्लित्तेर्ज्वलिष्यन्तीति ज्वलनक्रियां कुर्वन्ति काष्ठानि पचन्तीत्युच्यन्ते। तत्र तदा पचिर्वर्तते। एष क
रणस्य पाकः। एतत्करणस्य कर्तृत्वं। उद्यमननिपातनानि कर्तुश्छिदिक्रिया। उद्यमननिपातनानि कुर्वन्नेव देवदत्तश्छिनत्तीत्युच्यते।
तत्र तदा छिदिर्वर्तते। एष प्रधानकर्तुश्छेदः। एतत्प्रधानकर्तुः कर्तृत्वं। यत्तन्नन्तरेण न तत्सरणोश्छेदनं। यत्तत्समाने उद्यमने निपातने
च परशुना छिद्यते न त्सरुणा न तत्सरशोश्छेदनं। अवयवं चेत्तरेद्वे विज्ञेये। इतरथा ह्यसित्सरुणयोश्छेदनेऽविशेषः स्यात्। यो हि मन्यते उ
द्यमननिपातनादेवैतद्भवति छिनत्तीति ह्यसित्सरुणयोश्छेदनेऽविशेषः स्यात्। यदसिना छिद्यते तत्त्सरुणापि तच्छिद्येत॥ ॥

रिव्यापारे पचेर्वृत्तिर्द्रष्टव्या। यत्तन्नन्तरेणेनेति। अन्वयव्यतिरेकाभ्यां करणस्य विशिष्टव्यापारावेशनिदर्शनाय दर्शयति॥ ॥श्री॥ ॥श्री॥

=नन्वेवमेधाःपचंतीतिवद्ग्राममजायातीत्यपिस्यादत आह ग्राममव्रत्यादिः अत्रांतराधगमः ग्रामेसंयोगाश्रयत्वाख्यम्‌॥२= =धूमज्योतिःसलिलमरुतांसन्निपातःक्वमेघइत्यभियुक्तोक्तेरितिभावः॥२= ननुग्रामाग्रामेसंयोगाश्रयत्वंनविवक्षितंकिंतुविभागाश्रयत्वंतद्ग्राममागच्छतीतिकस्मान्नेत्यत आह०

माॅ०कौ०प्र०
३०७

नत्थेति। नह्यपादानेयामेग्राम ऽमागच्छतीतिप्रयोगोस्ति। बलाहकादिति। निःसरणांगेविद्योतनेद्युतिर्वर्ततेऽत्र गमावश्यविवक्षितउद्यपादानत्वं। बलाहकइतिस्थितिसंगेद्योतने ऽत्रद्युतिर्वर्तते। बलाहकेस्थितावाज्योतीरूपाविद्युतविद्योततइत्यर्थः। बलाहकइति। विद्युतोबलाहकस्यचाभेदविवक्षायामयंप्रयोगः। पर्याप्तमिति। स्वव्यापारानुष्ठानसमर्थेनेप्रधानक्रियायामुपयोगाभावात्‌। यो मत्स्यागच्छतीत्यर्थोतरागमादपादानेव्यापारानवसायात्प्रयोगाभावः। एवंब्राह्मणायददातीत्यर्थेब्राह्मणोददातीतिप्रयोगाभावः। शौ

[blacked out] अपादानादीनांत्वप्रसिद्धिः। अपादानादीनांकर्तृत्वस्याप्रसिद्धिः यथाहिमवताकरणादीनांकर्तृत्वंनिदर्शितंनतथाऽपादानादीनांनिदर्श्यते। नवास्वतंत्रपरतंत्रत्वाज्ञयोः पर्यायेणवचनंवचनाश्रयाचसंज्ञा। नवाएषदोषः। किंकारणं। स्वतंत्रपरतंत्रत्वात्‌। सर्वत्रैवात्रस्वातंत्र्यंपारतंत्र्यंचविवक्षितं। तयोः पर्यायेणवचनं। तयोःस्वातंत्र्यपारतंत्र्ययोः पर्यायेणवचनंभविष्यति। वचनाश्रयाचसंज्ञाभविष्यति। नद्यथा। बलाहकाद्विद्योततेविद्युत्‌। बलाहकेविद्योतते। बलाहकोविद्योततइति। किंतर्ह्युच्यतेऽपादानादीनांत्वप्रसिद्धिरिति। एवंतर्हिनब्रूमोऽपादानादीनांकर्तृत्वस्याप्रसिद्धिरिति। पर्याप्तंकरणाधिकरणयोः कर्तृत्वंनिदर्शितमपादानादीनांकर्तृत्वनिदर्शनाय। पर्याप्तोह्येकःपुलाकःस्थाल्यानिदर्शनाय। किंतर्हिसंज्ञायाअप्रसिद्धिः। यावतासर्वत्रैवात्रस्वातंत्र्यंविद्यतेपारतंत्र्यंच। तत्रपरत्वात्कर्तृसंज्ञैवप्राप्नोति॥ ॥ ॥ ॥

दृशक्लिस्वामायाद्यापादानसंप्रदानव्यापारेधातुर्नवर्तते। वस्तुतस्त्वपादानस्यावधिभावेनावस्थानंव्यापारोस्ति। संप्रदानस्याप्यनुमननादिलक्षणः प्रतीयमानोपिव्यापारःकारकव्यपदेशनिबंधनं। यथाप्रविशपिंडीमिति। परत्वादिति। अपादानादीनामन्यत्रावकाशःयदास्वातंत्र्यंनास्ति। कर्तृसंज्ञायाअवकाशःदेवदत्तःपचतीति। ननुसर्वत्रस्वातंत्र्यस्यसद्भावान्नास्तिकर्तृविमुक्तोऽपादानादीनामन्यत्रावकाशः। सत्यमेतत्‌। पूर्वपक्षस्त्वयं। तत्रचन्यायाभासेनैवमाक्षमन्यथापूर्वपक्षएवनस्यात्‌॥ ॥ ॥

राम०
३०७

=कर्मणि तं उद्भूतत्वं प्रधानीभूतधात्वर्थानाश्रयत्वं स्वातन्त्र्यं विवक्षितं तद्विपरीतं पारतन्त्र्यमागतमुद्भूतत्वं। १= तदुपयोगिनां राजस्वातन्त्र्यादुपयोगि। १= स्वकार्यं स्वातन्त्र्यलक्षणं। २= भाष्ये पतत्यभाजनमित्यादिः पाकजनकधारणादिक्रियायां कर्तृत्वेऽपि तस्याः तज्जनकप्रक्षालना

अत्रापीति॥ उद्भूतस्वातन्त्र्यविवक्षायां कर्तृसंज्ञा यथा स्थाली पचतीति। उद्भूतपारतन्त्र्यविवक्षायां तु न्यग्भावात्सदपि स्वातन्त्र्यं स्वकार्ये न प्रयुङ्क्ते। यथा राजसन्निधौ तदुपयोगिस्वं कार्यममात्या नारभन्ते। न वा एवमर्थमिति। प्रक्षालनाद्यभावेऽपि पाकनिष्पादकत्वे षां तन्त्रानङ्गत्वात्। किं पुनः प्रधानमिति। सामग्रीतः क्रियोत्पादात्सर्वेषां तत्र सामान्या

अत्रापि न वा स्वतन्त्रपरतन्त्रत्वात्तयोः पर्यायेण वचनं वचनाश्रया च संज्ञा इत्येव। यथा पुनरिदं भवता स्थाल्याः कर्तृत्वं निदर्शितं संभवनक्रियां धारणक्रियां च कुर्वती स्थाली स्वतन्त्रेति क्वेदानीं परतन्त्रा स्यात्। यत्तत्प्रक्षालनं परिवर्तनं वा। नैवा एवमर्थं स्थाल्युपादीयते प्रक्षालनं परिवर्तनं च करिष्यामीति। किं तर्हि संभवनक्रियां धारणक्रियां च करिष्यतीति तत्र चासौ स्वतन्त्रा। एवं तर्हि स्थालीस्थे यत्ने क्रियमाणे स्थाली स्वतन्त्रा। कर्तृस्थे यत्ने क्रियमाणे परतन्त्रा। ननु च भोः कर्तृस्थेऽपि यत्ने क्रियमाणे स्थाली संभवनक्रियां धारणक्रियां च करोति तत्रासौ स्वतन्त्रा क्वेदानीं परतन्त्रा स्यात्। एवं तर्हि प्रधानेन समवाये स्थाली परतन्त्रा व्यवाये स्वतन्त्रा। तद्यथा। अमात्यानां राज्ञा सह समवाये पारतन्त्र्यं व्यवाये स्वातन्त्र्यम्। किं पुनः प्रधानं। कर्त्ता। कथं पुनर्ज्ञायते कर्त्ता प्रधानमिति। यत्सर्वेषु साधनेषु सन्निहितेषु कर्त्ता प्रवर्त्तयिता भवति। ननु च भोः प्रधानेनापि वै समवाये स्थाल्या अन्येनार्थः। अधिकरणं कारकमिति। न हि कारकमित्यनेनाधिकारेणत्वमुक्तं अधिकरणमितिवा कारकत्वं॥ ॥

त्वकस्य चित्प्राधान्यमिति भावः। कर्त्ता प्रवर्त्तयितेति। तदधीनप्रवृत्तिनिवृत्तित्वात्करणादीनां तस्य च प्रागन्यतः शक्तिलाभात्स्वतिनिघ्यदर्शनात्करणाद्यभावेऽप्यास्ते शेते इत्यादौ केवलस्य कर्तुर्दर्शनात्कर्त्रा रहितानां करणादीनामदर्शनात्प्राधान्यं कर्तुरित्यर्थः॥ ॥श्री॥ ॥ ॥

=भाष्ये अनेनेति कारकव्यपदेशेनेत्यर्थः। अयं व्यवहार इष्यते तत्रोद्भूतस्वातन्त्र्याभावात् यथा कर्तृ शब्दप्रवृत्तिप्रधानदर्शकः कारकशब्दस्याप्रवृत्तिः स्यादिति भावः। ३ =करणादीनां हि सोमादीनां स्वीकृतत्वादेः प्रतिनिधिर्दृष्टो न कर्तुरिति भावः। २= भाष्ये नन्वेवं व्यवहारः पुनरु

उभौ चान्योन्यविशेषकाविति। तत्तच्चस्वातंत्र्यपारतंत्र्ययोर्युगपद्विरोधाद्विशेषणविशेष्यत्वेन प्रकल्प्येते इत्यर्थः। एवं तर्हीति। सर्वेषां कारकाणां साध्यत्वेन साधारणी क्रिया। तत्तच्च सर्वेषां
तस्यां कर्तृत्वं। अवान्तरव्यापारविवक्षायां तु करणादिरूपत्वं। यथा मातापि चोरप्तलोत्पादने कर्तृत्वं भेदविवक्षायां तु ऽयमस्मान्नियमस्माज्जनयतीत्यधिकरणत्वमपादानत्वं च व्यवति
ष्ठते। कर्तृसंज्ञा तु करणत्वाद्यवस्थायां न भवति। स्वतंत्रः कर्तेत्यत्र कारकत्वादेव स्वातंत्र्ये लब्धे पुनः स्वतंत्रश्रुतिर्नियमार्था। तेन स्वतः स्वातंत्र्यमेव यस्य कर्तृसंज्ञा तस्य न तु पारतंत्र्यस
हितस्वातंत्र्ययुक्तस्य। कारकसंज्ञा तु वस्तुस्थित्या विद्यमानमुद्भूतत्वेनाविवक्षितमपि स्वातंत्र्यमाश्रित्य करणादीनां विधानसामर्थ्यात्प्रवर्त्तते। यत्र च शक्तीनां निमित्तनिमि
त्तिभावेन युगपद्विवक्षा तत्र संज्ञानां विप्रतिषेध उच्यते। यथा धनुषा विध्यतीति विनापायविवक्षया धनुषः साधकतमत्वाभावात् संज्ञाद्वयप्रसंगे परत्वात्करणसंज्ञा। अस्मिंश्च

उभौ चान्योन्यविशेषकौ भवतः। कथं। एकद्रव्यसमवायित्वात्। तद्यथा। गार्ग्यो देवदत्त इति। न हि गार्ग्य इत्यनेन देवदत्तत्वमुक्तं देवदत्त इत्यनेन वा गार्ग्य
त्वं। उभौ चान्योन्यविशेषकौ भवतः एकद्रव्यसमवायित्वात्। एवं तर्हि सामान्यभूता क्रिया वर्त्तते तस्या निर्वर्त्तकं कारकं। अथवा यावद्ब्रूयात्क्रियायामिति
तावत्कारक इति। एवं च कृत्वा निर्देश उपपन्नो भवति कारके इति। इतरथा हि कारकेष्विति ब्रूयात्॥ ॥ ॥

नन्वीतिसत्येव साधकतमत्वे स्वातंत्र्यस्याविवक्षितत्वात् परत्वात्कर्तृसंज्ञा तदा तु तैक्ष्ण्यादीनां करणत्वं। तैक्ष्ण्यादीनां तु कर्तृत्वविवक्षायामात्मनः करणत्वं। तैक्ष्ण्यमेव हि विवक्षा
वशाद्द्विधा व्यवतिष्ठते। कर्तृत्वेन करणत्वेन च। वस्तुस्थित्या त्वेक एवार्थात्मेति कर्तृत्वं करणत्वस्य बाधकमुच्यते। अथवेति। क्रियात्र सूत्रे कारकशब्देनोच्यते। साहि कर्त्रादीन्विशिष्टव्यप
देशयुक्तान्करोति। विषयत्वेन चायमधिकारः। क्रियायां विषये यद्ध्रुवमित्यादि वस्तु संपद्यते। एवं च कृत्वेति। निर्द्धारणसप्तम्यां हि कारके षष्ठीति वाच्यं। निर्द्धारणस्यानेकाश्रयत्वात्।
कारकादत्तश्रुतयोरित्यादौ तु कारकशब्दस्य स्वरितत्वादधिकारोपात्तानामपादानादीनां ग्रहणं॥ ॥श्री॥ ॥श्री॥ ॥

=प्रेरकस्य गिरा वा दिग्लक्षणाय चंक्रमणमात्रमपेक्षितमिति तस्यैव प्राधान्यं ४= शब्देनेति शब्दसंस्कारे तस्यैव प्रसाक्षस्याप्रधानीकृत्य चिततात् ४= तादर्थ्यस्येति शिष्यसंबंधि चंक्रमणस्य तदीयाध्ययनप्रयोजकत्वाभावेपि गुरुसंबंधि गोलक्षणप्रयोजकशिष्यचंक्रमणस्य गुरुव्यापारस्य प्रयोजकत्वात्प्राधान्यं ४=

ध्रुवमपाये॥ ॥ध्रुवग्रहणमिति। अध्रुवस्य परत्वात्संज्ञान्तरं प्रवर्तिष्यते इति प्रश्नः। शकटेनेति। अपाये शकटस्यापि साधनत्वादपादानसंज्ञा प्राप्नोति। करणसंज्ञेति। यथा धनुषा विध्यतीति क्रियमाणेपि ध्रुवग्रहणे परत्वात्करणसंज्ञा भवति एवमक्रियमाणेपि शकटस्य भविष्यतीत्यर्थः। इदं तर्हीति। ननु कंसपात्र्यां साधनमेवागमनेन न भवति भुजिक्रियायां तु साधनं ध्रुवाच्च तत्र परत्वादधिकरणसंज्ञेति कडारसूत्रे उक्तं। एवं तर्हि वस्तुस्थित्या आगमनं प्रधानं तदंगं तु भोजनं। शब्दात्तु विपरीतो गुणप्रधानभावः प्रतीयते। तदुक्तं हरिणा। चंक्रम्यमाणोधीष्वात्र जपं स्वक्रमणं कुर्वंस्तादर्थ्यस्याविशेषेपि शब्दाद्भेदः प्रतीयत इति। तत्र कंसपात्र्यां भुजेः साधनत्वान्नद्वारेणागमनस्यापि भवत्येव साधनं। अत्रापीति। शब्देन भोजनस्यैव प्राधान्यं प्रतीयते

ध्रुवमपायेऽपादानं॥ ध्रुवग्रहणं किमर्थं। ग्रामादागच्छति शकटेन। नैतदस्ति। करणसंज्ञात्र बाधिका भविष्यति। इदं तर्हि ग्रामादागच्छन् कंसपात्र्यां पाणिनौदनं भुंक्ते इति। अत्राप्यधिकरणसंज्ञा बाधिका भविष्यति। इदं तर्हि वृक्षस्य पर्णं पतति कुड्यस्य पिंडः पततीति। जुगुप्साविरामप्रमादार्थानामुपसंख्यानं। जुगुप्साविरामप्रमादार्थानामुपसंख्यानं कर्तव्यं। जुगुप्सा। अधर्माज्जुगुप्सते। अधर्माद्बीभत्सते। अधर्माद्विरमति। अधर्मान्निवर्तते। प्रमादः। धर्मात्प्रमाद्यति। धर्मान्मुह्यति। इदं चोपसंख्यानं कर्तव्यं। सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इति। तत्तर्हीदं बहु वक्तव्यं॥ ॥

इति तत्प्रयुक्तयैव संज्ञया भाव्यं। यथा भोक्तुं ग्राममभिनिविशत इति प्रधानक्रियापेक्षायां ग्रामस्य कर्मसंज्ञा भवति न तु भुज्यपेक्षयाऽधिकरणसंज्ञा। वृक्षस्येति। अपरस्यात्रापाय इति भावः। न चात्र कारकत्वाभावात्संज्ञा न भविष्यति अपायाभावाच्च। एतेन वृक्षावधावपायो भवतीति पूर्वसूत्रे उक्तत्वात्। तत्र केचिदाहुः। सुज्ञानत्वात्पूर्वसूत्रे उक्तत्वाच्च भाष्यकारेणायमर्थो नोक्तः। अन्ये त्वाहुः। सतीह ध्रुवग्रहणे विशिष्टोपायो लभ्यते अस्ति तु तस्मिन्पातमात्रस्य लोके पायत्वेन प्रसिद्धत्वात्कारकाधिकारानपेक्षया च प्रत्युदाहरणमुपन्यस्तं। जुगुप्सेति। संश्लेषपूर्वको विश्लेषोऽपायः। स चात्र नास्ति। बुद्धिकल्पितस्तु योग इति भावः। कारकशेषत्वाच्चात्र षष्ठी प्राप्नोति। प्रधानटस्य प्रणोतीति। सांकाश्यकेभ्य इति। पंचमी विभक्ते इत्यनपेक्ष्यवचनं। अत्र य- तेषु निर्धारणमिति षष्ठीसप्तम्योः प्राप्नुतः॥ ॥ ॥

=वृक्षस्येत्यस्य पर्णोऽन्वयाभिप्रायेणैवमुक्तं। पततीत्यनेनान्वयोऽवधित्वं च षष्ठ्यर्थ इत्यभिप्रायस्तु भाष्यकारस्य। तदस्यकारकाधिकारानपेक्षया चेति ३=

=बुद्धौ परिकल्प्य प्राप्त्यैव निवर्त्तत इति प्राप्तिपूर्वकत्वान्निवृत्तेर्विश्लेषोऽत्र गम्यते ——— इति भावः। २=

नवक्तव्यमिति। साधकतमं करणमिति तमब्ग्रहणेन सूरिते नाधिकार इत्यधिकः कारोऽधिकार इत्यस्यार्थस्याश्रयणेन च बुद्धिव्यवस्थितापायाश्रयाऽपादानसंज्ञा प्रवर्त्तते। अधर्माज्जुगुप्सत इति। जुगुप्सादयो निवृत्त्यंगे जुगुप्सादौ वर्त्तन्ते। संभिन्नबुद्धिरिति। धर्माधर्मयोरेकाकारबुद्धिर्नास्तिक इत्यर्थः। यस्तैरिति। तैः सांकाश्यकैः पाटलिपुत्रकाणां समगुणत्वाद्यैः साम्यं गतवान् स प्रकर्षाश्रयेण पुनः एष कृतत्वात् कथं प्रयुंक्ते इत्यर्थः। त्रिविधं चेदमपादानं। निर्दिष्टविषयमुपात्तविषयमपेक्षितक्रियं चेति। तत्र निर्दिष्टविषयं। यत्र धातुनापायलक्षणो विषयो निर्दिष्टः यथा ग्रामादागच्छतीति। उपात्तविषयं। यत्र धातुर्धात्वंतरार्थांगं स्वार्थमाह। यथा बला

नवक्तव्यं। इह तावदधर्माज्जुगुप्सते अधर्माद्बीभत्सत इति। य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति दुःखोऽधर्मो नानेन कृत्यमस्तीति। स बुद्ध्या संप्राप्य निवर्त्तते। तत्र ध्रुवमपायेऽपादानमित्येव सिद्धं। इह अधर्माद्विरमति अधर्मान्निवर्त्तत इति। धर्मात्प्रमाद्यति धर्मान्मुह्यतीति। इह य एष मनुष्यः संभिन्नबुद्धिर्भवति स पश्यति नेदं किंचिद्धर्मो नाम नैनं करिष्यामीति स बुद्ध्या संप्राप्य निवर्त्तते। तत्र ध्रुवमपायेऽपादानमित्येव सिद्धं। इह च सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इति यस्तैः साम्यं गतवान् भवति स एतत्प्रयुंक्ते। गतियुक्तेष्वपादानसंज्ञा नोपपद्यतेऽध्रुवत्वात्। गतियुक्तेष्वपादानसंज्ञा नोपपद्यते। रथात्प्रवीतात्पतितः अश्वात्त्रस्तात्पतितः सार्थाद्गच्छतो हीन इति। किं कारणं। अध्रुवत्वात्॥ ॥ ॥

=पूर्वव्याख्येयमिति=
=शेषोऽर्थेयन २=

हकाद्विद्योतत इति। निःसरणांगे द्योतने द्युतिर्वर्त्तते। यथा वा कुसूलात्पचतीत्यादावादानांगे पाके पचिर्वर्त्तते। अपेक्षितक्रियं। यत्र क्रियावाचि पदं न श्रूयते केवलं क्रिया प्रतीयते। यथा सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इति। गतियुक्तेष्विति। अचलं ध्रुवमेकरूपं चेति परिस्पंदे ध्रुवता नास्तीति मन्यते। अश्वात्त्रस्तादिति। त्रासपूर्वके परिस्पंदेऽनेकार्थत्वाद्धातूनां त्रसिर्वर्त्तते। त्रस्तस्याश्वस्य पातस्य निमित्तमिति पूर्वमश्वस्य चलतैव संबंधः पश्चात्पततीत्यनेनेति ध्रुवताश्वस्य नास्ति॥ ॥

=बुद्धिमारोहतीति विशिष्टा क्रियामात्रमेतत्। २=

=अपायेमर्यादावधिरिति॰ अपायेसाध्येयत्स्रुतधातुःपातगमनावधिमित्यर्थः। उक्तस्त्र्यपायानावेशादित्स्यापायेसत्स्नावेशादित्यर्थः॥ १=सामयिकीति॰ नकेवलाप्रकृतिःप्रकृतिःप्रयोक्तव्येतिसमयेनकृतेत्यर्थः॥ २=आद्यपक्षस्येवयुक्तत्वबोधनायपुनःसंक्रान्यत्सम्भवेति॰ ४=विशेषणस्य

नवेति। अयमर्थः। ध्रुवमेकरूपमुच्यते। तच्च ध्रौव्यमपायविषयमाश्रीयते नत्वनवच्छिन्नं। ततोऽपाये यदनाविष्टंतदपायेऽध्रुवमुच्यते। देवदत्तकर्तृके चपाते च तस्यापायस्याप्यपायाना वेशात् अध्रुवत्वं। देवदत्तस्यैवापायावेशादध्रुवत्वं। अथवा अश्वस्यत्रस्तताद्यदध्रौव्यंतत्प्रथममविवक्षितमित्यर्थः। तथाहि। कारकत्वस्य कृत्क्रियासमन्वयः। सच श्रुतिमापितउच्यते। पञ्चम्या विशेषणेन वाक्यीयः संबंधः। तत्र पञ्चम्यान्वायतीति तद्रतिसंबंधेनास्य अश्वस्याध्रुवत्वं। पञ्चम्यात्रस्तत्वेन संबंधे सत्यपि अध्रौव्यं तरंगासंज्ञाननिवर्त्तते। विशेषणस्यासत्यप्यपादानत्वे सा मध्यि की विभक्तिः। साच विशेषणानुरोधेन प्रवर्त्तते नतु नियमेन। अथवा त्रस्तस्याप्यपादानत्वं। सत्यपि त्रासापेक्षेऽध्रुवत्वे पातंप्रति ध्रुवत्वात्। यथोक्तं प्राक्। आश्रुगामित्वमिति।

=त्रस्तपदार्थस्य॰१=

नवा ध्रौव्यस्याविवक्षितत्वात्। नवा एषदोषः। किं कारणं। अध्रौव्यस्याविवक्षितत्वात्। नात्र ध्रौव्यं विवक्षितं। किंतर्हि ध्रौव्यं। इहतावद् अश्वात्त्रस्तात्पतति तदितियत्तदश्वेऽश्वत्वमाश्रुगामित्वं तद्ध्रुवं तच्च विवक्षितं। रथात्प्रवीतात्पतति तदिति। यद्रथे रथत्वं रमंतेऽस्मिन् रथइति तद्ध्रुवं तच्च विवक्षितं। सार्थो द्धीनो हीन इति। यत्तत्सार्थे सार्थत्वं सहार्थीभावः तद्ध्रुवं तच्च विवक्षितं। यद्यपि तावदत्रैतच्छक्यते वक्तुं। ये त्वेते त्वंतगतियुक्तास्तत्र कथं। धावतः पततः त्वरमाणात्पततीति। अत्रापि नवाऽध्रौव्यस्याविवक्षितत्वादित्येव कथं पुनः सतो नाम विवक्षा स्यात्। सतोप्यविवक्षा भवति।तद्य

१या॥०॥

अयमर्थः। खुसत्ति मात्रमाश्रुगामित्वमितितदपेक्षया ध्रौव्यं नाशंकनीयं। जातिरेव शब्दप्रवृत्तिनिमित्तमितिनास्यत्र ध्रौव्यं। आश्रुगामित्वशब्देनैकार्थसमवायात्साह चर्याद् अश्वत्वमेवोच्यते। यद्यपीति। यत्र क्रियानप्रवृत्तिनिमित्तं किंतु खुसत्तिमात्रं निमित्तं तत्रैतदुक्तुंयुज्यते। यत्र तु शब्दप्रवृत्तिनिमित्तं क्रिया तत्र कथं नाध्रौव्यमितिप्र श्नः। अत्रापीति। सरणक्रियोपलक्षितं द्रव्यमात्रमपादानत्वेन विवक्षितं। तच्च देवदत्तकर्तृके पाते दृश्यं लन्यायाद्ध्रुवमेवेत्यर्थः। कथं पुनरिति। शब्दोपात्तमपि सरणं द्रव्योपलक्षणार्थत्वाद् ध्रौव्यनिमित्तं न भवतीति कुत एतदिति प्रश्नः॥ ॥ ॥श्री॥ ॥ ॥

=यदाश्रुगामित्वंतदश्वत्वमेव॰ रूढिर्योगमपहरतीतिन्यायात् आश्रुगामित्वस्यपृथगज्ञानात्॰ साचेयंनिरूढलक्षणाकुशलादिपदेष्विवेसाह॰ एकार्थसमवायादित्यादि॰ २=सरणक्रियोपलक्षणमिति॰ अनेनप्रवृत्तिनिमित्तस्याप्यविवक्षासूचिता॰ १=

अलोमिकेति॥ अत्र त्वात्स्तोमान्तत्वात्कार्योकरणादेवमुच्यते। असतश्चेति। निदर्शनार्थमिदमुच्यते। यथा असतो विवक्षा भवति एवं सतोऽप्यविवक्षेत्यर्थः॥ समुद्रः कुंडिकेति। कुंडिकायां पानीयबाहुल्यात्समुद्रत्वं विवक्षितं। समुद्रस्य वा स्वल्पतरत्वात्कुंडिकात्वं। विंध्यो वर्द्धितकमिति। पूर्ववदत्रान्तररूपादेरेण व्याख्येयं। मेषो मेषादपसर्पतीत्यत्रैव कस्य मेषस्य कर्तृत्वविवक्षा अपरस्यापादानविवक्षा। यदा तु मेषावपसरत इति प्रयोगस्तदा ध्रुवं तरमपेक्षणीयं॥ ॥भीत्रार्थानां॥ ॥कथमिति। भयमाकु

अलोमिका एडका॥ अनुदरा कन्येति। असतश्च विवक्षा भवति। समुद्रः कुंडिका विंध्यो वर्द्धितकमिति॥ ॥भीत्रार्थानां भयहेतुः॥ ॥

अयं योगः शक्योऽवक्तुं। कथं वृकेभ्यो बिभेति दस्युभ्यो बिभेति चोरेभ्यस्त्रायते दस्युभ्यस्त्रायत इति। इह तावद्वृकेभ्यो बिभेति दस्युभ्यो बिभेतीति य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति यदि मां वृकाः पश्यन्ति ध्रुवो मे मृत्युरिति स बुध्या संप्राप्य निवर्त्तते तत्र ध्रुवमपायेऽपादानमित्येव सिद्धं। इह चोरेभ्यस्त्रायते दस्युभ्यस्त्रायत इति य एष मनुष्यः प्रेक्षापूर्वकारी सुहृद्भवति स पश्यति यदीमं चोराः पश्यन्ति ध्रुवमस्य वधबंधनादिपरिक्लेशा इति स बुध्या संप्राप्य निवर्त्तयति तत्र ध्रुवमपायेऽपादानमित्येव सिद्धं॥ ०॥

=चोरमध्यगतस्य चोराणामधिकनिवर्तितं बुद्धेर्वाधितत्वात् चोरेभिः २=

त्रीमा वः त्राणमनर्थप्रतिघात इति तत्र च नास्ति मुख्योऽपाय इति प्रश्नः। प्रेक्षापूर्वकारीति। बुद्धिमवस्थितोऽत्रापायोऽस्तीति भावः। तत्र निवृत्तौ संगे भये बिभेत्यादयो वर्त्तन्त इति उपात्तविषयमे [illegible] नं। चोरेभ्यस्त्रायत इत्यनर्थपरिहाराय निवर्त्तयतीत्यर्थः। चोरमध्यगतस्य पित्रा लोचोरसंपर्के फलस्य वधबंधनादेः परहरणादेर्निवृत्ते नात्र नेभ्यो निवर्त्तयतीत्युच्यते। वारणार्थानामीप्सित इत्यनेनात्रापादानसंज्ञा न प्राप्नोति। चोराणामनीप्सितत्वात्। स्वत्राः रंभपक्षे तु कारकशेषत्वात् षष्ठी मा प्राप्यायामिदं वचनं॥ ॥

=फलप्राप्ति आदिविषयत्वाभावादिति भावः १=

=षष्ठीत्यस्य पक्षे अप्रमत्त निवृ= =त्तिविषये नैतेरर्थः स्वार्थः १=

=स्यात्प्रतीतेः २=

=अनीप्सितत्वादिति तदर्थं फलानाश्रयत्वात् मध्ये भोगं वारयतीत्यादौ यथा संयोगानुकूलव्यापाराभावानुकूलव्यापारस्य वारयत्यर्थत्वं तदर्थः संयोगरूपफलवधवानामपादानसंज्ञा भवति नैवं प्रकृते अनर्थपरिहारजनकनिर्वर्तिजनकव्यापारार्थ

=अभिभवइति॰ स्वीकरणेइत्यर्थः ॥१॥ =असोढग्रहणादिति॰ शत्रून्पराजयतइत्यत्र शत्रूणां सोढुं शक्यत्वेन तथात्वाभावादितिभावः ॥१॥ =नतितिं॰ अभीष्टेभी प्सितं रूपमितिकोशात्लोपसर्गस्येवरूढिशब्दत्वमितिभावः ॥४=

पराजे॥ ॥ परा जिः क्वचिद्भिभवे वर्त्तते। यथा शत्रून्पराजयतइति। इह त्वसोढग्रहणान्नूनीमावस्तनिर्गृह्यते। अध्ययनात्पराजयते ह्रसति। अध्येतुं ग्लायतीत्यर्थः। अत्र चार्थे ऽकर्मकत्वात्षष्ठ्याप्राप्तायां वचनं। पूर्ववदस्यापि प्रत्याख्यानेनिवृत्तंगे पराजये पराजेर्वर्त्तेनात्॥ ॥ वारणार्थानां॥ ॥ किमुदाहरणमिति। अव्याप्तिं मन्यमानस्य प्रश्नः। भवेद्यस्येति। यस्मात्मीयामाषास्तस्य तईप्सिताइत्यर्थः। अभिप्रेतपर्यायमीप्सितशब्दं मन्यते। यस्य त्विति। यस्मात्मीयागावः परकीयास्तुमाषास्तस्य नत ईप्सिताः। तस्यापीति। ईप्सितशब्दः क्रियाशब्दत्वाश्रीयतेन तु रूढिशब्दः। तत्र वारणक्रियया परकीया अपिमाषावारयितुमिष्टा भवन्तिमानशान्ते तेइस्येतेभ्यो

पराजेरसोढः ॥ अयमपियोगः शक्योऽवक्तुं। कथं अध्ययनात्पराजयतेइति। यएष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति दुःखमध्ययनं दुर्धरं च गुरवश्च दुरुपचारा इति स बुद्ध्या संप्राप्य निवर्त्तते तत्र ध्रुवमपायेऽपादानमित्येव सिद्धं॥ ॥ वारणार्थानामीप्सितः ॥ किमुदाहरणं। माषेभ्यो गा वारयति। भवेद्यस्य माषानगावस्तस्य माषा ईप्सिताः स्युः। यस्य तु खलु गावो न माषाः कथं तस्य माषा ईप्सिताः स्युः। तस्यापि माषा एवेप्सिताः। कुतः अनीप्सितः यदेभ्यो गा वारयति। इह कूपादन्धं वारयतीति कूपेऽपादानसंज्ञा न प्राप्नोति। न हि तस्य कूप ईप्सितः। कस्तर्हि अन्धः। तस्यापि कूप एवेप्सितः। पश्यस्य यमन्धः कूपमामापदिति। अथवा यथैवास्यान्यत्रापश्यत ईप्सा एवं कूपेऽपि॥ ॥

सो गा वारयति। माषा एवेति। एवकारोभिन्नक्रमः। ईप्सिता एवेत्यर्थः। कूपादिति। अन्धसंबन्धे कूपस्य न विनाशः नापि राजमयमिति प्रश्नः। कस्तर्हीत्यर्थ इति। तत्प्रसनुकंपायाः सद्भावात्तस्येप्सितत्वं मन्यते। तस्यापीति। वारणक्रियया आप्तुमिष्ट [illegible] इत्यर्थः। अथवेति। ईप्सितइत्यनेन कर्मणा के नेमात्रस्याक्षेपान्निवार्येमाणस्यांधस्य गमनादिक्रियया कूपः आप्तुमिष्टो भवतीति प्रवर्त्तते अपादानसंज्ञा। अंधस्य च प्रवृत्तस्यानुमेये स्यात्। तदाह। अन्यत्रापश्यत इति। अंधस्येत्यर्थः।

॥ सद्यपश्यन्न पिगंतव्यं जिगमिषति। अन्यथा न कचित्तस्य प्रवृत्तिः स्यात्॥ ॥ ॥

=नन्वेवं माषा एवेति माष्याज्ञवामीप्सितत्वाभावोन्मतेतत्तु न रामीप्सिततमत्वाभावात्कर्मत्वाभावे द्वितीयान स्यादत आह [illegible] न कर्मत्वमसेति॰ फलजनक

इदानीमतिप्रसंगमुद्भावयति। इहाग्नेरिति। कर्मसंज्ञा चेति। परत्वादिति भावः। कर्मसंज्ञाया अत्रावकाशो वारणार्थेभ्योऽन्ये धातवः। अपादानसंज्ञाया अप्रकर्षे रहितमीप्सितं। ईप्सित[illegible]तमस्यत्वभयप्रसंगे परत्वात्कर्मसंज्ञा। अन्याय्यपीति। कारकाधिकारे प्रकर्षो न विवक्ष्यते इत्यतंत्रंतमनिर्दिष्टं मन्यते। कर्मणो यदीप्सितमिति। तत्र कर्मसंज्ञानिमित्तमेवापादानसंज्ञाया इति माणवके प्रवर्त्तते। ततस्तस्येप्सितस्याग्नेरपादानसंज्ञेत्यर्थः। ईप्सितेप्सितमिति। वारयितुर्यदीप्सितं कर्म तस्य यदीप्सितमित्यर्थः। शेषषष्ठ्या चात्र समासः। अन्यथा

इहाग्नेर्माणवकं वारयतीति माणवकेऽपादानसंज्ञा प्राप्नोति। कर्मसंज्ञा च बाधिका भविष्यति। अन्याय्यापि तर्हि बाधिका स्यात्। तस्माद्वक्तव्यं कर्मणो यदीप्सितमिति। ईप्सितेप्सितमिति वा। वारणार्थेषु कर्मग्रहणमनर्थकं कर्तुरीप्सिततमं कर्मेति वचनात्। वारणार्थेषु कर्मग्रहणमनर्थकं। किं कारणं। कर्तुरीप्सिततमं कर्मेति वचनात्। कर्तुरीप्सिततमं कर्मेत्येव सिद्धं। अयमपि योगः शक्योऽवक्तुं। कथं माषेभ्यो गा वारयतीति। पश्यत्ययं यदि मा गावस्तत्र गच्छन्तीति ध्रुवः सस्यविनाशः सस्यविनाशेऽधर्मश्चैव राजभयं च। स बुद्ध्या संप्राप्य निवर्तयति तत्र ध्रुवमपायेऽपादानमित्येव सिद्धं॥ ॥

अन्तर्द्धौ येनादर्शनमिच्छति॥ ॥अयमपि योगः शक्योऽवक्तुं। कथं उपाध्यायादन्तर्द्धत्त इति। पश्यत्ययं यदि मामुपाध्यायः पश्यति ध्रुवं मे प्रेषणमुपालम्भो वेति स बुद्ध्या संप्राप्य निवर्त्तते तत्र ध्रुवमपायेऽपादानमित्येव सिद्धं॥ ॥ ॥

क्तेन च पूजायामिति निषेधः स्यात्। कर्तुरिति। प्रकर्षप्रत्ययोपादानसामर्थ्यात्कर्मसंज्ञायां प्रकर्षो विवक्ष्यत एव। तत्र द्वयोः संज्ञयोः सावकाशयोः परत्वादीप्सिततमस्य कर्मसंज्ञा॥ ॥अन्तर्द्धौ येनादर्शनमिच्छति॥ ॥अन्तर्द्धत्त इति। तिरोभवतीत्यर्थः॥ ॥श्री॥ ॥७॥ ॥०॥

आख्यातोपयोगे॥ उपयोगो व्यापारः स चाविशिष्टो नटोपाध्याययोरिति मत्वा पृच्छति। उपयोग इति किमर्थमिति। आरंभकारं गंगच्छतीति। रंगं सामाजिकस्थानं। आरंभकायत्वेन प्रवृत्तिं
गोगच्छतीत्यर्थः। प्रकर्षगतिरिति। व्यापारमात्रे लब्धे उपयोगग्रहणं विशिष्टव्यापारपरिग्रहार्थं ॥ तेन ग्रंथार्थधारणार्थं यद्ग्रहणं स उपयोगः। अथ वेति। उपयोगशब्दस्यैवायमर्थः नि

आख्यातोपयोगे॥ ॥उपयोग इति किमर्थं। नटस्य शृणोति ग्रंथिकस्य शृणोति। उपयोग इत्युच्यमानेऽत्र माभूत्। एषोऽपि ह्युपयोगः। आप्तश्चोपयोगः।
यदारंभकारं गंगच्छति नटस्य श्रोष्यामः ग्रंथिकस्य श्रोष्याम इति। एवं तर्ह्युपयोग इत्युच्यते सर्वश्चोपयोगः। तत्र प्रकर्षगतिर्विज्ञास्यते साधीयो य उपयोग इति
। कश्च साधीयः। योग्रंथार्थयोः। अथवा उपयोगः को भवितुमर्हति यो नियमपूर्वकः। तद्यथा। उपयुक्ता माणवका इत्युच्यते य एते नियमपूर्वकमधीतवंतो
भवंति। किं पुनराख्यातानुपयोगे कारकमाहोस्विदकारकं। कश्चात्र विशेषः। आख्यातानुपयोगे कारकमिति चेदकथितत्वात्कर्मसंज्ञाप्रसंगः। आख्या
नुपयोगे कारकमिति चेदकथितत्वात्कर्मसंज्ञा प्राप्नोति। अस्तु तर्ह्यकारकं। अकारकमिति चेदुपयोगवचनानर्थक्यं। यद्यकारकं। उपयोगवचनमनर्थ
कं। अस्तु तर्हि कारकं। ननु चोक्तमाख्यातानुपयोगे कारकमिति चेदकथितत्वात्कर्मसंज्ञाप्रसंग इति। नैष दोषः। परिगणनं तत्र क्रियते। दुह्याच्पच्दण्डि
प्रच्छिभिक्षिचिञामिति। अयमपि योगः शक्योऽवक्तुं। कथमुपाध्यायादधीत इति। अपक्रामति तत्तस्मादध्ययनं। यद्यपक्रामति किं नात्यंतायापक्रामति॥०॥

यमपूर्वकं विद्याग्रहणं। किं पुनरिति। उभयथा संभवाद्दोषदर्शनाच्च प्रश्नः। यद्यपक्रामतीति। यथापत्यंवृक्षादपक्रांतं न पुनर्वृक्षे तद्भवति एवं शब्देऽपि प्रसंग इत्यर्थः॥

(१॥श्री॥ ॥७॥ ॥७॥

=शब्दस्यापक्रमणं न युक्तमिति शंकते। यद्यपेति।१=

=पुनःपुनरुत्साद्यमानत्वेन संततत्वमिति भावः ।१९= शब्दरूपता । अति· जातिस्फोटपक्षेद्वंदं· तन्मते हि शब्दस्यानित्यत्वेपि तद्व्यक्तिज्ञानेर्बोधकतान्न दोष इति भावः ।२= =वक्तुरिच्छया प्रयत्नाभिप्रदेशगतो विवृतो वायुस्तत्तत्स्थानेष्वभिहतस्तत्तद्वर्णरूपशब्दत्वं प्रतिपद्यते· एवं शब्दतन्मात्रा=
=उच्यत इति· नटस्य श्लोकनीलादा बौद्धशब्दविशिष्टतापायविवक्षात्वनभिमानान्नेति नातिप्रसंगः ।२= =ज्ञानस्येति· ज्ञानानित्यत्वकत्वखलादितत्त्वमुपहिता निकृकाकारस्वकाराद्यात्मनाप्यव्यक्तिर्यते· दर्शनं· सिद्धांतः । प्रवादः ॥ शास्त्रम् ।२=

भा०कै०प्र०
३१२
३१२

संततत्वादिति। शब्दव्यंजकाध्वनयउपाध्याये नोत्साद्यमानाभिन्ना अपि सादृश्यापन्नत्वेनाध्यवसीयमानाः श्रोतुः पुनःपुनः श्रोत्रप्रदेशं गच्छंतो व्यक्तिस्फोटरूपं जातिस्फोटरूपं वा शब्दमभिव्यंजयंतीत्यर्थः। अथ वेति। ज्वालारूपं ज्योतिरविच्छेदेनोत्साद्यमानं सादृश्यापन्नत्वेनाध्यवसीयमानं संततं तत्तच्चोपाध्यायज्ञानानि भिन्नानि भिन्नशब्दरूपतामापद्यमानानि संततान्युच्यंते। ज्ञानस्य शब्दरूपापत्तिरिति दर्शनमत्रभाष्यकारस्य तथा चोक्तं। वाग्योरंगाद्ज्ञानस्य शब्दत्वापत्तिरिष्यते॥ केश्चिद्दर्शनभेदो हि प्रवादेष्वनवस्थित इति॥ ॥ जनिकर्तुः॥ ॥ अपक्रामंतितादिति। लोकप्रसिध्याश्रयेणेत्युच्यते। लोके हि यद्यस्माज्जायते तत्तस्मान्निर्गच्छतीत्युच्यते। न त्वाश्रयात्तु प्रक्रियाभिद्यते। वैशेषिकदर्शने परमाण्वादि समवेतं कारणोभ्योऽपृथग्देशं कार्यमुत्पद्यत इति नास्ति कार्यस्यापक्रमः। सांख्यदर्शने प्याविर्भाव

संततत्वात्। अथवा ज्योतिर्वज्ज्ञानानि भवंति॥ ॥ जनिकर्तुः प्रकृतिः॥ अयमपि योगः शक्योऽवक्तुं। कथं गोमयाद्वृश्चिको जायते गोलोमाविलोमभ्यो दूर्वा जायंत इति। अपक्रामंति तास्तेभ्यः। यद्यपक्रामंति। किं नासंततायापक्रामंति। संततत्वात्। अथवान्याश्चान्याश्च प्रादुर्भवंति॥ ॥ भुवः प्रभवः॥ ॥ अयमपि योगः शक्योऽवक्तुं। कथं हिमवतो गंगा प्रभवतीति। अपक्रामंति तास्तस्मादापः। यद्यपक्रामंति। किं नासंततायापक्रामंति। संततत्वात्। अथवान्याश्चान्याश्च प्रादुर्भवंति॥ ॥श्री॥ ॥ ॥१॥ ॥

तिरोभावलक्षणजन्मना शब्दरूपपरिणामेनाप्युपगमान्नास्त्यपक्रमः। यदीति। यद्यतोपक्रामति तत्तस्तु न तत्र न दृश्यते इति प्रसिद्धं। इह तु तत्रास्ति दर्शनमिति प्रश्नः। संततत्वादिति। अविच्छेदादित्यर्थः। यथा बिलाद्दीर्घो भोगी भोगी निःक्रामन्नप्यविच्छेदात्तत्रोपलभ्यते तत्पादृश्योपीत्यर्थः। अथ वेति। क्षणिकपक्षे द्व्यारंभपक्षे वा परिणामपक्षं वाश्रित्येतदुक्तमित्याहुः। ननु सतो जन्मायोगादसतश्च कर्तृत्वासंभवात्सत्क्षणांतरभावात्तु कथं कुतो जायत इति प्रयोगः। नैष दोषः। बुद्धिव्यवस्थापितस्यार्थस्य क्रियायां कारकरूपोपगमात्॥ ॥ भुवः प्र॥ संततत्वादिति। सादृश्यनिबंधनतत्वाध्यवसायादविच्छेदेन तासामुपलंभादित्यर्थः। अथ वेति। वस्तुतोत्रभेदए ((व))पामितिभावः॥ ॥ ॥श्री॥

नगर
राम०
३१२

=सांख्यमते प्रतिक्षणं परिणामित्वात्सर्वार्थानां गोलोमादेस्तन्नदवस्थयूर्वाकृपेण परिणाम इति भावः ।२= ननु सिध्यानामयं संततत्वमनुपपन्नमत आह· साधयेदिति· भेदएवेति· साध्यपमूलकामेदस्यानित्यपक्षे प्रतीतिर्मलत्वीत्यर्थः ।१= =खंडपत्रादिरीत्येत्यर्थः ।२=

कर्मणा यं ॥ कर्मणेति ग्रहणमिति उपाध्यायाय गां ददातीत्यत्र गोरूपाध्यायस्याप्यभिप्रेयमाणत्वं यतो गौर्येन क्रियया करणभूतयाभिप्रेयते गवा तूपाध्यायः । तत्र परत्वाद्गोः कर्मसंज्ञेति पा
रिशेष्यादुपाध्यायस्यैव संप्रदानसंज्ञा भविष्यतीति प्रश्नः । कर्मणा एवेति । सत्यप्युभयसंभवे तत्र रंगत्वात्कर्मणा एव गवादेः स्यादित्यर्थः । न चैवं कर्मसंज्ञानवकाशा स्यात् । वचनसामर्थ्या
न्न हि पर्यायः स्यात् । कारकप्रकरणे च प्रकर्षयोगो नाश्रीयते नेत्वं तरंग बहिरंगव्यवहारः । ननु पर्याये सति गत्यर्थकर्मणि त्वारंभो नर्थकः स्यात् । तस्य प्रसाख्यात्वादि त्वदोषः ।

कर्मणा यमभिप्रैति स संप्रदानं ॥ कर्मग्रहणं किमर्थं । यमभिप्रैति स संप्रदानमितीयत्युच्यमाने कर्मणा एव संप्रदानसंज्ञा प्रसज्येत । कर्मग्रहणे पुनः
क्रियमाणे न दोषो भवति । कर्मनिमित्तत्वेनाश्रीयते । अथ यं स ग्रहणं किमर्थं । कर्मणाभिप्रैति संप्रदानमितीयत्युच्यमाने अभिप्रयत एव सं
प्रदानसंज्ञा प्रसज्येत । यं स ग्रहणे पुनः क्रियमाणे न दोषो भवति । यं स ग्रहणादभिप्रयतः संप्रदानसंज्ञा निवर्त्यते । अथाभिप्रग्रहणं कि
मर्थं । कर्मणा यमेति स संप्रदानमितीयत्युच्यमाने यमेव संप्रत्येति तत्रैव स्यात् । उपाध्यायाय गां ददातीति । इह न स्यात् उपाध्यायाय गाम
दाः उपाध्यायाय गां दास्यतीति । अभिप्रग्रहणे पुनः क्रियमाणे न दोषो भवति ॥ ॥ ॥ ॥

अथ येति । अध्याहारेणापि सर्वनामद्वयार्थो लभ्यत इति प्रश्नः । अभिप्रयत एवेति । श्रुतपदार्थसंबंधे नैव निराकांक्षत्वे ऽध्याहारानुपपत्तिरिति भावः । कर्तृसंज्ञाया स्त्वकर्म
कोधातुरवकाशः स्यात् । ततश्चोपाध्यायाय शिष्येण गौर्दीयत इत्यत्रार्थे शिष्यायोपाध्यायस्य गौर्दीयत इति स्यात् । ननु शिष्यस्य कर्तृत्वाभावे कथं गोः कर्मसंज्ञा । नैष दोषः । कर्म
संज्ञायां स्यात् अस्य कर्तृग्रहणे नोपलक्षणात् । तथा च साधो दीयत इत्यत्र कर्मणि लकारो लब्धिः । निर्भज्यत इति । आलभ्यत इत्यर्थः । अथ येति । कर्मणा यमेति गच्छति प्रा
प्नोति संबध्नातीत्यर्थः । अभिप्रैतीत्युक्ते स एवार्थ इति प्रश्नः ॥ ॥ ॥

= नामस्पाकर्तव्यायत्रानुगमः क्रियत इति पंक्ति विंशती तिसृत्रेनाव्योक्ते रिति भावः ।१= भिंदन्तीति गर्ह कुत्सायामिति पाणात् ।२= निश्चयमिति उद्देश्यतप्रदर्शनायेदं एवमुक्तस्त्रोपश्लिष्टेत्यादि ।३=

आभिमुख्य इति । उपसर्गद्वयोपादानसामर्थ्यात्कालानवच्छिन्ना क्रियाश्रीयत इत्यर्थः । ननु यथा तेन दृश्यतीत्यादौ संख्याकालयोर्न विवक्षा तथेहापि संख्यावत्कालस्याविवक्षा भविष्यतीति मुपसर्गद्वयोपादानेन । एवं तर्हि व्याप्यसिद्धये वार्थ उपसर्गद्वयोपादानेन प्रदर्श्यत इति भाष्यकारस्याभिप्रायः । आङ्गायेति । आङ् निवृत्तिनास्तिकत्वात् इत्यर्थः । युद्धायेति । युद्ध विषयं संनहनपूर्वकं निश्चयं करोतीत्यर्थः । पत्ये शेत इति । पतिमुपश्लिष्य शेते इत्यर्थः । न सिध्यतीति । क्रियान्तरानुपादानानुपादानादिति भावः । कथं च नामेति । क्रियान्तरानुपादाने

अभिरामिमुख्ये वर्त्तते प्रशब्द आदिकर्मणि । तेनायं चाभिप्रैतीयं चाभिप्रैष्यतीयं चाभिप्रागादाभिमुख्यमात्रे सर्वेत्र सिद्धं भवति । क्रियाग्रहणमपि कर्त्तव्यं । इहापि यथा स्यात् । आङ्गाय निगर्हते । युद्धाय संनह्यते । पत्ये शेते इति । तत्तर्हि वक्तव्यं । न वक्तव्यं । कथं । क्रियां हि नाम लोके कर्मेत्युपचरंति । कां क्रियां करिष्यसि किं कर्म करिष्यसीति । एवमपि कर्त्तव्यं । कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययो भवति । क्रियापि कृत्रिमं कर्म । न सिध्यति । कर्तुरीप्सिततमं कर्मेत्युच्यते । कथं च नाम क्रियया क्रियेप्सिततमा स्यात् । क्रियापि क्रियये प्सिततमा भवति । कया क्रियया । संदर्शनक्रियया प्रार्थयति क्रियया अध्यवस्यति क्रियया च । इह य एष मनुष्यः प्रेक्षापूर्वकारी भवति स बुध्या तावत्कंचिदर्थं पश्यति संदृष्टे प्रार्थना प्रार्थनायामध्यवसायः अध्यवसाये आरंभः आरंभे निर्वृत्तिः निर्वृत्तौ फलावाप्तिः । एवं क्रियापि कृत्रिमं कर्म । एवमपि कर्मणः करणसंज्ञा वक्तव्या संप्रदानस्य

= एकाकनीति एकविकल्पितः स्वनिरूपितः कर्मकरणभावोनास्तीत्यर्थः ।१=

१ चकर्मसंज्ञा ॥ ० ॥

एकस्या एव क्रियायाः कर्मकरणभाव एकदा एकात्मन्येव नोपपद्यत इति भावः । क्रियापीति । प्रतीयमानक्रियापेक्षः कारकभावः प्रविशपिंडीमित्यादावि वात्रेत्यर्थः । यदा तु संदर्शनादयो धात्वर्थाद्भेदेन विवक्ष्यंते तदा संप्रदानसंज्ञा अन्यदा तु कर्मसंज्ञैव यथा कटं करोतीति । भेदाभेदविवक्षा प्रयोगदर्शनवशेन नियतविषयैवाश्रीयत इति प्रयोगस्यासंकरः । कर्मणः करणसंज्ञेति । एतच्छंदो विषयं सर्वे विधयश्छंदसि विकल्प्यंत इति यथा प्राप्तमपि प्रयोगो भवति ॥ " "

पशुना रुद्रं यजत इति॥ रुद्रं देवतामुद्दिश्य पशुं सृजतीत्यर्थः। कैश्चिदन्वर्थसंज्ञाविज्ञानाद्दानक्रियाविषय एव संप्रदानसंज्ञेत्यभ्युपगतं। दानं च स्वत्वनिवृत्तिः परस्वत्वापत्तिपर्यन्तेति प्रसज्ञापि। त
दुभयमप्ययुक्तं। अन्यत्रापि भाष्यकारेण संज्ञाया अभ्युपगमात्। तथा च क्रियाग्रहणं स्वर्गस्यार्थे कर्मणीति सूत्रस्य प्रत्याख्यानं कृतं। तथा खलु निवृत्तस्वभावेऽपि ददातेः प्रयोगो दृश्यते। न शू
द्राय मतिं दद्यादिति। खण्डिकोपाध्यायस्तस्मै चपेटां ददातीति च॥ ॥क्रुधद्रुह॥ ॥किमेत इति। ननु लोकव्यवहारादेवार्थावगमात्सन्देहानुपपत्तिः। एवं तर्हि चित्तदोषरूपता सर्वेषाम
स्तीति सामान्यापेक्षायामेकार्थत्वं अवान्तरभेदविवक्षायां तु भिन्नार्थत्वमित्यदोषः। किमर्थमिति। एकेनैव धातुनार्थस्योपलक्षितत्वादन्येषां वैयर्थ्यप्रसङ्गः। नानार्था इति। क्रोधो रोषः। द्रो
होऽभिचारः। ईर्ष्या परगुणासहनं। असूया परगुणविध्वंसनं। कुपाविति। कुपौ धातौ वाच्यत्वेन यत्र स्थितं तदेतेषां साधारणमित्यर्थः। कोपपूर्वाणां सर्वेषां ग्रहणार्थं यं प्रति कोप इ

पशुना रुद्रं यजते। पशुं रुद्राय ददातीत्यर्थः। अयं किल पशुः प्रक्षिप्यते रुद्रायोपह्रियत इति॥ ॥क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः॥ ॥
किमेत एकार्था आहोस्विन्नानार्थाः। किं चातः। यद्येकार्थाः किमर्थं पृथङ्निर्दिश्यन्ते। अथ नानार्थाः। कथं कुपिना शक्यन्ते विशेषयितुं। एवं त
र्हि नानार्थाः कुपौ त्वेषां सामान्यमस्ति। नह्यकुपितः क्रुध्यति। न चाकुपितो द्रुह्यति। न चाकुपित ईर्ष्यति। न चाकुपितोऽसूयति॥ ॥साधक
तमं करणं॥ ॥तमग्रहणं किमर्थं। न साधकं करणमित्येवोच्येत॥ ॥ ॥

तिविशेषणमित्यर्थः। तेनेह न भवति भार्यामीर्ष्यति। परैर्दृश्यमानां न सहत इत्ययमत्रार्थ इति नास्ति कोपप्रभवत्वमत्रेर्ष्यायाः। नह्यकुपितः क्रुध्यतीति। ननु कोपः क्रोध
एवेति भेदाभावात्कथं पौर्वापर्यं। एवं तर्हि प्रथममनुद्भूतां कोपावस्थां द्वितीयां चोद्भूतां विवक्षितवान्कायव्यापारेणानुमीयमानां माश्रित्यैतदुक्तमित्यदोषः। न वा
कुपितो द्रुह्यतीति। यत्र विषये संप्रदानसंज्ञेष्यते तदुद्देशेनैतदुच्यते न तु सर्वविषयापेक्षया अन्यथा व्यभिचाराभावाद्यं प्रति कोप इति विशेषणमनुपादेयं स्या
त्। भार्यामीर्ष्यतीति विनापि कोपात्प्रायेण दर्शनाच्च। अस्मान्द्वेष्टीत्यत्र संप्रदानसंज्ञा न भवति द्विषेरक्रोधार्थत्वात्। अनभिनन्दने द्विषिर्वर्तते तेऽयं योषं द्वेष्टीति॥ ॥
साधक॥ ॥तमग्रहणमिति। कारकाधिकारात्साधकत्वे लब्धे पुनः साधकश्रुतिः प्रकर्षमवगमयतीति प्रश्नः॥ ॥ ॥ ॥

सर्वेषामेवेति॥ प्रकर्षगतिरूपत्वात्तत्र प्रतिपादयिष्यते। तत्र वचनसामर्थ्यादेकसंज्ञाधिकाराच्च करणसंज्ञायाः संज्ञानयोश्च विकल्पः स्यात्। नन्वसति विशेषाश्रयणे करण कारकसंज्ञाद्वयोपादानमनर्थकं स्यात्। नहि संज्ञाद्वयविधानसामर्थ्यात्करणसंज्ञा कंचिदेव विषयं परिहरतीति लभ्यते न त्वनिष्टविषयपरिहारेणेष्टविषये तस्याः प्रवृत्तिर्लभ्या। परत्वादनवकाशत्वाच्चेति। विषयभेदापेक्षो हेतुद्वयोपन्यासः। सावकाशत्वे सति परत्वं हेतुः। अन्यत्र निरवकाशत्वं। इह तर्हीति। अत्र संज्ञाद्वयप्रसंगे निरवकाशत्वादपादानसंज्ञैव स्यात्। करणसंज्ञा त्वपादानादन्यत्र सावकाशा। तमग्रहणे तु सति विवक्षाविषयत्वादुभयोर्धनुषा विध्यतीत्यत्र परत्वात्करणसंज्ञा सिध्यतीति। उ

साधकं करणमितीयत्युच्यमाने सर्वेषामेव कारकाणां करणसंज्ञा प्रसज्येत। सर्वाणि हि कारकाणि साधकानि। तमग्रहणे पुनः क्रियमाणे न दोषो भवति। नैतदस्ति प्रयोजनं। पूर्वोक्तास्तावत्संज्ञा अपवादत्वाद्बाधिका भविष्यन्ति। पराः परत्वादनवकाशत्वाच्च। इह तर्हि धनुषा विध्यति अपाययुक्तत्वादपादानसंज्ञा साधकत्वाच्च करणसंज्ञा प्राप्नोति। तमग्रहणे पुनः क्रियमाणे न दोषो भवति। एवं तर्हि लोकत एतत्सिद्धं। तद्यथा लोके अभिरूपायोदकमानेयमभिरूपाय कन्या देयेति। न चानभिरूपे प्रवृत्तिरस्ति। तत्राभिरूपतमायेति गम्यते। एवमिहापि साधकं करणमित्युच्यते। सर्वाणि च कारकाणि साधकानि न चासाधके प्रवृत्तिरस्ति तत्र साधकतममिति विज्ञास्यते। एवं तर्हि सिद्धे सति यत्तमग्रहणं करोति तज्ज्ञापयत्याचार्यः कारकसंज्ञायां तरतमयोगो न भवतीति। किमेतस्य ज्ञापने प्रयोजनं। अपायमाचार्यः किं न्याय्यं मन्यते यत्र संप्राप्य निवृत्तिः। तेनै [illegible] ते। ग्रामादागच्छति। सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इत्यत्र न स्यात्। कारकसंज्ञायां तरतमयोगो न भवतीत्युच्यते सत्यपि सिद्धं भवति॥ ॥ ॥

दकमानेयमिति। कन्यादानार्थं। न चानभिरूप इति। दृष्टादृष्टप्रयोजनत्वात्कन्यादानस्येति भावः। तरतमयोगो नास्तीति। कथं पुनः केवलयोः प्रत्यययोः प्रयोगः। नैष दोषः। प्रत्ययार्थानुकरणत्वात् तत्रानुकरणाभ्यामनुकार्यौ प्रत्ययौ प्रतीयेते ताभ्यामपि साहचर्यात्तदर्थौ लक्ष्येते। तत्र तमश्रुतिरेव ज्ञापयति प्रकर्षप्रत्ययमन्तरेणेह प्रकरणे सामर्थ्यगम्यः प्रकर्षो नाश्रीयते। सांकाश्यकेभ्य इति। बुद्धिकल्पितोऽत्रापायो न तु मुख्यः॥ ॥ श्री॥ ॥ ॥

यत्र कृत्स्न इति। सर्वैरवयवैः सह यत्रावयवी व्याप्त इत्यर्थः। गंगायामिति। गोभिर्गंगाया व्याप्त्यभावात्तस्या अधिकरणसंज्ञा। अस्माज्ज्ञापकात् सामीप्यमात्राश्रयेण प्रकल्पिताधा
रनिबंधना सा भवति। अथ सामग्री साध्यायां क्रियायां कोतिशयः करणस्येति चेत्। यद्व्यापारानंतरं क्रियाप्रसिद्धिः यस्य च यदातिशयविवक्षा तस्य करणत्वं यथा स्था
ल्यां पच्यत इति। कारकांतरापेक्षस्य करणस्यातिशयो न तु स्वकक्षायामिस्येव नद्यादिकया पथा व्रजतीति सर्वेषां क्रियानिष्पत्तौ सन्निपत्योपकारकत्वात् करणत्वं सि
द्धं॥ ॥उपान्व॥ ॥वसेरश्यर्थस्येति। अर्थशब्दो निवृत्तिवाची। व्यधिकरणे षष्ठ्यौ। अश्यर्थस्य वाचको यो वसिस्तस्येत्यर्थः। अथवा शीङोर्थः श्यर्थः। नश्यर्थः अश्यर्थः
।तस्य अस्थानार्थस्येत्यर्थः। स्थाने हि शीङ्वृत्तेर्यथा जलशाय इति। तेन ग्रामे तिष्ठतीत्यस्यार्थे ग्राममुपवसतीति प्रयोगः। अस्थानार्थे त्वेतु ग्राम उपवसती

तथ्याः धारमाचार्यैः किं स्यात् प्रश्ने यत्र कृत्स्न आधारात्मा व्याप्तो भवति। तेनेहैव स्यात् तिलेषु तैलं दध्नि सर्पिरिति। गंगायां गावः कूपे गर्गकुल
मिति तन्न स्यात्। कारकसंज्ञायां तरतमयोगो न भवतीत्यत्रापि सिद्धं भवति। उपान्वध्याङ्वसः॥ ॥वसेरश्यर्थस्य प्रतिषेधः। वसेरश्यर्थ
स्य प्रतिषेधो वक्तव्यः। ग्रामे उपवसतीति। स तर्हि वक्तव्यः। न वक्तव्यः। नात्रोपपूर्वस्य वसेर्ग्रामोधिकरणं। कस्तर्हि। अनुपसर्गस्य। ग्रामे सौ
वसंस्त्रिरात्रमुपवसतीति॥ कर्तुरीप्सिततमं कर्म॥ ॥तमब्ग्रहणं किमर्थं। कर्तुरीप्सितं कर्मेतीयत्युच्यमाने इहाग्नेर्माणवकं वारयतीति
माणवकेऽपादानसंज्ञा प्रसज्येत। नैष दोषः। कर्मसंज्ञात्र बाधिका भविष्यति। अग्नावपि तर्हि बाधिका स्यात्। इह पुनस्तमब्ग्रहणे क्रियमा
णे न उपपन्नं भवति यदुक्तं वारणार्थेषु कर्मग्रहणार्थक्यं कर्तुरीप्सिततमं कर्मेति वचनादिति॥ ॥ ॥

ति। नात्रेति। विशिष्टाधारावस्थितत्वेन निश्चिते देवदत्ते भोजननिवृत्तिविशिष्टकालं प्रसाधयितुमिदं प्रयुज्यते ग्राम उपवसतीति। तत्रांतरंगत्वात्प्रतीयमानक्रियापेक्षो
ग्रामस्याधिकरणभावः। उपवसनं तु स्वरूपेणैव कालमपेक्षत इति काले नैवासांतरंगः संबंधः। ग्रामादिनात्तु बहिरंग इत्यर्थः॥ ॥कर्तुरीप्सित॥ ॥तमब्ग्रहणमिति॥
अससि पितमब्ग्रहणे अग्नावपि गच्छती सादौ कर्मसंज्ञा सिध्यती ईप्सितमस्यापि ईप्सितत्वसद्भावादिति प्रश्नः। माणवक इति। विशेषविहितत्वादपादानसंज्ञायाः। कर्मसंज्ञेति। प
रत्वात्। अग्नावपीति। अग्निमाणवकयोरीप्सितत्वप्रज्ञावात्। कर्मापादानसंज्ञाविषयविभागाज्ञाने परमेतत्। न तु निरवकाशा अपादानसंज्ञा सावकाशा या कर्मसंज्ञया बा

= विक्लेदनान्तरेति । विक्लेदनान्तरप्रतीतिप्रसंगादित्यर्थः ॥ २ = गौणत्वेऽर्थस्य ... एतेन ... पचिरिति ... ओदनरूपेणेत्यर्थः ॥ ३ = ... आपद्यमानस्य निर्वर्त्यमानतया ... सामान्येन ... ओदनस्य कर्मता ... ओदनं निर्वर्तयतीति ... विगमात् ... आक्षेपे ... अन्तर्निष्ठविक्लित्ति ओदनं

इहेति ॥ लोकः शास्त्रं च सामान्येन निर्दिष्टं प्रपत्ते । लोके प्रयुज्यमानत्वात् शास्त्रे चोदाह्रियमाणत्वात् । द्रव्यान्तरमिति । ओदनशब्दस्य तंडुलविकारे प्रयुज्यमानत्वात् सचेत्स्वविक्लि सुपसर्जने न विक्लेदनवचनत्वान्निर्वृत्तस्यौदनस्य विक्लेदनान्तरकारणत्वात् । ओदनार्थ इति । गौणत्वेऽप्याश्रयणे नैव सर्वलोकस्य प्रयोगदर्शनादिदमन्नमनचौदनीयं मुख्यस्यैव लोदनस्य पुनर्विक्लित्तिनिरोध[?]क्रियाणां साध्यं प्रयोगो न भवतीति । विकारविशेषप्रतिपादनाय गौणत्वे परिग्रहः । तंडुलान्पचतीत्युक्ते विकारान्तरमपि प्रतीयते । अपेहेति । उभयथा प्रयोगदर्शनात्पृच्छति विक्लित्तः साक्षादुपादानात्सामर्थ्यात्ताच्छब्द्यानुपपत्ता विक्लेदनवचनेतु पचौ तंडुलानामोदनं पचतीति प्रयोगा योगाद्रव्यान्तरनिर्वृत्तिप्रत्ययप्रसंगाच्च निर्वर्तनवचनेतु पचौ तंडुलानां कर्मभावाघटनात्तंडुलानोदनं पचतीति प्रयोगाभावप्रसंगाच्च प्रश्नः । द्व्यर्थः पचिरिति विक्ले

इहोच्यते । ओदनं पचतीति यद्योदनः पच्यते द्रव्यान्तरमभिनिर्वर्त्येत । नैष दोषः । तादर्थ्यात्ताच्छब्द्यं भविष्यति । ओदनार्थास्तंडुला ओदन इति । अथ वेह कश्चिद्भवितव्यं तंडुलानोदनं पचतीत्याहोस्वित्तंडुलानामोदनं पचतीति । उभयथापि भवितव्यं । कथं । इह हि तंडुलानोदनं पचतीति द्व्यर्थः पचिः तंडुलान्पचन्नोदनं निर्वर्तयतीति । इहेदानीं क्वचित्कंचित्प्रदामंत्रयते सिद्धं भुज्यतामिति । स आमंत्र्यमाण आह प्रभूतं भुक्तमस्माभिरिति । आमंत्र यमाण आह दधि खलु भविष्यति पयः खलु भविष्यति । आमंत्र्यमाण आह दध्ना खलु भुंजीय पयसा खलु भुंजीयेति । अत्रकर्मसंज्ञा प्राप्नोति । तद्धि तस्येप्सिततमं भवति । तस्याप्योदनएवेप्सिततमः न तु गुणोपसर्जनो रोधः ॥ × दानीं तंडुलानामोदनं पचतीति द्व्यर्थश्चेवपचिर्विकारयो दनोपसर्जने निर्वर्तने पचिर्वर्तते । तंडुलान्विक्लेदयन्नोदनं निर्वर्तयतीत्यर्थः । तत्रोपसर्जने विक्लेदनक्रियापेक्षं तंडुलानां कर्मत्वं प्रधानभूतक्रियापेक्षं लोदनस्य । द्व्यर्थश्चेवेति । तंडुलानां संबंधिनं विकारविशेषं ओदनं विक्लिसा निर्वर्तयतीत्यर्थः । सा च विक्लित्तिः सामर्थ्यात्तंडुलानामेव विज्ञायते । इहकश्चिदिति । अव्ययव्यतिरेकाभ्यां दधिपयसोरीप्सिततत्वं न तु लोदनस्येति दर्शयति । तस्याप्योदनइति । दधिपयसोस्तु संस्कारकत्वाल्लक्षणभावः । न तु गुणेष्विति । गुणोपकारकेषु

= ईप्सित ... कर्तुः क्रियया ... संयोगाद्रूपं ... सम्बध्यमाणे ॥ १ केवलत्वेषु नास्यादरः किं तर्हि तत्संस्कृत ओदन इत्यर्थः ॥ ... दधिपयसोरेव ... नित्ययोरेव न त्वोदनस्येति भावः ॥ २ = न तु गुणेष्वादराभावे दधिमनान ... ॥ स्पष्टभावः ॥ १ = ॥

= विक्लित्तिसेति । फलस्यापि विक्लित्तेः स्वद्वारा निर्वर्तनांगभिनिकरणत्वेन विवक्षितत्वात् ... विवक्षितत्वात् ... कर्मता ... योगस्य विभावः ॥ २ = तत्रेति । विक्लित्तिनिर्वर्त्योऽर्जनव्यापारस्यैककाले ... गुणप्रधानभावेन ...

=निर्भर्त्सितविकारोघटादेः संस्कारः प्रोक्षणादिनाव्रीह्यादेः । प्रतिपत्तिर्दग्धादिना हविरादेः ।३।= एवं प्रयोगात्प्रपत्तिरत आह कर्मभावत्वमपि ।१= यदीति । एवं च कर्तृनिष्ठव्यापारजन्यफलेन संबध्यमानत्वविषय ओदनो पि भवतीति भवति तस्य कर्मत्वं । दधिपयसोस्तु नैवं । मुख्यासाः

मृदुविशद इति । मृदुश्चासौ विशदश्चेति कर्मधारयः । यदि मार्दवमात्रे आदरः स्यात्तं कममपि भक्षयेत् । विशदमात्रादरे सिकता अपि । ईप्सितस्येति । ईप्सिततममेवेप्सितपदेन सामान्यशब्देन निर्दिष्टं । विशेषेषु सामान्यस्य भावात् । तत्र पचिर्वर्तते क्रियाः ना धे यविकारं क्रिया निष्पन्नस्यार्थे केवलमुपादीयते तत्क्रियासंबंधात्प्राप्यमपि नेप्सितमिति तस्य कर्मसंज्ञा न प्राप्नोति । यत्र हि कर्मार्थो क्रिया निष्पत्ति संस्कार प्रतिपत्तिभिः तत्र कर्मेप्सिततमं । अन्यत्र तु क्रियैव प्रतीयमानसंदर्शनादि क्रियापेक्षया ईप्सितेति भावः । गुडं भक्षयतीति । भक्षणाय गुडस्योपादानं न तु गुडाय भक्षणानुष्ठानं । न वेति । गुडभक्षणाय स्येप्सिततमस्य गुडो भक्षणक्रियये प्सितः । यस्मान्नासौ गुडस्य दर्शनस्पर्शनादिना कृती भवति नापि लोष्टादिभक्षणे

तद्यथा । भुंजीयाहमोदनं यदि मृदुविशदः स्यादिति । एवमिहापि दधिगुणमोदनं भुंजीय पयोगुणमोदनं भुंजीयेति । ईप्सितस्य कर्मसंज्ञायां निर्वृत्तस्य कारके कर्मसंज्ञाप्रसंगः क्रियेप्सितत्वात् । ईप्सितस्य कर्मसंज्ञायां निर्वृत्तस्य कारककले कर्मसंज्ञा प्राप्नोति । गुडं भक्षयतीति । किं कारणं । क्रियेप्सितत्वात् । क्रियात्तस्येप्सिता । न वोभयेप्सितत्वात् । न वा एष दोषः । किं कारणं । उभयेप्सितत्वात् । उभयं हि तस्येप्सितं । आतश्चोभयं । यस्य हि गुडभक्षणे बुद्धिः प्रसक्ता नासौ लोष्टं भक्षयित्वा कृती भवति । यद्यपि तावदत्रैतच्छक्यते वक्तुं । ये त्वेते राजकर्मिणो मनुष्यास्तेषां कश्चित्केचिदाह कटं कुर्विति स आह नाहं कटं करिष्यामि घटो मया आहृत इति । तस्य क्रियामात्रमीप्सितं । यद्यपि तस्य क्रियामात्रमीप्सितं यस्त्वसौ प्रेषयति तस्योभयमीप्सितमिति ॥ ॥

नेति । न भक्षणमात्रमीप्सितं नापि गुडमात्रमित्यर्थः । ये त्वेत इति । नेहियं काचित्क्रियामनुष्ठायकालमति वाहयंति । न ते षांद्रव्यविशेषे तात्पर्यं । तत उच्यते नाहं कटं करिष्यामीत्यत्र कटस्य कर्मत्वानुपपत्त्या द्वितीया न प्राप्नोतीति । कटकर्मिका क्रिया न निषिद्धा भवेत् । तथा घटो मयाहृत इत्यत्र घटस्य कर्मत्वाभावादाहृत इत्यत्र कर्मणि निष्ठा न प्राप्नोति । यस्त्वसौ प्रेषयतीति । प्रयोजकचिंतानुवर्तनेन तस्य स्वार्थसिद्धयेत्रकर्तत्वो । यदा च विशिष्टकर्मिका क्रिया तेन संपाद्यते तदाज्ञानुष्ठितनाम वतीति प्रयोजकस्योभयोर्ज्यस्याप्युभयमीप्सितमिति भाष्यकारस्याभिप्रायः । अन्ये तु प्रयोजककर्त्रपेक्षया प्रयोज्यस्य कर्तुरनीप्सितमपि कर्मत्वमाचक्षते । तत्तु प्रयोजकव्यापारस्याशब्दार्थत्वात्सर्वोक्त उदाहरणे युक्तमिति न्यायवि

=विधिमानायाः क्रियायाः शब्दस्नी तिर्नस्यादिसर्थः ।३।= अत्यंतमति वस्तुतो यद्यप्येवमोदनो तथा चेत्सनेन सिद्धे र्वकुं शकानथापि भाष्यसमाधानं वक्तुमयमुपक्रम इत्यारः ।१= ९दो मन्यंते ॥ ॥ ०॥

=विषभक्षणोप्सानीसाभ्यांविषस्येप्सानीसे अन्वयव्यतिरेकाभ्यांप्रदर्शयन्नवतो ननस्यतथात्वंक्रियाविशेषविषयेनतत्प्रमायाः समासादिसाकन्यदीति॰१=

विषस्य॰

तथा युक्तं॥ ॥ कस्यचनामेति। विषमिति वक्तव्ये विषभक्षणमिति किमर्थं। उच्यते। यदि भक्षणमीप्सितं तदा विषमपीप्सितं विषभक्षणस्य त्वनीप्सितत्वे विषमपि प्राणहरत्वा
दनीप्सितं भवति। भक्षणक्रियया च विषं नेप्सितं परिहारादिक्रियापेक्षया तदीप्सितं भवत्येवेति भक्षणग्रहणेन प्रदर्श्यते। विषभक्षणमपीति। यथा लोकस्य सुखमाप्तव्यो क्रि
यायां प्रवृत्तिस्तथा भयादिभ्यो दुःखनिवृत्त्यर्थापि विषादिष्विप्सितत्वर्थः। चोरान्पश्यतीति। विषयेंद्रियसंबंधसामर्थ्याद्दर्शनेनाप्तुमनिष्टतमा अपि चोरास्तथा युक्ताः॥ श्वेरासि

तथा युक्तं चानीप्सितं॥ ॥ किमुदाहरणं। विषं भक्षयतीति। नैतदस्ति। पूर्वेणाप्येतत्सिध्यति। न सिध्यति। कर्तुरीप्सिततमं कर्मेत्युच्यते। कस्यचनामवि
षभक्षणमीप्सितं स्यात्। विषभक्षणमपि कस्यचिदीप्सितं भवति। इह य एष मनुष्यः दुःखार्त्तो भवति। सोन्यानि दुःखान्यनुनिशाम्य विषभक्षणमेव
ज्यायो मन्यते। आतश्चेप्सितं यत्तद्भक्षयति। यत्तर्ह्येनं मत्करिष्यामीत्यन्यत्करोतीति तदुदाहरणं। किं पुनस्तत्। ग्रामांतरमयं गच्छन् चोरान्पश्यति अहिं
लंघयति कंटकान्मृद्नातीति। इहेप्सितस्यापि कर्मसंज्ञा आरभ्यते। नीप्सितस्यापि यदिदानीं नैवेप्सितं नाप्यनीप्सितं तत्र कथं। ग्रामांतरमयं गच्छन्वृ
क्षमूलान्युपसर्पति। कुड्यमूलान्युपसर्पतीति। अत्रापि सिद्धं। कथं। अनीप्सितमिति नायं प्रसज्यप्रतिषेधः ईप्सितं नेति। किं तर्हि पर्युदा
सोयं। यदन्यदीप्सितात्तदनीप्सितमिति। अन्यश्चैवेदमीप्सितात् यन्नैवेप्सितं नाप्यनीप्सितमिति॥ ॥ ॥

दुक्कर्मभावात्तत्वेनेन कर्मसंज्ञया संबध्यते। ईप्सितस्यापि। ईप्सिततमस्यापीत्यर्थः। नायं प्रसज्यप्रतिषेध इति। यथाऽधर्मान्नतादिभिरुत्तरपदार्थप्रतिपक्षभूतं वस्तु तत्प्रतिषेधद्वारेण
प्रतिपाद्यते तथानीप्सितशब्देनापि द्वेष्यं वस्तुपदमभिधीयते तदेव न गम्यते किं त्वनुसर्वमीप्सितादन्यदित्यर्थः॥ ॥ ॥श्री॥ ॥

=ननुप्रसज्यप्रतिषेधे ईप्सितं कर्म नेत्यर्थः स्यात्तथा युक्तः पूर्वेण कर्मत्वस्य तत्रैव =धर्मभिन्नबाधेपि नैवतथा गम्यते किंतु धर्मविरोधिनमानेत्यर्थः। विरोधस्यैव तदन्यत्वस्यापि नञर्थत्वस्मरणात्॰१=

अकथितं च ॥ ॥ केनेति। किं साधारणकारकसंज्ञया अथ विशेषसंज्ञाभिरपादानादिभिरिति प्रश्नः। अपादानादिभिरिति। कर्त्तरि करणे वा तृतीया। भूतकाले क्तः। अत्र न विवक्ष्यते। यथा पराजेरसोढ इत्यत्रासहिष्यमाणस्याप्यपादानसंज्ञा भवति अध्ययनात्पराजेष्यत इति। तेन हेतुकर्तृसंज्ञाप्राप्तौ ऽप्ययिष्यमाणस्यापि कर्मसंज्ञा न भवति। इह कारक इत्यनुवर्त्तनात्तस्यैव कारकत्वे ऽकथितस्य कर्मसंज्ञया भाव्यमिति सामर्थ्याद्विशेषकथाभिरकथितत्वमाश्रीयते। प्रश्नप्रतिवचनाभ्यां चासंकीर्तितवचनो ऽकथितशब्देन तु प्रधानवाची रूढिशब्दो ऽत्राश्रित इति दर्शितं। रूढिषु हि मुख्यसमर्थमेव क्रियोपादीयते न तु प्रवृत्तिनिमित्तत्वेन। तथा च गच्छतीति गौरित्युक्ते केनेति प्रश्ने रथेनेति प्रतिवचने भवति तथा गौरित्युक्ते प्रश्नप्रतिवचनेन भवतः। किमुदाहरणमिति। नटस्य शृणोतीत्यादौ तु विकर्मसंज्ञाप्रसंगः। अथवा ऽपादानादिभिः सर्वैः सविषयस्त्वापनादुदाहरणसंभवं मत्वा पृच्छति। उपयोगनिमित्तमिति। उपयुज्यत इत्युपयोगः पयः फलादि तस्य निमित्तं गवादि। अनेन गां दोग्धि पय इत्यत्र पयस उपयुज्यमानत्वादीप्सिततमत्वे गोस्तूपयोगत्वादुपादानस्यानीप्सिततमत्वं दर्शयति। तथायुक्तत्वाभावाच्च गोस्तथायुक्तमित्यनेनापि कर्मसंज्ञा न सिध्यति। अपूर्वविधाविति। पूर्वत्वमन्योपल

अकथितं च ॥ ॥ केनाकथितं अपादानादिभिर्विशेषकथाभिः। किमुदाहरणं दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ ॥ ब्रुविशासिगुणेन च यत्सचते तदकीर्तितमाचरितं कविना॥ दुहि। गां दोग्धि पयः। नैतदस्ति। कथितात्रापूर्वो ऽपादानसंज्ञा। दुहि॥ ० ॥

क्षणमिति परविधावपीयं संज्ञा न भवति। ब्रुविशासिगुणेनेति। ब्रुविशास्योर्गुणः साधनं प्रधानकर्म धर्मादिकं तेन यत्सचते यत्संबध्यत इत्यर्थः। क्रियायाः साध्यत्वात्प्राधान्यं। तदर्थत्वात्सर्वेषां कारकाणां गुणत्वादकथितेनेति। कविशब्दो मेधाविवचनः। क्रांतदर्शनात्। दुह्यादीनां चार्थोपलक्षणं योपादानात्। याचप्रयोगे ऽपि कर्मसंज्ञा भवति। ननु गां दोग्धि पय इत्यस्यायमर्थः। गोः पयस्स्रजति देवदत्तो गवा पयस्स्राजयति तत्र प्रयोजकव्यापारेणाप्यमानत्वाद्गोः कर्मत्वं सिद्धं। नैतदस्ति। यथा एपंते सुधातुषु क्रियावि[illegible]ष्टः प्रयुज्यत इति प्रतीतिः नैवमिह निष्क्रिय[illegible]स्यापि गवादेर्दोहनादिषु विनियोगात् गां दोग्धीति। दोहेनाप्यमानत्वेपि गोरीप्सितमत्वाभावान्न च पउपादानात्प्रकर्षस विवक्षितत्वादेशाप्ता कर्मसंज्ञा नेन विधीयते। दुह्यादिपरिगणनान्नटस्य शृणोतीत्यादौ न भवति। अकथितं चेति। गोः पय इत्याद्यत्र इसथोवगमात्॥

पौरवं गामिति। पौरवेण गां रिद्धाप्य विषतरसर्थः प्रतीयते। गोत्त्वे प्सितत्तमत्वं न पौरवस्य। कथितात्वेति। पौरवाङ्गां जिघृक्षतरसर्थे संप्रसार्यत्। नयाचनादेवेति। याचितापि याचनकाले नाध्ववस्यतिनूनमस्मादिदं वस्तु निर्गसमां प्राप्नोतीति भावः। अन्ववरुणद्धीति। गोव्रजं प्रविशति गांवा व्रजं प्रवेशयतीत्यर्थः। कथितेति। गांव्रजे स्थापयतीति संप्रसार्यात्। व्रजस्य स्थानक्रियापेक्षमाधारत्वं। माणकमिति। अश्वं चिरस्थापयिषति पंथानं माणवकेनेत्यर्थः। कथितेति। माणवकान्मार्गोपदेशं जिघृक्षतरतिसंप्रसार्यात्। न प्रश्नादेवेति। प्रश्नमान

याचितेद्ददंतर्हि पौरवं गां याचतरति। नैतदस्ति। कथितात्रपूर्वोऽपादानसंज्ञा। नयाचनादेवापायो भवति याचितो सौयदिददातितत्तोऽपायेन सुज्यते। याचि। रुधि। अन्ववरुणद्धि गां व्रजं। नैतदस्ति। कथितात्रपूर्वोधिकरणसंज्ञा। रुधि। प्रच्छि। माणवकं पंथानं पृच्छति। नैतदस्ति। कथितात्रपूर्वोपादानसंज्ञा। नप्रश्नादेवापायो भवति पृष्टोसौयद्याचष्टे ततोऽपायेन युज्यते। प्रच्छि। भिक्षि। पौरवं गां भिक्षते। नैतदस्ति। कथितात्रपूर्वोऽपादानसंज्ञा। नभिक्षणादेवापायो भवति भिक्षितो सौ यदि ददाति ततोऽपायेन युज्यते। भिक्षि। चिञ्। वृक्षमवचिनोति फलानि। नैतदस्ति। कथितात्रपूर्वोऽपादानसंज्ञा। ब्रुविशासि गुणेन च यत्सचते तदकीर्तितमाचरितं कविना। ब्रुविशासिगुणेन यत्सचते तच्चोदाहरणं। किं पुनस्तत्। पुत्रं ब्रूते धर्मं। पुत्रमनुशास्ति धर्ममिति। नैतदस्ति। कथितात्रपूर्वो संप्रदानसंज्ञा। नस्मात्री एषेवोदाहरणानि। पौरवं गां याचते माणवकं पंथानं पृच्छति पौरवं गां भिक्षते इति॥०॥

मनंगीकृतापायं धात्वर्थ इत्यर्थः। भिक्षियाचिवद्व्याख्येयः। अथ याचिभिक्ष्योः एकार्थत्वात्किमर्थमुभयोरुपादानं। उच्यते। अनुनयार्थस्यापि याचेर्ग्रहणार्थं। तेनाविनीतं विनयं याचत इत्यत्रापि कर्मसंज्ञा भवति। वृक्षमिति। वृक्षेण सार्जयति फलानीत्यर्थः। कथितेति। वृक्षात्फलान्यादत्त इत्यर्थो वस्यात्। पुत्रमिति। पुत्रो धर्मं प्रतिपद्यते पुत्रं धर्मं प्रतिपादयतीत्यर्थः। कथितेति। धर्मे एव च नानुशासनकर्मणा पुत्रस्याभिप्रेयमाणत्वात्॥ ॥ ॥ श्री॥ ॥

अथेति। सर्वोदाहरणव्याख्यार्थं उदाहरणत्रयवादिनं स्वमतानुरूपं व्याचष्टुमिति। इहासंकीर्तितपर्यायस्य कथितशब्दस्य ग्रहणे विवक्षा मे दुह्यो गोः। पयः इत्याद्यपि भवति। गो दुग्धि पयः इत्याद्यपि। पूर्वोक्ते नूदाहरणत्रये कर्मसंज्ञैव शेषाव्यवस्था। अप्रधानवचना कथितशब्दोपादाने तु अपादानसंप्रदानसंज्ञे बाधित्वा दुह्यादिषु कर्मसंज्ञैव स्यात्। इत्यसंकीर्तितमकथितमिहाश्रितं। तत्र कर्मणि लादय उत्पद्यमानाः प्राधान्याप्राधान्याभ्यां भिन्नकक्षमनेकं कर्म युगपदभिधातुमसमर्थाः। किं प्रधानकर्मण्युत्पद्यन्ते अथ गुणकर्मणीति प्रश्नः। कथितं इति। प्रधानेऽप्सिततमे इत्यर्थः। प्रधानाप्रधानसन्निधौ प्रधानस्यैवाभिधानस्य न्याय्यत्वात्। अथवा परः कथितस्यैवाभिधानमन्यते। अकथितस्य तु कारकत्वा

अथ ये धातूनां द्विकर्मकास्तेषां किं कथिते लादयो भवेयुः आहोस्विदकथिते। कथिते। कथिते लादिभिरभिहिते गुणकर्मणि का कर्तव्या। कथिते लादयश्चेत्स्युः षष्ठी कुर्यात्तदा गुणे। कथिते लादयश्चेत्स्युः षष्ठी गुणकर्मणि तदा कर्तव्या। दुह्यते गोः पयः। याच्यते पौरवस्य कम्बल इति। कथं। अकारकं ह्यकथितात्। अकारकं ह्येतद्भवति। किं कारणं। अकथितत्वात्। कारकं चेत्तु नाम्यथा। अथ कारकं नाकथितं। अथ कारके सति का कर्तव्या। कारकं चेद्विजानीयाद्यां यां मन्येत सा भवेत्। कारकं चेद्विजानीयाद्यां यां मन्येत सा कर्तव्या। दुह्यते गोः पयः। याच्यते पौरवात्कम्बल इति। कथिते अभिहिते त्वविधिस्त्वमतिर्गुणकर्मणि लादिविधिः सपरे। कथिते लादिभिरभिहिते त्वविधिरेष भवति। किमिदं त्वविधिरिति॥ ॥

भावात् अभिधानासंभवमेवेति यद्वक्ष्यति षष्ठी कुर्यात्तदा गुणे इति। अकारकमिति। अपादानादिष्वेव विशेषेषु कारकत्वं सामान्यं स्थितं न तु विशेषरहितस्य सामान्यस्य स्थितिरस्तीति भावः। अथ कारक इति। यदा विशेषाश्रयणं दृष्टिः सामान्यमित्यर्थः। यां यामिति। उद्देश एव वीप्सा प्रतिपन्ने तु सा भवेदिति प्रतिनिर्देशे न विवक्षिता। दुह्यते गोरिति। अपादाने गोः। याच्यते पौरवादिति। ननूदाहरणत्रयवादी पौरवस्य कर्मत्वमिच्छन् स्वेनेव कथं पौरवादित्युक्तो। अत्रोच्यते। न्यायस्य समानत्वादत्राप्यपादानत्वं मन्यते। तथा हि। याच्यते पौरवात्कम्बल इत्यस्य पौरवात्कम्बलं प्राप्तुमित्यर्थः। ततो बुद्धिकृतस्यापायस्यात्र संभवः। कथित इति। प्रधानकर्मणि लादिभिरभिहिते त्वविधेयं मतिर्ये उक्तं गुणे षष्ठी भवति चतुर्थी पंचम्यौ चेति॥ ॥

तद्विधिरिति॥ अस्य पदेन विग्रहः। त्वशब्दस्त्वन्यवाची। यथोक्तत्वः पयस्त्रितिपस्पशायामुक्तं। युष्मदर्थे सापि तत्पेक्षावशादन्यत्वमस्तीत्येवमुक्तं। इदानीं न्याय्यं पक्षं दर्शयति। गुण
कर्मणीति। लादयो लकारसरूपखलर्थाः। गौर्दुह्यते पयः। गोर्दोग्धव्यं पयः। गोर्दुग्धा पयः। गोः सुदोहा पयः। अनेन दुह्यादयः सर्वे एवोदाहरणानीति दर्शितं। तत्र सन्न
प्यपायो यदा न विवक्ष्यते निमित्तमात्रं विवक्ष्यते तु गोस्तदानेन कर्मता। अपादानादिविशेषैर्निर्मुक्तं च विद्यते कारकं यथा नटस्य शृणोतीति। यत एव पयोर्थी प्रथ
मं गां विप्रवर्त्तते ततोऽन्तरंगत्वाद्दुह्यादिषु गुणकर्मणि लादयो भवंति। सत्यपि चान्तरंगत्वे गवादीनामीप्सिततमत्वाभावोऽन्यार्थत्वात्तत्र क्रियाप्रवृत्तेः। पयसस्तु विवक्षा
यां गोरेवेप्सिततमत्वं। यथोक्तमपादानमुत्तराणि गां दोग्धीति। पयो विवक्षायां च प्राधान्येप्यंतरंगत्वाद्दुहोऽणादयः। उक्तं च। गुणकर्मणि लादिविधिः पूर्वं गुणकर्म
णा भवतियोगात्। मुख्यकर्मणोऽपेक्षुर्थसाकांक्षत्वात्तत्र प्राक्। तस्माच्च दुहस्तु हेर्भवति गवा पूर्वमेव संबंधः। गोर्दुहिना पयसस्तु प्राक् तस्माल्लादयस्तत्रिस्मिन्निति। अ

तद्विधिस्त्वविधिः। त्वमतिः। किमिदं त्वमतिरिति। तव मतिस्त्वमतिरिति। नैवमन्ये मन्यंते। कथं तर्ह्यन्ये मन्यंते। गुणकर्मणि लादिविधिः सपरे गुण
कर्मणि लादयो भवंति सह परेण योगेन। गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णाविति। ध्रुवचेष्टितयुक्तिषु चाप्यगुणे तदन
ल्पमतेर्वचनं स्मरत। ध्रुवयुक्तिषु चेष्टितयुक्तिषु चाप्यगुणे कर्मणि लादयो भवंतीति तदनल्पमतेराचार्यस्य वचनं स्मर्यतां॥ ॥

पादानविवक्षायां तु पंचमी भवति। गोर्दुह्यते पय इति। यदा तु पयो विशेषणत्वेन विवक्ष्यते तदा षष्ठी गोः पयो दोग्धीति। माणवकाय धर्मं ब्रूत इत्यपि भवति यदा धर्मेण
माणवकस्याभिप्रेयमाणत्वं न लक्ष्यते तदविवक्षायां त्वनेन कर्मत्वं। सपर इति। उत्तरसूत्रेप्ययमेव विधिरित्यर्थः। बोध्यते माणवकं धर्मः। श्राव्यते माणवकं श्लोकः। भोज्यते मा
णवकमोदनमिति। प्रयोजकव्यापारेणाप्यमानत्वात् माणवकस्य प्राधान्यं धर्मादेस्तु गुणभावः। ध्रुवेति। अगुणे प्रधानकर्मणि। ध्रुवयुक्तिष्वकर्मकेषु चेष्टितयुक्तिषु च
गत्यर्थेषु च लादयो भवंति। पूर्वाचार्यप्रसिद्ध्या ध्रुवयुक्तयोऽकर्मका उच्यंते। तेषां हि क्रियासामान्यस्यावस्थितानुकर्मा यथा। तत्र ध्रुवनिष्ठोऽकर्मको धात्वर्थ उच्यते। तेन
मासमास्यते देवदत्तः। शाय्यते क्रोशं देवदत्त इति प्रयोज्ये देवदत्ते प्रयोजकव्यापारस्य तत्रैवेर्वसन्निपाताल्लादयो भवंति। तथा गम्यते ग्रामं देवदत्त इत्यत्रापि। अनल्पमते
रिति। मेधाविन आचार्यस्येत्यर्थः। स्मरतेति। आगमस्याविच्छेदमनेन दर्शयति॥ ॥श्री॥ ॥ ॥

आगम एवायं न स्वमतिपरिकल्पनेति दर्शयितुमाह। अपर इति। अजा नीयत इति। अजायाः प्राधान्ये तु श्रुतत्वात्तस्यामेव प्रवृत्ते क्रियाप्रवर्त्तनादन्तरङ्गत्वाच्च तस्यामेव लादयः। एवं तेन कर्तुरुक्तकर्मण
इति। कर्तुः सतो एवं तेधा तेः कर्मणो वाचकाः लादयो भवन्ति। गतिबुद्धीत्यनेन नयस्य प्रयोज्यस्य कर्मसंज्ञा विधीयते तस्मिन्वाच्ये सर्वेषु गत्यर्थादिषु धातुषु लादयो भवन्तीत्यर्थः। पूर्वश्लोके तु भेदे
नोक्तं गत्यर्थाकर्मकेषु प्रधाने कर्मणि। बुद्धिप्रत्यवसानार्थशब्दकर्मकेषु तु सपर इत्यनेन लादयो गुणकर्मणि। प्रयोज्यकर्मण्येव लादयो दर्शयन्त इत्येकेषां मतं। माणवकं धर्मं ब्रूते माणवकं
धर्मं बोधयतीत्यादौ अनियतो गुणप्रधानभाव इत्याह। धर्मप्रतिपादनपरत्वे वाक्यस्य धर्मस्य प्राधान्यं माणवकस्य गुणभावः। माणवकसंस्कारपरायां प्रवृत्तौ माणवकस्य प्राधान्यं
धर्मस्य गुणभावः। तथाऽभिधानव्यापारे प्रयोजकव्यापारस्य प्राधान्यात्प्रयोज्यस्यैव कर्मणः प्राधान्यं। गुणभूतप्रयोज्यव्यापारकर्मणस्तु गुणभावः। अर्थे न तु व्यापारेण प्रयोज्यव्या

अपर आह। प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणां। अप्रधाने कर्मण्यभिधेये द्विकर्मणां धातूनां कर्मणि लादयो भवन्तीति वक्तव्यं। अजां नयति ग्रामं। अजा नीयते
ग्रामं। अजा नीता ग्राममिति। अप्रधाने दुहादीनां। अप्रधाने दुहादीनां कर्मणि लादयो भवन्तीति वक्तव्यं। दुह्यते गौः पयः। एवं तेन कर्तुरुक्तकर्मणः लादयो भवन्ती
ति। गम्यते यज्ञदत्तो ग्रामं देवदत्तेन। के पुनर्धातवो द्विकर्मकाः। नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च। द्विकर्मकेषु ग्रहणं। अजां नयति ग्रामं भारं वहति ग्रामं भा
रं हरति ग्रामं। गत्यर्थानां। गमयति देवदत्तं ग्रामं। यापयति देवदत्तं ग्रामं। सिद्धं वाप्यन्यकर्मणः। सिद्धं वा पुनरेतद्भवति। कुतः। अन्यकर्मणः। अन्यस्यात्राजा कर्म
ऽन्यस्य ग्रामः अजामसौ गृहीत्वा ग्रामं नयति॥ ॥ ॥

पारस्य प्राधान्ये। तदर्थत्वात्प्रयोजकव्यापारस्य तत्प्राधान्यात्तत्कर्मणोपि प्राधान्यं वदन्त आचार्याः दुह्यादिपरिगणनाद्दृश्यत्र द्विकर्मकत्वं न प्राप्नोतीति दृश्यते चेति मत्वा पृच्छति। के पुनरी
ति। गत्यर्थानामिति। उत्तरसूत्रोपात्तधातूपलक्षणं गत्यर्थग्रहणं। तथैव चेति। चकारेण जयत्यादयः समुच्चीयन्त इत्याह। शतं जयति देवदत्तं। शतं मुष्णाति देवदत्तं। शतं दण्डयति देवदत्तं। सिद्धं वे
ति। अन्यस्याश्रूयमाणस्य क्रियाविशेषस्य कर्मणः संभवादित्यर्थः। अथवा कर्मशब्देन कर्मत्वमुच्यते। अन्यकर्मत्वादित्यर्थः। विभाषा गुणे इति पंचमी। यथा प्रविश पिण्डीमिति भक्षणापेक्षं पि
ण्ड्याः कर्मत्वं तथा जामं नयतीत्यत्र ग्रहणापेक्षमजायाः कर्मत्वं। नयतिस्तु प्राप्तिमात्रवाची तेनाजां गृहीत्वा ग्राममप्राप्नोतीति गम्यार्थः संपद्यते॥ ॥ ॥

भा०कै०म०
३१५
३१७

परसाधन इति॥ नीयते इति नयतेः परेणालंकारेण नयतिकर्मैवाभिधानीयं ग्रहणमसत्यजाकर्मेन नयतेरिति कर्थंमात्वेनाभिधीयते। तस्मादन्यकर्मत्वमजाया नेष्टव्यं। कालेति। मासादय एव कालवाचित्वेन लोके प्रसिद्धाः ननु गोदोहनपाकादय इति सत्यपि भावस्य कालत्वे पृथगुपादानं कृतं। निर्ज्ञातपरिमाणा हि क्रिया अनिर्ज्ञातपरिमाणायाः क्रियायाः परिच्छेदायोपादीयमाना मासगोदोहादिशब्दवाच्या काल इति निदर्शनं। अध्वाचासौ गंतव्यो ऽध्वगंतव्यः। अत एव निपातनात् विशेषणस्यापि परनिपातः। गंतव्यतया लोके यः प्रसिद्धः क्रोशयोजनादिनियतपरिमाणः तस्यैव कर्मत्वं नान्यस्येत्यध्वानं स्वपितीति न भवति। केचिदध्वगंतार इति पठंति। तत्रायमर्थः। गंतेरंतो निष्ठानिष्ठयोवा येषु ते गंतारः क्रोशयोजनादयः। अध्वनो गंतारः इति षष्ठीसमासः। कर्मसंज्ञा हीति। ननु कालाध्वनोरिति द्वितीया सिद्धेति किं कर्मसंज्ञया। गोदोहादीनां कालत्वेनाप्रसिद्धत्वात् द्वितीया न प्राप्नोतीति भावस्यतावत्कर्मसंज्ञा विधेया। कालाध्वनोरपि लादिविधानार्थं कर्मत्वमेषितव्यं। आस्यते मासः। आसितव्यो मासः। आसितो मा

अन्यकर्मेति चेद्ब्रूयाल्लादीनामविधिर्भवेत्। अन्यकर्मेति चेद्ब्रूयात् लादीनामविधिरयं भवेत्। अजा नीयते ग्राममिति। परसाधन उत्पद्यमानेन लेनाजाया अभिधानं न प्राप्नोति। कालभावाध्वगंतव्याः कर्मसंज्ञा ह्यकर्मणां। कालभावाध्वगंतव्या अकर्मणां धातूनां कर्मसंज्ञा भवंतीति वक्तव्यं। कालः। मासमास्ते। मासं स्वपिति। भावः। गोदोहमास्ते गोदोहं स्वपिति। अध्वगंतव्याः। क्रोशमास्ते। क्रोशं स्वपिति। देशश्चाकर्मकाणां। कर्मसंज्ञो भवतीति वक्तव्यं। कुरून् स्वपिति पंचालान् स्वपिति। विपरीतं तु यत्कर्म तत्कल्म कवयो विदुः। किमिदं कल्मेति। अपरिसमाप्तं कर्मकल्म। न वा अस्मिन्सर्वाणि कर्मकार्याणि क्रियंते द्वितीयेव॥ ॥ ॥

सः। आसो मासः। एवं शय्यते क्रोश इत्यादि द्रष्टव्यं। यदालंगीकृतसकर्मकधात्वंतरार्थे आसनादावास्यादयो वर्त्तंते तदा पूर्वे गौणकर्मत्वं सिद्धं। तथा हि। मासमास्त इत्यस्यायमर्थः। मासमासनेन व्याप्नोतीति। तथा च वक्ष्यति। मासं कृत्स्नमेवेदं कर्म यथा कटं करोतीति। अत्र दर्शनेन केवलमकर्मकाणां कालादयः कर्मत्वं प्रतिपद्यंते अपि तु सकर्मकाणामपि न्यायस्य तुल्यत्वात्। देशश्चेति। संस्थायविशेषः कुरुपंचालादिर्देश इह गृह्यत इति भाष्य उदाहरणाद्विज्ञायते। इदानीमकथितस्य पूर्वाचार्यकृतं संज्ञांतरं दूषयितुमुपन्यस्यति। विपरीतमिति। कर्मधर्माणां विपर्ययत्वाद्विपरीतमुच्यते। ईप्सिततमं हि ध्येयं इतरच्चेति पूर्वं त्रिविधं निर्दिष्टं इदं तद्विपरीतं। कपित्थकादित्वाच्चलत्वे कल्मेति भवति। अपरिसमाप्तमिति। ईप्साशकर्षो भावादिसर्गः। न वेति। लक्षणस्य कृतत्वाद्यो नाम विधानाय धानकर्मण्यभिधेय इति पूर्वमुक्तत्वात्। दुहादीनां तु प्रधानकर्मणि लादिविधानानुष्ठ एवायं पक्षः। तथा च परस्ताद्दूषयिष्यते॥ ॥ — — ॥

एम०
३१५

तस्यैव विपरीतकर्मणो लक्षणं दर्शयति। यस्मिंस्त्विति। यस्मिन्नश्वादौ कर्मणि सत्यन्यस्य पयः प्रभृतेरुपजायते तत्कर्म कल्प्यं धात्वर्थयोगेति। धातुशब्देन धात्वर्थ उच्यते। तस्यार्थः प्रयो
जनं पयः प्रभृति तेन योगो यस्याः सा षष्ठी यत्र भवति। गोर्दुह्यते पयः पौरवस्य कंबलो याच्यत इति। प्रधाने तु न भवति षष्ठी दुह्यते पयसो गौरिति। इत्यादीनि संज्ञान्तरमनारभमाणा न्या
हा कल्प्यमनोक्तमिति। यस्मात्तत्कर्मैव तस्मात्तत्र षष्ठ्यनोक्तेऽस्मिन्शास्त्रे। दुहादीनामप्रधानकर्मणि लादिदर्शनात्। सर्वे कर्मकार्ये पपसा अपरिसमाप्तत्वाभावात्।
भेदेन च कल्प्यसंज्ञाविधानेन कर्मकार्यप्रसंगादिति भावः। धातोर्हि वृत्तिरिति। रेफस्य लत्वमात्रेण धातोरर्थान्तरे वृत्तिर्नास्तीत्यर्थः। क्वचित्तु पाठः धातोर्निवृत्तिरिति। त
त्रायमर्थः। धातोः कृपे तेरेफस्य लत्वमात्रेण स्वार्थान्निवृत्तिर्नास्तीति। एतदुक्तं भवति। वर्णविकारेऽपि कृतेकर्मकल्प्यशब्दयोः पर्याय एव। यथा पांसुरपांसुलशब्दयोः।
तत्र किं संज्ञाभेदेनेत्यर्थः। एतेनेति। अकथितं कर्मेत्येवास्तु माभूत्सूत्रद्वयं तद्विषयेनैव कर्मसंज्ञायाः सिद्धत्वात्। परिगणनं च न करिष्यत इति प्रश्नार्थः। यत्त्विति।

यस्मिंस्तत्कर्मण्युपजायते स्वधात्वर्थयोगापि च यत्र षष्ठी। तत्कर्म कल्प्यमिति च कल्प्यमनोक्तं धातोर्हि वृत्तिर्नेरल्लत्वतोऽस्ति। एतेन कर्मसंज्ञासिद्धा भवस्त्वकथि
तेनातत्रेप्सितस्य किं स्यात् प्रयोजनं कर्मसंज्ञायाः। यत्त्वकथितं पुरस्तादीप्सितयुक्तं च तस्य सिध्यर्थं। ईप्सितमेव तु यस्मात्तस्य भविष्यत्यकथिते
" नाप्येह कथं भवितव्यं नेताश्वस्य स्रुघ्नमिसाहोस्विन्नेताश्वस्य स्रुघ्नस्येति॥ ॥

यथेप्सोगावारयतीतिगवां कथितत्वात्कर्मसंज्ञा नस्यात् वारणार्थानामित्यपादानसंज्ञैव तु स्यादिति कर्तुरीप्सिततममिसाधारव्ध्यम्। नन्वतथा युक्तस्थाने न भविष्यति।
नेतद्स्ति। दुह्यादिपरिगणनं न रसस्मृणोतीसादौ अतिप्रसंगनिवृत्त्यर्थमवश्यं वक्तव्यं। ईप्सितयुक्तं चेति। ईप्सितेन पयआदिना युक्तं पक्वादिवार्यमाणं तस्य कर्मसंज्ञा
सिध्यर्थं पूर्वसूत्रं कर्त्तव्यमित्यर्थः। चशब्दात्कर्मापादानसंज्ञयोर्विषयविभाग सिध्यर्थं चेत्युक्तं भवति। ईप्सितमेवेति। अवधारणेनेप्साप्रकर्षाभावं दर्शयति। अकथितेनेति।
सूत्रैकदेशानुकरणमेतत्। अनेन सूत्रेणेत्यर्थः। अपेहेति। प्रधानेकर्मण्यभिधेये लादीनाह्युक्तं। तत्र लादिग्रहणेन किं षष्ठ्यपि गृह्यते उत न। यद्यादिशब्दोव्यवस्था
यां तदा ल्तः कर्मणि च भावे चाकर्मकेभ्य इत्येतयोरेवक्तसक्तवत्वर्थाः इत्येतेषां ग्रहणं स्यात्। अथ प्रकारे तदाषष्ठ्यपि लादिग्रहणेन गृह्यत इति प्रधानकर्मण्येव सा भवतीति मत्वा
" प्रश्नः॥॥

उभयथेति। गुणकर्मणि षष्ठीद्वितीयादर्शनादुभयमपि स्मर्यते। वाचनिकं चेदं नकुस्मापं यत्र ह्येकेनैव शब्देनाभिन्नकर्तृकयोर्गुणप्रधानयोः कर्मणोरभिधानं न सम्भवति तत्र प्रधानकर्मण एवाभिधानं न्याय्यं। षष्ठीतु शेषत्वेन गुणप्रधानाभ्यां द्वितीया च द्विधीयते इति विशेषाभावादुभाभ्यां प्राप्तिशिष्टस्मरणादुणकर्मणि विकल्प्यते॥ ॥गतिबुद्धि॥ ॥कथमिति। कर्मशब्देन कश्चित्क्रियागृह्यते। यथा कर्त्तरि कर्मव्यतिहार इति। कश्चित्तु साधनं कर्म यथा वेः शब्दकर्मण इति। ततश्चोभयथा व्यवहारदर्शनात्संशयानः पृच्छति। ह्वयत्यादीनामिति। ह्वयत्यादयो धातवः साध्यमानावस्थं क्रियारूपं शब्दमभिदधतीति शब्दकर्मत्वादणिप्रसंगे सति प्रतिषेधो विधेयः। ह्वय

उभयथा गोणिकापुत्रः॥ ॥गतिबुद्धिप्रत्यवसानार्थशब्दकर्माऽकर्मकाणामणिकर्त्ता स णौ॥ ॥शब्दकर्मेति कथमिदं विज्ञायते शब्दो येषां क्रियेत्याहोस्विच्छब्दो येषां कर्मेति। कश्चात्र विशेषः। शब्दकर्मनिर्देशे शब्दक्रियाणामिति चेत् ह्वयत्यादीनां प्रतिषेधः। शब्दकर्मनिर्देशे शब्दक्रियाणामिति चेत् ह्वयत्यादीनां प्रतिषेधो वक्तव्यः। के पुनर्ह्वयत्यादयः। ह्वयतिक्रन्दतिशब्दायते। ह्वयति देवदत्तः ह्वाययति देवदत्तेन। क्रन्दति देवदत्तः। क्रन्दयति देवदत्तेन। शब्दायते देवदत्तः शब्दाययति देवदत्तेन। शृणोत्यादीनामुपसंख्यानमशब्दक्रियत्वात्। शृणोत्यादीनां चोपसंख्यानं कर्त्तव्यं। के पुनः शृणोत्यादयः। शृणोति विजानात्युपलभते। शृणोति देवदत्तः। श्रावयति देवदत्तं। विजानाति देवदत्तः। विज्ञापयति देवदत्तं। उपल

भते देवदत्तः। उपलम्भयति देवदत्तं। किं पुनः कारणं न सिध्यति। अशब्दक्रियत्वात्॥ ॥

तिदेवदत्त इति। पुत्रादेः कर्मणो भावादकर्मकत्वं ह्वयतेर्नोपपद्यते। नीयां शब्दायते इति। शब्दं करोतीति शब्दवैरेति क्यङ्। शब्दलक्षणस्यात्र कर्मणोऽन्तर्भावात् कर्मान्तरायोगाच्चाकर्मकत्वादपि कर्मसंज्ञाप्रसंगः। शृणोत्यादीनामिति। शब्दोपलब्धिरूपेऽर्थे वर्त्तमानाः शृणोत्यादयः शब्दक्रिया न भवन्ति। शब्दसाधनकर्मणस्तु तद्विषयत्वेन प्रयोगात्। न चैषां बुध्यर्थत्वं। शृणोत्यादयो हि न ज्ञानमात्रवचनाः बुध्यर्थो विजानात्युपलभतश्चेतौ यद्यप्युपलब्धिमात्रवचनौ तथापि प्रयोजकव्यापारविवक्षायां प्रकरणादिवशाच्छब्दविषयामेवोपलब्धिं प्रत्यायतस्तस्य शब्दसाधनकर्मग्रहणेऽपि भवति न तु क्रियाग्रहण इत्युपसंख्यानं कर्त्तव्यं। एवं तु बुध्यर्थत्वादनयोः सिध्यतीति चिंतामेतत्॥ ॥

जल्पतिप्रभृतीनामिति। जल्पसारयः शब्दान्क्रियां वर्जन्ते इति क्रियाग्रहणे सिध्यति न तु साधनकर्मग्रहणे। पुत्रं जल्पतीत्यादौ शब्दकर्मत्वाभावात्। दृशेः सर्वत्रेति। यदि क्रियाग्रहणमथ साधनग्रहणमथोभयग्रसाश्रयणं सर्वत्र दृशेः न प्राप्नोतीति भावः। पश्यति रूपतर्क इति। चक्षुःप्रणिधानद्वारकउपलंभे यदा दृशिर्वर्त्तते तदैतदुदाहरणम्। अन्यत्र तु बुध्यर्थत्वात्सिध्यति। तत्र साधनकर्मग्रहणमिति पक्षस्याश्रीयते। क्रियाग्रहणे कर्मग्रहणानर्थक्यप्रसंगात्। गतिबुद्धिशब्दप्रत्यवसानार्थकर्मकाणामित्येव सिद्धत्वा

अस्मिन्नर्थे शब्दायेषां कर्मेति। शब्दकर्मण इति चेज्जल्पतिप्रभृतीनामुपसंख्यानं। शब्दकर्मण इति चेज्जल्पतिप्रभृतीनामुपसंख्यानं कर्त्तव्यं। के पुनर्जल्पतिप्रभृतयः। जल्पति विलपति आभाषते। जल्पति देवदत्तः जल्पयति देवदत्तं। विलपति देवदत्तः विलापयति देवदत्तं। आभाषते देवदत्तः आभाषयति देवदत्तं। दृशेः सर्वत्र। दृशेः सर्वत्रोपसंख्यानं कर्त्तव्यं पश्यति रूपतर्कः कार्षापणं। दर्शयति रूपतर्कं कार्षापणं। आदिखादिनीवहीनां प्रतिषेधः। आदिखादिनीवहीनां प्रतिषेधो वक्तव्यः। अत्ति देवदत्तः। आदयति देवदत्तेन। अपर आह। सर्वमेव प्रत्यवसानकार्यमदेर्न भवतीति वक्तव्यं परस्मैपदमपि। इदमेकमिष्यते। क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः। इदमेषां जग्धं। खादि। खादति देवदत्तः। खादयति देवदत्तेन। नी। नयति देवदत्तः नाययति देवदत्तेन। वहेरनियन्तृकर्तृकस्य। वहेरनियन्तृकर्तृकस्येति वक्तव्यं। वहति भारं देवदत्तः। वाहयति भारं देवदत्तेन। अनियन्तृकर्तृकस्येति किमर्थं। वहन्ति बलीवर्दा यवान्। वाहयति बलीवर्दान्यवान्॥ ॥ ॥

त्पुत्रादिकर्मत्वे जल्पतिप्रभृतीनामुपसंख्यानं कर्त्तव्यमेव। श्लोकादिशब्दविशेषकर्मकत्वे तु शब्दकर्मत्वात्सिद्धिः। दृशेर्बुध्यर्थत्वादेव ग्रहणं सिध्यति। आदिखादीति। आदिखाद्योः प्रत्यवसानार्थत्वात्प्राप्तिः। नीवह्योर्गत्यर्थत्वात्। यद्यपि न गतिहिंसार्थेभ्य इत्यत्र न वहिर्गत्यर्थ इत्युक्तं भाष्ये। तथापि वहेरनियन्तृकर्तृकस्येत्यभिधानाय वहेरुपक्षेपः। परस्मैपदमिति। निगरणचलनार्थेभ्यश्चेति प्राप्तं। वहेरिति। नियन्ता सारथिः॥ ॥ ॥

भक्षेरिति। अणिकर्त्तेति हेतुमण्णिचो निषेधाच्चुरादिएयंतोप्ययं तनएवेति भावः। भक्षयंतियवान्निति। क्षेत्रस्थानां प्ररोहाद्यवस्थायांयवानां भक्षणाद्धिंसा भवति। तदवस्थायां केचिच्चैतन्यस्याभ्युपगमात्। परकीययवभक्षणेवा परोहिंसितो भवति। हिंसांगे भक्षणेनुभक्षिर्वर्त्तते। कालकर्मणामिति। कालग्रहणेन साहचर्यात्सर्वे सह निर्दिष्टत्वा द्भावाध्वदेशानामपि ग्रहणं। वक्ष्यमाणन्यायस्यतुल्यत्वाद्वा। सिद्धमिति। तेनमासमास्यते देवदत्तेनेत्यादावकर्मकेभ्यो भावे विधीयमानो लादयः सिद्धा भवंति। स्थास्यंचा भावत्वं कर्मत्वं। तेन मासमास्यते देवदत्तेनेत्यादौ कर्मण्यपि भवंति। नचकेचिदिति। ननु क्रियामात्रविवक्षायां कालादीनामविवक्षितत्वात्तैरप्यकर्मकत्वं

भक्षेरहिंसार्थस्य। भक्षेरहिंसार्थस्येति वक्तव्यं। भक्षयति पिंडीं देवदत्तः भक्षयति पिंडीं देवदत्तेन। अहिंसार्थस्येति किमर्थं। भक्षयंतियवान्ब लीबर्द्दाः भक्षयति बलीबर्द्दान् यवान्। अकर्मकग्रहणे कालकर्मणामुपसंख्यानं। अकर्मकग्रहणे कालकर्मणामुपसंख्यानं कर्त्तव्यं। मासमास्ते देवदत्तः। मासमासयति देवदत्तं। मासं शेते देवदत्तः मासं शाययति देवदत्तं। सिद्धंतु कालकर्मणामकर्मकवद्वचनात्। सिद्धमेतत्। कथं। कालक र्मका अकर्मकवद्भवंतीति वक्तव्यं। तत्तर्हि वक्तव्यं। नवक्तव्यं। अकर्मकाणामित्युच्यते। न च केचित्कालभावाध्वभिरकर्मकाः तएवं विज्ञास्यामः॥

१ क्वचिद्ध्यकर्मका इति॥ ॥ श्री॥

भवसेवायथा शेते देवदत्तो न भुंक्ते इति। अत्राहुः। असंतावि द्यमानकर्माणो धातवोऽकर्मकग्रहणेनगृह्यंते नत्वविवक्षितकर्माणः। अन्यथा पचादीनामपि कर्माविवक्षायामकर्मकत्वनिबंधनानि कार्याणि भवेयुः। अकर्मकशब्दस्य च धातवोऽन्यपदार्थत्वेनाश्रीयंते नत्वर्थाः। अर्थाश्रयणेहि कर्माविवक्षायामर्थस्याक र्मकव्यपदेशः स्यात्। धातुपाठश्रीयमाणेषु क्वचिदपि कर्मसंबंधदर्शनेन सारूप्यात् एवेन इति तत्तत्प्रसयविषयानाकर्मत्वेनव्यपदिश्यंते। अर्थास्तुकौरकादिभिर्द्दाड्डि न्ना एवं ऽन्येसकर्मका अन्ये त्वकर्मका इति साद्यपदेशः। पदात्वर्थस्यापि सत्वं तोनास्ति भेदइति दर्शनेनतदार्थे धात्वन्यपदार्थे घटो ऽपः क्वचिदिति। द्रव्यएव कर्मणि सत्सकर्मका

१ इत्यर्थः॥ ॥

अथवायेनेति॥ संभवव्यभिचाराभ्यां विशेषणविशेष्यभावे सर्वत्र स्तः स्थिताः विवक्षिता अपि कालादयः संतीति न तैः केचिदकर्मका इत्यर्थः॥ अथ वेति॥ अकर्मकश्रुसांतरंगं द्रव्यकर्मनिषिध्यते न बहिरंगं कालादिकर्म। तथा हि। पूर्वं क्रियया द्रव्यकर्मणा सह संबंधो भवति पश्चात्कालादिभिः परिमाणनिर्धारणाय। तथा चोक्तं। शक्तिप्रमाणसंख्यादेर्द्रव्यधर्मो ऽनुवर्तते। क्रियासु कालयोगो ऽतः प्राग्यो द्रव्यकर्मणा इति। सूत्रं चेदं नियमार्थमिति कृद्ग्रहणसूत्र उक्तं तत एवावधार्यं॥ हृक्रोः॥ ॥उभयत्र विभाषेयमिति नवेति विभाषेत्युक्तं। अभिवादिदृशोरिति।

अथवा येन कर्मणा सकर्मकाः स्युरकर्मकाश्च भवंति तेनाकर्मकाणां। न चैतेन कर्मणा कश्चिदप्यकर्मकः। अथवा यत्कर्म भवति न च भवति तेनाकर्मकाणां। न चैतत्कर्म क्वचिदपि न भवति॥ हृक्रोरन्यतरस्यां॥ हृक्रोर्वा वचने ऽभिवादिदृशोरात्मनेपद उपसंख्यानं। हृक्रोर्वा वचने अभिवादिदृशोरात्मनेपद उपसंख्यानं कर्तव्यं। अभिवदति गुरुं देवदत्तः अभिवादयते गुरुं देवदत्तेन अभिवादयते गुरुं देवदत्तं। पश्यंति भृत्या राजानं दर्शयते भृत्यैराजा दर्शयते भृत्यान्राजा। कथं चात्मनेपदं। एकस्य णेरणाविति अपरस्य णिचश्चेति॥ ॥स्वतंत्रः कर्ता॥ ॥किं यस्य स्वतंत्रेसः स्वतंत्रः। किं चातः। तंतुवाये प्राप्नोति। नैष दोषः। अयं ■ तंत्रशब्दो ऽस्त्येव वितानेवर्त्तते। तद्यथा। आस्तीर्णं तंत्रं प्रोतं तंत्रमिति। वितानमिति गम्यते॥ ॥ ॥

=वितानमिति॥ स च सन्निवेशविशिष्टतंतुसमूहो बोध्यः॥१॥

अभिवादयतावुपात्तं कर्मसंज्ञापक्षे विधीयते दृशेर्बुध्यर्थत्वान्नित्यस्य प्राप्ते पक्षे निवर्त्यते॥ ॥स्वतंत्रः कर्ता॥ ॥किं यस्येति। तंतुवायस्य स्वतंत्रं वाच्यत्वाद्विशेषानुपादानाच्च प्रश्नः। तंतुवाय इति। यद्यपि तंतुवायो वयति भुंक्ते इत्यादौ तंतुवायस्य कर्तृसंज्ञेष्यते तथापि विशेषविहितत्वात्सरत्वाच्चापादानादिसंज्ञाविषये ऽपि सा प्राप्नोति ब्राह्मणेनाधीत इत्यादौ ब्राह्मणहेतुं प्राप्नोतीति दोषः। वितान इति। वितन्यत इति वितानं॥ ॥श्री॥ ॥श्री॥ ॥

भा०कै०प्र०
३२२
३२२

स्वातंत्र्याभावात्

स्वतंत्रो ब्राह्मण इति। स्वशब्द आत्मवाची। स्व आत्मा तंत्रं प्रधानं यस्य स स्वतंत्र उच्यते। तत्र कारकाधिकारात् क्रियासिद्धौ प्राधान्यस्योपयोगात् तंतुवायस्यापि तंतुवायरूपतया तत्रानुप-
योगात् प्रधानवाचिनः तंत्रशब्दस्येह ग्रहणं। अनेककारकसाध्यायामपि क्रियायां यथा कस्यचित् स्वातंत्र्यं तथा कारकसूत्रे प्रतिपादितं। यस्य धातुना व्यापारो गुणभा-
वेनोच्यते सर्वोसौ स्वतंत्र इत्येतदपि तत्रैवाभ्युक्तं प्रतिपादितं। हेतुमतीति। प्रयोज्य इत्यर्थः। यथा कर्त्तुः सन्निधौ करणादीनां नास्ति स्वातंत्र्यं तथा प्रयोजकस-
न्निधौ प्रयोज्यस्य पारतंत्र्यात् कर्त्तृसंज्ञायामप्रसंगात् पाचयत्योदनं देवदत्तेनेति कर्त्तरि तृतीया न प्राप्नोति। तत्प्रयोजक इत्यत्र चकारेण परामर्शो न प्रप-

अस्ति प्राधान्येव वर्त्तते। तद्यथा। स्वतंत्रो ब्राह्मण इत्युच्यते स्वप्रधान इति गम्यते। नद्यः प्राधान्येव वर्त्तते तत्र शब्दस्तस्येदं ग्रहणं। स्वतंत्रस्य कर्त्त-
संज्ञायां हेतुमत्युपसंख्यानमस्वतंत्रत्वात्। स्वतंत्रस्य कर्त्तृसंज्ञायां हेतुमत्युपसंख्यानं कर्त्तव्यं। पाचयत्योदनं देवदत्तो यज्ञदत्तेनेति। किं पुनः कार-
णं न सिध्यति। अस्वतंत्रत्वात्। नवा स्वातंत्र्यात् इतरथा ह्यकुर्वत्यपि कारयतीति स्यात्। न वा कर्त्तव्यं। किं कारणं। स्वातंत्र्यात् स्वतंत्रोसौ भवति
। इतरथा ह्यकुर्वत्यपि कारयतीति स्यात्। यो हि मन्यते नासौ स्वतंत्रः अकुर्वत्यपि तस्मिन् कारयतीत्येतत् स्यात्। नाकुर्वतीति चेत् स्वतंत्रः। न चेद-
कुर्वति तस्मिन् कारयतीत्येतद्भवति स्वतंत्रोसौ भवति। शक्यं तावदनेनोपसंख्यानं कुर्वता वक्तुं कुर्वन्स्वतंत्रो अकुर्वन्नेति। साधीयो ज्ञापकं॥ ॥

द्यते। न वेति। प्रयोजकसन्निधानेपि प्रयोज्यस्य करणादिसाधनविनियोगादिना स्वातंत्र्यस्य क्रियासिद्धौ सद्भावादित्यर्थः। अकुर्वत्यपीति। यदि प्रयोज्यस्य स्वातंत्र्यं न
स्यात् नैवासौ साधनान्तरविनियोगादिना क्रियां कुर्यात् तथा चाकुर्वत्यपि प्रयोज्ये प्रयोजकः कारयतीति व्यपदिश्येत। शक्यं तावदिति। उपसंख्यानवाद्यपि प्रयोज्यस्य स्वा-
तंत्र्यमस्तीत्यभ्युपगच्छतीति प्रतिपाद्यते प्रयोज्यस्य स्वातंत्र्येण स्वव्यापारे प्रवर्त्तनात् किलोपसंख्यानमारभ्यते। तेन चेदमवश्यमभ्युपगन्तव्यं कुर्वन्स्वतंत्रो न
त्वकुर्वन्निति एवं चेत् प्रयोजकसन्निधानेपि स्वार्थदर्शनात् प्रयोज्यः करोति नान्यथेति तस्य स्वातंत्र्यमस्त्येव। तथा चोक्तं भाष्यकृता। न हि कश्चित् परेणानुग्रहीतव्य इति प्रवर्त्तते स-
र्व इमे स्वभूत्यर्थं यतंत इति॥०॥

राम०
३२२

प्रेषिते चेति। कर्तुरधिकरणत्वेन विवक्षितत्वात्सप्तमी। क्रियामिति। स्वार्थे दर्शनादिक्रियायां सत्यां क्रियां न ददर्शनात्स्वक्रियां। यदि चेति। स्वार्थदर्शनादिक्रियायामसत्सामिसर्थः॥ ॥
तत्प्रयोजकः॥ ॥प्रैष इति। ननु पूर्वसूत्र एव प्रयोज्यस्य स्वातन्त्र्यमुपपादितं तत्किमर्थं चोद्यते। एवं मन्यते। प्रैषाद्यूर्ध्वं प्रयोज्यस्य स्वव्यापारे प्रवर्तनात्स्वातन्त्र्यं प्रैषकाले तु
स्वव्यापाराप्रवर्तनात् प्रवृत्तौ प्रैषवैयर्थ्यात् स्वातन्त्र्यं नास्ति तस्य च प्रयोजको न हेतुः स्यात् ततश्चात्र णिज् न भवेत्। प्रैषग्रहणमध्येषणानिवृत्त्यर्थमिति केचित्। अध्ये
षणे किल व्यापार्यमाणस्य गुर्वादेः स्वव्यापारे स्वातन्त्र्यमस्तीति। तत्त्वयुक्तं। न्यायस्य तुल्यत्वात्। तस्मादत्र प्रैषग्रहणेन नियोगमात्रमुच्यते न तु निकृष्टविषय एव नि

प्रेषिते च किलायं क्रियां चाक्रियां च दृष्ट्वाऽध्यवस्यति। कुर्वन्स्वतन्त्रोऽकुर्वन्नेति। यदि च प्रेषितोऽसौ न करोति स्वतन्त्रोऽसौ भवतीति। तत्प्रयोजको हेतु
श्च॥ ॥प्रैषे स्वतन्त्रप्रयोजकत्वाद्धेतुसंज्ञाप्रसिद्धिः। प्रैषे स्वतन्त्रप्रयोजकत्वाद्धेतुसंज्ञाया अप्रसिद्धिः प्राप्नोति। स्वतन्त्रप्रयोजको हेतुसंज्ञो भव
तीत्युच्यते न चासौ स्वतन्त्रं प्रयोजयति। स्वतन्त्रत्वात्सिद्धं। स्वतन्त्रत्वात्सिद्धमेतत्। स्वतन्त्रमसौ प्रयोजयति। स्वतन्त्रत्वात्सिद्धमिति स्वतन्त्रं चेत्स्वतन्त्रपरतन्त्रत्वं विप्रतिषिद्धं। यदि च स्वतन्त्रो न
प्रयोज्यः। अथ प्रयोज्यो न स्वतन्त्रः। प्रयोज्यः स्वतन्त्रश्चेति विप्रतिषिद्धं। उक्तं वा। किमुक्तं। एकं तावदुक्तं। न वा स्वातन्त्र्यादितरथा ह्यकुर्वत
पि कारयतीति स्यादिति। अपरमुक्तं। न वा सामान्यकृतत्वाद्धेतुतो ह्यविशिष्टं स्वतन्त्रप्रयोजकत्वात् अप्रयोजक इति चेन्मुक्तसंशयेन तु
ल्यमिति॥ ॥इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमाध्यायस्य चतुर्थपादे तृतीयमाह्निकं॥ ॥ ॥

योगः स्वतन्त्रत्वादिति। दृष्टसामर्थ्यो वा संभावितसामर्थ्यो वा क्रियायां स्वातन्त्र्येण समाश्रित एव नियुज्यत इत्यर्थः। स्वतन्त्रपरतन्त्रत्वमिति। प्रयोजकसन्निधौ पा
रतन्त्र्येण स्वातन्त्र्यस्य तिरस्कृतत्वाद्यौगपद्यानुपपत्तिरिति भावः। उक्तं वेति। वक्ष्यमाणस्यापि बुध्या विषयीकृतत्वाद्भूतत्वारोपाद् उक्तं वक्ष्यमाणे चाभेदेनोक्तं वेति नि
र्दिष्टं। न वा सामान्यकृतत्वादिति। हेतुमति चेत्यत्र वार्त्तिककारेणोक्तं। मुक्तसंशयेनेति। अप्रयुक्तो यः स्वयं करोति तेन तुल्यः प्रयोज्योपीत्यर्थः॥ ॥इत्यु
पाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपे प्रथमस्याध्यायस्य चतुर्थपादे तृतीयमाह्निकं॥ ॥५॥ ॥ ॥

प्राग्रीश्वरात्॥ ॥किमर्थमिति। प्राग्रीश्वरादित्येव क्रियतां प्रसाससाधिरीश्वरशब्दोयद्धीष्यत इति प्रश्नः। वीश्वरादिति। व्याप्तिन्याया द्वीश्वरान्त्याकस्मात्। पदसंहितया सूत्रपाठस्तदा वकारसहित ईश्वरशब्दोस्तीत्येतदभिप्रेत्यैवमुक्तं। पदद्वयमिति। सेकसेन्त्र भवतीनां ण मुल्कमुल्लोष्व निपातत्वादेवाव्ययसंज्ञायां सिद्धायां कृन्मेजन्त इत्यव्ययसंज्ञाविधानाज्ज्ञापकाद्यान्निबोध्यत इत्यर्थः। परोपीति। कृत्सार्थत्वे वैकेनित्यादिरेजन्तः स्वमुत्तादिर्मोनो। स्तिनदर्थमेतत्स्यादिस ज्ञापकं व्याप्रेबोधस्य। यन्त्रहीति। व्याप्तावाश्रीयमाणायां निपातत्वादव्ययीभावस्याव्ययसंज्ञासिद्धैव किं तद्विधानेनेति ज्ञापकं संपद्यते। समासेष्विति। तुल्यजातीयव्याहृतये नियमार्थमेतत्स्यात् न तु व्याप्त्यग्रहणज्ञापनार्थमेतदित्यर्थः।

प्राग्रीश्वरान्निपाताः॥ ।किमर्थेरेफाधिकईश्वरशब्दोग्रहते। रीश्वराद्वीश्वरान्माभूत्। रीश्वरादित्युच्यमानेवीश्वरान्माभूदिति। प्रक्रिणामुल्कमुल्लावीश्वरेतोसुन्कसुनाविति। नैतदस्ति प्रयोजनं। आचार्यप्रवृत्तिर्ज्ञापयति अनन्तरोयईश्वरशब्दस्तस्य ग्रहणमिति। यदयं कृन्मेजन्त इति कृतो मान्तस्यैजन्तस्याव्ययसंज्ञां शास्ति। कृन्मेजन्तः परोपि सः। परोप्येतस्मात् कृन्मेजन्तश्चास्ति तदर्थमेतत्स्यात्। एवं तर्ह्यव्ययीभावस्याव्ययसंज्ञां शास्ति तज्ज्ञापयत्याचार्यः अनन्तरोयईश्वरशब्दस्तस्य ग्रहणमिति। समासेष्वव्ययीभावः। समासस्यैतज्ज्ञापकं स्यादव्ययीभाव एव समासोऽव्ययसंज्ञो भवति नान्य इति। एवं तर्हि लोकत एतत्सिद्धं। तद्यथा लोके आवन्तेनान्तादा उदकान्तात् प्रियं पान्थमनुव्रजेदिति। य एव प्रथमो वन्तान्त उदकान्तस्तावदनुव्रजति। लौकिके चाभिवर्त्तते। द्वितीयं तृतीयं वन्तान्तमुदकान्तं चानुव्रजति तस्माद्रेफाधिक ईश्वरशब्दो गृहीतव्यः॥ ॥

एवं तर्हीति। लोके प्रत्यासत्तिराश्रीयते यथा कपिंजलानालभेतेति त्रय एवालभ्यन्ते न चतुरादयः। शास्त्रे च लोकव्यवहारोंगीक्रियत इति भावः। लौकिकमिति। लौकिकं प्रत्यासत्तिलक्षणं न्यायं लोक एव परित्यजति। स्नेहादिवशात् द्वितीयमप्युदकान्तं प्राप्य निवर्त्तते। कपिंजलानिति त्रित्वप्रथमातिक्रमे कारणाभावान्न हिंसात्त्वबोधनात्तानीति चतुर्थ्यादिषु निषेधावगताज्जय एवालभ्यन्ते। इह तु विरोधकाभावाद्व्याप्तिन्यायाश्रयः स्यात्। न लोकाश्रयेसम्पत्त्यात् लोकादीनां सिद्धे षष्ठीनिर्देशे पुनस्तेषामुपादानमव्ययसंज्ञया एवाभावं ज्ञापयेत्। निपातसंज्ञानुसारादेव तन्तं व्यक्तीर्थे भिसादौ निपातत्वाज्जिति प्रग्रह्यसंज्ञास्यात्॥ ॥श्री॥ ॥

=भसंज्ञकत्वेति॥ नह्युविधेयानिर्देशाद्धेऽध्यं॥ ननु असत्वेत्य चादय इति गणपाठ विशेषणार्थेत्यामं बहुत्वमत आह॥ तंत्रेणेति॥ ८॥ ननु प्राप्यसत्त्वभावेन तत्संबोध्य आदिर्येतेसत आह॥ प्राग्ग्रहणवाचेऽयेति॥ ८॥ चादिषु सावकाशा क्रियायोगे प्रादिष्वपि सावकाशा निपातसंज्ञोऽसत्त्वमः॥ ८॥

सुमादि

अर्थेति॥ प्राग्ग्रहणं द्वारेणावधिनिर्देशान्तो ■■ द्यते। निपाता इत्ययमस्तु यथा प्रत्यय इत्यादिरधिकारो विनाप्यवधिनिर्देशेनाभिमतविषये प्रवर्ततेतथायमपि प्रवर्ति ष्यत इति भावः। निपातसंज्ञामिति। प्रादिषु पक्रियायोगे विकल्पितगतिसंज्ञाविषये पुसाक्षात्प्रभृतिषु च गतिसंज्ञाभावपक्षे सावकाशा निपातसंज्ञा गत्यादिसंज्ञाभिर्बाध्येतेत्यर्थः। क्रियमाणा इति। ई श्वरादिति पंचम्याः प्राक् शब्दाध्याहारेण लब्धे पुनः श्रुतिः प्राग्ग्रहणं संपद्यते। परशब्दाध्याहारेण तु पंचमी न भविष्यति। चादयोऽसत्त्वे इत्यादी नाम संबद्धत्वप्रसंगात्। तेन रीश्वरात्प्राक् शब्दाद्युच्चार्यते। तेनायमर्थः। प्राग्रीश्वराद्येव्यवस्थिता स्तेषामा ऋषिपानसंज्ञा भवंतीति निपाताः संतोगत्यादिसंज्ञा इति भावे प्रांति क्रुः। केवलेन तु निपाता इत्यधिकारे क्रियमाणे सत्यामपि प्रत्तियोगमनुवृत्ताबेकसंज्ञाधिकारात्सर्याय: स्यान्ननुसमावेशः। अवयवसंज्ञा इति। विशिष्टावधिपरिच्छिन्नस्य समुदायस्यानेतलपनिता।

अथ प्राग्वचनं किमर्थं। प्राग्वचनं संज्ञानिवृत्त्यर्थं। प्राग्वचनं क्रियते निपातसंज्ञाया अनिवृत्तिर्यथा स्यात्। अक्रियमाणे हि प्राग्वचनेऽनवकाशाः गत्युपसर्गकर्मप्रवचनीयसंज्ञाः निपातसंज्ञां बाधेरन्। ताः मा बाधिषतेति प्राग्वचनं क्रियते। अथ क्रियमाणेऽपि प्राग्वचने यावता अनवकाशा एताः संज्ञाः कस्मादेव न बाधंत इति। क्रियमाणे हि प्राग्वचने सत्यां निपातसंज्ञायामेताः अवयवसंज्ञा आरभ्यंते तत्र वचनात्समावेशो भविष्यति॥ ॥चादयोऽसत्त्वे॥ ॥अयं सत्वशब्दः अस्त्येव द्रव्यपदार्थकः। तद्यथा। सत्त्वमयं ब्राह्मणः सत्त्वमियं ब्राह्मणीति। अस्ति क्रियापदार्थकः। सद्भावः सत्त्व

=सदैरैणादिको वन्द॥ ८॥ जक्षांणतरं भेचतेनेति॥ ५॥ ((मिति। कस्येदं ग्रहणं। द्रव्यपदार्थकस्य कुतः एतत्। एवं कृत्वा विधिश्च सिद्धो भवति प्रतिषेधश्च॥ ॥ ॥

गत्यादिसंज्ञाभाजोऽप्यवाभवंतितेषां संज्ञा इत्यर्थः॥ ॥चादयोऽसत्त्वे॥ ॥अयमिति। अर्थद्वयेऽपि सत्त्वशब्दस्य प्रयोगदर्शनाद्विशेषावगतौ प्रमाणानुपलंभात्प्रश्नः। तत्र सीदंत्यस्मिन् जातिगुणक्रिया इति सत्त्वं द्रव्यमुच्यते। यदानुप्रवृत्तोऽभावः सत्त्वमिति तदासाध्यमानतया क्रियारूपापन्ना सत्ता सत्त्वशब्देनोच्यते। एवं च कृत्वेति। यदि सत्त्वशब्देन सत्तोच्येत तदा प्रतिषेधोऽनर्थकः स्यात्। नहि चादिषु सत्तावाची कश्चिच्छब्दोऽस्ति यदर्थो निषेधः स्यात्। पशुर्वैपुरुष इत्यत्र च निपातसंज्ञा स्यात्। चाद्यनुकरणेनोच्चः पठितो हि येस्मादर्थे इत्यादावपि विधिनिषेधौ यथाभिमतविषयौ न प्रवृत्तिषेयातां। इत्यस्य ग्रहणे तु प्रवर्तिष्येते। द्रव्यशब्देन चात्र सिद्धावस्थारूपं वस्त्वभिधीयते। तदुक्तं। वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते। द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षित इति॥ ॥श्री॥ ॥

किंपुनरिति॥ उभयथा माऽस्त्वित्युद्देशेनान्यभेदः। विप्र इति। विप्रातीति विप्रः। आतश्चोपसर्गे इति कप्रत्ययान्तः। क्रियोपसर्जनं द्रव्यवाचित्वात्केवलाद्द्रव्यात् क्रियाद्रव्यसमुदायस्यान्यत्वाद्द्रव्यादन्यस्मिन्नर्थे वर्तते। प्रादिभिरिति निपातत्वेनाभिमतैः। सामान्यमिति। सारूप्यं। तदन्तविधिनेति। ननु विशेष्यासन्निधानात्कथं तदन्तविधिः। एवं तर्ह्ययमर्थः। निपातस्य संज्ञा निपातसंज्ञा। सा चाव्ययसंज्ञा। तत्संज्ञा चास्ति तदन्तविधिः। प्रयोजनं सर्वनामाव्ययसंज्ञायामिति। तत्र विप्रशब्दे प्रशब्दस्य निपातसंज्ञायां यथा परमोच्चैरिति स्वराद्यन्तस्याव्ययसंज्ञा भवत्येवं निपातान्तस्यापि स्यात्। ततो लुक्प्रसज्येत। विप्र केवलः इत्यत्र च निपातान्तस्य पूर्वपदप्रकृतिस्वरः

किंपुनरयं पर्युदासः यदन्यत्सत्त्ववचनादिति आहोस्वित्प्रसज्यायं प्रतिषेधः सत्त्ववचने नेति। किं चातः। यदि पर्युदासः विप्र इत्यत्रापि प्राप्नोति। क्रियाद्रव्यवचनोऽयं संघातः। द्रव्यादन्यश्च विधिना श्रीयते। अस्ति च प्रादिभिः सामान्यमिति कृत्वा तदन्तविधिना निपातसंज्ञा प्राप्नोति। अथ प्रसज्य प्रतिषेधः न दोषो भवति। यथा न दोषस्तथास्तु॥ ॥ प्रादयः॥ प्रादय इति योगविभागः। प्रादय इति योगविभागः। निपातसंज्ञार्थः। निपातसंज्ञा यथा स्यात्। एकयोगे हि निपातसंज्ञाभावः। एकयोगे हि निपातसंज्ञाया अभावः स्यात् यस्मिन्नेव विशेषे गत्युपसर्गकर्मप्रवचनीयसंज्ञास्तस्मिन्नेव विशेषे निपातसंज्ञा स्यात्॥ ॥ ॥

× योगविभागः कर्तव्यः। प्रादयोऽसत्त्ववचना निपातसंज्ञा भवन्ति × १ ×

× तत उपसर्गाः क्रियायोग इति। किमर्थो × २

स्यात्॥ ॥ प्रादयः॥ ॥ यदा प्रागेव प्रादय इति योगो विभज्यते तदा प्रयोजनं कथनाय वार्त्तिकं। यदा तु प्रादय उपसर्गाः क्रियायोग इत्येको योगः पठ्यते तदा योगविभागः कर्तव्यत्वेन चोद्यते। एकयोगे हीति। अक्रियायोगे निपातसंज्ञा न स्यात् क्रियायोग एव तु गत्युपसर्गसंज्ञावत् स्यात्। ततश्च प्रगत आचार्यः प्राचार्य इत्यत्र पूर्वपदप्रकृतिस्वरो न स्यात्। यस्मिन्नेवेति। कर्मप्रवचनीयसंज्ञासु प्रजायामित्यादिभिर्योगैः प्रादीनां विहिता॥ ॥ ॥ ॥

= स्वादीति। तत्रापि पूर्वपदं विशेष्यमस्ति। १ =

=अलौकिकमिदमिति। अलौकिकत्वं चाप्रहन्निसर्वि सुद्धेश्यताव[illegible]च्छेदका ॥ ...

मरुद्वत्त इति। प्रक्रियायां रूप[illegible]मलौकिकमिदमुपात्तं। तत्त्वेन हि निसंमायां उपसर्गसंज्ञैव चास्येष्यते ॥ न निपातसंज्ञा। तस्यां हि सत्यां निपातत्वाद् घुदान्ता इत्याद्युदात्तत्वं तृतीयाक्रमेणेति पूर्वपदप्रकृतिस्वरेण स्यात्। अंतोदात्तश्च मरुच्छद्ब इष्यते। अपमुपसंज्ञा च स्यात्। तत्त्व एवोपसर्गसंज्ञेष्यते। अनभिधानाद्धि किं रनेभवति। संज्ञा वचन सामर्थ्याद्वानंतत्त्वेपि तं प्रवर्त्तते। अनेन तुल्यायेन मरुन्नयतीति तत्वर्गेत्व वा येपि णत्वमाश्रीति। तस्मात् तत्त्व एवोपसर्गसंज्ञा वक्तव्या। प्रकारांतरेणापि मरुत्शब्दो कुलादयिष्यते तथ्यर्वे मरुद्धामिति। श्रच्छद्बस्येति। तेनमिदादिषु श्रद्धाशब्देन पठितव्यो भवति ॥ ॥ गतिश्च ॥ ॥ कारिकाशब्दस्येति। कारिकाक्रियामर्यादास्थितिरित्यर्थः। यत्न इत्यपरे। यत्तु श्लोकरूपा चीकारिकाशब्द

मरुच्छब्दस्योपसंख्यानं। मरुच्छब्दस्योपसंख्यानं कर्त्तव्यं। मरुद्दत्तो मरुत्तः। अपच उपसर्गादिति तत्त्वं यथा स्यात्। श्रच्छब्दस्योपसंख्यानं। श्रच्छब्दस्योपसंख्यानं कर्त्तव्यं। श्रद्धा ॥ ॥ गतिश्च ॥ ॥ कारिकाशब्दस्य। कारिकाशब्दस्योपसंख्यानं कर्त्तव्यं। पुनश्चनसौ छेदसि। पुनश्चनसो छेदसि गतिसंज्ञौ भवत इति वक्तव्यं। पुनरुत्स्यूतं वासो देयं। पुनर्निष्कृतो रथः। उशिग्दूतश्चनो हितइति। गत्युपसर्गसंज्ञाः क्रियायोगे यत्क्रियायुक्ताः तं प्रतीति वचनं। गत्युपसर्गसंज्ञाः क्रियायोगे यत्क्रियायुक्ताः तं प्रतिगत्युपसर्गसंज्ञा भवंतीति वक्तव्यं। किं प्रयोजनं। प्रयोजनं षत्वणत्वे। षत्वं। विगताः सेचका अस्मात् ग्रामाद्विसेचको ग्रामः। उपसर्गादिति षत्वं माभूत्। णत्वं। प्रगतानायका अस्मात् ग्रामात्प्रनायको ग्रामः। उपसर्गादिति णत्वं माभूत्॥ ×कारिकाशब्दस×४॥ ॥

तत्सयहणं न भवति। क्रियायोगग्रहणेन कारिकाशब्दस्य विशेषणं क्रियावृत्तेर्ग्रहणात्। पुनश्चनसाविति। तंतश्च पुनराधेयमित्यत्र क्रदंतो त्तरपदप्रकृतिस्वरेणायतो नावइति धेय शब्द उदात्तः। पुनरुत्स्यूतमिति। गतित्वात्समासः। स्वरस्तु प्रकृत्यादेराकृतिगणत्वादंतोदात्तत्वं। चनो हितइति। निपातत्वाद्आद्युदात्तश्चनः शब्दस्य गतिरनंतर इति प्रकृतिस्वरः। गत्युपसर्गसंज्ञेति। क्रियायोग इति सामान्येनोपात्तानां द्विशेषावधारणार्थं वचनं। अपद्यवाप्रत्यासन्ने बुद्धिक्रियाग्रह्यते इति न्याय्यमुत्सादनार्थं ॥ ॥ ॥

वृद्धिविधौ चेति। उपसर्गो णौ च धातोः प्रक्षेपात् प्रच्छेक इति। प्रगता ऋच्छका अस्मादिति बहुव्रीहिः। तत्र धातुग्रहणस्य शाकल्यनिवृत्तिः प्रयोजनं वक्ष्यते। उद्धृत इति। क्रियायामस्या
प्रयोगात् उपसर्गत्वाभावः। अनवकाश इति। येषां हि क्रियाशब्दप्रयोगे तेषामुपसर्गसंज्ञा तेषां प्रसक्तुपसर्गोऽपि गद्यत इत्यर्थः। क्रियत इति। केवलाभ्यामिति विशेषणाभिधा

वृद्धिविधौ च धातुग्रहणमनर्थकम्। वृद्धिविधौ च धातुग्रहणमनर्थकम्। उपसर्गादृति धाताविति। तत्र धातुग्रहणस्यैतत्प्रयोजनमिह मा भूत्। प्रर्षभं व
नमिति। क्रियमाणे चापि धातुग्रहणे प्रच्छेक इत्यत्र प्राप्नोति। यत्क्रियायुक्तास्तं प्रतीति वचनान्न भवति। वृद्धिविधिनत्वभावाबीलसाङ्गादिस्वरणत्वेषु दो
षो भवति। वृद्धिविधि। य उद्धृतो निवृत्तो यासि बप्सत्। वृद्धिविधि। नत्वभाव। प्रणसं मुखम्। उन्नसं मुखम्। नत्वभाव। अबील। प्रेपं परेपम्। अबील। साङ्गादि
स्वर। प्रस्फिक्। प्रोदरः। साङ्गादिस्वर। णत्व। प्रणः। शूद्रः। प्रण आचार्यः प्रणो राजा प्रणोऽरत्रहा। उपसर्गादिस्वेते विधयो न प्राप्नुवन्ति। वृद्धिविधिनत्व
भावाबीलसाङ्गादिस्वरणत्वेषु वचनप्रामाण्यात्सिद्धम्। अनवकाशा एते विधयस्ते वचनप्रामाण्याद्भविष्यन्ति। सुदुरोः प्रतिषेधो नुम्वि
धितत्वषत्वणत्वेषु। सुदुरोः प्रतिषेधो नुम्विधितत्वषत्वणत्वेषु वक्तव्यः। नुम्विधि। सुलभं दुर्लभम्। उपसर्गादिति नुम्मा भूदिति। न सु
दुर्भ्यां केवलाभ्यामिति तत्र वक्तव्यं भवति। नैतदस्ति प्रयोजनं क्रियत एतन्न्यास एव। तत्व। सुदत्तम्। अच उपसर्गादिति तत्वं मा भूदिति। षत्व। सु
सिक्तं घृतं शतेन। सुस्तुतं श्लोकशतेन। उपसर्गादिति षत्वं मा भूदिति। सुदुः प्रजायामितीयत्त्वं वक्तव्यं भवति। नैतदस्ति प्रयोजनम्। क्रियते न्यास एव। णत्व। दुर्नयं
दुर्नीतमिति। उपसर्गादिति णत्वं मा भूदिति॥ ॥ ॥

नार्थमवश्यं कर्तव्या। तेनान्ति सुलंभमित्यत्रोपसर्गत्वे नुम् भवत्येव। क्रियत इति॥ प्रजायामिति विशेषणोपादानार्थं। तेन सुषिक्तं किं तवात्रेत्यादौ षत्वं भवत्येव॥ पश्री॥ण॥

ऊर्यादि॥ ॥ऊरी पक्त्वेति। प्रयोगपर्यालोचनेन संभवमात्राश्रयेणोक्त उदाहृतः। न चान्ययेति। च्विडाचौ तावत् कृभ्वस्तियोग एव विहितौ ऊर्यादयोऽपि कृभ्वस्तिविषया एवमप्युच्यन्ते नान्यत्रे
ति॥ ॥अनुक॥ ॥कथमिति। द्वयोरपि समासयोः संभवाद्दोषदर्शनाच्च प्रश्नः। खाडिति कृत्वेति। गतिसंज्ञायां समासः स्यात्। धातोश्चानन्तरं प्रयोग इति रूपमेतन्न सिध्येत्। इति खाट्कृ
त्वेत्यत्र च निषेधप्रसंगः। श्रौषडिति। श्रौषट् शब्द इति परो न भवतीति श्रौषडाद्यव्यवधानादिति गतिसंज्ञाप्रसंगः। ननु व्यवहितेऽपि परशब्दस्य दर्शनाद्भवत्वेवेति परत्वं। नैष दोषः। अव्यव

ऊर्यादिच्विडाचश्च॥ ॥कृभ्वस्तियोग इति वर्त्तते। इहैव यथा स्यात्। ऊरीकृत्य ऊरीभूय। इह मा भूत्। ऊरी पक्त्वा। तर्हि वक्तव्यं। न वक्तव्यं। क्रियायोग इ
त्यनुवर्त्तते। न चान्यया क्रिययोर्यादिच्विडाचां योगोऽस्ति॥ ॥अनुकरणं चानितिपरं॥ ॥कथमिदं विज्ञायते इतेः परमितिपरं न इतिपरमनितिपर
मिति। आहोस्विदितिः परो यस्मान्नदिदमितिपरं न इतिपरमनितिपरमिति। किं चातः। यदि विज्ञायते इतेः परमितिपरं न इतिपरमनितिपरमि
ति खाडिति कृत्वा निरष्ठीवदित्यत्र प्राप्नोति। अथ विज्ञायते इतिः परो यस्मान्नदितिपरं न इतिपरमनितिपरमिति। श्रौषड्वौषडिति कृत्वा
निरष्ठीवदित्यत्र प्राप्नोति। अस्तु तावदितिः परो यस्मान्नदितिपरं न इति [illegible] परमनितिपरमिति। ननु चोक्तं श्रौषड्वौषडिति कृत्वा
निरष्ठीवदित्यत्र प्राप्नोतीति। नैष दोषः। इदं तावदयं प्रष्टव्यः। अथेह ते प्राग्धातोरिति। कथं नु तिमात्रस्य पूर्वप्रयोगो भवति उपोद्धरतीति। ग
(१) साकृतिः प्रतिनिर्दिश्यते। इहापि तर्ह्यनुकरणकृतिः प्रतिनिर्दिश्यते। किमर्थमिदमुच्यते॥ ॥

=अन्यत्वेनेति। प्रयोगात्प्राक् ... अंतराले ... उच्चारणादिति। एवं चोच्चारणाद् ... निश्चायकमनपेक्षणात् ... ननु प्रयोगात् ... निश्चया ... अनपेक्षणात् ...

धानमेवास्य मुख्या वृत्तिः। अनन्तरत्वं तु गौणत्वस्य प्रसिद्धमिव व्यवधानमेवाश्रित्य प्रयुज्यते। इह तु श्रौषड्वौषडित्येव व्यवधायकस्योच्चारणाद्युक्तमनपेक्षणं। खाट्कृत्वेति निर
ष्ठीवदित्यत्र धातुव्यवधानेऽपि प्रतिषेधप्रसंगात्। इदं तावदिति। योऽयमन्त्याश्रयेण व्यवधानमन्यते॥ साकृतिरिति। तस्या अभिन्नायास्त्वपि व्यक्तिषु अभिन्नाया नास्त्यत्र व्यवधा
नं। किमर्थमिति। अनितिपरमेतदित्यर्थः। संज्ञानियमपक्षे सिद्धं मत्वा प्रश्नः॥ ॥ ॥

=इति खाट्कृत्येति पक्षे सेवेति यद्यप्यनुकरणत्वाद्योतकत्वदर्शनाद्गतिसंज्ञा बाधिता शास्त्रविरोधादिति खाट्कृत्येति भाष्यप्रतिनिषेधमिदं साधयन्ति खाडिति कृत्वेत्यस्य चाविलोप एव भाष्य इति भावः ॥१॥

प्रकृति

अनिष्टशब्दनिवृत्त्यर्थ इति। खाडिति कृत्वेति प्रयोक्तव्ये इति खाट्कृत्वेति प्रयोगः स्यात्। प्रयोगनियमे चायं दोषः। तत्र स्वयमर्थः। गत्युपसर्गसंज्ञा धातोः प्रागेव प्रयोक्तव्या इति तेनाव्यवहितस्य प्रयोगप्रसंगः। संज्ञानियमे तु न दोषः। तेनैव नियमेन खाडितिकृत्वेत्यत्र व्यवहितस्य संज्ञानिवारणादस्य प्रयोगस्य सिद्धत्वात्॥ ॥आदर॥ ॥ कथम सत्कृत्येति। यदि न सत्कृत्वा सत्कृत्येति न समासः क्रियते तदा सति शिष्टत्वात् कृदुत्तरपदप्रकृतिस्वरं बाधित्वा अव्ययपूर्वपदस्वरेणाद्युदात्तत्वं स्यात्। अपि न सदसदिति समासः क्रियते तदा सच्छब्दस्य विधीयमाना गतिसंज्ञा सच्छब्दस्य न स्यादिति भावः। तदंतविधिनेति। यद्यपीह प्रकृतं विशेष्यं नास्ति तथापि कार्यार्थत्वात्संज्ञायाः कार्यप्रदेशेषु प्रकृतस्य गतिना

अनुकरणस्येतिकरणपरत्वप्रतिषेधो निष्टशब्दनिवृत्त्यर्थः। अनुकरणस्येतिकरणपरत्वप्रतिषेध उच्यते। किंप्रयोजनं। अनिष्टशब्दनिवृत्त्यर्थः। अनिष्टशब्दता माभूदिति। इदं विचारयिष्यते। प्राग्धातुवचनं प्रयोगनियमार्थं वा स्यात्संज्ञानियमार्थं वेति। तद्यदा प्रयोगनियमार्थं तदानिष्टशब्दनिवृत्त्यर्थमिदं वक्तव्यं। यदा हि संज्ञानियमार्थं तदा न दोषो भवति॥ आदरानादरयोः सदसती॥ ॥ इदमतिबहु क्रियते आदरे अनादरे सत् असदिति। आदरे सदित्येव सिद्धं। कथमसत्कृत्येति। तदंतविधिना भविष्यति। केनेदानीमनादरे भविष्यति। नञा आदरप्रतिषेधं विज्ञास्यामः। न आदरे अनादर इति। नैवं शक्यं। आदरप्रसंगे एव स्यादनादरप्रसंगे न स्यात्। अनादरग्रहणे पुनः क्रियमाणे बहुव्रीहिरयं विज्ञायते। अविद्यमानादरे इति। तस्मा

दनादरग्रहणं कर्तव्यं। असत्कृत्य तदंतविधिना सिद्धं॥ ॥ ॥

विशेषणात्तदंतविधिर्भवति। तत्र समासविधौ सुब्विति प्रकृते गतिरनंतर इत्यत्र पूर्वपदं गतिर्गेनाविसत्रपदस्येति। अप्रयसंज्ञायामस्सेवतदंतविधिः। नञ्आदर इति। अनेनासच्छब्दस्यानादरार्थवर्जितां दर्शयति। ततश्चानादरग्रहणे न यत्सान्यतरन्यथापि सिध्यतीत्येवं परमेतत्। आदरप्रसंग इति। गुरूनसत्कृत्य सेव्यादरे स्यात्। शब्दिनमसत्कृ त्येत्यादौ तु न स्यात्। तथाहि। अब्राह्मण इति क्षत्रियादिरेवोच्यते न तु गोलोष्टादिः। बहुव्रीहिरिति। स चासंज्ञाभावेऽपि सत्त्वभावे भवतीति स चेत्रसंज्ञा सिध्यति। असत्कृत्य ति। आदरानादरयोः सदित्येव वक्तव्यं। तत्रानादरे सच्छब्दस्य वृत्तभावात्तदंतविधिना। सच्छब्दस्य गतिसंज्ञा भविष्यति। यथा गोष्पदं सेविते सेवितेगोष्पदशब्दस्यासंभवाद्गो

ष्पदार्थमसेवितग्रहणं॥ ॥०॥

अन्तर॰ ॥ ॥ अन्तःशब्दस्येति । अङ्किविधिणत्वानि उपसर्गसंज्ञाश्रयाणि । समासस्तु गतिसंज्ञाश्रयः इत्यपूर्ववचनं सूत्रोपादानं च सामान्येनोपसंख्यान[...]नमुच्यते । गतिसंज्ञा
याऽनेनैव सिद्धत्वादपूर्ववचनाभावात् । अन्तर्हण्यादिति । हन्तेरत्पूर्वस्येति णत्वस्य सिद्धत्वात् । अन्तरदेशे इति न वक्तव्यं भवति । देशे तु ह्रस्वादित्वात्त्वाभावः । न थेवायने
चेति न वक्तव्यं । कृत्स्वचेति सिद्धत्वात् । अन्तर्णयतीत्यत्राप्युपसर्गादिति णत्वं सिध्यति ॥ ॥ साक्षात् ॥ ॥ साक्षात्प्रभृतिष्विति । अभूततद्भावविषयाणामे

=ननु समासस्य कृतेऽनैव सिद्धेर्विशिष्टे समासग्रहणं व्यर्थमत आह सामान्येनेति । गतिसंज्ञायामपि । अनेनास्य ...र्थः । नरतिविकल्पविषये अनेनाप्रतिषेध इति भावः ॥ १ ॥ नदादंभेष्वस्यावयव... दर्शयति । अन्तर्णयतीति ॥

अन्तरपरिग्रहे ॥ ॥ अन्तरशब्दस्याङ्किविधिसमासणत्वेषूपसंख्यानं । अन्तःशब्दस्याङ्किविधिसमासणत्वेषूपसंख्यानं कर्तव्यं । अङ् ।
अन्तर्द्धा । किविधिः । अन्तर्द्धिः । समासः । अन्तर्हत्य । णत्वं । अन्तर्हण्यात् गोभ्यो गाः ॥ ॥ साक्षात्प्रभृतीनि च ॥ साक्षात्प्रभृतिषु च्व्यर्थवचनं । साक्षा
त्प्रभृतिषु च्व्यर्थवचनं कर्तव्यं । असाक्षात् साक्षात्कृत्वा साक्षात्कृत्य । यदा हि साक्षादेव सत् किंचित्क्रियते तदा मा भूदिति । मकारान्तत्वं च गति
संज्ञासंनियुक्तं । मकारान्तत्वं च गतिसंज्ञासंनियोगेन वक्तव्यं । लवणंकृत्य । न त्वत्र च च्विप्रतिषेधः । तत्र च च्व्यन्तस्य प्रतिषेधो वक्तव्यः । लवणीकृ
त्य । न वा पूर्वेण कृतत्वात् । न वा वक्तव्यं । किं कारणं पूर्वेण कृतत्वात् । अनेन तु विभाषा पूर्वेण नित्यो भविष्यति । इदं तर्हि प्रयोजनं ।
मकारान्तत्वं च गतिसंज्ञासंनियुक्तं यथा स्यात् [ ] च्व्यन्तस्य मा भूदिति । एतदपि नास्ति प्रयोजनं । लवणशब्दस्यायं विभाषा लवणंशब्दस्या
देशः क्रियते । यदि च लवणीशब्दस्यापि विभाषा लवणंशब्दस्यादेशो भवति न किंचिद्दुष्यति । त्रैशब्द्यं चेह साध्यं तच्चैवं सति सिद्धं भवतीति ॥

वयथा साक्षात् यदा तु साक्षाद्भूतं रूपान्तरेण क्रियते तदा मा भूदित्यर्थः । लवणीकृत्येति । अत्र हि परत्वादनेन विभाषा प्राप्नोति । नित्या च गतिसंज्ञेष्यते । पूर्वेणेति । पु
नः प्रसंगविज्ञानादिति भावः । च्व्यन्तस्य मा भूदिति । एकदेशविकृतस्यानन्यत्वात् प्राप्नोति । त्रैशब्द्यमिति । त्रय एव शब्दास्त्रैशब्द्यं । लवणंकृत्वा लवणंकृत्य लवणीकृत्येति ॥ ॥

ते प्राग्धातोः॥ ॥ किमिदमिति। नियमद्वयसंभवात्प्रश्नः। तत्र यदा प्रयोगनियमस्तदा गते इत्यनेन लब्धगत्युपसर्गसंज्ञाः परा अप्रयुंजते। यदा तु संज्ञानियमस्तदा प्रादय उपनिब
सर्यंतः स्वरूपेणैव प्रसवमप्रयुंजते संज्ञायास्त्वनिष्पादनात्। अनेनैव कवाकतामापन्नैः पूर्वसूत्रैस्तस्याविधानात्। अनुकरणस्येति। अनुकरणं चानितिपरमिति सूत्रेण व्याख्या
तं। संज्ञानियमे सिद्धमिति। अनितिपरमिति न वक्तव्यं। अनेनैव नियमेन ख्यापितत्वादिति कृते सत्र संज्ञानिरासस्य सिद्धत्वात्। उत्तरं तु सूत्रद्वयं न कर्तव्यं भवति। पर
व्यवहितानां गत्युपसर्गसंज्ञयोर्निवारणान्न तु प्रयोगस्येत्यर्थः। अस्त्विति। लाघवादस्यैव पक्षस्य युक्तत्वात्। उभयोरिति। भाषायां परव्यवहितप्रयोगेन दृश्य

ते प्राग्धातोः॥ ॥ किमिदं प्राग्धात्वनुवचनं प्रयोगनियमार्थं एते प्रागेव धातोः प्रयोक्तव्या आहोस्वित्संज्ञानियमार्थमेतत्। प्राक् च प्राक्प्रयो
क्तव्याः प्राक्प्रयुज्यमानानां गतिसंज्ञा भवतीति। कश्चात्र विशेषः। प्राग्धात्वनुवचनं प्रयोगनियमार्थमिति चेदनुकरणस्येति परप्रतिषेधोऽनिष्टश
ब्दनिवृत्त्यर्थः। प्राग्धात्वनुवचनं प्रयोगनियमार्थमिति चेदनुकरणस्येतिकरणपरप्रतिषेधो वक्तव्यः। किं प्रयोजनं। अनिष्टशब्दनिवृत्त्यर्थः। अ
निष्टशब्दता मा भूदिति। छन्दसि परव्यवहितवचनं च। छन्दसि परेऽपि व्यवहिताश्चेति वक्तव्यं। संज्ञानियमे सिद्धं। संज्ञानियमे सति सिद्धमेतद्भ
वति। अस्तु तर्हि संज्ञानियमः। उभयोरनर्थकं वचनमनिष्टादर्शनात्। उभयोरपि पक्षयोर्वचनमनर्थकं। किं कारणं। अनिष्टादर्शनात्
न हि कश्चित्सचतीति प्रयोक्तव्ये पचंति प्रेति प्रयुंक्ते यदि चानिष्टं दृश्येत ततो यत्नार्हं स्यात्। उपसर्जनसन्निपाते तु पूर्वपरव्यवस्थार्थं। उपसर्ज
नसन्निपाते तु पूर्वपरव्यवस्थार्थमेतद्वक्तव्यं। ऋषभं कूलमुद्रुजं ऋषभं कूलमुद्रुहं। अत्र गतेः प्राग्धातोः प्रयोगो यथा स्यात्॥ ॥

ते तत्र किं प्रयोगनियमेन वा संज्ञानियमेन वा। यत्र हि लोके संकीर्णः प्रयोगः यथा गौर्गावीति तत्रासाधुपरिहाराय साध्वनुज्ञानं कर्तव्यं न त्वसंकीर्ण एव प्रयोगे स्थिते शास्त्र
स्य किंचिदपि प्रयोजनं। छन्दसि तु परव्यवहितप्रयोगो दृश्यत एव। उपसर्जनसन्निपात इति। यद्यपि लोके विपरीतः प्रयोगो न दृश्यते तथापि कूलमुद्रुज इत्यादौ द्वयोर
प्युपपदत्वात्समासे कृते उपसर्जनं पूर्वमिति शास्त्रदर्शनात्तयोर्येन पूर्वनिपातेन भाव्यं कूलमुद्रुज उत्कूलरुज इत्येवं योऽभ्राम्येत्तं प्रतीदं सूत्रं कर्तव्यमित्यर्थः॥ ॥

=निषेधस्य प्रसक्तत्वादिति। साक्षात्क्रिया नादिति भावः। प्रयोगनियमस्येति। व्यवहितप्रयोगव्यावृत्तिफलकस्य धातोरव्यवहिताः प्रागेव प्रयोक्तव्या इति प्रयोगविधेरित्यर्थः। अन्यत्रावकाशत्वादिति। मुमविषये तु पश्चात्सावकाशत्वादिति भावः। बाधेऽपीति। नियमफली

सुकटंकराणीति। सुखेन क्रियन्त इति कर्मणि खल्। इति इत्वे ऋकारस्य गुणे रपरत्वे खित्वान्मुमि कृते मुमो विधानात्स्यात्किं तर्हि सुकटंकराणीति प्राप्नोतीति। अस्तु त्वेतेति। प्राप्त्याप्ताप्नोतु प्रतिषेधाच्चानेन मुमयुज्यत इत्यर्थः। खित्करणादव्ययस्यापि भवत्विति चेत्। नेत्याह। अनव्ययस्येति निषेधसमर्थस्य सत्वाद्बाधितुमशक्यत्वात्। प्रयोगनियमस्याप्यन्यत्रावकाशत्वाद्बाधेऽपि न कश्चित्क्षतिः। स्यादेवेति। कटं सुकराणीत्येवमपि प्रयोगे स्यादेव मुमित्यर्थः॥ ॥कर्मप्रवचनीयाः॥ ॥किमर्थमिति। लाघवार्थत्वात्संज्ञाकरणस्य लाघवप्रकर्षाय एका

यद्युपसर्जनसन्निपातेऽपि पूर्वपरव्यवस्थार्थमिदमुच्यते सुकटंकराणि वीरराज्ञी सत्यगतेः प्राग्धातोः प्रयोगः प्राप्नोति। आचार्यप्रवृत्तिर्ज्ञापयति नात्र गतेः प्राक्प्रयोगो भवतीति। यदयमीषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खलिति खकारमनुबन्धं करोति। कथं कृत्वा ज्ञापकं। खित्करणे एतत्प्रयोजनं खितीति मुम्यथा स्यात्। यदि चात्र गतेः प्राक्प्रयोगः स्यात् खित्करणमनर्थकं स्यात्। अस्त्वत्र मुम्। अनव्ययस्येति प्रतिषेधो भविष्यति। पश्यति त्वाचार्यः नात्र गतेः प्राक्प्रयोगो भवतीति ततः खकारमनुबन्धं करोति। नैतदस्ति ज्ञापकं। यद्यत्र गतेः प्राक्प्रयोगः स्यात्स्यादेवात्र मुमागमः। कथं। ईषदाढ्यंकरः दुराढ्यंकरः। नैष दोषः। नैष उदिरूप पदं कृतं हि विशेषणं। उदिकूले रुजिवहोः। उत्कूलमुद्वहः। इति एवमर्थं नञ्ग्याद्युवचनेन। कथं कूलमुद्रुजः कूलमुद्वहः। नैष दोषः। नैष उदिरूपपदं कृतं हि विशेषणं। उदिकूले रुजिवहोः। उत्पूर्वाभ्यां रुजिवहिभ्यां कूले उपपदे इति॥ ॥कर्मप्रवचनीयाः॥ ॥किमर्थमहती संज्ञा क्रियते। अन्वर्थसंज्ञा यथा विज्ञायेत कर्म प्रोक्तवन्तः कर्मप्रवचनीया इति। के पुनः कर्म प्रोक्तवन्तः। ये संप्रति क्रियां नाहुः। के च संप्रति क्रियां नाहुः॥ ॥श्री॥ ॥५॥ =निपातानां योगात्कर्मप्रोक्तवन्त इत्यर्थः। गतमनागतं प्रयुज्यते। ॥

स्यादि क्षराक्षराः संज्ञाकार्ये इति भावः। अन्वर्थसंज्ञेति। अर्थमनुगता अर्थेन वा अनुगता अंगीकृतप्रवृत्तिनिमित्ता या संज्ञा सा अन्वर्थसंज्ञा। कर्मप्रोक्तवन्त इति। प्रयुज्यमाने क्रियापदे क्रियाविशेषं द्योतितवन्त इत्यर्थः। क्रियां नाहुरिति। क्रियाविशेषं न द्योतयन्तीत्यर्थः॥ ॥श्री॥ ॥५॥ ॥

येऽप्रयुज्यमानस्य क्रियामाहुरिति। शाकल्यस्य संहितामनुप्रावर्षदिति वाक्ये प्रयुज्यमानस्य निशमेर्या क्रिया तत्कृतो वर्षसंहितयोर्हेतुहेतुमद्भावलक्षणः संबंधस्तस्ययमर्थोऽनुशब्दस्य सन्निधौ प्रतीयते। तदयमनुः संहितामिति द्वितीययाभिहितं संबंधमवच्छिनत्ति। विशिष्टक्रियाभिजनितत्वेन हेतुहेतुमद्भावलक्षणविशेषरूपतया वा तत्सन्निधौ संबंधस्य संप्रसयात्। तथाहि। क्रियायास्तावदयं न वाचकः। कारकविभक्तिप्रसंगात्। शेषविभक्तिसंबंधस्याप्रतीति प्रसंगाच्च। अत एव न क्रियापदाक्षेपकः। यथा प्रादेशं विपरिलिखतीति विशब्दो विमानक्रियाया आक्षेपक इति प्रादेशमिति कर्मणि द्वितीया। क्रियाविशेषद्योतकत्वमपि क्रियापदसन्निधाने दृष्टमिति अत्र न संभवतीति पारिशेष्यात्संबंधावच्छेदहेतुरनुः संपद्यते। तथा चोक्तं हरिणा। क्रियाया द्योतको नायं संबंधस्य न वाचकः। नापि

येऽप्रयुज्यमानस्य क्रियामाहुस्ते कर्मप्रवचनीयाः॥ ॥अनुर्लक्षणे॥ ॥किमर्थमिदमुच्यते। कर्मप्रवचनीयसंज्ञा यथा स्यात्। गत्युपसर्गसंज्ञे मा भूतामिति। किं च स्यात्। शाकल्यस्य संहितामनुप्रावर्षत्। गतिर्गतौ विति निघातः प्रसज्येत। यद्येवं वेरपि कर्मप्रवचनीयसंज्ञा वक्तव्या। वेरपि निघातो नेष्यते। प्रादेशं विपरिलिखतीति। अस्य त्वविशेषः। नात्र वेर्लिखिं प्रति क्रियायोगः। किं तर्हि प्रयुज्यमानं। प्रादेशं विमाय परिलिखतीति। यद्येवमनोरपि कर्मप्रवचनीयसंज्ञया नार्थः। अनोरपि न वृषिं प्रति क्रियायोगः। किं तर्हि प्रयुज्यमानं। शाकल्येन सुकृतां संहितामनुनिशम्य देवः प्रावर्षत्। इदं तर्हि प्रयोजनं द्वितीया यथा स्यात्। कर्मप्रवचनीययुक्ते द्वितीयेति। अत उत्तरं पठति॥ ॥ ॥

क्रियापदाक्षेपी संबंधस्तु भेदक इति। तत्र क्रियामाहुरिति क्रियाशब्देन तदुपजनितसंबंधविशेष उपचारादुच्यते। आहुरित्यस्यापि द्योतयंतीत्ययमर्थः। क्वचित्तु प्रवृत्तिनिमित्ताभावेऽपि वचनसामर्थ्यादियं संज्ञा प्रवर्तते। यथा सुः पूजायामिति। सोः षत्वादिनिवृत्तये यत्तु उपसर्गसंज्ञाबाधनार्थो॥ ॥अनुर्ल॥ ॥किमर्थमिति। लक्षणेत्थंभूताख्याने सनेनैव सिद्धत्वादिति प्रश्नः। इतरः शिष्यबुद्धिपरीक्षार्थं जासु उत्तरं ददाति। कर्मप्रवचनीयसंज्ञेति। निघात इति। निपातत्वादाद्युदात्तो [illegible]त्रानुरिष्यते। नात्र वेरिति। न हि प्रादेशो लिख्यते। किं तर्हीति। धातुं प्रतीति वाक्यशेषः। प्रादेशे च योग्या क्रिया वेराक्षेप्येति सामर्थ्याद्विमानक्रियाया आक्षेपः। शाकल्येन सुकृतामिति। अत्र वाक्ये या निशमने क्रिया तत्कृतो वर्षसंहितयोः संबंधावच्छेदः। तेनाप्रतिपाद्यत इतिना तु वर्षक्रियायोगो नोरित्यर्थः॥ ॥

अनुर्लक्षणे इति॥ सूत्रानुकरणमेतत्। सामान्यकृतत्वादिति। सामान्यं साधारणं यत्तत्त्वं अर्थान्तरसंज्ञान्तरनिर्देशात्तेनैव कृतत्वात्सिद्धत्वादित्यर्थः। हेत्वर्थमिति। हेतुरर्थः प्रयोजनं। प्रयोजक
एतस्य वचनस्येत्यर्थः। हेतुरिति। अन्वयव्यतिरेकाभ्यां वर्षप्रतिसंहितायाः कारणत्वावगमादित्यर्थः। किं वक्तव्यमिति। हेतौ लक्षणत्वं नास्तीति किं परिभाषितव्यमिति मत्वा पृच्छति। येन पुनः
पुनरिति। पौनःपुन्येन साहचर्यावगमे तस्य लक्षणभावो भवतीति भावः। अथेदानीमिति। येनोक्तं सत्तर्हि तथेति स एवमन्दिहानः पृच्छति। व्याप्त इति। हेतुर्हेतुविषयत्वाल्लक्षण

अनुर्लक्षणे वचनानर्थक्यं सामान्यकृतत्वात्। अनुर्लक्षणे वचनानर्थक्यं। किं कारणं। सामान्यकृतत्वात्। सामान्येनैवात्र कर्मप्रवचनीयसंज्ञा भविष्यति लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनव इति। हेत्वर्थं तु वचनं। हेत्वर्थमिदं वक्तव्यं। हेतुः शाकल्यस्य संहितावर्षस्य न लक्षणं। किं वक्तव्यमेतत्। न हि। कथमनुच्यमाने गंस्यते। लक्षणं हि नाम स भवति येन पुनः पुनर्लक्ष्यते। न यः सकृदपि निमित्तत्वाय कल्प्यते। सकृच्चासौ शाकल्येन सुकृतां संहितामनुनिशम्य देवः प्रावर्षदिति। स तर्हि तथा निर्देशः कर्तव्यः अनुर्हेताविति। अथेदानीं लक्षणे न हेतुरपि व्याप्नोति। नार्थोऽनेन। लक्षणे न हेतुरपि व्याप्नोत्यवश्यं तदेव लक्षणं भवति येन पुनः पुनर्लक्ष्यते किं तर्हि यत्सकृदपि निमित्तत्वाय कल्प्यते तदपि लक्षणं भवति। तद्यथा। अपि भवान्कमण्डलुपाणिं छात्रमद्राक्षीदिति। सकृदपि असौ कमण्डलुपाणिश्छात्रो दृष्टस्तस्य तदेव लक्षणं। एतदेव तर्हि प्रयोजनं। द्वितीया यथा स्यात्। कर्मप्रवचनीययुक्ते द्वितीयेति। एतदपि नास्ति प्रयोजनं। सिद्धात्र द्वितीया कर्मप्रवचनीययुक्त इत्येव। न सिध्यति। परत्वाद्धेत्वाश्रया तृतीया प्राप्नोति॥ ॥

भव४

स्येन हेतुर्व्याप्तो भवति। लक्षणेनेति। सिद्धान्तवादी। तदपि लक्षणमिति। कार्योत्पत्तिनिमित्तमपि तद्विशेषावगमहेतुत्वाल्लक्षणं भवतीत्यर्थः। परत्वादिति। येन नाप्राप्तिन्या
येन कर्मप्रवचनीययुक्ते द्वितीया षष्ठ्या एव बाधिका तां तु परत्वात्तृतीया बाधेत पुनः संज्ञाविधाने तु स्यान्नान्तरङ्गत्वाद्द्वितीया हेतुतृतीयां बाधते॥ ॥

=तद्विशेषस्य कार्यविशेषस्य शाकल्यसंहितानुनिशमनजन्यवृष्टिविशेषस्यावगमहेतुत्वाज्ज्ञानकारणत्वाज्ज्ञापकत्वादित्यर्थः।२२

आङ् मर्या॥ ॥अमत्र मर्यादाभिविध्योर्भेदेन निर्दिष्टः शब्दो नात्र विनातेनेति मर्यादा। एतेनैते समभिविधिरिः समेदं मत्वा वार्त्तिकं पठति। आकुमारमिति। कुमारान्पियशः प्राप्नमि
त्यर्थः। मर्यादावचन इत्येवेति। वचनग्रहणस्येदं प्रयोजनं अवान्तरभेदपरिहारेण परिच्छेदहेतुमात्रं मर्यादाग्यथा ग्रह्येत॥ ॥लक्षणेत्थं॥ ॥कस्येति। किं यथा विभक्तिस
मीपादयोः व्ययार्थास्तत्र लक्षणादयः प्रत्यादीनां अथ परं तरवाच्याः स तेनो विषयभावेन संज्ञायाः प्रत्यादीनां वा निर्दिष्टा इति प्रश्नः। वृक्षादीनामिति। वृक्षं प्रति वि
द्योतते विद्युदिति वृक्षो विद्योतनस्य लक्षणं। प्रत्यादयस्तु प्राप्तिक्रियाजनितसंबंधविशेषावच्छेदहेतवः॥ किमर्थमिति। वृक्षं वृक्षं प्रति कर्मत्वाद्द्वितीयासिद्धेतितद्धि
सिंचतीत्यत्र

आङ्मर्यादावचने॥ ॥आङ्मर्यादाभिविध्योरिति वक्तव्यं। इहापि यथा स्यात्। आकुमारं यशः पाणिनेरिति। तर्हि वक्तव्यं। न वक्तव्यं। मर्यादावचन इत्ये
व सिद्धं। एषा ह्यस्य यशसो मर्यादा॥ ॥लक्षणेत्थंभू॥ ॥कस्य लक्षणादयोऽर्था निर्दिश्यन्ते। वृक्षादीनां। किमर्थं पुनरिदमुच्यते। कर्मप्रवचनीयसंज्ञा
यथा स्यात् गत्युपसर्गसंज्ञे मा भूतामिति। नैतदस्ति प्रयोजनं। यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवतः। न च वृक्षादीन्प्रति क्रियायोगः। इदं
तर्हि प्रयोजनं द्वितीया यथा स्यात्। कर्मप्रवचनीययुक्ते द्वितीयेति। वृक्षं प्रति विद्योतते वृक्षमनु विद्योतते इति॥ ॥अधिपरी अनर्थकौ॥ ॥
किमर्थमधिपर्योरनर्थकयोः कर्मप्रवचनीयसंज्ञोच्यते। कर्मप्रवचनीयसंज्ञा यथा स्यात्। गत्युपसर्गसंज्ञे मा भूतामिति। नैतदस्ति प्रयोजनं। य
त्क्रियायुक्तौ तं प्रति गत्युपसर्गसंज्ञे भवतः। अनर्थकौ चेमौ॥ ॥ ॥ ॥

= वृक्षादिषोऽयं लक्षणत्वं प्रतिक्रिय
= [illegible]
= परिच्छेदलक्षणः [illegible] द्योतने
= नैतिरयो: [illegible] संबंधपरिच्छेद
= [illegible]

धानार्थं तावदिदं न भवति। प्रत्यादीनां च क्रियाविशेषानवद्योतनात् क्रियायोगाभावाद्गत्युपसर्गसंज्ञाबाधनार्थमपि नोपयुज्यते इति प्रश्नः। वृक्षं प्रतीति। अ
कर्मकत्वात् द्युतेः कर्मणि द्वितीया नास्ति॥ ॥अधिपरी॥ ॥किमर्थमिति। अनर्थकयोः क्रियायोगाभावात्संज्ञान्तरबाधनार्थं संज्ञाविधानं नोपयुज्यते। ना
पि परियोगे पञ्चमीविधानार्थं। अपेन साहचर्याद्वर्जनविषयपरियोगे तस्या विधानात्। अपादानसद्भावे चाधिशब्दस्य प्रयोग इव परियोगे तन्निमित्तायाः पंच
म्याः सिद्धत्वादिति प्रश्नः॥ ॥

अथवेति। पूर्वोपरितोपेरोदमुच्यते। यस्य शब्दस्य वाच्यं द्योत्यं वा वस्तु न संभवति तस्य वाक्यार्थेऽनुपयोगात् प्रयोगानुपपत्तिः। तस्मादर्थशब्द इह प्रयोजनवाची। तेनयोर्थोः न
योर्थो ऽसः तस्य प्रकरणवशान्निः प्रयोजनावेतावुच्येते धातुनोक्तामिति। प्रकरणादिसामर्थ्यावगतविशेषां धातुनोक्तां क्रियामित्यर्थः। आहतुरिति। द्योतयत इत्यर्थः। तद
विशिष्टमिति। तत् क्रियालक्षणं वस्तु विशिष्टं। अपि परिसन्निधानेऽप्यनाहितविशेषमित्यर्थः। यथेति। शंखेन्यस्तं क्षीरं शौक्ल्येनाभिन्नं शंखादित्यर्थः। यद्येवमि
ति। धातोर्वाचकत्वात् तस्य प्रयोगं नाश्रिपति। तेन विना तैर्योगासंभवादुपसर्गग्रहणं चाधिपर्योरूपलक्षणार्थं। उक्तार्थानामपीति। प्रकरणादिवशादवगता

इदं तर्हि प्रयोजनं पंचमी यथा स्यात्। पंचम्यपाङ्परिभिः [illegible] कुतः पर्यागम्यत इति। सिद्धं तु पंचम्यपादाने इत्येव। आगतश्चापादानपंचम्येव।
पञ्चाधिशब्देनयोगे पंचमी न विधीयते तत्रापि च श्रूयते कुतोऽध्यागम्यत इति। एवं तर्हि सिद्धे सति यदनर्थकयोरुपसर्गसंज्ञा बाधिका कर्मप्रवचनी
यसंज्ञा शास्ति तज्ज्ञापयत्याचार्योऽनर्थका नाम प्रयोगं भवन्त्यर्थवत्कृतमिति। किमेतस्य ज्ञापने प्रयोजनं। निपातस्यानर्थकस्य प्रातिपदिक
त्वं चोदितं तन्न वक्तव्यं भवति। अथवा नेमावनर्थकौ। किं तर्ह्यनर्थकावित्युच्येते। अनर्थान्तरवाचिनावनर्थकौ धातुनोक्तां क्रियामाहतुः। त
द्विशिष्टं भवति यथा शंखे पयः। यद्येवं धातुनोक्तत्वात्तस्यार्थस्योपसर्गप्रयोगो न प्राप्नोति उक्तार्थानामप्रयोग इति। उक्तार्थानामपिप्र
योगो दृश्यते तद्यथा। अपूपौ द्वावानय ब्राह्मणौ द्वावानयेति॥ ॥

र्थानामपि स्फुटतरावगत्यर्थः प्रयोगो लोके भवति। न चानियमप्रसंगः। येषामेव हि गतार्थानां प्रयोगो दृश्यते त एव प्रयुज्यन्ते न वृक्षस्तरुः पादप इति तथा प्रयोगाद
र्शनात्। अपूपौ द्वाविति। अपूपावित्यत एवावगते द्वित्वे द्विशब्दस्यापि प्रयोगो लोके दृश्यते। एतदुक्तं भवति। यथा यावशब्दोऽकान्तरविषयोऽन्य एव। अन्यश्च यावकशब्दः।
यथा चर्षभशब्दो वृषभशब्द इति। तथैवागच्छत्यध्यागच्छति पर्यागच्छतीति च। तदत्र विषये धातोरधिपर्योः सहाभिधा [illegible] यित्वमंगीकर्तव्यं॥ ॥ ॥

अपिः पदार्थ॥ ॥ इहेति। यथा॰ऽपिशब्दस्य कर्मप्रवचनीयसंज्ञायां सत्यां स्यादिसत्रोपसर्गाश्रयं षत्वं न भवत्येवं सर्पिः शब्दात् द्वितीया कस्मान्न भवतीति प्रश्नः। इतरो भवत्येवा आपेः संज्ञे साह। किंच स्यादिति। नेमे इति। यद्यपि शब्दार्थो इमे निर्दिश्यन्ते न पदार्थग्रहणमनर्थकं स्यात्। अन्य पदार्थो व्यभिचारात्। संभावनादीनां चोपादानमनर्थकं स्यात्। तेषामपि पदार्थत्वात्। पर पदार्थो इति। स्यादिसादेः परस्य पदस्यामी अर्थो इत्यर्थः। तदयमर्थः। स्यादिसादिपदं कर्तृसामान्यवाच्यपि यदा सामर्थ्याल्लक्षणविशेषे बिन्दौ वर्तते तदा तन्मात्रस्यापि कर्मप्रवचनीयः। सर्पिः शब्दस्तु समुदाय एव वर्तते नावयवमात्रे। न तत्र एवावयवोपजनितव्यतिरेके षष्ठी भवति। अथ वेति। बिन्दुकर्तृकत्वं क्रियायाः द्योतयितुं प्रयुज्यते इति बिन्दुप्रति कर्मप्रवचनीयो॰ऽपिः। ननु सर्पिः प्रतीति भावः। बिन्दोस्तर्हीति। ननु यदा बिन्दुशब्दो न प्रयुज्यते तदापिः कर्मप्रवचनीयः। न उच्यते तु निकारैः। पदान्तरस्याप्रयुज्य

अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु॥ ॥ इह कस्मान्न भवति। सर्पिषोऽपि स्यात्। गोमूत्रस्यापि स्यात्। किंच स्यात्। द्वितीया प्रसज्येत कर्मप्रवचनीययुक्ते द्वितीयेति। नैष दोषः। नेमे अपि अर्था निर्दिश्यन्ते। किं तर्हि परपदार्था इमे निर्दिश्यन्ते। एतेष्वर्थेषु यत्पदं वर्तते तत्रापिः कर्मप्रवचनीयसंज्ञो भवतीति। अथ वा यदत्र कर्मप्रवचनीयेनाद्यः प्रयुज्यते किं पुनस्तत्। बिन्दुः। बिन्दोस्तर्हि कस्मान्न भवति। उपपदविभक्तेः कारकविभक्तिर्बलीयसीति प्रथमा भविष्यति॥ ॥अधिरीश्वरे॥ ॥ अधिरीश्वरवचने उक्तो। किमुक्तं। यस्य चेश्वरवचनमिति कर्तृनिर्देशश्चेद्वचनात्। अथ

मानस्यापेः पदार्थ इति। न चाप्रयुक्ते द्वितीयाविधातुं शक्या। अत्राहुः। पदार्थग्रहणमिहोपलक्षणार्थमुपात्तं तेन यस्मि ॥ अथ माउपपत्तिस्तु॥ ०॥ ॥
न्पदार्थे पदान्तरस्याभिधानशक्तिर्नास्ति तत्रापिः कर्मप्रवचनीयः। ततश्चागतार्थो बिन्दुशब्दो यदापि सर्पिःप्रतिपत्तये प्रयुज्यते तदाप्यपिः कर्मप्रवचनीयसंज्ञो भवति। उप
पदविभक्तेरिति। कारकविभक्तिरत्र प्रथमा। सर्वत्रैव वाक्ये॰ऽवश्यंभाव्यं क्रियायाः ततः सत्तया। तत्र बिन्दोः प्रथमं स्यादि सन्नेन संबध्यते। तदनु तद्द्वारको॰ऽपिशब्देन
॥ ॥अधि॥ ॥उक्तमिति। वक्ष्यमाणमपि बुद्ध्या निरूपितत्वादुक्तमित्युक्तं। कर्तृनिर्देशश्चेदिति। यदीश्वरवचनमित्यनेन पदेनेश्वरः स्वामी भवति नियोगादेः कः
कर्त्ता स निर्दिश्यते तदानेन स्वामिनः सप्तमी विधीयते। अधिब्रह्मदत्ते पंचालाः इति तत्राधिकरणत्वादेव सप्तमी सिद्धा। ब्रह्मदत्ते स्थिताः पंचालाः इत्यर्थावगमात्॥
पंचाला इति च प्रथमा न प्राप्नोति। कर्मप्रवचनीययुक्ते द्वितीयेति द्वितीयया बाधितत्वात्॥ ॥

स्ववचनादिति॥ अधिबलदत्ते पंचाला इत्यस्याः अन्यथासिद्धत्वादधिं सेइत्येव वक्तव्यं। अधिपंचालेषु ब्रह्मदत्त इत्यर्थः। ईश्वरवचनमिति च कर्त्तव्यः षष्ठीसमासः। ईश्वरेणाप्युच्यते स्वं तत्कर्मप्रव
चनीययुक्ते सप्तमीति। यदि वा यस्य स्वं वेधि न ईश्वरस्य वचनं सप्तमी तत्र। पंचाले घासनादिक्रियोपजनिते संबंधे षष्ठ्यां प्राप्तायां सप्तमी विधीयते। स्वं च मस्येः कर्मप्रवचनीयसंज्ञा न स्वा
मिनमिति स्वामिनः प्रथमैव भवति॥ ॥लः परस्मैपदं॥ ॥ल इत्यादेशापेक्षा षष्ठी। लादेशाः परस्मैपदसंज्ञा इत्यर्थः। लादेश इति। लस्य स्थाने यत्र परस्मैपदमिति वक्तव्यं। इह तु वचने
एकसंज्ञाधिकारात् परस्मैपदसंज्ञा शतृक्वसोः सावकाशं पुरुषसंज्ञा तिङ्षु बाधेरन्निति सर्थः। सिचि वृद्धौ लिति। अस्मादेव लिंगादेकसंज्ञाधिकारोऽत्र बाध्यत इति भावः। आत्मनेप

स्ववचनानुसिद्धमिति। अधिः स्वमतिकर्मप्रवचनीयसंज्ञो भवतीति वक्तव्यं॥ ॥लः परस्मैपदं॥ ॥लादेशे परस्मैपदग्रहणं पुरुषबाधितत्वात्। लादेशे परस्मैपद
ग्रहणं कर्त्तव्यं। किं कारणं। पुरुषबाधितत्वात्। इह वचने हि संज्ञाबाधनं। इह हि वचने [illegible] क्रियमाणे अनवकाशा पुरुषसंज्ञा परस्मैपदसंज्ञां बाधेत। पर
स्मैपदसंज्ञा पुनरनवकाशा सा वचनाद्भविष्यति। सावकाशा परस्मैपदसंज्ञा। कोऽवकाशः। शतृक्वसू अवकाशः। सिचि वृद्धौ तु परस्मैपदग्रहणं ज्ञापकं पुरुषाबाधकत्वस्य।
यद्ययं सिचि वृद्धिः परस्मैपदेष्विति परस्मैपदग्रहणं करोति। तज्ज्ञापयत्याचार्यः न पुरुषसंज्ञा परस्मैपदसंज्ञां बाधत इति॥ ॥तिङस्त्रीणि त्रीणि प्रथममध्यमो
त्तमाः॥ ॥प्रथममध्यमोत्तमसंज्ञायामात्मनेपदग्रहणं। प्रथममध्यमोत्तमसंज्ञायामात्मनेपदग्रहणं कर्त्तव्यं। आत्मनेपदानां च प्रथममध्यमोत्तमसंज्ञा
भवंतीति वक्तव्यं। किं प्रयोजनं। समसंख्यार्थं। संख्यातानुदेशो यथा स्यात्॥ ॥

दसंज्ञया परस्मैपदसंज्ञाया बाधनं यथा स्यादित्येवमर्थं लिङ्प्रकरणे। नयोः संज्ञयोर्विधानं। सामान्यापेक्षं च ज्ञापकमित्यात्मनेपदसंज्ञयापि पुरुषसंज्ञानां समावेशो भवति। अन्यथा
पुरुषसंज्ञाः सावकाशास्तिङ्षु अनवकाशया आत्मनेपदसंज्ञया बाध्येरन्॥ ॥तिङस्त्रीणीति॥ ॥तिङां षट्त्रिकाः संज्ञास्तिस्र इति वैषम्यात् यथासंख्यं न प्राप्नोतीति मत्वाह। प्रथमेति। आ
त्मनेपदग्रहणे च ष्यक्रियमाणे सूत्रं परस्मैपदविषयमेव भवतीति वाक्यभेदादेकेन वाक्येन परस्मैपदानां त्रयाणां निस्त्रः संज्ञा द्वितीयेनात्मनेपदानामिति सिद्धमिष्टं॥ ॥

वैषम्यादिति॥ यद्यप्येकैकस्य त्रिकस्यानेकसंज्ञाकरणे प्रयोजनाभावः तथापि कस्यचित्त्रिकस्य काचित्संज्ञेत्येतावद्वक्तव्यमेव। ननु यथासंख्यमत्र विषयविभागलाभः। आनु-
पूर्व्येवचनं चेति। अत्र सूत्रे त्रिकाणामुच्चारणं नास्ति। केवलं त्रीणि त्रीणीति वीप्सया प्रतिपत्तिस्तेषां। तत्रानियमप्रसंगे नियमार्थमानुपूर्व्यग्रहणं चकारेणाभिलप्यते।
एकशेषनिर्देशादिति। आकृत्यभिधानाश्रयेण प्रत्याख्यातं सूत्रं शास्त्रप्रक्रियासंपत्त्यर्थमेव संपद्यते। अथैतस्मिन्निति। उभयथा संभवाभावः। प्रथममध्यमयो-

अक्रियमाणे ह्यात्मनेपदग्रहणे तिङः संज्ञाः षट् संज्ञिनः वैषम्यात्संख्यातानुदेशो न स्यात्। क्रियमाणेऽपि चात्मनेपदग्रहणे आनुपूर्व्येवचनं च। आनुपूर्व्येवचनं च
कर्तव्यं। अक्रियमाणे हि कस्यचिदेव त्रिकस्य प्रथमसंज्ञा स्यात् कस्यचिदेव मध्यमसंज्ञा कस्यचिदेवोत्तमसंज्ञा स्यात्। न चैकशेषनिर्देशात्। यत्तावदुच्यते आत्मनेपदग्रहणं
कर्तव्यं समसंख्यार्थमिति तन्न कर्तव्यं। संज्ञा अपि षडेव निर्दिश्यन्ते। कथं। [illegible] एकशेषनिर्देशात्। एकशेषनिर्देशोऽयं। अथैतस्मिन्नेकशेषनिर्देशे
सति किमयं कृतैकशेषाणां द्वन्द्वः प्रथमश्च प्रथमश्च प्रथमौ। मध्यमश्च मध्यमश्च मध्यमौ। उत्तमश्चोत्तमश्चोत्तमौ। प्रथमौ च मध्यमौ चोत्तमौ च प्रथममध्यमोत्तमा
इति। आहोस्वित्कृतद्वन्द्वानामेकशेषः। प्रथमश्च मध्यमश्चोत्तमश्च प्रथममध्यमोत्तमाः। प्रथममध्यमोत्तमाश्च प्रथममध्यमोत्तमाश्च प्रथममध्यमोत्तमा इति।
किं चातः। यदि कृतैकशेषाणां द्वन्द्वः। प्रथममध्यमयोः प्रथमसंज्ञा प्राप्नोति। उत्तमप्रथमयोः मध्यमसंज्ञा प्राप्नोति। मध्यमोत्तमयोरुत्तमसंज्ञा प्राप्नोति। अ-
थ [illegible] कृतद्वन्द्वानामेकशेषः न दोषो भवति। यथा न दोषस्तथास्तु। किं पुनरत्र न्याय्यं। उभयमित्याह। उभयं हि दृश्यते।
तद्यथा। बहुशक्तिकिटकं बहूनि शक्तिकिटकानि। बहुस्थालीपिठरं बहूनि स्थालीपिठराणि॥ ॥ ॥ ॥

रिति। प्रसिद्धिमाश्रित्यैतदुच्यते। आख्यानान्निर्णय इति मत्वाह। कृतद्वन्द्वानामिति। बहुशक्तिकिटकमिति। एकशेषे कृते द्वन्द्वः। जातिरप्राणिनामित्येकवद्भावः। बहुशब्दस्यात्र वैपुल्यवच-
नत्वेऽप्येकवचनं। समुदायस्य वैपुल्यमवयवानां प्रचयाद्भवति। यदा तु समाहारद्वन्द्वे कृते एकशेषः क्रियते तदा बहूनि शक्तिकिटकानीति भवति॥ ॥ ॥

लोकतइति॥ यथा पंक्तिस्थेष्वासनेषु द्वौ द्वौ ब्राह्मणावानयेत्युक्ते आनुपूर्व्येणानयनं भवति न तु व्युत्क्रमेण तथेहापि भवतीति भावः। विहव्यस्येति। विहव्याख्यस्य सूक्तस्य द्वाभ्यां द्वा
भ्यामग्निरूपस्थेय इत्युक्ते आनुपूर्व्येण ऋग्द्वयं गृह्यते न तु व्युत्क्रमेण॥ ॥विभक्तिश्च॥ ॥सतिप्रयोजने स्वरितत्वप्रतिबुद्धे शब्दानामनुवृत्तसन्नुवृत्तीर्भवतः। लिंगदर्शनं च प
क्षद्वयेप्यस्ति इति संदेहात्प्रश्नः। त्रीणीति। आत्वं न प्राप्नोतीति। नह्यष्टन्शब्दात्परं युगपत्त्रिकमस्ति। प्रथमयोरिति। प्रत्येकं संज्ञित्वे विभक्तिसमुदायस्य विभक्तिग्रहणे नाग्रह
णात्प्रथमयोरिति समुदायद्वयापेक्षानुपपत्तौ प्रत्यययोरेव द्वयोर्ग्रहणं प्राप्नोतीत्यर्थः। वचनादिति। त्रिकस्य युगपत्प्रयोगाभावात्सामर्थ्यात्समुदाये वृत्तिर्विभक्तिशब्दोऽवयवे

यद्यप्युच्यते क्रियमाणे प्यात्वे न परत्वग्रहणे आनुपूर्व्ये वचनं कर्त्तव्यमिति। न कर्त्तव्यं। लोकत एतत्सिद्धं। तद्यथा लोके विहव्यस्य द्वाभ्यां द्वाभ्यामग्निरू
पस्थेय इति न चोच्यते आनुपूर्व्येणेति आनुपूर्व्येण चोपस्थीयत इति॥ ॥विभक्तिश्च॥ ॥त्रीणित्रीणीत्यनुवर्त्तते उताहो न। किं चातः। यद्यनु
वर्त्तते। अष्टन आ विभक्तावित्यात्वं न प्राप्नोति। अथ निवृत्तं। प्रथमयोः पूर्वसवर्ण इत्यत्र प्रथमयोरेव ग्रहणं प्राप्नोति। यथेच्छसि तथास्तु। अस्तु तावद
नुवर्त्तत इति। न तु चोक्तमष्टन आ विभक्तावित्यात्वं न प्राप्नोतीति। वचनाद्भविष्यति। अथवा पुनरस्तु निवृत्तं। न तु चोक्तं प्रथमयोः पूर्वसवर्ण इति प्र
थमयोरेव ग्रहणं प्राप्नोतीति। नैष दोषः। अचीत्यनुवर्त्तते। न चाजादी प्रथमौ प्रत्ययौ स्तः। ननु चैवं विज्ञास्यते अजादी यौ प्रथमौ अजादीनां वा यौ प्रथमावि
ति॥ ०॥

वर्त्तिष्यते इति भावः। न चाजादीति। सुशब्दो शब्दो प्रथमौ स्तः आजादिने भवतीति प्रत्यययोरजादित्वासंभवादवयवशब्दस्त्रिके समुदाये उपचाराद्वर्त्तत इति भावः। अजादीयाविति।
अजादीविशेष्यो प्रथमयोरिति विशेषणं। तेनौजसोरेव ग्रहणमस्त्वित्यर्थः। अजादीनां वेति। अचीत्यनुवर्त्तते। तत्र व्याख्यानात्तदादिविधिर्निर्द्धारणं चाश्रयिष्यते अजादिषु
यौ प्रथमाविति। एवमप्यौजसोरेव ग्रहणं स्यादिति चोद्यं॥ ॥श्री॥ ॥७॥ ॥श्री॥ ॥

यत्तद्धीति। एत्वा नुगाः पश्चे सत्रनत्वनिहसर्थ तस्मादित्युच्यते। औजसोरेवग्रहणेः नन्तरपूर्वेसवर्णो दीर्घो उत्तरः शसः सकारो न भवतीति किं तस्मादिसनेनात्तक्रियमाणं त्रिकद्वय ग्रहणस्य ज्ञापकं संपद्यते॥ ॥युष्म॥ ॥किमर्थमिति। किंत्वादेश विधानवाक्येनैव कृताकृत्वाद्विध्यर्थमिदं। अथ विहिते बुत्वादेशे बुनियमार्थमिदमिति प्रश्नः। तत्रैकवाक्यतापक्षेऽन्तरेतराश्रयपरिहाराय भाविनी संज्ञाश्रयितव्येति मनि पत्तिला घवार्थं वाक्यभेदेन नियमपक्षं दर्शयितुमाह। युष्मदस्मदिति। किमयमिति। ननु प्रत्यय

यत्तद्धितस्माच्छसो नः पुंसीत्यनुक्तं तत्पूर्वेसवर्णं प्रति निर्दिशति। तज्ज्ञापयत्याचार्यः विभक्त्योर्ग्रहणमिति। अथवा वचनग्रहणमेव कुर्यात औजसोः पूर्वसवर्ण इति॥ ॥युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः॥ ॥अस्मद्युत्तमः॥ ॥शेषे प्रथमः॥ ॥किमर्थमिदमुच्यते। युष्मदस्मच्छेषवचनं नियमार्थं। नियमार्थो यमारंभः। अथैतस्मिन्नियमार्थे विज्ञायमाने किमयमुपपदनियमः युष्मदि मध्यम एव अस्मद्युत्तम एव। आहोस्वित्पुरुषनियमः युष्मद्येव मध्यमः अस्मद्येवोत्तम इति। किं चातः। यदि पुरुषनियमः शेषग्रहणं कर्तव्यं शेषे प्रथम इति। किं कारणं। मध्यमोत्तमौ युष्मदस्मदी अनियते। तत्र प्रथमोऽपि प्राप्नोति। तत्र शेषग्रहणं कर्तव्यं। प्रथमनियमार्थं। शेष एव प्रथमो भवति नान्यत्रेति। अथ ह्युपपदनियमः एवमपि शेषग्रहणं कर्तव्यं। शेषे प्रथम इति। युष्मदस्मदी नियतेन मध्यमोत्तमौ अनियतौ तौ शेषेऽपि प्राप्नुतः। तत्र शेषग्रहणं। शेष नियमार्थं। शेषे प्रथम एव भवति नान्यदिति। उपपदनियमे शेषग्रहणं शक्यमकर्तुं। कथं। युष्मदस्मदी नियतेन मध्यमोत्तमाभ्यां नियतौ तौ शेषेऽपि प्राप्नुतः। ततो व

=नियतौ

“स्यामिप्रथमो भवतीति तन्नियमार्थं भविष्यति॥ ॥ ॥

समाधानान्तन्नियम एवयुक्तः। नैषदोषः। समुदायस्य संचिन्त्यकीर्तितत्वात्र्याधानं। तदंगत्वानुप्रसयोपपदयोर्द्वयोरप्याधान्यमिति उभयोरपि नियम आश्रयते। युष्मदि मध्यम एवेति। तुल्यजातीयस्यार्थान्तरे नियमफलत्वादुत्तमप्रथमौ निवार्येते न तु जादयः। तजादिविधिसामर्थ्याद्वाना लिते यां निवारणं॥ ॥ ॥

यत्र प्रथमस्येति। युष्मदि मध्यम एव अस्मद्युत्तम एवेति युष्मदस्मदोर्नियतत्वात्तयोः पुरुषान्तरं न भवति मध्यमोत्तमयोस्त्वनियतत्वात् शेषेपि तत्प्रसंगे प्रथम इति सूत्रं आरभ्यमाणं मध्यमोत्तमयोर्निवारणार्थं संपद्यते। प्रथम एव भवति न मध्यमोत्तमाविति। यथा समेदे शेयजेतेति पाक्षिकं प्राप्तौ नियमः। तत्रेति। उभयथा नियम इत्यर्थः। शेषत्वादिति। यत्र केवले युष्मदस्मदी उपपदे स एवाशेषस्तत्र माभूत् प्रथमः। यत्र तत्सहिते तेनेस्तः तत्र समुदायस्य युष्म▬दस्मद्ग्रहणेनाग्रहणाच्छेषत्वमेवेति प्रथमप्रतिषेधो वक्तव्यः। स एवाह।

सिद्धं प्रथमस्य

यत्र प्रथमस्यान्यस्य प्राप्नोतीति तत्र प्रथम एव भवतीति। तत्र युष्मदस्मदन्येषु प्रतिषेधः शेषत्वात्। तत्र युष्मदस्मदन्येषु प्रथमस्य प्रतिषेधो वक्तव्यः। त्वं च देवदत्तश्च पचथः। अहं च देवदत्तश्च पचावः। किं कारणं। शेषत्वात्। शेषे प्रथम इति प्रथमः प्राप्नोति। सिद्धं तु युष्मदस्मदोः प्रतिषेधात्। सिद्धमेतत्। कथं। युष्मदस्मदोः प्रतिषेधात्। शेषे प्रथमः युष्मदोर्नेति वक्तव्यं। युष्मदि मध्यमादस्मद्युत्तमो विप्रतिषेधेन। युष्मदि मध्यमादस्म▬▬▬ द्युत्तमो भवति विप्रतिषेधेन। युष्मदि मध्यम इत्यस्यावकाशः। त्वं पचसि। अस्मद्युत्तम इत्यस्यावकाशः। अहं पचामि। इहोभयं प्राप्नोति। त्वं चाहं च पचावः। अस्मद्युत्तम इत्येतद्भवति विप्रतिषेधेन। स तर्हि विप्रतिषेधो वक्तव्यः। न वक्तव्यः। त्यदादीनां यद्यत्परं तत्तच्छिष्यत इत्येवमस्मदः शेषो भविष्यति। तत्रास्मद्युत्तम इत्येव सिद्धं। अनेकशेषभावार्थं तु। अनेकशेषभावार्थं तु स विप्रतिषेधो वक्तव्यः। यदा चैकशेषो न। कदा चैकशेषो न। सहविवक्षायामेकशेषः। यदा न सहविवक्षा तदैकशेषो न॥ ॥

सिद्धं त्विति। यत्र शेषे युष्मदस्मदी स्तः तत्र शेषे प्रथमो नेति वक्तव्यमित्यर्थः। चोदक आह। स तर्हीति। आचार्यदेशी आह। न वक्तव्य इति। अस्मदः शेष इति। आवां पचाव इति। न चास्मद्युत्तम इति। ननु शिष्यमाणस्यास्मदो द्व्यर्थत्वादप्रयुज्यमानेपि युष्मत्पदितदर्थगतो मध्यमविधानात् तस्याप्यत्र प्रसंग इति विप्रतिषेध एवाश्रयितव्यः। अत्राहुः। युष्मदर्थे साह वयोरस्मद्रूपत्वमारोप्यते तदा भेदाभावात् प्रथमयुष्म उपपदनिमित्तः सिद्ध उत्तम एवेत्यदोषः। चोदकस्त्वाह। अनेकशेषभावार्थमिति। त्वं चाहं च पचाव इत्यत्र प्रयोगे॥ ॥

आचार्यदेशीय आह। न चेति। सह विवक्षाया अभावे यथा युष्मदस्मदोरेकशेषाभावः एवं तदधिकरणयोरपि क्रिययोर्भेदस्य विवक्षितत्वात् तयोरपृथक्शेषाभावे पचसि पचामि चेति पृथगेव प्रयोगान्नार्थो विप्रतिषेधे नेत्यर्थः। एतदेव समर्थयितुमाह। क्रियापृथक्त्व इति। यथा क्रियापृथक्त्वे सति द्रव्यपृथक्त्वं न तु सहविवक्षा एवं द्रव्यपृथक्त्वेऽपि क्रियापृथक्त्वे न भाव्यं। परस्परसाहचर्यो व्यभिचारात्। एवं च कृत्वेति। द्रव्यपृथक्त्वे सति क्रियापृथक्त्वादित्यर्थः। इदानीमाचार्य आह। यत्तावदिति। एकशेष इति। एकशेषफलत्वादेकशेष इत्यु

न वा युष्मदस्मदोरनेकशेषभावात्तदधिकरणानामप्यनेकशेषभावादविप्रतिषेधः। न वार्थो विप्रतिषेधेन। किं कारणं। युष्मदस्मदोरनेकशेषभावात्तदधिकरणानामपि युष्मदस्मदधिकरणानामपि एकशेषेण न भवितव्यं। त्वं चाहं च पचसि पचामि चेति। क्रियापृथक्त्वे च द्रव्यपृथक्त्वदर्शनमनुमानमुत्तरत्रानेकशेषभावस्य। क्रियापृथक्त्वे च द्रव्यपृथक्त्वं दृश्यते। तद्यथा। पचसि पचामि च त्वं चाहं चेति। तदनुमानमुत्तरयोरपि क्रिययोरेकशेषो न भवतीति। एवं च कृत्वा सोऽप्यदोषो भवति यदुक्तं तत्र युष्मदस्मदन्येषु प्रतिषेधः शेषत्वादिति। तत्राप्येवं भवितव्यं। त्वं च देवदत्तश्च पचसि पचति चेति। अहं च देवदत्तश्च पचामि पचति चेति। यत्तावदुच्यते न वा युष्मदस्मदोरनेकशेषभावात्तदधिकरणानामप्यनेकशेषभावादविप्रतिषेध इति। दृश्यते हि युष्मदस्मदोश्चानेकशेषस्तदधिकरणानां चैकशेषः। तद्यथा। त्वं चाहं च वृत्रहन्तुभौ संप्रयुज्याव है इति। यदप्युच्यते क्रियापृथक्त्वे च द्रव्यपृथक्त्वदर्शनमनुमानमुत्तरत्रानेकशेषभावस्येति। क्रियापृथक्त्वे खल्वपि द्रव्यैकशेषो भवतीति दृश्यते। तद्यथा॥ ॥

च्यते। न तु पृथगमगच्छमो नमानामेकशेषो स्वरूपत्वादिति वाचनिक एकशेषः। एवं ह्येकशेषे आश्रीयमाणे नार्थो विप्रतिषेधेन। तस्मात्कारकभेदेऽपि क्रियाया अभेदादेकस्य धातुः प्रयुज्यते तस्माच्च परेऽलकारे एवानेकार्थाभिधायी विरोधाभावात्। तत्र पुरुषद्वयप्रसंगे युक्तो विप्रतिषेधः॥ ॥ ॥ ॥

क्षा इति। शाकटाक्षविभीतकाक्षदेवनाक्षाणां सह विवक्षायामेकशेषः तेनावयवक्रियायाः समुदाये आरोपाद्भज्यं तामित्यादि बहुवचनं सामानाधिकरण्यं चोपपद्यते। यथा द्रव्यैकशेषेऽपि क्रिया पृथक्त्व-
मेवं द्रव्यपृथक्त्वेऽपि क्रियैकशेष इत्यर्थः। नहि शेषश्च्वान्यश्चेति। उपयुक्तादन्यः शेषः। युष्मदस्मदोश्चोपयुक्तयोः सद्भावान्नास्ति शेषत्वं। इतर एतत्सामर्थ्यमविदित्वाह। भवेदिति। इतरस्त्वाह। यदत्रे-
स्क्षाः भज्यंतां भक्ष्यंतां दीव्यंतामिति। एवं चकल्पतासोऽपि दोषो भवति। यदुक्तं तत्र युष्मदस्मदन्येषु प्रतिषेधः शेषत्वादिति। नैष दोषः। परिहृतमेतत्। सिद्धं तु युष्मदस्म-
दोः प्रतिषेधादिति। सतर्हि प्रतिषेधो वक्तव्यः। न वक्तव्यः। शेषे प्रथमो विधीयते। नहि शेषश्च्वान्यश्चशेषग्रहणेन गृह्यते। भवेत्प्रथमो न स्यात्। मध्यमोत्तमावपि न प्राप्नुतः। किंका-
रणं। युष्मदस्मदोरुपपदयोर्मध्यमोत्तमावुच्येते। न च युष्मदस्मदी त्वन्यश्च युष्मदस्मद्ग्रहणेन गृह्यते। यदत्र युष्म[illegible]स्मच्चतदाश्रयौ मध्यमोत्तमौ भविष्य-
तः। यथैव तर्हि यदत्र युष्मच्चास्मच्च तदाश्रयौ मध्यमोत्तमौ भवतः एवं योऽत्र शेषस्तदाश्रयः प्रथमो भविष्यति। एवं तर्हि शेषउपपदे प्रथमो विधीयते। उपोच्चारि
पदमुपपदं। यच्चात्रोपोच्चारि न स शेषः यश्च शेषः न तदुपोच्चारि। भवेत्प्रथमो न स्यान्मध्यमोत्तमावपि न प्राप्नुतः। किंकारणं। युष्मदस्मदोरुपपदयोर्म-
ध्यमोत्तमावुच्येते उपोच्चारि पदमुपपदं यच्चात्रोपोच्चारि न ते युष्मदस्मदी। ये च युष्मदस्मदी न तदुपोच्चारि। एवं तर्हि शेषेण सामानाधिकरण्ये प्रथमो वि-
धीयते न चात्र शेषेणैव सामानाधिकरण्यं। भवेत्प्रथमो न स्यान्मध्यमोत्तमावपि न प्राप्नुतः। किंकारणं। युष्मदस्मद्भ्यां सामानाधिकरण्ये मध्यमोत्तमा

॥ वुच्येते। न चात्र युष्मदस्मद्भ्यामेव सामानाधिकरण्यं ॥ ॥ ॥

ति। तत्सन्निधो शेषत्वाभावात्तन्निबंधनमेव कार्यं भवतीत्यर्थः। इतरः शेषपदार्थमविद्वानाह। यथैवेति। एतद्विचारणीयमप्युपेक्ष्योपपदार्थं वर्णयितुमाह। एवं तर्हीति
। यच्चात्रेति। युष्मदस्मदोः श्रवणात्तदन्यावेच शेषसद्भावात्। यश्च शेष इति। देवदत्तश्चेति। न तदिति। नहि तस्यैव साधनत्वं। किं तर्हि युष्मदस्मदर्थयोरपि। न चात्र शेषेणैवेति। किं तर्हि

दस्म ९

॥ युष्मदर्थेनापि तद्भावाच्छेषत्वाभाव इत्यर्थः ॥ ॥ ॥

दस्म ९

मिति विवक्षितमा

एवं तर्हीति। यद्यप्यनेकशेषे दोष उपक्रान्तस्तथाप्येकशेषे दूषणान्तरमुपक्रमः। स्यानिन्यपीति। अप्रयुज्यमाने प्रयुज्यमाने च शेषे प्रथमविधानाद्दोषान्तरमप्याह। सदादीनामिति। एतत्परिहार्यमन्यमानो लब्धोच्छेदोऽन्यदप्याह। युष्मदीति। परमत्वमिति। युष्मदस्मदिति विशिष्टरूपपरिग्रहादस्य च शब्दान्तरत्वात्। आचार्यदेशीय आह। तदन्तविधिनेति। युष्मदस्मदोरुपपदस्य विशेषणात्तदन्तविधिः। चोदको दोषमाह। इहापीति। अतित्वमिति। त्वामतिक्रान्त इति समासः। एवं तदन्तविधावतिव्याप्तिमुक्त्वाऽव्याप्तिमाह। ये चाप्येत इति। त्वत्कल्प इति। ईषदसमाप्तस्त्वं त्वत्कल्प इति कालान्तरप्रसिद्ध्युपरहितो युष्मदर्थ एव त्वत्कल्पशब्देनोच्यते न तु तत्सदृशं पदार्थान्तरं। तदभिधाने

एवं तर्हि सदादीनि सर्वैर्नित्यमिसेवमत्र युष्मदस्मदोः शेषो भविष्यति। तत्र युष्मदि मध्यमः अस्मद्युत्तम इत्येव सिद्धं। न सिध्यति। स्यानिन्यपीति प्रथमः प्राप्नोति। सदादीनां खल्वपि यद्यत्परं तच्छिष्यत इति यदा भवतः शेषस्तदाश्रयः प्रथमः प्राप्नोति। युष्मदि मध्यम अस्मद्युत्तम इत्येवोच्यते नाविह न प्राप्नुतः। परमत्वं पचसि परमाहं पचामीति। तदन्तविधिना भविष्यति। इहापि तर्हि तदन्तविधिना प्राप्नुतः। अतित्वं पचति अत्यहं पचतीति। ये चाप्येते समानाधिकरणवृत्तयस्तद्धितास्तत्र मध्यमोत्तमौ न प्राप्नुतः। त्वन्तरः पचसि मन्तरः पचामीति। त्वद्रूपः पचसि मद्रूपः पचामि त्वत्कल्पः पचसि मत्कल्पः पचामीति। एवं तर्हि युष्मदस्मद्वतीसेवं भविष्यति। इहापि तर्हि प्राप्नुतः अतित्वं पचति अत्यहं पचतीति। एवं तर्हि युष्मदि साधने अस्मदि साधन इत्येवं भविष्यति। एवं च कृत्वा सोऽप्यदोषो भवति यदुक्तं तत्र युष्मदस्मदन्येषु प्रतिषेधः शेषत्वादिति। अथ वा प्रथम उत्सर्गः करिष्यते तस्य युष्मदस्मदोरुपपदयोर्मध्यमोत्तमावपवादौ भविष्यतः। तत्र युष्मदुपपदस्यास्मदुपपदस्यासतिकृत्वा मध्यमोत्तमौ भविष्यतः॥ ॥ ॥ ॥

युष्मदर्थस्यासाधनत्वान्मध्यमाभावात्। एवं मत्कल्प इति बोद्धव्यं। आचार्यदेशीय आह। एवं तर्हीति। सौत्रत्वान्निर्देशस्य मतुब्लोपोऽभिधास्यते इति भावः। चोदक आह। इहापीति। आचार्य आह। एवं तर्हीति। समानाधिकरण इति वचनाद्युष्मदर्थे न यत्र त्वां तस्य सामानाधिकरण्यं तत्र मध्यमोत्तमाभ्यां भवितव्यमिति नास्ति कश्चिद्दोषः। एवं च कृत्वेति। युष्मदस्मदर्थस्यासाधनत्वाच्छेषत्वाभावः। अथ वेति। प्रथम इत्येतावत्सूत्रं क्रियते अनाश्रितविशेषविषयः प्रथमो विधीयमान उत्सर्गो भवति। तस्य विषयविशेषे विधीयमानौ मध्यमोत्तमावपवादौ भवतः। तत्रापवादनिमित्तसद्भावाद्व्यामिश्रे विषये मध्यमोत्तमावेव भविष्यतः न तु प्रथम इत्यर्थः॥

=उपयुक्तासमभिव्याहृतेन उपयुक्तादन्यः शेषपदेनोच्यत इति भावः।१=

अप्लुतवन्निति॥ प्रकृतिविकृत्योरभेदविवक्षायां द्विप्रत्ययः। ननु किं प्रकृत्याश्रयेण प्रथमेन भाव्यं अथ विकृत्याश्रयेण मध्यमेनेति प्रश्नः। अतो उत्तरं। प्लुतवतीति प्रकृतेरेव विकाररूपेण संपन्नौ कृ-
न्नेत्वमिति भावः। मध्यमोत्तमौ कस्मादिति। यथा प्रकृतिस्तद्धर्मसमाचाराद्युष्मदस्मद्व्यपदेशं लभते तथा मध्यमोत्तमावपि प्राप्नुतः। गौणमुख्ययोरिति। तद्धर्मसमाचारादारोपितमत्र युष्मदस्मदर्थ-
त्वमिति भावः। शिष्टं भाष्यमोदितमत्र व्याख्यातं तत एवावधार्यतां। यदुक्तं भवतः शेष इति तत्रोत्तरमाह। युष्मदस्मद्वत्तु इत्येवं न सन्निवेश आश्रयणीयः। किं तु भवतु युष्मदस्मदिति। ततस्त्वास्म-
द एव शेषो न तु भवतः। पूर्वं शेषदर्शनाच्चेति वचनाद्वा॥ ॥परः सं॥ ॥पूर्ववर्णोच्चारणानंतरमेव यद्वर्णांतरमुच्चार्यते न तु तच्छून्यांतरालसद्भावः स पर उत्कृष्टः सन्निकर्षः प्रत्यासत्तिलक्षणः
संहितासंज्ञ इति सूत्रार्थः। एवं स्थिते चोद्यते। पर इति। द्रुतायामेव वृत्तावनंतरोक्तः परः सन्निकर्षः संभवति। न तु मध्यमायां विलंबितायां वेत्यर्थः। असंहितमिति। संहितासंज्ञाया अभाव इत्यर्थो भा-

अथेह कथं भवितव्यं अप्लुतवत्संपद्यते इति प्लुतवतिमप्लुतवतीति। आहोस्वित्प्लुतवसि मप्लुतवामीति। प्लुतवतिमप्लुतवती सेवं भवितव्यं। मध्यमोत्तमौ कस्मान्न भवतः। गौणमुख्ययोर्मुख्ये संप्रत्य-
यो भवति। तद्यथा। गौरनुबंध्योऽजोऽग्नीषोमीय इति। न वाहीकोऽनुबध्यते। कथं तर्हि वाहीके रथ्यालेभवतः। गौस्तिष्ठति गामानयेति। अर्थाश्रय एतदेवं भवति। यद्धि शब्दा-
श्रयं शब्दमात्रे तद्भवति। शब्दाश्रये च रथ्यालेः॥ ॥परः सन्निकर्षः संहिता॥ ॥परः सन्निकर्षः संहिता चेद्द्रुतायां। तुल्यः सन्निकर्षः। तुल्यः सन्निकर्षो वर्णानां द्रुतमध्य-
मविलंबितासु वृत्तिषु। किंकृतस्तर्हि विशेषः। वर्णकालभूयस्त्वं तु। वर्णानां तु कालभूयस्त्वं। तद्यथा। हस्तिमशकयोस्तुल्यः सन्निकर्षः प्राणिभूयस्त्वं तु॥ ×तायामसंहितं परः सन्नि-
×कर्षः संहिता चेद्द्रुतायां इतरयोः संहितासंज्ञा न प्राप्नोति द्रुतायामेव हि परः स-

वेऽव्ययीभावः। अविद्यमाना वा संहिता अस्मिन्निति बहुव्रीहिः। द्रुतमध्यमविलंबितास्विति। द्रुता च मध्यमा च विलंबिता चेति द्वंद्वे कृते भाष्यकारवचनप्रामाण्यात्पुंवद्भावः। सर्वासु वृत्तिषु तुल्यः सन्नि-
कर्षः नैरंतर्योच्चारणात्। विशेष इति। वृत्तीनामिति शेषः। क्वचिद्वृत्तिविशेष इत्येव पाठः। वर्णानां त्विति। वर्णोपलब्धिकालभेदाद्वर्णकालभूयस्त्वमुच्यते। द्रुतायां स्वल्प उपलब्धिकालः म-
ध्यमायामधिकः विलंबितायामधिकतरः। प्राकृतवैकृतभेदाद्भिन्ना ध्वनयः। तत्र वैकृतध्वनिवशात्तस्यैव वर्णस्य पुनः पुनरुपलब्धिर्भवतीति ध्वनिभेदाद्वृत्तिभेदः। किंकृत इति का-
रणप्रश्ने वर्णकालभूयस्त्वमिति सामर्थ्यात्कारणमेवोक्तं भवतीति। हस्तिमशकयोरिति। हस्तिनो हस्तिनायः सन्निकर्षः मशकस्य च मशकेन स तुल्यः परस्परापेक्षयेत्यर्थः। प्राणिभूयस्त्वमि-
ति। हस्तिनो महांतदेशव्याप्तो मशकोऽनुस्वल्पः। नैरंतर्येण त्वविशिष्टमित्यर्थः॥ ॥श्री॥ ॥ ॥

—ननु सर्वासु वृत्तिषु वर्णानामेकरूपत्वात्कथं वर्णकालभूयस्त्वमत आह। वर्णोपेति। ७— वैकृत आलस्यादिजन्यो ध्वनिः। ३— ननु किं [illegible] मुचितं न तु कालभूयस्त्वं लिंगमध्यमां तेने सत आह सामर्थ्यादिति। तथा च कि-

=एकैकस्येति। एकवर्णोच्चारणानन्तरं तत्काले द्वितीयवर्णोच्चारणफलकद्वितीयप्रयत्नोत्पत्तिकारणकालेन वर्णानां व्यवहितत्वाभावः॥ २=

वर्णानां व्यंजकध्वनिरूढतयोक्तभेदमप्रतिपद्यमानः स्वगतमेव भेदं मत्वा चोदयति। यद्येवमिति। शिष्टं भाष्यं तत्परस्तत्कालस्येत्यत्र व्याख्यातं ततएवावधार्यतां। शब्दविराम इति। यदा प्रयोक्ता शब्दोच्चारणान्निविरमति तदा शब्दविरामः स च मध्यमविलंबितयोरपि परसन्निकर्षाभावेप्यस्तीति सिद्धा संहितासंज्ञा शब्दविरामे प्रतिवर्णमिति। भिन्नप्रयत्नजनितध्वनिव्यंग्यत्वाद्वर्णानां प्रतिवर्णं प्रयत्नभेदादेकप्रयत्नाविच्छेदाभावात् प्रथमप्रयत्नोच्चारितवर्णानन्तरं प्रयत्नान्तरेण वर्णान्तरोच्चारणादेकैकस्य वर्णस्य विरामसद्भावादवसानसंज्ञा प्राप्नोति। अव सानसंज्ञामिति। वर्णान्तरानुच्चारणे वृक्षइत्यादौ सावकाशा मितिभावः। तेन सर्वथा वर्णानामयोर्विरामः सोऽवसानसंज्ञो न तु नान्तरीयक इत्यर्थः। अथ वेति। सर्वत्र विरामसद्भावात्सुनः श्रुत्या विशेषआश्रीयते। शब्दार्थयोरिति। अन्यत्रतुसत्यपि शब्दविरामे पदार्थस्य वाक्यार्थस्य वाऽविरामान्नभवत्यवसानसंज्ञा। शब्दविराम इति। प्रयत्नविच्छेदजनितो वर्णविरामः।

यद्येवं द्रुतायां तपरकरणे मध्यमविलंबितयोरुपसंख्यानं कालभेदात्। द्रुतायां तपरकरणे मध्यमविलंबितयोरुपसंख्यानं कर्तव्यं। किं कारणं। कालभेदात्। ये द्रुतायां वृत्तौ वर्णास्त्रिभागाधिकास्ते मध्यमायां। ये मध्यमायां वृत्तौ वर्णास्त्रिभागाधिकास्ते विलंबितायां। उक्तं वा। किमुक्तं। सिद्धं त्ववस्थिता वर्णा वक्तुश्चिराचिरवचनाद्वृत्तयो विशिष्यन्त इति। अथवा शब्दविरामः संहितेत्येतल्लक्षणं करिष्यते। शब्दविरामे प्रतिवर्णमवसानं। शब्दविरामे प्रतिवर्णमवसानसंज्ञा प्राप्नोति। किमिदं प्रतिवर्णमिति। वर्णं वर्णं प्रति प्रतिवर्णं। येनैव प्रयत्नेनैको वर्ण उच्चार्यते विच्छिन्ने वर्णे उपसंहृत्य तं प्रयत्नमन्यमुपादाय द्वितीयः प्रयुज्यते तथा तृतीयस्तथा चतुर्थः। एवं तर्ह्यनवकाशा संहितासंज्ञा। अवसानसंज्ञां बाधिष्यते। अथवा अवसानसंज्ञायां प्रकर्षगतिर्विज्ञास्यते साधीयो यो विराम इति। क्व चासौ साधीयः। यः शब्दार्थयोर्विरामः। अथवा शब्दविरामः संहितेत्येतल्लक्षणं करिष्यते। शब्दविरामे स्पर्शघोषसंयोगे सन्निधानात्संहिता। शब्दविरामे स्पर्शानां घोषाणां च संयोगे सन्निधानात्संहितासंज्ञा न प्राप्नोति। कुक्कुटः पिप्पकः पित्तमिति॥ ॥

प्यत्नु रणानन्तरपि वर्णान्तरोच्चारणे प्यनुवर्तमानो घोषो नाद उच्यते। स्पर्शघोषसंयोग इति। वर्ग्याणां प्रथमद्वितीयानां शषसानां च संयोगे घोषविच्छेदात्सन्निधानात्संहितासंज्ञायामप्राप्तिरित्यर्थः। अघोषसंयोग इत्येव सिद्धत्वात्स्पर्शग्रहणमनर्थकं। असस्पर्शानामप्यघोषाणां शषसानां संयोगे तुल्यन्यायत्वात्तज्ज्ञाया अप्रसंगात् तान् च स्पर्शानामघोषाणां चेति समुच्चयः। घोषवतां स्पर्शानां संयोगे घोषप्रसंगात्। कुक्कुट इति कुक्कुट इवाय मितिकनोलुम्पतु व्ये इति लुपि कृते संज्ञाया मुपमानमिसाद्युदात्तत्वं शिष्टमनुदात्तं। ततः संहितायां विधीयमानमुदा

ऽहात्ताद्रनुदात्तस्य स्वरितत्वं न स्यात्॥ ॥श्री॥ ॥०॥ ॥

पचतीति। अत्रापि चकारस्याघोषत्वात्ककारोच्चारणे घोषविच्छेदस्त्वरितत्वाप्रसंगः। द्वारेणेति। द्वयोरकारयोर्घोषवतोर्मध्ये चकारो घोषवानिव लक्ष्यत इत्यर्थः। आश्रयान्तरगतोपि गुण आश्र
यान्तर उपलभ्यत इति दृष्टान्तेन दर्शयति। द्वयोरिति। एकेनेति। अनेकस्य यः सन्निकर्षः स एकेन तुल्यः। यथैकोः न द्रुत्वेपि न द्रुतगुणवत्त्वं तरसन्निधौ न द्रुतगुण उपलभ्यते तथाः नेकोपि स्पष्टि
क्रादिरर्थ इत्यर्थः। अथ वेति। वर्णान्तरोच्चारणकालात् अन्ये न वर्णाः श्रूयन्ते न कालेनाव्यवहितं पौर्वापर्यं संहितेति लक्ष्यते। तेन मध्यमविलम्बितयोः परमसन्निकर्षाभावेपि संहि
तासं तासिध्यति। पूर्वापराभावादिति। युगपत्स्थितानां देशकृतं पौर्वापर्यं दृष्टं। वर्णास्त्वेकैकश उपलभ्यमाना यौगपद्येनासन्निधानात्कथं पौर्वापर्यमश्नुवीरन्। एकवर्णावर्त्तित्वा

किमुच्यते संयोग इति। अथ यत्रैकः पचतीति पूर्वपरयोर्द्वारेण प्रच्छाद्यते न यथा। द्वयोर्वस्त्रयोर्मध्ये मुक्तं वस्त्रं तद्गुणमुपलभ्यते। वर्द्धपिटकेरिक्तको लोहकंसस्तद्गुण उपल
भ्यते। एकेन तुल्यः सन्निधिः। यथैको वर्णो द्वारेण प्रच्छाद्यते एवमनेकोपि। अथ वा पौर्वापर्यमकालव्यवेतं संहितेत्येतल्लक्षणं क्रियते। पौर्वापर्यमकालव्यवेतं संहिता चेत्पू
र्वापराभावादसंहितं। पौर्वापर्यमकालव्यवेतं संहिता चेत्पूर्वापराभावात्संहितासंज्ञानमाप्नोति। न हि वर्णानां पौर्वापर्यमस्ति। किं कारणं। एकैकवर्णवर्त्तित्वाद्वाचः। उच्चरितप्र
ध्वंसित्वाच्च वर्णानां। एकैकवर्णवर्त्तिनी वाक्। न द्वौ युगपदुच्चारयति। गौरिति गकारे यावद्वाग्वर्त्तते। नौकारे न विसर्जनीये। यावदौकारे न गकारे न विसर्जनीये। या
वद्विसर्जनीये न गकारे नौकारे। उच्चरितप्रध्वंसित्वात्। उच्चरितप्रध्वंसिनः खल्वपि वर्णाः। उच्चारितः प्रध्वस्तः। अथापरः प्रयुज्यते न वर्णो वर्णस्य सहायः। एवं तर्हि बुद्धौ कृ
त्वा सर्वाश्चेष्टाः। कर्त्ता धीरस्तन्वन्नीतिः। शब्देनार्थान्वाच्यान्दृष्ट्वा बुद्धौ कुर्यात्पौर्वापर्यं। इह य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति अस्मिन्नर्थेयं शब्दः प्रयोक्तव्यः

=उच्चरितप्रध्वंसित्वं चोच्चारणाधिकरणकालोत्तरकालवृत्तिध्वंसप्रतियोगित्वरूपं। कुतो धीर इति। कर्त्ता ... ॥१=

अस्मिंस्तावच्छब्देयं तावद्वर्णः। ततोयं ततोयमिति॥

रिति। सामान्येनोपक्रमात्त्रीप्रसयाभावः। उच्चरितेति। क्रमोत्पन्ना अपि वर्णा यद्यवतिष्ठेरंस्तदा स्यात्पौर्वापर्यं अपदेशो ज्येष्ठ्यव्यपदेशवन्तः। अनवस्थानात्तु नास्ति तत्र विभुः पूर्वापरभावइ
सर्थः। बीजकध्वन्यपेक्षया चैतदुक्तं। ध्वनिस्फोटभेदस्तत्र निर्णीतत्वान्नेह प्रपञ्च्यते। न द्वौ युगपदिति। युगपद्द्वयोरुच्चारणे सादेशावयवधानं। कालेन पौर्वापर्यं तु मा भूदित्यर्थः। वागिति वागिन्द्रि
यमित्यर्थः। एतेन युगपदनवस्थानात्सन्निकर्षाप्राप्तिः प्रत्युक्त इति विज्ञेयः। एवं तर्हीति। बुद्धिप्रकल्पितः सर्वः पौर्वापर्ये सन्निकर्षादिव्यवहार इत्यर्थः। धीरः पण्डितः। तन्वन्नीतिरिति। तनन्तत्सासास्ती
ति तन्वन्तीं सकलविषयव्यापिनीं नीतिर्यस्य स तथा तन्वन्नीतिरिति। अन्ये तु तन्वन्नीतिरिति पठन्ति। तन्वती विषयान्व्याप्नुवती बुद्धिरस्येति स एवार्थः॥ ×मध्यमकनिष्ठ×४

=वर्णानां स्फोटरूपाणां नित्यत्वात्तद्ध्वनीति। स्फोटस्य तु सर्वगतत्वात् ... पौर्वापर्यं स्फोटसंज्ञा ... विभागः॥२

विरामः ॥ ॥इदं विचार्यत इति। विचरति नानागच्छति यद्वस्तु तद्विचार्यं तेपरीक्ष्यत इत्यर्थः। अभावो वेति। केचिदभावोऽवसानमिति पठंति। अन्ये तु विरामोऽवसानमिति। तत्र युक्तायुक्त
विचारः क्रियते। उपरीति। वर्णोच्चारणादूर्ध्वं योऽभावः स उपलक्षितो वर्णोऽवसानमिति वक्तव्यं प्राग्भावस्योपलक्षणत्वनिरूत्यर्थं। रस इति। परव सूर्वस्यापि रेफस्याभावविषय
त्वाद्विसर्जनीयप्रसंगः। विरामे विरामवचनमिति। अधिकं कर्तव्यमित्यर्थः। ततोऽवसानं चेति। अदर्शनमभाव इत्येक एवार्थः। तेन पुनरभावग्रहणं न कर्तव्यमित्यर्थः। तत्र लो
पसंज्ञाया अभावः संज्ञित्वेनाश्रीयते अवसानसंज्ञायां तूपलक्षणत्वेन तेन वर्णांतराभावोपलक्षितोऽवसानसंज्ञ इत्यर्थः। उत्तरत्रत्वभावस्यैव लोपावसानसंज्ञे व्याख्यास्येते। अ

विरामोऽवसानं ॥ ॥इदं विचार्यते अभावो वावसानलक्षणं स्याद्विरामो वेति। कश्चात्र विशेषः। अभावेऽवसानलक्षणे उपर्यभाववचनं। अभावेऽवसानलक्षणे उप
र्यभावग्रहणं कर्तव्यं। उपरि यः अभाव इति वक्तव्यं। पुरस्तादपि हि शब्दस्याभावस्तत्र माभूदिति। किंच स्यात्। रथः रसः खरवसानयोर्विसर्जनीय इति विसर्जनीयः
प्रसज्येत। अस्तु तर्हि विरामः। विरामे विरामवचनं। यस्य विरामः विरामग्रहणं तेन कर्तव्यं। ननु च यस्याप्यभावस्तस्याप्यभावग्रहणं कर्तव्यं। परार्थं मम भविष्यति।
अभावो लोपस्ततोऽवसानं चेति। ममापि तर्हि विरामग्रहणं परार्थं भविष्यति। विरामो लोपोऽवसानं चेति। उपरि यो विराम इति वक्तव्यं। पुरस्तादपि हि शब्दस्य विरामः त
त्र माभूदिति। किंच स्यात्। रथः रसः खरवसानयोर्विसर्जनीय इति विसर्जनीयः प्रसज्येत। नैष दोषः। आरंभप्रभृतिको मम विरामः। अथवा नेदमवसानलक्षणं विचार्य
ते किं तर्हि संज्ञी। अभावोऽवसानसंज्ञी स्याद्विरामो वेति। कश्चात्र विशेषः। अभावेऽवसानसंज्ञिन्युपर्यभाववचनं। अभावेऽवसानसंज्ञिन्युपर्यभावग्रहणं कर्तव्यं। उपरि योऽभाव इ
ति वक्तव्यं। पुरस्तादपि हि शब्दस्याभावस्तत्र माभूदिति। किंच स्यात्। रथः रसः खवसानयोर्विसर्जनीय इति विसर्जनीयः प्रसज्येत। अस्तु तर्हि विरामोऽवसानं। विरामे विरामवचनं। य
स्य विरामस्तेन विरामग्रहणं कर्तव्यं। ननु च यस्याप्यभावस्तेनाप्यभावग्रहणं कर्तव्यं। परार्थं मम भविष्यत्यभावो लोपोऽवसानं चेति। ममापि तर्ह्यवसानग्रहणं परार्थं भविष्यति विरामो लोपो

स्मिन्पक्षे खरवसानयोरिति षष्ठी। खरः समीपस्य रेफस्यावसानस्य च रेफस्येत्यर्थः। अथ वैकापि सप्तमी विषयभेदाद्भिद्यते। खरि परतो रेफस्य विसर्जनीयः अवसाने च रेफस्यानिमित्ति विस
र्जनीय इत्यादेशस्य विषयत्वेनस्थानी विवक्ष्यते। ममापीति। अभावो विराम इति पर्यायत्वं मन्यते। आरंभप्रभृतिक इति। निवृत्तिर्विरामः स च प्रवृत्तस्य भवतीति भावः। अवसानलक्षणमिति। अभा
वोपलक्षितो वर्णोऽवसानं विरामोपलक्षितो वेति पूर्वं विचारितं। इदानीं तु तावेव संज्ञित्वेन विचार्येते। अभावो लोप इत्येकस्य संज्ञाद्वयविधानसामर्थ्याद्विषयविभाग आश्रीयते। प्रसक्ताभावो लो॥
॥ पसंज्ञः अभावमात्रमवसानसंज्ञमिति॥ ॥

अभावोवसानमिति स्सिंज्ञक्षणेदोषः। उपाधिरहितस्येति। अभावोपाधिर्हि योग्यानुपलब्धिः।४

भा०कै०प्र० ३३७

नावष्टपमिति। प्रवृत्तौ सत्यां यानिवृत्तिस्तस्यामित्यर्थः॥ उपरतान्यस्मिन्निति। न प्रवृत्तेषु निवृत्तानि किं तर्हि पूर्वमेवाप्राप्तानीत्यर्थः॥ नियतविषयत्वाच्च शब्दप्रयोगस्य शशविषाणमिति प्रयोगाभावः॥ क
चिदुत्तानीति पाठः॥ भावाविरामभावित्वादिति। इह शब्दस्य स्वसंबंधी ह्यभावोऽवसानलक्षणं स्यात् शब्दांतरस्य संबंधी वा। न तावत्स्वसंबंधी विरोधात्। न हि यस्य सत्ता तस्य तदानीमेवासत्ता युज्यते। नापि
शब्दांतरसंबंधी। न हि घटाभावः पटस्याभावो भवति। भावस्य सत्ताया अविच्छेदेन भवस्यावष्टपमिति भावाविरामभावी शब्दः॥ न हि शब्दस्य भवनकाले सत्ता विच्छिद्यत इत्यर्थः॥ अपर आहेति।
भावाविरामशब्दयोर्द्वंद्व इत्यर्थः। इदानीं लक्षणद्वयस्याप्यनुपपत्तिः प्रतिपाद्यते। भावेन सत्तया अविरामेण अविच्छेदेन भवतीत्यर्थः॥ उपाधिरहितस्याभावस्य प्रतीतिर्नास्ति। तस्य र इति

नावष्टपमयं रश्मिः प्रवृत्तावेवर्त्तते किं तर्हि अप्रवृत्तावपि। तद्यथा। उपरतान्यस्मिन्कुले व्रतानि। उपरतः स्वाध्याय इति। न च तत्र स्वाध्यायो भूतपूर्वो भवति नापि व्रतानि। भा
वाविरामभावित्वाच्छब्दस्यावसानलक्षणं नोपपद्यते। भावाविरामभावित्वाच्छब्दस्यावसानलक्षणं नोपपद्यते। किमिदं भावाविरामभावित्वादिति। भावस्याविरामः भावाविरामः। भावा
विरामेण भवतीति भावाविरामभावी। भावाविरामभाविनो भावो भावाविरामभावित्वं। अपर आह। भावभावित्वाद्विरामाभावित्वाच्च शब्दस्यावसानलक्षणं नोपपद्य
त इति। तस्य र इति वा वर्णस्यावसानं। विरामपरो वर्णोऽवसानसंज्ञो भवतीति वक्तव्यं। वर्णोन्त्योऽवसानं। अथ वा यथान्यासमेव पठितव्यं। अन्त्यो वर्णोऽवसानसंज्ञो भवतीति। तत्र
हि वक्तव्यं। न वक्तव्यं। संहितावसानयोर्लोकविदितत्वात्सिद्धं। संहितावसानमिति लोकविदितौ वेतावर्थौ। एवं हि कश्चित्कंचिदधीयानमाह शन्नो देवीयं संहितया
धीष्वेति स तत्र परमसंनिकर्षमधीते। अपर आह। केनावस्यसीति। स आह। अकारेणैकारेणौकारेण वेति। एवमेतौ लोकविदितावर्थौ तयोर्लोकविदितत्वात्सिद्धं॥ ॥
इति श्रीमद्भगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये प्रथमाध्यायस्य चतुर्थे पादे चतुर्थमाह्निकं पादोध्यायश्च समाप्तः॥ ॥ ॥ ॥

वेति। इदानीं शब्दांतराभावपरो वर्णोऽवसानसंज्ञो भवतीति प्रतिपाद्यते। अभावेनापि बुद्धिपरिकल्पितेनोपपर्येमाश्रीयते। अथ वेति। यद्यपि विरामशब्दे करणसाधने आश्रीयमाणोऽयम
र्थो लभ्यते तथापि भावसाधनस्यापि संभवात्करणसाधनत्वं संदिग्धमिति व्यक्तमेव पठितव्यमित्युक्तं। संहितयाधीष्वेति। यथा पदैर्नैरंतर्ये संहिताव्यवहारस्तथैकपद्येऽपि नैरंतर्ये। अवसानश
ब्दोऽपि विधिप्रदेशेषु भावसाधनः करणसाधनो वाऽऽश्रयिष्यत इति नार्थः संज्ञाद्वयविधानेन। तेन विनापीष्टस्य सिद्धत्वात्॥ ॥ इत्युपाध्यायभाष्यप्रदीपे प्रथमस्य चतुर्थमाह्निकं॥ अध्यायः स
माप्तः॥ संवत् १८२९ लीखानी हाल्लचंदकाऐ पनै॥० ॥

एम० ३३७



